CC-0. In Public Domain. Digitization by eGangotri

ISSN 2616-0439

शोध

SHODH



अनुसन्धानात्मक पत्रिका

नेपाल संस्कृत विश्वविद्यालय प्राध्यापक सङ्घ
केन्द्रीय समिति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपाल संस्कृत विश्वविद्यालय प्राध्यापक सङ्घ
केन्द्रीय समिति

सभापति

डा. नवराज कट्टेल

उपसभापति

अनोज खत्री

महासचिव

प्रा. अच्युत अर्याल

सचिव

प्रमोद झा

कोषाध्यक्ष

डा. लेशमणि दाहाल

सदस्यहरु

डा. ऋषि रेग्मी

जर्मन चौधरी

विनोद आचार्य

विजय कुमार दत्त

राधाकृष्ण गैरे

मधुसूदन ज्ञवाली

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शोध

अनुसन्धानात्मक पत्रिका

वर्ष ६ अङ्क २ पूर्णाङ्क २

संरक्षक
डा. नवराज कट्टेल
सभापति

प्रकाशन समिति
संयोजक
प्रा. अच्युत अर्याल

प्रधान सम्पादक
प्रा. अच्युत अर्याल
महासचिव

सदस्य
विजय दत्त
जर्मन चौधरी
डा. गणेश घिमिरे
डा. मधुमालती खत्री
पीताम्बर सापकोटा
डा. लेशमणि दाहाल

सम्पादक मण्डल
डा. विष्णु दाहाल
डा. लेखप्रसाद निरौला
मोहनराज गौली
वसन्त आचार्य

प्रकाशक
नेपाल संस्कृत विश्वविद्यालय प्राध्यापक संघ
केन्द्रीय समिति, काठमाडौं

SCANNED

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकः
नेपाल संस्कृत विश्वविद्यालय प्राध्यापक संघ
केन्द्रीय समिति
प्रदर्शनी मार्ग, काठमाडौं
फोन : ०१-४२२५६०५

प्रकाशन मिति : २०७५ वैशाख
ISSN : 2616-0439
सर्वाधिकार : प्रकाशक

प्रकाशितः ५०० प्रति
मूल्य : ने.रू. ३००/-
भा.रू. २००/-
US$: 9.00

मुद्रक :
किशोर अफसेट प्रेस प्रा. लि
गोल्कोपाखा, काठमाडौं
फो.नं.: ०१-४०२२५४४, thekishorpress@gmail.com

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सभापतिको कलमबाट

सहनाववतु, सह नौ भुनक्तु, सह वीर्यङ्करवावहै । तेजस्विनावधीतमस्तु, मा विद्विषावहै ।

नेपाल संस्कृत विश्वविद्यालय प्राच्यविद्याको धरोहर हो । यहाँ प्राच्यविद्याका धेरै विषयहरूको पठनपाठन हुँदै आएको छ भने कतिपय विषयहरूले प्रवेश पाउन बाँकी नै रहेका छन् । नेपाल प्राचीन कालदेखि नै आर्य मनीषीहरूको तपस्थली रहँदै आएकाले यस हिमसंस्कृतिले समाच्छन्न भूभागमा अनेक शास्त्रहरूको उत्पत्ति, प्रयोग र पठनपाठन हुँदै आएको पाइन्छ । वामन, वसिष्ठ र विश्वामित्रले यही धराधाममा तपश्चर्याबाट गायत्री मन्त्रको दर्शन गर्नु, नेपाल अखण्ड भूखण्डस्थित जनकपुरका राजा जनकको उपदेष्टा र गुरु रहेका महर्षि याज्ञवल्क्यले यही मेदिनीमा सविताको तपःसाधनाबाट यजुः मन्त्रको दर्शन गर्नु, शतपथ ब्राह्मण र बृहदारण्यक उपनिषद्को उपदेश गर्नु, याज्ञवल्क्य शिक्षा र याज्ञवल्क्य स्मृतिको प्रणयन गर्नु, वाल्मीकि ऋषिले यसै हिमाली भूखण्डको आसपास रहेर विश्वप्रसिद्ध वाल्मीकि रामायणको प्रणयन गर्नु, महर्षि कृष्णद्वैपायन वेदव्यासले नेपालमा जन्मिएर यसलाई तपस्थली र कर्मस्थली बनाई विश्वप्रसिद्ध ब्रह्मसूत्र, महाभारत र १८ पुराणको रचना गर्नु, महर्षि पाणिनिले यहाँकै गोनर्त पर्वतमालामा तपःसिद्धिका साथ माहेश्वर सूत्रको वर प्राप्त गरी विश्वप्रसिद्ध पाणिनि अष्टाध्यायीको रचना गर्नु, यही हिमदेशकै आसपास रहेर महर्षि पतञ्जलिले विश्वप्रसिद्ध योगसूत्रको प्रणयन गर्नु जस्ता सुकृत्यले नेपाल र नेपालीको गौरव गाथालाई समादृत तुल्याएको छ । वैदिक र उत्तरवैदिक महर्षिहरूले यस हिमवक्षलाई तपस्साधना र सिद्धभूमिका रूपमा, देवभूमिका रूपमा आत्मसात् गर्दै अनेक ग्रन्थहरूको प्रणयनद्वारा अपरा र पराविद्याको आविष्कार र सम्पोषण गर्दै आएको पाइन्छ । हामीहरू पनि तिनै अमर ऋषिका सन्तति हौं, अतः त्यो अमर विद्यालाई जोगाउनु, नित्यनवीन बनाउनु, साधना र सिद्धिद्वारा विश्वलाई शान्ति र सम्पोषण प्रदान गर्नु हाम्रो दायित्व र कर्तव्य हुन आएको छ ।

उदात्त विश्वमयी भावना र उच्च विचारबाट स्खलित हुँदै तपःसाधना र सिद्धिमा समाहित हुन नसकेर हामी भोजनसाधना र भोजनसिद्धिकै धुनमा भौंतारिन बाध्य भएका छौं र त्यही नै हाम्रो लक्ष्य बन्न गएको छ । संस्कृतको राष्ट्रिय र आन्तर्राष्ट्रिय बजार हुँदाहुँदै पनि आफ्नै अक्षमताका कारण संस्कृतको जनशक्ति खुम्चिन बाध्य भएको छ । विश्वविद्यालयको प्रशासन र हामी प्राध्यापकहरू पनि अल्मलिएका छौं, विद्यार्थी र विद्या अल्मलिएको अवस्था छ । समाज र सरकार संस्कृतबाट धेरै टाढा भाग्दै गइरहेको परिस्थिति छ, यसको महत्ता बोध गराउन सकिएको छैन र हामी आँफै यसको आदर्श बन्न सकिरहेका छैनौं । विद्या नै बल हो, सामर्थ्य हो र शक्ति हो भन्ने अटल विश्वास राखेर आ-आफ्ना विषयमा पारङ्गत बन्यौं भने हामीलाई र संस्कृत विद्यालाई कसैले केही गर्न सक्तैन । हामी अरूको आलोचना गर्न महापण्डित छौं, माहिर छौं, तर आफ्नै छातीमा हात राखेर सोचौं त आफूभित्र के छ र के छैन ! आफ्नै सत्यापन गरौं र सुरभारती महिमामण्डित संस्कृतविद्याको विकासमा लागौं ।

प्राध्यापक संघ मूलतः प्राध्यापकहरूको हक र हितसँग केन्द्रित रहने संस्था हो तर यसले प्राध्यापकहरूको हितको कुरा मात्र नगरेर विश्वविद्यालयकै समष्टिगत हित, समुन्नयन र विकासको विषयलाई झनै महत्त्व र प्राथमिकता दिँदै आएको छ । विश्वविद्यालय नै कमजोर भए हाम्रा हक र हितका विषय पनि स्वतः छायामा पर्न जान्छन् । त्यसैले हामी सबैले विश्वविद्यालयलाई सबल र सक्षम बनाउनु हामी सबैको कर्तव्य हो । प्राध्यापक

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संघका माग यसै दिशामा अभिप्रेरित रहेका छन् । असम्भव प्रायः रहेको विशेष आन्तरिक विज्ञापनको प्रक्रिया प्राध्यापक संघकै पहलमा पूरा भई साथीहरूले नियुक्ति पाइसक्नुभएको छ । लामो समयदेखि प्रयास गरिएको सञ्चयकोष कर्मचारी सञ्चयकोषमा स्थानान्तरण भैसकेको छ । पेन्सनकोष नागरिक लगानी कोषमा लाने निर्णय भैसकेको छ । प्राध्यापक संघको अधिवेशन खर्च, टी.ए.डी.ए. र काजको व्यवस्था, वर्षमा ३ बैठकको भत्ता जस्ता कुरा सभाबाट टुंग्याउन प्राध्यापक संघ सफल भएको छ । पुरानु खुला विज्ञापनको प्रक्रिया टुङ्गिएको छ भने प्राध्यापकको विज्ञापन प्रक्रिया पूरा भई प्राध्यापक साथीहरूले नियुक्ति प्राप्त गरिसक्नुभएको छ । प्राध्यापक र सहप्राध्यापकको विज्ञापनका लागि प्रयत्न भइरहेको छ । प्राध्यापक संघको कार्यकक्षको निर्माण भैसकेको छ भने पाठ्यक्रम परिमार्जनको प्रक्रिया अगाडि बढिरहेको छ । दीक्षान्त समारोह अगाडि बढेर पनि निर्वाचन र सत्ता परिवर्तनका कारण टुङ्गिन सकेको छैन । आयुर्वेदमा शुल्क परिमार्जन र ४० सिट बनाउने माग पनि पूरा भएको छ । पत्रिका प्रकाशन र गोष्ठीका कार्य पनि सम्पन्न हुँदैछन् । वेतनको वितरण व्यवस्थामा पनि सुधार आएको छ । सवारी साधन ऋण र डेढवर्षे ऋण यथावत् कायम गराउने कुरामा पनि हामी सफल रहेका छौं । त्यस्तै यसै अवधिमा गोरखापत्रमा संस्कृत समाचार प्रकाशित गराउन र नेपाल सरकारबाट प्राध्यापकहरूको मर्यादाक्रम निर्धारण गराउन पनि सफल भएका छौं । यसै अवधिमा सन् २०२४ को विश्व संस्कृत सम्मेलन नेपालमा गराउन क्यानाडामा २०७५ को असारान्तमा १७ औं सम्मेलनले घोषणा गर्ने भएको छ । २०७५ वैशाखमा भारतको उज्जैनमा सम्पन्न भएको विश्वगुरुकुल सम्मेलनमा पनि हामी जोडिएका छौं । नेपाल टेलिभिजनबाट संस्कृत समाचार प्रसारण गराउन र साप्ताहिक संस्कृत कार्यक्रमका लागि पनि प्रयत्न भइरहेको छ । तर यी प्रयत्नहरूले मात्रै हामीलाई पुगेको छैन, हामी सन्तुष्ट छैनौं । अतः प्राध्यापक संघले विश्वविद्यालय सुधारका लागि ३५ सूत्रीय माग पेश गरेको छ । त्यसका लागि प्राध्यापक संघ लड्दैछ ।

प्रस्तुत अनुसन्धानपत्रिका 'शोध'को दोस्रो अङ्क यस अघि नै प्रकाशित भई पाठकहरूको हातमा आइसक्नु पर्थ्यो तर विविध प्राविधिक समस्याले गर्दा ढिलो हुन गएको हो । यसमा संस्कृत, नेपाली र अंग्रेजी खण्ड गरी तीन भाग रहेका छन् । संस्कृत खण्डमा २२ लेख, रचना, नेपालीमा १५ र अंग्रेजीमा ६ लेख रचना रहेका छन् । अनुसन्धाताहरूले आ-आफ्ना विषयमा प्रशस्त मिहिनेत गर्नुभएको छ । आगामी दिनमा पनि सहयोग रहने नै छ । यसका लेखरचनाहरू अनुसन्धाताबाट नै परिमार्जन र कम्प्युटर गराई लिइएको हो र आलेखका प्रति लेखक स्वयं जिम्मेदार हुनुहुन्छ । तै पनि विज्ञ सम्पादकहरूले र अन्य विद्वान् मित्रहरूले पनि यसलाई परिमार्जन गरी सुन्दर तुल्याउन मिहिनेत गर्नुभएको छ । त्यसका लागि प्राध्यापक संघ आभारी छ र सबैलाई धन्यवाद ज्ञापन गर्दछ । पत्रिका प्रकाशनका लागि आर्थिक सहयोग जुटाइदिनुभएकामा विश्वविद्यालयका पदाधिकारीहरूलाई पनि धन्यवाद दिन्छु । पत्रिका प्रकाशनका विभिन्न समितिहरूमा रहेर कार्य सम्पादन गर्नुहुने मित्रहरू, कार्य समितिका साथीहरू लगायत सम्पादनमा विशेष सहयोग पुऱ्याउनुहुने मुकुन्द लामिछाने, रामप्रसाद पौडेल, बैकुण्ठ घिमिरे अन्य शुभचिन्तक प्राध्यापक मित्रहरूमा पनि यथोचित धन्यवाद एवं आभार प्रकट गर्दछु ।

जयतु संस्कृतम् ।

पूर्णमदः द्दपूर्णमिदं पूर्णात् पूर्णमुदुच्यते ।
पूर्णस्य पूर्णमादाय पूणमेवावशिष्यते ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्पादकीय...

पौरस्त्य दर्शन र ज्ञान-विज्ञानमा आधारित विशिष्ट वाङ्मयप्रति विश्वको चासो बढ्नु गौरवको विषय हो । विकासका सोपानहरू आरोहण गर्दै उत्तरोत्तर प्रगतितिर उन्मुख रहँदै आएको वर्तमान विश्वपरिवेशले आफ्ना हरेक प्रगतिको आधारबीजका रूपमा पौरस्त्य वाङ्मयलाई समेत लिने गर्नु पनि सुखद संयोग नै हो । एकातिर भौतिक समृद्धि र अर्कातिर आत्मिक शान्तिका पक्षमा समन्वयवादी भूमिका निर्वाह गर्ने पौरस्त्य वाङ्मयको उपादेयता वास्तवमै प्रशंसनीय रहेको छ । संस्कृतका माध्यमबाट व्यक्त भएका अथाह ज्ञानराशि र धर्मदर्शनलाई साक्ष्य मानेर संसारका भाषाहरू मात्र हैन, मानव जीवनका आधारभूत आवश्यकता, कर्तव्य र समुन्नतिका आयामहरूसमेत प्रभावित हुनुलाई पनि पौरस्त्य वाङ्मयको महत्तम उपलब्धि मानिन्छ ।

विचारले जीवनलाई क्रियाशील तुल्याउँछ र अनुभवले त्यसलाई परिपक्व बनाउँछ। निरन्तरको साधना र समर्पणभावकै परिणतिस्वरूप विचारले नै अदृष्टलाई दृष्टभैँ र अगम्यलाई गम्यजस्तै तुल्याउने गर्छ । मानव सभ्यताको आदिम कालदेखि अविच्छिन्न रूपमा साधना र समर्पणका साथ विकसित हुँदै आएका परीक्षणयुक्त विचारहरूकै मानकस्वरूप आदर्शमय पौरस्त्य वाङ्मयले प्रभावकारिता दर्साएको हो। संस्कृत र परिष्कृत विचारहरूभित्र दीर्घकालीन अनुभवशीलताको भूमिका उल्लेखनीय रहेकै हुन्छ । त्यसैले, पूर्वीय वाङ्मयका रूपमा संस्कृत भाषाका माध्यमबाट प्रस्तुत गरिएका परीक्षणयुक्त विचार र अनुभवहरू ज्ञान-विज्ञान, धर्म-दर्शन र संस्कृतिका साथै जीवनोपयोगी विषय बनेर देखापरेका हुन् ।

भाषा विचार विनिमयको साधन भए पनि भाषाभित्र तत्कालीन समाज, संस्कृति, भूगोल, मानवीय आवश्यता र उपकरणलगायत अनेक विषयहरूको प्रतिविम्ब विद्यमान हुने गर्दछ । संस्कृतनिष्ठ वैदिक समाज, उत्तर वैदिक समाज, सूत्रकालीन र उपनिषद्/ब्राह्मणकालीन समाजका जेजस्ता विषय र आवश्यकताहरू थिए तिनीहरूको अभिलेखन आज पनि उत्तिकै सान्दर्भिक मानिन्छ । त्यस्तै स्मृतिकालीन समाजले निर्धारण गरेका मूल्य र मान्यताहरूको प्रभाव कति औचित्यपूर्ण रहेछ भन्ने कुराको मूल्याङ्कन पनि सामाजिक व्यवस्थाका अभियन्ताहरूले मात्र हैन वर्तमान समयले समेत गरिरहेकै पाइन्छ । यसर्थ, मानव जीवनोपयोगी व्यवस्था, विचार, व्यहार र मनोरञ्जनका लागि संस्कृत भाषाका वाङ्मयहरूको योगदान सदैव स्मरणीय रहँदै आएको छ ।

नेपाल संस्कृत विश्वविद्यालय, जहाँ वेद-वेदाङ्गदेखि आधुनिक ज्ञानविज्ञानसम्मत विषय र विधाहरूको अध्ययन-अनुसनधानका लागि अनुपमेय परिसर मानिन्छ; जहाँ प्राचीन शिक्षादेखि अर्वाचीन शिक्षालाई अनुमोदन गरिन्छ र जहाँ 'अविद्ययामृत्युंतीर्त्वा विद्ययाऽमृतमश्नुते' भन्ने मूलमन्त्रलाई हृदयमा राखिन्छ; वस्तुतः त्यही नै पौरस्त्य वाङ्मयको साधना र सदुपयोगको परिणति पनि हो । यस कल्पतरुभित्र लाग्ने अमृतमय फलको अपेक्षा भनेको पनि गुणवत्ता र सच्चिरत्रनिष्ठ विद्वत्तापूर्ण जीवनपद्धतिको सफलता नै हो । त्यसैले, प्राज्ञिक वर्गको समुन्नयनका लागि विचारपूर्ण शब्दसाधना र जीवनोपयोगी विषयको भाषिक अभिव्यक्तिलाई मूल अभीष्ट मानेर गरिएको सत्प्रयासस्वरूप प्रस्तुत पत्रिकाको उदय भएको छ ।

नेपाल संस्कृत विश्वविद्यायल केन्द्रीय प्राध्यापक सङ्घद्वारा प्रकाशित यस **शोध** पत्रिकामा त्रिभाषिकताको सम्पुटभित्र विषयवैविध्यलाई सजाइएको छ । संस्कृत, नेपाली र अङ्ग्रेजीजस्ता विशिष्ट भाषिक अभिव्यक्तिभित्र सजिएका हरेक विषयले प्राज्ञिक किसिमबाट जीवनोपयोगी सन्देशहरू प्रस्तुत गरेका छन् । वेद, व्याकरण, साहित्य, ज्योतिष, धर्मशास्त्र, पुराण, दर्शन, तन्त्र, नीतिशास्त्र, राजनीति र गणित आदि अनेक विषयकेन्द्री झन्डै चार दर्जनजति प्राज्ञ समीक्षकहरूद्वारा प्रस्तुत अभिव्यक्तिभित्र आआफ्नै प्रकृति र सीमाहरू रहेका छन् । ऐतिहासिकता, विश्लेषणात्मकता, विवरणात्मकता, तुलनात्मकता र क्षेत्रीय अध्ययनलगायत फरकफरक प्रकृतिका यी हरेक लेखले तत्तत् क्षेत्रका जिज्ञासुहरूलाई पक्कै पनि लाभान्वित तुल्याउने नै छ । यसपटक पक्कै केही हतारो भएको कुरा यी लेख र प्रस्तुतिगत अवस्थाहरूले सङ्केत गरे पनि यिनले दिने सन्देश सकारात्मक र रचनात्मक नै भएकाले पूर्वीय वाङ्मयलाई आधार बनाएर तयार गरिएको यस किसिमको **शोध**को उपायदेयता अवश्य पुष्टि हुन्छ नै । अन्त्यमा प्रत्यक्ष-अप्रत्यक्ष जेजस्तो किसिमबाट भए पनि **शोध**को अभियानमा सहयोग गर्नुहुने सम्पूर्ण सज्जनहरूप्रति हार्दिक धन्यवाद छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषयसूची

संस्कृतखण्डः

सहप्रा. अच्युतप्रसाद लामिछाने	शब्दस्यावश्यकत्वं लोकशास्त्रव्यवहारोपयोगित्वञ्च	९
अमरराज ढकालः	तन्वादिद्वादशभावानां शुभाशुभज्ञानम्	१५
उत्तमप्रसादखतिवडा	भामिनीविलासावलोकनाभिलाषः	१७
स्वामी केशवानन्द गिरि	हलन्त्यम् इति सूत्रेऽद्वैततत्त्वम्	२१
डा.जनार्दन उपाध्यायः	वाल्मीकिरामायणे राजनीतिशिक्षा	२७
जयन्त आचार्यः	धर्मशास्त्रेषु पुराणेषु च संख्या वाचकशब्दानां गणितीय विषयाणाञ्चोल्लेखः	३१
उपप्रा. दुर्गामणिः सिग्देलः	तन्त्रशास्त्रोक्ता दश संस्काराः	३६
नवराज पाण्डेय	पाणिनीयव्याकरणे रप्रत्याहारविवेचनम्	४२
नारायणप्रसाद निरौला	ज्योतिषशास्त्रीयवायोरध्ययनम्	४५
पराशर आचार्यः	शब्दशक्तिविवेचने मम्मटविश्वनाथौ	५०
प्रकाश तिवारी	समासपरिचयः	५६
भरतराजज्ञवाली	शास्त्रार्थे न्यायदर्शनसम्मतानि निग्रहस्थानानि	६०
भवानीशङ्करभट्टराई	वर्णानामुच्चारणस्थानविमर्शः	६६
भीमप्रसादः कण्डेल	पाणिनीयव्याकरणस्य पञ्चाङ्गानां निरूपणम्	७१
डा. भोलानारायणरेग्मी	व्याकरणदर्शनत्वविचारेऽनुस्यूतौ बौद्धार्थधात्वर्थौ	७६
डा.महानन्द तिमिल्सिना	कवेः टीकारामस्य 'मातृभूशोकदुर्दिनम्' कविताया विश्लेषणम्	८१
सहप्रा.डा.मुकुन्दप्रसादलामिछाने	अरस्तुभरतयोः नाट्यसिद्धान्तः	८५
सहप्राध्यापकः डा.मोहनीलालनेपालः	पाणिनिव्याकरणे धात्वनुबन्धप्रयोजनम्	९४
डा.रघुनाथ-नेपालः	न्यायवैशेषिकाभिमतानुमानावयवस्वरूपविमर्शः	१००
डा.रामप्रसादपौडेलः	ईशस्य न्यायोपासना	१०६
उपप्रा.वसन्त आचार्य	ज्योतिषविषयस्य अध्ययनाध्यापने समागताः समस्याः तासां समाधानोपायाश्च	१११
सहप्रा. डा.वासुदेवखनालः	सनातनधर्मस्य वेदमूलकता सार्वजनीनता च	११३
सहप्रा. डा.श्रीरामोऽधिकारी	वैदिकवाङ्मये छन्दोदेवतर्षिज्ञानमीमांसा	११९
हरिनारायण पाण्डेय	पण्डितराजजगन्नाथविरचितगङ्गालहरीस्तवकाव्यस्य समीक्षात्मकमध्ययनम्	१२२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपाली खण्ड

अनोज कुमार खत्री	ग्रह एवं नक्षत्रको उदयास्त तथा दिशा ज्ञान	१३१
सहप्रा. डा. ऋषिराम रेग्मी	रुद्राभिषेकको वैदिक स्वरूप	१३८
काशीराज पोखेल	वैष्णव-एकादशी उपवास विचार	१४३
डा. खगेन्द्र घोडासैनी	पदावली संरचना	१४८
खगेश्वर गौतम	बुद्धकोदृष्टिमा धर्मनिरपेक्षता	१५४
डा.गणेशप्रसाद घिमिरे	अम्लान फूलमा चहार्न खोज्दा	१६१
डा. घनश्याम दाहाल	अर्थालङ्कारको सैद्धान्तिक स्वरूप	१६५
चेतमणि न्यौपाने	अद्वैतवेदान्तमा मिथ्यात्व	१७५
टेकनाथ दहाल	वाच्यको स्वरूप र नेपाली भाषामा यसको अवस्था	१७८
ध्रुवप्रसाद भट्टराई	कवित्वका मापक तत्त्व	१८३
सहप्रा.डा.नवराज कट्टेल	समको जीवनमा पौरस्त्य संस्कृतिको प्रभाव	१८७
नवराज घिमिरे	पुराणमा सरस्वती	१९२
डा. भेषराज अर्याल	शुक्राचार्य विरचित शुक्रनीतिमा दण्डनीति, राजा र राज्याङ्ग: एक अध्ययन	१९८
रामप्रसाद रिमाल	भाट्टमीमांसक पार्थसारथि मिश्र	२०४
उप प्रा.रामेश्वर उपाध्याय	शक्तिपृथकीकरणको सिद्धान्त र नेपालको प्रशासनिक व्यवस्था	२०९
सहप्रा. डा. विष्णुप्रसाद दहाल	पाणिनिको अष्टाध्यायीमा प्राचीन लोक जीवन	२१७

English Section

Bhawani Shankar Adhikari	Jews in Adolf Hitler's Mein Kampf	222
Keshav Chalise	Spiritualizing Nature in Transcendentalism	226
Krishna Kanta Parajuli	Vedic Sutra ध्वाजङ्ग	233
Dr. Lal Mani Pandey	Political Ethics in the Smritis	237
Mohan Raj Gouli	Travels as Respect for the Beauty and Value of Landscape	244
Shantikrishna Adhikaree	An Analysis of Voting Pattern of Nepalese People	248
Shree Ram Tharu	A Study on Intergovernmental Fiscal Relationship in Nepal	253

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शब्दप्रमाणस्य लोकशास्त्रव्यवहारोपयोगित्वम्

सहप्रा. अच्युतप्रसादलामिछाने

वाल्मीकिविद्यापीठम्

सारः

"एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे मर्त्ये च कामधुक् भवती"ति महाभाष्यानुसारेण गुणेष्वन्तर्गतस्य शब्दस्य न केवलं न्यायशास्त्रे अपितु सर्वत्र शास्त्रे, लोके व्यवहारे चात्यन्तं महत्त्वमुपयोगित्वं वर्तत इत्यनुभूयते। शब्दाभिधानरूपं किमपि प्रकाशकरं तत्त्वं संसारे यदि न प्रकाशते तर्हि समस्तमिदं लोकत्रितयं गाढान्धकारव्याप्तं स्यात् । देवानारभ्य पामरपर्यन्तानां प्राणिनां लोकयात्राऽपि वाचामेव प्रसादेन अनुग्रहेण वा प्रचलति नान्यथा। एवं लोकयात्रायां विभिन्नेष्वर्थेषु विभिन्नाकाराः शब्दाः प्रयुज्यन्ते। तत्र कतिपयेषु दर्शनेषु नातिविचित्राः शब्दाः प्राप्यन्ते चेत् कतिपयेषु नव्यन्यायादिग्रन्थेषु अतिविचित्राः नवीनाः दर्शनान्तरविलक्षणाः पारिभाषिकाः शब्दाः प्राप्यन्ते । तेषां परिज्ञानं विना महाभाष्यादिग्रन्थेषु शास्त्रान्तरेषु च गतिर्न सम्भवतीति निश्चीयते ।

प्रेक्षणार्थकदृश् धातोर्ल्युटि कृते दर्शनशब्दो निष्पद्यते । "निर्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणम्" इत्यमरकोशानुसारं निर्वर्णनम्, निध्यानम्, आलोकनम्, ईक्षणञ्च दर्शनशब्दस्य पर्यायाः सन्ति । अनेन ज्ञायते यद् येन याथातथ्येन निरीक्ष्यते, परीक्ष्यते, समीक्ष्यते, अवलोक्यते, विलोक्यते वा तद्दर्शनम्[1] इति । तत्र विशेषतः प्राच्यदर्शनपरम्परायां दर्शनानि आस्तिक-नास्तिकभेदेन द्विविधानि सन्ति । आस्तिकदर्शनेषु (न्यायवैशेषिक-सांख्यायोग - पूर्वोत्तरमीमांसासु) अपि "नितरामतिशयेन ईयते अवगम्यते विवक्षितार्थसिद्धिरनेनेति व्युत्पत्त्या न्यायशब्दस्य निष्पत्तिर्भवति । अत्र न्यायो हि प्रमाणशास्त्रम् । अस्य प्रमाणशास्त्रस्य चतुर्दशविद्यास्थानेषु सर्वोपरि स्थानं वर्तते । चतुर्दशविद्या च -

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः-
पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश ।

अर्थात् शिक्षाकल्पनिरुक्तव्याकरणछन्दो ज्यौतिषम् इति षडङ्गानि, ऋक्सामयजुरथर्वेति चत्वारो वेदाः, मीमांसा, न्यायः, पुराणम्, धर्मशास्त्रञ्चेति चतुर्दशविद्या ।

एवम् आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः-
अर्थशास्त्रं चतुर्थं तु विद्याह्यष्टादशैव ता[2]: ।

अर्थात् आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रञ्चेति परिगणय्य अष्टादशविद्यास्थानानि विष्णुपुराणे प्रतिपादितानि सन्ति । इमास्त्रयी, वार्ता, दण्डनीतिरान्वीक्षिकी चेति चतस्रो विद्याः पृथक्विषयप्रतिपादनपरा प्राणभृतामनुग्रहायोपदिश्यन्ते । तत्राग्निहोत्रादिकर्मप्रतिपादिका वेदत्रयीविद्या, हलशकटादिवाणिज्यप्रतिपादिका वार्ता विद्या, राजनीतिप्रतिपादिका दण्डनीतिर्विद्या, प्रमाणप्रमेयादिपदार्थप्रतिपादिकान्वीक्षिकी न्यायविद्या । आसां चतसृणां मध्ये इयमान्वीक्षिकी न्यायविद्या चतुर्थी । तस्या विद्यायाः संशयादयः प्रतिपाद्याः पदार्थाः। संशयादीनां प्रमाणप्रमेयाभ्यां पृथक्कथनं विना इयं न्यायविद्या अध्यात्मविद्या मात्रं स्यात्, यथोपनिषदः। संशयादिपदार्थप्रतिपादनं परित्यज्य उपनिषदि मोक्षसाधनीभूततत्वज्ञानमात्रस्य प्रतिपादनेन न्यायविद्यायाः वेदान्तविद्यात्वमेव स्यादिति न्यायविद्यायाः पृथक् प्रस्थापनं निरर्थकमेवेति । तन्निराकरणाय न्यायशास्त्रे प्रमाणप्रमेयाभ्यां पृथक् संशायादिभिः पदार्थैः प्रस्थाप्यते[3] । न्यायशास्त्रे संशयादिपदार्थानां निरूपणात्, वेदान्तशास्त्रे ऽनिरूपणात् वेदान्तविद्यातो न्यायविद्यायाः पृथक्त्वम् । वेदान्तविद्यातो न्यायविद्यायाः पृथक प्रस्थापनमपि सार्थकमेव । अथ च शब्दोपमानयोर्नैव पृथक् प्रामाण्यम् इति वैशेषिका वदन्ति किन्तु अनुमानेन शाब्दबुद्धेर्गतार्थता कल्पने महान्तो दोषा आपतन्ति न्यायनये। अत एव प्रकृतानुसारं तमेव शब्दतत्वविषयमवलम्व्य किञ्चिन्निरूप्यते-

द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावा : सप्तपदार्था[4]: । तेषु पदार्थेषु गुणपदार्थेष्वन्तर्गतस्य शब्दस्य न्यायशास्त्रे अत्यन्तं महत्त्वं वर्तते । न केवलं न्यायशास्त्रे ऽपितु सर्वत्र शास्त्रे लोके व्यवहारे च शब्दस्य महत्त्वं वर्तते । शब्दाभावे संसारे न किमपि कार्यं प्रचलतीति शब्दसाहाय्यं विना मुका अन्धा इव लोका भवन्तीति मनसि निधाय प्रकृतप्रसङ्गमेवात्रानुसर्यते । प्रसङ्गात्- "एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे मर्त्ये च कामधुक् भवती" ति[5] महाभाष्यवचनमत्र सान्दर्भिकम् । अनेन शब्दस्यात्यन्तं

१ उपाध्यायः जगत् " न्यायदर्शनसम्मतशाब्दावोधप्रक्रियाया भाषावैज्ञानिक विवेचन्" मर्यादा, अङ्क वाल्मीकि विद्यापीठः प्रदर्शनीमार्ग, २०६७
२ विष्णुपुराणम्, तृतीयो भागः, अध्यायः ६, श्लोक -२८-२९
३ न्यायदर्शनम्, पृष्ठ ५-६
४ न्यायसिद्धान्तमुक्तावली पृष्ठ १५, श्लोक २
५ पतञ्जलिः, व्याकरणमहाभाष्य, उपक्रम, चौखम्वा संस्कृत सीरीज वारणसी, १९५४ सम्वत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
महत्त्वमुपयोगित्वञ्च प्रकटितं वर्तत इति । एतावतैव ज्ञायते यत् सर्वत्र शास्त्रे लोके व्यवहारे च शब्दं परित्यज्य न किमपि कार्यं प्रचलति । कथमिति् चेत् प्रकाश्यते-

शब्द एव खलु लोकानां शैशवात् वस्तुषु विशेषविज्ञानमनुकूलयति । मुख्यतया मातापित्रादिगुरुजन- शब्दव्यवहारपरम्परयैव लोका वस्तूनां विशेषज्ञानं समासादयन्ति । यदि शब्दो नाभविष्यत् अन्धा इव लोका अभविष्यन्, संसारयात्रायामनुपयुक्तैव लोका अभविष्यन् । अतो लोके व्यवहारे च शब्दस्य महत्त्वं वर्तते । प्रथमतो वयं बाल्यात् मातापित्रादिबान्धवजनानां व्यवहारादिना वस्तूनां विशेषज्ञानं कूर्मः, बाल्यकालानन्तंर गुरुकूलं, विद्यागृहं, पाठशालां वा गत्वा शब्दस्य सहयोगेनैव विशिष्टेषु विषयेषु विज्ञानसर्जयामः। द्वारभूतेन शब्दमूलवस्तुविशेषेणैव विद्यागृहं गुरूणां समीपे वयं स्वां स्वां जिज्ञासां निवेदयामः। प्रथमन्तत्र जिज्ञासाकाले नानार्थगोचरान्संशयान् आपतन्ति । तत्तच्छब्दसहयोगाद् गुरूणामुपदेशाच्च तान्सर्वान् संशयान् अपसार्य विद्याविशेषाधिगमेन च वयमानन्दमनुभवामः । एतावता क्रमेण गुरूपदेशात् स्वतो वा वेदस्मृतिपुराणन्यायादिशास्त्रान् वा अधीत्य नानाविधेषु अर्थेषु वयं निष्णाता भवामः । लोकयात्रायां यस्मिन् कस्मिन् अपि कर्मणि प्रवर्तनं शब्दसाहायेनैव भवति । अर्थवशात् शब्दस्य सहयोगादेव वा निष्फलकर्मणि प्रवर्तनं न भवति, सफलकर्मण्येव प्रवर्तनं भवति । अतो लोकयात्रायामस्माकं शरणं मुख्यतया शब्द एव । इदमेव वचनं लक्ष्यीकृत्य दण्डिमहाभागाः अधो लिखितरीत्या निरूपयन्ति -

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा-
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते[६] ।

अर्थात् इह संसारे शिष्टैः - शब्दशास्त्रप्ररूढमतिभिः - पाणिनिवरुचिप्रभृतिभिः, अनुशिष्टानां - प्रकृतिप्रत्ययविभागादिभिर्व्युत्पादितानां साध्वसाध्वनुशासनविधया वा शासितानां संस्कृतप्राकृतानां, शिष्टानां-केनापि प्रकारेण अनुशासनं वा प्राप्तानां संस्कृतप्राकृतभिन्नानां, देशभाषाणां वाचामेतत्त्रितयरूपाणां गिरामेव प्रसादेन -अनुग्रहेण लोकानां - देवानारभ्य पामरपर्यन्तानां प्राणिनां यात्रा व्यवहारः प्रवर्तते । तत्र संसारे त्रिविधा वाचः समुपलभ्यन्ते - संस्कृताः, प्राकृताः, देश्याश्च । तत्रापि पाणिन्यादिरनुशिष्टाः संस्कृताः, वररुचिना कृतानुशासना प्राकृता, देशी वाक्च तृतीयेति । एवं वाचमाधारीकृत्य देवादिपामरपर्यन्तमिदं विश्वमुच्चावचव्यवहारं करोति । तत्राप्युत्तमानां व्यवहारः संस्कृतभाषया, मध्यमानां व्यवहार प्राकृतभाषया, अधमानां व्यवहारो देशभाषया भवति । इत्थमुपरि निर्दिष्टरीत्या सर्वेषां ज्ञानानां शब्दानुविद्धत्वं, व्यवहाराणाञ्च शब्दनैरपेक्ष्येणासम्भवत्वं सिद्ध्यति । अस्य स्पष्टीकरणन्तु-

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते[७] ।

अर्थात् सर्वं ज्ञानं शब्देष्वनुविद्धं वर्तते, शब्दं विना न किमपि भासते, सर्वं शब्देनैव भासत इत्यर्थः । एवम् -

इदमन्धतमःकृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते[८] ॥

इति काव्यादर्शानुसारमपि विचित्रेऽस्मिन् संसारे यदि शब्दाभिधानरूपं प्रकाशकरं किमपि तत्त्वं न प्रकाशते तर्हि समस्तमिदं लोकत्रितयं गाढान्धकारव्याप्तं जायेत । अतः श्रीमद् दण्डिमहाभागस्यैतद् वचनानुसारं प्रथमतो निश्चप्रचं शब्द एव संसारसारमिति अस्माभिर्मन्यते । पुनश्च कोऽयं शब्दः ? इति प्रश्ने सति अन्नं भट्टेनोक्तं वर्तते -

"श्रोत्रग्राह्यो गुणःशब्दः । आकाशमात्रवृत्तिः । स द्विविधः- ध्वन्यात्मको वर्णात्मकश्च । पुनराप्तवाक्यं शब्दः, आप्तस्तु यथार्थ वक्ता[९]" । न्यायसूत्रानुसारम् "आप्तोपदेशः शब्द । अत्रापि आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा । दृष्टादृष्टार्थत्वाच्छब्दस्य द्वैविध्यम् । तत्र दृष्टार्थो यथा - घटमानय इत्यादिस्तदर्थस्य घटादेर्दृश्यमानत्वात्, अदृष्टार्थो यथा- ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यादिस्तदर्थस्य स्वर्गादेरदृष्यमानत्वादित्यर्थः[१०] ।

वस्तुतस्तु शाब्दबोधे पदज्ञानं करणम्, वृत्तिज्ञानसहकृतपदजन्यपदार्थोपस्थितिर्व्यापारः, वाक्यार्थज्ञानं शाब्दबोधस्य फलम् । अत्र वृत्तिर्नाम शक्तिलक्षणान्यतररूपा, शक्तिर्नाम घटादिविशेष्यकघटपदजन्यबोध- विषयत्वप्रकारक ईश्वरसङ्केतः । ईश्वरसङ्केतोनाम ईश्वरेच्छा, सैव शक्तिरित्यर्थः । शक्य सम्बन्धो लक्षणा, सा द्विविधा गौणी शुद्धा चेति । गौणीनाम सादृश्यविशिष्टे लक्षणा । यथा- सिंहो माणवक इत्यादौ सिंहपदस्य सिंहसादृश्यविशिष्टे लक्षणा । शुद्धा लक्षणा त्रिविधा - जहल्लक्षणा, अजहल्लक्षणा जहदजहल्लक्षणा चेति । लक्ष्यतावच्छेदकरूपेण लक्ष्यमात्रबोधप्रयोजिका लक्षणा जहल्लक्षणा, यथा गङ्गायां घोष इत्यत्र गङ्गापदवाच्यप्रवाहसम्बन्धस्य तीरे सत्वात्तादृशशक्यसम्बन्धरूपलक्षणाज्ञानाद् गङ्गापदात्तीरोपस्थितिः ।

६ काव्यादर्शः, श्लोक ३
७ पूर्ववत्, पृष्ठ ४
८ पूर्ववत् श्लोक ४
९ तर्कसंग्रहः, पृष्ठ १९-२०, ६२
१० प्रसन्नपदापरिभूषितं न्यायभाष्यम् -पृष्ठ २७ -२८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्यतावच्छेदकरूपेण लक्ष्यशक्योभयबोधप्रयोजिका लक्षणा अजहल्लक्षणा, यथा काकेभ्यो दधि रक्ष्यताम् इत्यत्र काकपदस्य दध्युपघातके लक्षणा, अत्र लक्ष्यतावच्छेदकं दध्युपघातकत्वम्, तेन रूपेण दध्युपघातकानां सर्वेषां काकविडालकुक्कुटसारमेयादीनां शक्यलक्ष्याणां बोधात् । शाक्यतावच्छेदकपरित्यागेन व्यक्तिमात्रबोधप्रयोजिका लक्षणा जहदजहल्लक्षणा[११] वेदान्तिनां मते । यथा तत्त्वमसीत्यत्र सर्वज्ञत्वकिञ्चिज्ज्ञत्वपरित्यागेन व्यक्तिमात्रबोधनात् । एवञ्च-

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः[१२] । यथा शब्दो विशेषगुणश्चक्षुर्ग्रहणायोग्यबहिरिन्द्रिय- ग्राह्यजातिमत्वात् स्पर्शवत्, शब्दो द्रव्यसमवेतो गुणत्वात् संयोगवदित्यनुमानेनापि शब्दस्य द्रव्यसमवेतत्वं सिद्ध्यति । एवञ्च- शब्दो न स्पर्शवद् विशेषगुणो यतो हि अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारण-गुणपूर्वकप्रत्यक्षत्वात्सुखवत् । अत्र पाकजरूपादौ व्यभिचारवारणाय अग्निसंयोगासमवायिकारणकत्वाभावे सतीति सत्यन्तपदम्, पटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्वकेति विशेष्यपदम् । जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति पदम् । इत्थं शब्दो न स्पर्शवद् विशेषगुण इति सिद्ध्यति । एवं शब्दो न दिक्कालमनसां गुणो यतो दिक्ककालमनःसु विशेषगुणस्यावर्तमानत्वात् । एवञ्च-शब्दो नात्मविशेषगुणो बहिरिन्द्रियग्राह्यत्वाद्रूपवत् । इत्थं परिशेषात् गगनाश्रयत्वेन, श्रोत्रग्राह्यविशेषगुणत्वेन च शब्दस्य सिद्धिर्भवति । उपर्युक्तवचनस्य समर्थनं वैशेषिकसूत्रानुसार निम्नलिखितरीत्या भवति -

कार्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुण, परत्रसमवायात् प्रत्यक्षत्वाच्च, नात्मगुणो न मनो गुणः, अर्थात् आत्मेतराकाशे समवायसम्बन्धेन सत्वात्, शब्दस्य श्रोत्रप्रत्यक्षत्वाच्च नात्मगुणो न मनो गुण इति सिद्ध्यति । परिशेषाल्लिङ्गमाकाशस्य इति शब्दसिद्धिः[१३] । इत्थं शब्दसिद्धौ सत्यां तस्य शब्दस्य लोके व्यवहारे च अत्यन्तं महत्त्वमावश्यकत्वञ्चानुभूयते । सर्वत्र लोके व्यवहारे च शब्दं श्रुत्वा तदनुकूलं शब्दसामर्थ्यमवश्यं ग्रहणीयम्, अन्यथा (शब्दसामर्थ्यं विना) शब्दं श्रुत्वा प्रवृत्तिरेव न भवति । अत्र लोके व्यवहारे च शब्सामर्थ्यमेव वृत्तिः - प्रवृत्तिरित्यर्थः । नैयायिकसिद्धान्ते सङ्केतो लक्षणा चेति वृत्तेः संज्ञाद्वयी, तदुक्तं शक्तिवादे गदाधरभट्टाचार्येण - सङ्केतो लक्षणा चार्थे पदवृत्तिः । आलङ्कारिकास्तु शब्दस्य शक्यार्थलक्ष्यार्थव्यतिरिक्तार्थविशेप्रतिपत्त्यनुकूलं व्यञ्जनाख्यमपि वृत्त्यन्तरमभ्युपगच्छन्ति । अत एवालङ्कारिका स्वसम्प्रदायसिद्धामभिधालक्षणा व्यञ्जनेति वृत्तित्रयमेव शक्तिसंज्ञया व्यपदिशन्ति । पदवृत्तेरित्यत्र संकेताख्यो भेदो द्विधा विभज्यते - आजानिकश्चाधुनिकश्चेति । अत्राजानिको नाम जनिरहितः लौकिक पुरुषविशेषाकल्पितपरमेश्वरकल्पितोऽनादिकालसिद्ध इति । सोऽयमाजानिक संङ्केत एव नैयायिकैः शक्तिनाम्ना व्यपदिश्यते, नाधुनिकः सङ्केतो न वा लक्षणा नाम वृत्तिः शक्तिनाम्ना व्यवह्रियते[१४] ।

शक्तिश्च पुनः पदेन सह पदार्थस्य सम्बन्धः, स चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपः । अत्र शक्तिविषये प्राच्य-नव्ययोरस्ति किञ्चित्पार्थक्यम् । यथा- ईश्वरेच्छारूपा शक्तिः, आधुनिकेऽपि नाम्नि शक्तिरस्त्येव - एकादशेऽहनि पिता नाम कुयादितीश्वरेच्छायाः सत्वात् । आधुनिकसङ्केतिते तु न शक्तिरिति प्राचीनाः । नवीनास्तु ईश्वरेच्छा न शक्तिः, किञ्चिच्छामात्रं शक्तिः । तेन आधुनिकसङ्केतितेऽपि शक्तिसत्वान्न काचिद्धानिरिति प्राच्यनव्ययोः शक्तिविषये पार्थक्यम्[१५] ।

शक्तं पदम् तच्च शक्तिविशिष्टं पदमित्यर्थः । तत्पदं चतुर्विधम् - क्वचिद्यौगिकम्, क्वचिद्रूढम, क्वाचिद्योगरूढम्, क्वचिद, यौगिकरूढम् । यस्मिन् पदे योगशक्त्या अवयवार्थ एव बुद्ध्यते तत्पदं यौगिकम् । यथा पाचकशिक्षकादिपदम् । अत्र पाचकपदेन पाककर्ता, शिक्षक - पदेन च शिक्षणकर्ता एव बुद्ध्यते इति तद्यौगिकम् । यत्रावयवशक्तिनैरपेक्षेण समुदायशक्तिमात्रेण बुद्ध्यते तद्रूढम् । यथा-गोमण्डलादिपदम् । अत्र गवादिपदेन प्रकृत्याद्यवयवशक्तिरपेक्षां विनैव समुदायशक्त्या अवयवसंस्थानविशिष्टगोत्वाद्यवच्छिन्नरूपोऽर्थो बुद्ध्यते न तु गच्छतीति व्युत्पत्या गमनकर्तृरूपावयवार्थस्तथैव मण्डलपदेनापि सूर्ययादिबोधकः कुण्डलाकारपरिधिर्बुध्यते न तु मण्डं लातीति व्युत्पत्या ओदनमण्डपानकर्तृरूपावयवार्थः ।

यत्रावयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम् । यथा पङ्कजादिपदम् । तथाहि पङ्कजपदमत्रावयवशक्त्या पङ्कजनिकर्तृरूपमर्थ बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति । यत्पदादवयवशक्त्या, समुदायशक्त्या च योगार्थस्य रूढ्यर्थस्य च स्वातन्त्र्येण बोधो भवति, तत्पदं यौगिकरूढम् । यथा उद्भिदादिपदम् । अत्र ऊर्ध्वं भिनत्तीति व्युत्पत्या अवयवशक्त्या उद्भेदनकर्ता तरुः (वृक्षः) गुल्मादिर्बुध्यते, अतस्तत्पदं केवलं योगलभ्यार्थबोधकं यौगिकम् । समुदायशक्त्या च उद्भिदा यजेत पशुकाम इति श्रुतिवाक्यानुसारेण उद्भित्पदस्य यागविशेषोऽप्यर्थो भवति । अतस्तत्पदं रूढमपीति । इत्थमुद्भिदादिपदं यौगिकरूढमिति[१६] स्पष्टम् ॥ एवं पूर्वोक्तयोर्द्वयोः संकेतयोर्मध्ये सोऽयम् आजानिकसङ्केत एव शक्तिग्राहकोपायरूपेण प्रतिपद्यते यथोक्तम् -

११ तर्कसंग्रह, पृष्ठ ६३,६४
१२ न्यायसिद्धान्तमक्तावली श्लोक ४४, पृष्ठ १४३
१३ वैशेषिकसूत्रोपस्कारः, सूत्र २६,२७,२८ अध्याय २, आह्निक १
१४ दर्शनविन्दुसंग्रह : द्वितीयो भाग :, पृष्ठ ४,५
१५ न्यायसिद्धान्तमक्तावली पृष्ठ २६५,२६६
१६ पूर्ववत् पृष्ठ २८२-२८४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च -

वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ।

अर्थात् क) पच् गमादिधातूनां, घटपटादिप्रकृतीनां सुप् तिबादिप्रत्ययानां शक्तिग्रहो व्याकारणाद् भवति । अत्र शाब्दबोधविषये वैयाकरणनैयायिकयोरस्ति किञ्चित्पार्थक्यम् । तथाहि चैत्रः पचतीत्यत्र वैयाकरणमते पच् धात्वर्थो विक्लितिरूपं फलं, व्यापारश्च । आख्यातार्थः (तिवर्थः) कर्ता, एकत्वं वर्तमानकालश्च प्रत्यायार्थ एव । चैत्रस्य प्रत्ययार्थे कर्तरि अभेदान्वयः । एकत्वस्य च स्वरूपसम्बन्धेन कर्तरि एवान्वयः । फलस्यानुकूलत्वसम्बन्धेन, वर्तमानकालस्य च वृत्तित्वसम्बन्धेन व्यापारे ऽन्वयः। एवं चैत्राभिन्नकर्तृवृत्तिविक्लित्यनुकूलो वर्तमानकालिको व्यापार इत्यन्वयबोधः । नैयायिकमते तु पच्धात्वर्थो विक्लित्यनुकूलो व्यापारः आख्यातार्थः कृतिविशेषः, वर्तमानकालश्च। अत्र धात्वर्थव्यापारस्य आख्यातार्थकृतौ अनुकूलत्वसम्बन्धेनान्वयः, कृतेश्च चैत्रे आश्रयत्वसम्बन्धेनान्वयः । एवञ्च- विक्लित्यनुकूलव्यापारानुकूलवर्तमानकालिककृतिमान् चैत्र इति शाब्दबोधः । अत्र वैयाकरणमते व्यापारमुख्यविशेष्यकशाब्दबोधः । ते आख्यातस्य कर्तरि शक्तिःस्वीकुर्कन्ति । प्रथमान्तार्थ- मुख्यविशेष्यवादिनो नैयायिकास्ते कृतौ शक्तिस्वीकुर्वन्ति । वैयाकरणमतमनुसृत्य आख्यातस्य कर्तरि शक्तिरूपेयते चेत् शक्यः कर्ता जातः, शक्यतावच्छेदकं कर्तृत्वं जातम्, तच्च कृतिमत्वं, तद्धि कृतिरेव, कृतिंश्च व्यक्तिभेदेन अनन्तेति अनन्तशक्यतावच्छेदककल्पने गौरवम् । नैयायिकमतानुसारेण कृतौ शक्तिस्वीकारे तु शक्या कृतिः, शक्यतावच्छेदकं कृतित्वं, तच्च जातिविशेष एक एवेति लाघवम् । लाघवादेव आख्यातस्य कृतावेव शक्तिः स्वीकर्तव्यम् इति ।

ख) एवम् उपमानदपि शक्तिग्रहो यथा -प्रथमं केनचिदारण्यकेन गोसदृशो गवपपदवाच्य इति श्रुत्वा वनं गतो ग्रामिणेन गवयो दृष्टस्तं दृष्ट्वा गोसदृशो गवय इत्यतिदेशवाक्यार्थस्मरणं तस्य भवति । तत्रातिदेशवाक्यार्थस्मरणमेव व्यापारस्तादृशव्यापारद्वारा गवयो गवयपदवाच्य इति यज्ज्ञानं जायते,. तदेवोपमितिरिति उपमानाच्छक्तिग्रहः ।

ग) कोशादपि शक्तिग्रहो यथा-गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति, इति कोशेन शुक्लादिपदस्य शुक्लरूपे शुक्लरूपविशिष्टे च शक्तिर्व्युत्पादिता किन्तु तत्र लाघवात् शुक्लरूप एव शुक्लपदस्य शक्तिरभ्युपेयते, शुक्लरूपविशिष्टे तु लक्षणा, अन्यथा शुक्लपदस्य शुक्लरूपवति शक्तिस्वीकारे शक्यतावच्छेदकं शुक्लरूपवत्वं जातम्, तच्च शुक्लरूपमेवेति, तच्च अनन्तमिति अनन्तशक्यतावच्छेदककल्पने गौरवम् । शुक्लादिपदस्य शुक्लरूप एव शक्तिस्वीकारे तु शक्यतावच्छेदकं शुक्लरूपत्वं जातम्, तच्च जातिविशेष एक एवेति लाघवम् । तस्मात् शुक्लादिपदस्य शुक्लरूप एव शक्तिस्वीकारः सवर्थोचित इति नैयायिकानामाशयः ।

घ) एवमाप्तवाक्यादपि शक्तिग्रहः । अत्र यथार्थज्ञानवान् - आप्तः- यथार्थवक्तेत्यर्थ, तदुच्चारितवाक्यश्रवणादपि शक्तिग्रहो भवति । तदुदाहरणं यथा - कोकिलः पिकपदवाच्यः इत्यादिशब्दाद् पिकादिपदानां कोकिले शक्तिग्रहः । यतो हि कोकिलः पिकपदवाच्यः इत्याप्तोक्तवचनात् ।

ङ) एवं व्यवहारादपि शक्तिग्रहो भवति । यथा कश्चन प्रयोजकबृद्धः प्रयोज्यवृद्धं शिष्यादिकं प्रति घटमानय इति वाक्यं प्रयुक्ते, तच्छुत्वा प्रयोज्यवृद्धो घटमानयति । तत्र समीपस्थोऽगृहीतशक्तिको बालो वृद्धोच्चारितं वाक्यं श्रुत्वा प्रयोज्यवृद्धस्य गमनं घटानयनं च दृष्ट्वा घटानयनरूपं कार्यं घटमानयेति वाक्यप्रयोज्यमित्यवधारयति इति लोकव्यवहारेणापि शक्तिग्रहः ।

च) एवं वाक्यशेषादपि शक्तिग्रहः, यथा- यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशुकविशेषे कङ्गौ च प्रयोगो दृश्यते । तत्र आर्यधर्मानुयायिनो वाक्यशेषाद् यवपदस्य दीर्घशूकविशेषे यवे शक्तिं गृह्णन्ति, म्लेच्छास्तु तत्पदस्य कङ्गौ शक्तिमवधारयन्ति । अत्र क्व शक्तिस्वीकारः समुचितः ? इति चेदुच्यते -

वसन्ते सर्वशस्यानां जायते पत्रशातनम् -

मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः ॥

अर्थात् यदा वसन्ततौं सर्वशस्यानां पत्रशातनं जायते, तदैवैते कणिशाशालिनो यवाः मोदमानाः बृद्धिमन्तो बीजवन्तः सपर्णाश्च तिष्ठन्तीति वाक्यशेषाद् यवपदस्य दीर्घशूकविशेष एव आर्यप्रयोगानुसारात् शक्तिर्निर्णीयते, कङ्गौ तु भ्रमादेव शक्तिग्रह इति ।

छ) तत्समानार्थकान्यपदेन तदर्थकथनं विवरणम् । एतस्माद्विवरणादपि शक्तिग्रहो भवति । यथा- घटोऽस्तीति वाक्यस्य कलशोऽस्तीति वाक्येन विवरणात् घटपदस्य कलशे शक्तिग्रहः । तथैव पचतीत्यस्य पाकं करोतीति विवरणात् पच् धातोराख्यातस्य ति प्रत्ययस्य यत्नार्थकत्वं कल्प्यत इति विवरणाच्छक्तिग्रह : ।

ज) एवं प्रसिद्धपदसान्निध्यादपि शक्तिग्रहो भवति । यथा इह सहकारतरौ मधुरं पिको रैतीत्यस्मिन् वाक्ये पिकः कूजति पञ्चमम् इति कोशात् माधुर्यादिपञ्चमस्वरात्मकप्रसिद्धार्थकस्य सान्निध्यात् पिक पदस्य कोकिले शक्तिग्रह[१७] इति ।

---

१७ न्यायदर्शनम्, कक्षा १० पृष्ठ ७२-७७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इत्थं शक्तिग्राहकोपायनिरूपणानन्तरं शाब्दवोधोपयोगिकारणं निरूप्यते-

आसत्तिर्योग्यताकाङ्क्षा तात्पर्यज्ञानमिष्यते। अर्थात् आसत्तिर्योग्यताकाङ्क्षातात्पर्यज्ञानमिति शाब्दबोधस्य सहयोगिकारणम्। अत्र सम्बन्धस्य किञ्चित्प्रतियोगिः किञ्चिदनुयोगिपदगतमासत्तिज्ञानं शाब्दबोधे कारणम्। यथा नीलोघट इत्यत्र प्रतियोगिपदं नीलपदम्, अनुयोगिपदं घटपदम्, तयोः (प्रतियोग्यनुयोगिपदयोः) अव्यवधानम् आसत्तिः तद्विषयकं ज्ञानं नीलप्रकारकघटविशेष्यकशाब्दबोधे कारणम्। वस्तुतः शाब्दबोधेऽ-व्यवधानज्ञानस्यापेक्षितत्वात् यत्पदार्थेन यत्पदार्थस्यान्योऽपेक्षितस्तयोरव्यधानेनोपस्थितिः शब्दाबोधे कारणम् इति मुक्तावल्यामुक्तत्वात् गिरिर्भुक्तमग्निमान् देवदत्तेन् इत्यत्र न शाव्दवोधः। यतो हि गिरिपदार्थेन सह अग्निमत्पादर्थस्य अव्यवधानेन अन्वयो ऽपेक्षितो वर्तते किन्तु तयोर्मध्ये भुक्तमिति पदेन व्यवधानात् गिरिपदार्थेन सह अग्निमत्पदार्थस्य अव्यवधानेनोपस्थित्यभावात् गिरिर्भुक्तम् अग्निमान् देवदत्तेनेत्यत्र न शाब्दबोधः। अव्यवधानेनोपस्थितिसत्वे तु नीलो घट इत्यत्रवत् शाब्दबोधो भवत्येव। पदार्थे तत्र तद्वता योग्यता परिकीर्तिता : एकपदार्थेऽपरपदाथस्य सम्बन्धो योग्यता अर्थात् बाधाभावो योग्यतेत्यर्थः। यथा वह्निना सिञ्चतीतित्यत्र सेककरणत्वरूपजलादिधर्मस्य वह्नौ बाधनिश्चयसत्वात् वह्निना सिञ्ततीतिवाक्यात् न शाब्दबोधः। बाधाभावे जलेन सिञ्चतीत्यादौ तु शाब्दबोधो भवति।

यत्पदेन विना यस्याननुभावकता भवेत्, तेन पदेन सह तस्याकाङ्क्षा। यथा- तण्डुलं पचतीत्यत्र

पचतीति क्रिया पदं विना तण्डुलपदोत्तरा अम् विभक्तिः नान्वयबोधं जनयति इति क्रियापदं विना कारकपदस्यान्वयबोधाजनकत्वेन क्रियापदेन सह कारकपदस्य आकाङ्क्षेति आकाङ्क्षाज्ञानं शाब्दबोधे कारणम्। तात्पर्यज्ञानमपि शाब्दबोधे कारणम्। अत्र वक्तुरिच्छैव तात्पर्यम्। यथा - सैन्धवमानय इति वाक्यं यदि भोजनकाले वक्त्रोच्चरितं तदा सैन्धवपदस्य लवणे तात्पर्यम्, ततो सैन्धवपदाल्लवणबोधः। सैन्धवमानय इति वाक्यं यदि बहिर्गमनवेलायां वक्त्रोच्चरितं तदा सैन्धवशब्दस्य अश्वविशेषे तात्पर्यम्, ततो सैन्धवपदादश्वबोधः। इत्थं वृत्त्या पदार्थोपस्थितावपि प्रकरणवशादर्थविशेषमवधार्य तत्तद्विषयकःशाब्दाबोधो भवतीति[१८]।

शक्तिविषये गदाधरभट्टाचार्येणाप्युक्तं वर्तते शक्तिवादे - ईश्वरेसङ्केतः शक्तिः तथाचार्थबोधकं वाचकम्, यथा- गोत्वादिविशिष्टबोधकं गवादिपदम्., तद्बोध्योऽर्थो गवादिर्वाच्यः स एव मुख्यार्थ इत्युच्यते[१९]। अत्रैव सङ्केतस्य द्वैविध्यम्, तयोः स्वरूपं च भर्तृहरिर्निम्नरीत्या निरूपयति -

आजानिकश्चाधुनिकः सङ्केतो द्विविधो मतः

नित्य आजानिकस्तत्र या शक्तिरीति गीयते। आजानिकः, आधुनिकभेदेन सङ्केतो द्विविधो बोध्यः। तत्र आजानिकसङ्केतो नित्यः, अस्य सङ्केतस्य पूर्वमुक्तत्वात् क्रमप्राप्तमधुना आधुनिकसङ्केतो निरूपप्यते -

कादाचित्कस्त्वाधुनिकः शास्त्रकारादिभिः कृतः[२०]। अर्थात् आधुनिको नाम द्वितीयप्रकार- सङ्केतः परमेश्वरादन्येन केनापि कल्पितः सङ्केतः। स एव सङ्केतः परिभाषेति गीयते। तया वृत्त्या यत्पदं यमर्थं प्रतिपादयति तत्पदं तदर्थे पारिभाषिकम्। सैषा परिभाषा लौकिकी तान्त्रिकी चेति द्विविधा। तत्र लौकिकव्यवहारसौकर्याय केनाप्याधुनिकेन कल्पिता नगनदीवननगरादिपरिभाषा लौकिकी (प्रथमा)। तान्त्रिकव्यवहारसौकर्याय तन्त्रकारकल्पिता नदीवृद्ध्यादिपरिभाषा द्वितीया। गदाधरभट्टाचार्यादयस्तु वैदिकी तान्त्रिकी चेति परिभाषायाः भेदद्वयमनादृत्य एकविधामेव परिभाषामाहुः। तदुक्तं -

तत्राधुनिकसङ्केतः परिभाषा, तया चार्थबोधकं पदं पारिभाषिकम्। यथा शास्त्रकारादिसङ्केतितनदीवृद्ध्यादिपदम्। नदी वृद्ध्यादिपदे तान्त्रिकपरिभाषाया विवरणं यथा - व्याकरणशास्त्रे "यूस्त्र्याख्यौ नदी" इत्यनेन सूत्रेण पाणिनिना नित्यस्त्रीलिङ्गानामीकारान्तानामूकारान्तानाञ्च नदी संज्ञा कृतेति तादृशेषु शब्देषु नदीपदं पारिभाषिकम्। एवं "वृद्धिरादैच्" इत्यनेन सूत्रेणापि पाणिनिना आ आर् ऐ औ इत्येषां वृद्धिसंज्ञा कृतेति तादृशेषु शब्देषु वृद्धिपदं पारिभाषिकम्। तथैव जनाः साधारण अपि लोका लौकिकव्यवहारादिषु नगनदीवननगरादीनां नामसु विशेषपरिभाषां कल्पयित्वा लोकव्यवहारान् समासादयन्ति। "द्वादशेऽहनि पिता नाम कुर्या"दिति श्रुत्यनुसारं पित्राद्याधुनिकपरिकल्पितरामश्याम- हरिकृष्णादिनामगतमपि सङ्केतं आधुनिकसङ्केतमेवेति मनन्ति[२१]।

उभयावृत्तिधर्मेण संज्ञा स्यात्पारिभाषिकी[२२] इति परिभाषिकसंज्ञायाः लक्षणं जगदीशेनोक्तं शब्दशक्तिप्रकाशिकायाम् अर्थात् उभयवृत्तिधर्मावच्छिन्नसङ्केतवती या संज्ञा सा पारिभाषिकी। यथाऽऽकाशं डित्यादि, सा हि संज्ञा द्वितीयावृत्तिधर्मेणैव शब्दादिना रूपेणा तदाश्रयमभिधत्ते। ये तु जात्यवच्छिन्नसङ्केतवतामपि चैत्रादिपदानां पारिभाषिकत्वमाहुस्तेषां (वैयाकरणानां) मते त्रैविध्यमन्यथा निर्वक्ति -

१८ पूर्ववत् पृष्ठ ९४-१०४
१९ शक्तिवाद पृष्ठ २
२० शब्दशक्तिप्रकाशिका, पृष्ठ १२४
२१ शक्तिवाद पृष्ठ ३
२२ शब्दशक्तिप्रकाशिका, पृष्ठ ११७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यद्वाधुनिकसङ्केत शालिस्यात्पारिभाषिकम्

जात्या नैमितिकं शवतमौपाधिकमुपाधिना[२३] । अर्थात् आधुनिकसङ्केतवदर्थवोधकं नाम पारिभाषिकम् । यथा पित्रादिभिः पुत्रादौ सङ्केतितं चैत्रादि । जातिविशिष्टार्थबोधकञ्च नैमित्तिकम्, यथा-गोगवयादि । उपाधिविशिष्टार्थप्रतिपादकं नाम औपाधिकम्, यथा-आकाशपश्वादि । तयोः (आकाशपश्वोः) शब्दवत्वलोमलाङ्गूलवत्वाद्युपाध्यवच्छिन्नशक्तिमत्वस्य सत्वात् । एवं क्रमेण विभिन्नेषु अर्थेषु विभिन्नकारा : शब्दाः प्रयुज्यन्ते । एकाकारा अपि केचनः शब्दाः शास्त्रभेदेन विभिन्नार्थेषु परिभाषिता दृश्यन्ते । यथा- एक एव प्रकृतिशब्दः साङ्ख्यसिद्धान्तें सत्वरजस्तमसां त्रयाणां गुणानां साम्यावस्थायां, वेदान्ते मायायाम्, न्यायवैशेषिकतन्त्रेऽदृष्टे प्रयुज्यते । एवमेक एव सत्वशब्दः सौगततन्त्रेऽर्थक्रियाकारित्वे, साङ्ख्यदर्शने सत्वाख्यगुणविशेषे, न्यायवैशेषिकतन्त्रे द्रव्यगुणकर्मत्रितयवृत्तिसत्वाख्यजातौ[२४] समुपयुज्यते । एवमन्येऽपि शब्दाः सन्त्येव ये विभिन्नेषु तन्त्रेषु विभिन्नार्थेषु परिभाषिताः दृश्यन्ते ।

सर्वत्र दर्शनेषु शास्त्रेषु च पारिभाषिकाः शब्दाः प्राप्यन्ते । तेषु कतिपयेषु शास्त्रेषु नातिविचित्राः पारिभाषिकाः शब्दाः प्राप्यन्ते । यथा- वैशेषिकप्राचीनन्यादिग्रन्थे सामान्यविशेषसमवायेत्यादयः पारिभाषिकाः शब्दाः प्राप्यन्ते । नव्यन्यायादिग्रन्थेषु तु अतितरां विचित्राः नवीनाः दर्शनान्तरविलक्षणाः शब्दाः प्राप्यन्ते । यथा - प्रतियोगिता,अनुयोगिता, प्रकारता, विशेष्यता, आधेयता, अधिकरणता, विषयता, विषयिता, कारणता, कार्यता, प्रयोजकता, प्रयोज्यता, संसर्गता, संसर्गिता, उद्देश्यता, विधेयता, प्रतिबन्धकता, प्रतिबध्यता, व्यापकता, व्याप्यता, अवच्छेदकता, अवच्छेद्यता (अवच्छिन्नता), निरूपकता, निरूपितेत्यादयः[२५] अनेकाः पारिभाषिकाः शब्दाः । येषां परिज्ञानं विना विशेषतो नव्यन्यायशास्त्रे गतिर्न सम्भवति, न केवलं नव्यन्यायशास्त्रेऽपितु रसगङ्गाधरव्युत्पतिवादादिसाहित्यव्याकरणादिशास्त्रेऽपि गतिर्न सम्भवति । तेषु शास्त्रेषु गतिप्रवर्धनाय उपर्युक्तानां पारिभाषिकशब्दानां परिज्ञानमत्यन्तमावश्यमकमनुभूयते । अतः शब्द एव खलु लोकानां शरणं यं परित्यज्य सर्वत्र शास्त्रे, लोके, व्यवहारे च न किमपि कार्यं प्रचलति, यदि शब्दाभिधानरूपं किमपि प्रकाशकरं तत्त्वं संसारे न प्रकाशते तर्हि समस्तमिदं लोकत्रितयं गाढान्धकारव्याप्तं जायेत । अतः संसारसारं निश्चप्रचं शब्द एवेति निर्विवादं सुनिश्चितमेवेति ।

सन्दर्भसूची

आचार्यो दण्डीः काव्यादर्श, व्याख्याकारः आचार्यः श्री रामचन्द्र मिश्र, चौखम्वा विद्याभवन वाराणसी, पुनर्मुद्रितसंस्करण २००३ ।

उपाध्याय, जगत् "न्याय दर्शनसम्मतशाब्दवोधप्रक्रियाया भाषावैज्ञानिक विवेचन्" मर्यादा, वाल्मीकि विद्यापीठ प्रदशर्नीमार्ग, २०६७

उपाध्याय विद्यानाथ, न्यायदर्शनम्, कक्षा १०, प्रकाशकः, पाठ्यक्रमविकासकेन्द्रम्, सानोठिमी भक्तपुरम्, पद्मप्रसाद भट्टराईः । प्रथमसंस्करणम्, २०५९ वि.सं.

तर्कालङ्कारभट्टचार्यो जगदीशः, शब्दशक्तिप्रकाशिका, चौखम्वा संस्कृतसीरीज आफीस, वाराणसी, द्वितीयसंस्करण, २०२९ वि.सं. ।

त्रिपाठी, हरिश्चन्द्रः, दर्शनविन्दुसङ्ग्रहः (द्वितीय भाग) , सम्पूर्णानन्द विश्वविद्यालयः, प्रकाशनाधिकारी, वाराणसी, अक्षयतृतीया-२०४९ वि.सं. ।

बदरीनाथसिंह शाव्दबोधविमर्शः, प्रकाशक बदरीनाथसिंह, गौदोलिया वाराणसी ।

भट्ट अन्नम्: न्यायबोधिनीसहितस्तर्कसङ्ग्रह, मोतीलालवनारसीदास, दिल्ली, द्वितीयं संस्करणम्, १९८५ ई.सं ।

भट्टाचार्यो गदाधरः, शक्तिवादः, प्रकाशकः खेमराज श्रीकृष्णदास, बैङकटेश्वर स्टीम प्रेस, बम्बई, २०१३ वि.सं. ।

भट्टचार्यो विश्वनाथपञ्चाननः, न्यायसिद्धान्तमुक्तावली, सम्पादकः हरिरामशुक्लः, चौखम्वासंस्कृतसंस्थानम्, वाराणसी, चुतर्थसंस्करणम्, २०५९ वि.सं. ।

मिश्र शंकर : वैशेषिकसूत्रोपस्कारः, ।

मुनि : पराशर : विष्णुपुराणम्, गीताप्रेस, गोरखपुरम् ।

मुनिः वात्स्यायन : प्रसन्नपदापरिभूषितं न्यायभाष्यम्, सम्पादकः स्वामी श्री द्वारिकादासशास्त्री, सुधीपकाशासन, वाराणसी, २०४३ वि.सं. ।

२३ पूर्ववत् पृष्ठ १२२

२४ न्यायदर्शनविन्दु पृष्ठ ८

२५ विद्यानाथ उपाध्याय :, नव्यन्यायका पारिभाषिक शब्दहरूको प्रयोग आन्वीक्षिकी पत्रिका, न्यायविषयक गोष्ठी विशेषाङ्क, प्रकाशक ने.सं.वि. वाल्मीकि विद्यापीठ, न्यायशिक्षण विभाग, २०६७ गुरूपूर्णिमा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तन्वादिद्वादशभावानां शुभाशुभज्ञानम्

सहायक प्रा. अमरराजढकाल:
पिण्डेश्वरविद्यापीठम्

जातकशास्त्रे तन्वादीनां द्वादशभावानां ग्रहस्थितिवशात् शुभाशुभफलानि समुत्पद्यन्ते इति विषय: समग्रतो निरूपितो दृश्यते। तत्रोक्तम् लघुजातके - तनुधनसहजसुतरिपुजायामृत्युधर्मकर्मायव्यया: इति द्वादशभावा: उक्ता: । जनिमतां यत् किञ्चित् शरीर-धन-भातृ-मित्र-पुत्र-शत्रु -स्त्री-मृत्यु-धर्म-कर्म-आय-व्ययसम्वन्धितं फलं तत्रतो विचार्यते। एतत् सर्वं पूर्वोक्तेन सम्वन्धितेन तेन तेन तन्वादिभावेन तत्र तत्रोपस्थितग्रहवलाबलशात् समुद्भूतं भवति । भाववलं भावेशानुसारेण तस्य दृष्टेरनुसारेण च भावोपरिस्थितानाम् ग्रहाणामवस्थानुसारेण च अन्यग्रहाणां दृष्टिसम्वन्धेन च फलं विचार्यते। उक्तञ्च पृथुयशा षट्पञ्चाशिकायाम्-

यो यो भाव: स्वामीदृष्टो युतो वा
सौम्यैर्वास्यात्तस्य भावस्य वृद्धि: ।
पापैरेवं तस्य भावस्य हानि:
निर्दिष्टव्या पृच्छतां जन्मतो वा ॥ १। ६॥

जातकस्य जन्मकुण्डल्यां स्थितेषु द्वादशभावेषु यो यो भाव: तत्रस्थराशे: स्वामिना सौम्यैर्ग्रहैर्वा युक्तो दृष्टो वा भवति चेत् तस्य भावस्य फलं वर्धते । तथा सति स: भाव: शुभफलदायको भवतीति निश्चय: क्रियते । एवमेव पापग्रहैर्दृष्टस्य युतस्य वा भावस्य तु फलहानि: भवति । अथवा तादृशो भाव: जातकमशुभं फलं प्रयच्छति ।

यस्मिन् भावे यो राशि: विद्यते तस्य यो ग्रह: स: ग्रहस्तस्य स्वामीति कथ्यते । तत्र द्वादशानां राशीनां सूर्यचन्द्रभौमादयो ग्रहा: सपमनो भवन्ति । तद्यथा - कुजशुक्रेन्द्वर्कज्ञशुक्रकुजजीवशैरियमगुरव इति राशिस्वामिन: उक्ता: । यो ग्रह: यस्मिन् भावे वसति तत् तस्य स्थानम् । अथवा लग्ने जन्मलग्ने प्रश्नलग्ने च य: कश्चित् भाव तन्वादिक: स्वस्वामिनावलोकितस्तस्य भावस्य फलवृद्धि: भवति । स: भाव सौम्यग्रहै:(बुधगुरुशुक्रपूर्णचन्द्रै:) युक्तो दुष्टो वा वर्तते तर्ह्यपि तस्य भावस्य फलवृद्धि भवति । अनेन प्रकारेण पापग्रहै: (रविशौरिभौमा: क्रूरयुक्तोवुध: क्षीणचन्द्रेण च एतै: युक्तो दृष्टो वा भाव: स्यात् तस्य भावस्य हानि: अशुभफलपाप्तिर्वक्तव्या ।

सर्वे ग्रहा: स्वस्थानात् सप्तमं स्थानं पूर्णं पश्यन्ति । अत: शुभग्रहैरवलोकितो भाव: शुभं फलं तथाशुभग्रहैरवलोकितो (पापग्रहै:) भाव अशुभं फलं जनयति । भौम-गुरु-शनय: विशेषरूपेण ४-८, ५-९, ३-१० स्थानं च पश्यन्ति । अतो यस्मिन् यस्मिन् भावे यस्य यादृशस्य ग्रहस्य दृष्टि: भवति सो सो भाव तादृशमेव शुभाशुभफलं जनयति । ग्रहाणामपि शत्रु-मित्र-समादि क्षेत्राणि निर्धारितानि सन्ति । मित्रै: (मित्रग्रहै:) युक्तो दृष्टो वा चेत् स: तस्य भावस्य वृद्धि: करोति । शत्रुणा (शत्रुग्रहै:) युक्तो दृष्टो वा चेत् स: तस्य भावस्य हानि करोति । शत्रुक्षेत्रस्थितो तस्य भावस्य हानि: तथा मित्रक्षेत्रस्थितो तस्य भावस्य वृद्धि: करोति । पापयुत:, नीचस्थ: सौम्ययुतो वा ग्रह: यस्मिन् भावे व्यवस्थित: स: तस्य भावस्य हानि: करोति । उदासीनक्षेत्रस्थितस्तु नैव हानि नैव वृद्धि विदधाति । मित्रक्षेत्रे स्वक्षेत्रे मूलत्रिकोणे स्वोच्चे स्वांशे वा व्यवस्थितो ग्रह: तस्य भावस्य फलवृद्धिं करोति । यस्मिन् भावे सौम्यो ग्रह: स्थित: स: तस्य भावस्य फलवृद्धिं करोति (वृहज्जातकस्य भट्टोत्पली टीकायाम् २०-१०) । यस्मिन् भावे पापग्रहो स्थित: स: तस्य भावस्य हानिं करोति । रिफे (१२) षष्ठाष्टमे (६-८) चैतत् फलं विपरीतं वदन्ति । द्वादशे भावे स्थिता: सौम्या: ग्रहा: हानिं (व्ययं) कारयन्ति, तत्रस्था पापा: व्ययवृद्धिं षष्ठे सौम्या: शत्रुहानिं कुर्वन्ति तत्रस्था: पापा: शत्रुवृद्धिञ्च कारयन्ति । अष्टमे सौम्या: मृत्युहानिं कुर्वन्ति, तत्रस्था: पापा: मृत्युं कष्टवृद्धिं वा कुर्वन्ति । तथा चोक्तम् लघुजातके -

पुष्णन्ति हि शुभाभावास्तन्वादीन् हन्ति संस्थिता: ।
सौम्या: षष्ठेऽरिहन्ता: च सर्वे नेष्टाव्ययाष्टमा: ॥ प्रकीर्णाध्याय: ४।

ये ये भावा: लग्नादयो शुक्रबुधगुरुस्वस्वस्वामीभि: सहिता: वीक्षिता: वा सन्त: अन्यै: ग्रहैर्युता, दृष्टा वा न भवेयु: तदा ते लग्नादि भावेषु शुभफलदायका: भवन्ति । तदा भावजन्यं फलं शुभं भवति । वैद्यजातेन जातक पारिजाते निगदितम् यत् -

ये ये भावा: सितज्ञामरगुरूपतिभि:संयुता वीक्षिता वा ।
नान्यैर्दृष्टा नयुक्ता: यदि शुभफलदा मूर्तिभवादिकेषु ॥ (जातकपारिजात ११-१)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्वनीचराशौ शत्रुराशौ वा स्थितो ग्रहो यस्मिन् भावे विद्यमानः स्यात् सः ग्रहः तस्य भावस्य विनाशको भवति । एवमेव स्वमूलत्रिकोणे, स्वराशौ, स्वकीयोच्चे, मित्रगृहे वा स्थितः सन् यस्मिन् भावे स्थितो भवति असौ ग्रहः तस्य भावस्य वृद्धिं करोति । यथा चाह वजातकपारिजाते वैद्यनाथः -

नीचस्थो रिपुराशिस्थः खेटो भावविनाशकः ।
मूलस्वतुङ्गमित्रस्थो भाववृद्धिकरो भवेत् ॥ (११-३)

यस्य भावस्य स्वामी रिपौ (६) रन्ध्रे (८) रिफे (१२) वा वसति, भावफलकेतरः तस्य भावस्य नाशं कथयन्ति । असौ भाव केनचित् शुभग्रहेण निरिक्षितश्चेत् तत्फले अन्यथा भवति अर्थात् तस्य भावस्य नाशो न भवति अपितु तस्य भावस्य वृद्धिः कथयन्ति । तथा चोक्तम् -

यद् भावनाथो रिपुरिष्फरन्ध्रे दुस्थानगो यद्भवनस्थितस्तु ।
तद्भावनाथं कथयन्ति तज्ज्ञाः शुभेक्षितश्चेत् फलमन्यथा स्यात् ॥ जा.पा. ११-४)
दुष्टस्थितो वापि यदा नभोगः पापोऽरिनीचांशक संयुतो यः ।
स्वतुङ्गमित्रांशकराशियुक्तः शुभेक्षितो वा यदि शोभनः स्यात् ॥ जा.पा. ११-९)

यस्य भावस्य स्वामी विलग्नात् केन्द्रे (१, ४, ७, १०) कोणे (५,९) यदि शुभग्रहेणावलोकितः भवेत् तथा तुङ्गादिवर्गोपगतो भवेत्तदा तस्य भावस्य पुष्टिं कथयन्ति । अथवा तस्य भावस्य फलवृद्धिः भवति, शुभफलान्युत्पद्यन्ते । तदुक्तम् -

यद्भवपे केन्द्रगते विलग्नात् त्रिकोणगे वा यदि सौम्यदृष्टे ।
तुङ्गादिवर्गोपगते बलाढ्ये तद्भावपुष्टिं फलमाहुरायोः ॥ जा.पा. ११-५)

अन्यच्चाग्रे

तत्तद्भावत्रिकोणे सुखमदनगृहे वास्पदे सैम्ययुक्ते
पापानां दृष्टिहीनेभवनपसहिते पापखेटैरयुक्ते ।
भावानां पुष्टिमाह सकलशुभकरं चान्यथा चेत् प्रवाशं
मित्रं मित्रगृहेन्द्रैरखिलमपि तथा मूर्तिभावादिकानाम् ॥

सङ्क्षेपतो भावानां शुभाशुभफलं निम्नानुसारेण ज्ञेयम् -

स्वस्वस्वामिना युक्तः दृष्टो वा भावः शुभकारकः ।
शुभग्रहैरवलोकितो युक्तो वा भाव शुभफलवर्द्धकः स्यात् ।
भावाधिपतिलग्नात् केन्द्रत्रिकोणे स्वांशे वा स्थितश्चेत् भावस्य पुष्टिकारकः स्यात् ।
भावेशः स्वमित्रे स्वोच्चे स्वांशे मूलत्रिकोणे च स्थितश्चेत् तस्य भावस्य वृद्धि करोति ।
स्वोच्च ग्रहाश्रितो भावः शुभफलकारकः ।
दुस्थानस्याधिपतिना युतस्य दृष्टस्य वा शुभफलविनाशको भवति ।
भावाधिपतिः रिपुरन्ध्ररिष्फेषु (६,८,१२ भावेषु) पतति तदा भावस्य विनाशं करोति ।
खलखेटास्थिताः भावा फलहानिं कुर्वन्ति ।
नीचः नीचराशिस्थः ग्रहः शुभफलस्य हानिः करोति । अथवा तस्य भावफलस्य विनाशं करोति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भामिनीविलासावलोकनाभिलाषः

उपप्रा. उत्तमप्रसादखतिवडा
शारदाविद्यापीठम्, महेन्द्रनगरम्

स्मारं स्मारं जगन्नाथं कविं पण्डितपार्थिवम् ।
तद्भामिनीविलासं स्वविलासाय विचिन्तये ॥

१. उपक्रम

काव्यत्वधर्मावच्छिन्नान्यखिलान्यपि काव्यानि यद्यपि सहृदयहृदयहृद्यानि तथापि सनातनान्यन्यान्येव कानिचिद्भवन्त्यरून्तुदानि । देशकालवस्तुपरिच्छिन्नानां कविकर्मणां देशकालाद्यवच्छेदेनैव महत्त्वमुपयोगित्वं वावधारितं काव्यकलाकोविदैः । परं सर्वविधपरिच्छेदशून्यानां तेषां काव्यानां किमप्यनितरसाधारणं लोकोत्तरं प्रतीक्ष्यं पदं वर्वर्तीति नाविदितमिदं विद्वद्धौरेयाणाम् । संस्कृतसाहित्यसरस्वति महार्घमौक्तिकमूर्त्तयः स्थान्ववदातकीर्तयश्चायुष्मन्तोऽसंख्यसंख्यावन्तो जेजीयन्त इत्यस्माकं सुरवाग्वरिवस्यासंसक्तचेतसां गौरवास्पदम् । तादृक्षा दुर्दैवादसकृन्न संसरन्त्यपितु कञ्चिद्देशं कालं वा जातु जनुषा ज्वालयन्ति केनापि रूचिररूचा । परन्त्वेतावता तद्देशकालावच्छिन्नत्वकल्पनं तेषु हेलयावहेलनमसमञ्जसं वेति नात्र वैमत्यम् । तेषान्तु सार्वदेशिकत्वं सार्वकालिकत्वञ्चासाधारणधर्मरूपमिति सर्वजनानुभवप्रमाणप्रमीतमविरूद्धञ्च । तथाविधकोविदेषु स्वरूपेण पण्डितराजत्वनिष्ठाधेयतानिरुपिताधिकरणतावान् पण्डितराजापरपर्यायो जगन्नाथोऽप्यन्यतमः । कवितल्लजेनामुना स्वप्रागभावानिनीषयाजननेन कदा क्व च मही मण्डितेति सर्वमिदमित्थन्तया तर्कयितुं नैव प्रभविष्णवो वयम् । परं परपरिभवासहिष्णुना काव्यरसोन्मादोत्पतिष्णुना तेन दिल्लीराज्याश्रये वर्तिष्णुनाभावीति साक्षिनिमीलनं निर्णेतुं नैव सन्देहगन्धोऽप्यस्मासु । तच्च 'दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः[१]' इति तदीयकाव्यांशांशुमान् प्रकाशयत्येव यथायथम् । तत्रैव यवनान्वयोद्भवया कयाचिल्लवङ्गीनाम्न्याद्वितीयया द्वितीयया तारूण्यं तीर्त्वा तदनु यथेप्सितं वाराणस्यां स्थविरे स्थितिं चक्र इति तज्जीवनचक्रचङ्क्रमणचिन्तनेन निश्चीयतेऽनुसन्धानचुञ्चुभिः । भगीरथरथखातावच्छिन्नजलप्रवाहोपसेविनो जगन्नाथस्य जीवनवनं कण्टकाकीर्णं मसृणमञ्जुलं वा यादृशमपि स्यात्, तज्जा विकचकाव्यव्रततयो वेविद्यन्त एव निरतिशयश्रेष्ठाः प्रेष्ठाश्च । सकलशास्त्रपारदृश्वनोऽस्य लोकोत्तरां प्रतिभां प्रकाण्डपाण्डित्यञ्च परिलक्ष्य धीरधुरन्धराणां पण्डितपुरन्दराणामपि चलाचलानि चेतांसि मत्सरःसरस्वत्सहस्रकल्लोलकोलाहलक्लान्तत्वमभजन्त किल । पण्डितराजकर्तृककाव्यत्वावच्छिन्नानि नूनं माधुर्यातिशयेन तत्पद्यबन्धसंबन्धबद्धानां केषां चेतसि चमत्कृतिं न चकाशयेयुः? वस्तुतोऽस्य रचनाचातुरी स्वर्वामाधरमाधुरीमप्यतिशेषीतीत्युक्तौ नातिशयवचनरचनम् । विचिकित्सां विना चोक्तं कविना स्वयमेव –

ध्रुवं ते जीवन्तोऽप्यहह ! मृतका मन्दमतयो
न येषामानन्दं जनयति जगन्नाथभणितिः[२] । इति ।

काव्यकलानुकूला एवास्य गर्वोक्तयः समुद्धतधीमतां दम्भोलिरूपाः प्रतीयन्त आपाततः । परं सुषमयानुपमया सम्परिष्वक्ता, श्रवणयोः पीयूषोपमरसनिस्यन्दिनी, विलक्षणत्वेनात्मनि स्वेतरभेदसाधिका, जगन्नाथजा कविता यस्य कस्यापि दृषद्दारूणमपि द्रवयति चेतः । अतस्तत्कविताकामिनीकटाक्षकरवालछिन्नचेतसो मे तदुपरि सानुरागेक्षणं नासाधारणम् । संप्रति तस्यैव भामिनीविलासान्तर्गतं प्रथमं प्रास्ताविकविलासमुररीकृत्य तद्घटितपद्यानां नातिदीर्घमध्ययनं विधीयते ।

२. भामिनीविलासावलोकनम्

भामिनीविलासान्तर्गते प्रथमे प्रास्ताविकविलासे सप्तविंशत्युत्तरशतसंख्यकानि पद्यानि विलसन्ति । तानि च पद्यान्यन्योक्तिपराणि एव वेविद्यन्ते । तत्रभवता पण्डितराजेनाऽयं मुक्तकशैल्या काव्यबन्धो बबन्धेति समालोचकानां विचारः । विविधविषयेषु संकेतसरण्या मर्मभिदर्थप्रकटनार्हाणि पद्यानि न सामान्यानामेवापित्वनितरसाधारणशेमुषीजुषां विपश्चिदपश्चिमानां कृतेऽपि महार्हाणि मौक्तिकतुल्यानि प्रतिभान्ति । वस्तुतः पण्डितराजान्तश्चेतस्थितमनिर्वचनीयमभिमानतत्वमेव कुत्रचित् भूरिवैदुष्यभूषितं सत् पद्यरूपेण प्रकटितं परिलक्ष्यते । यथा प्रथमे एव पद्ये–

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः, करिण्यः कारूण्यास्पदमसमशीलाःखलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं, नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः[३] । इति ॥

अत्र'मृगपति'पदेन कश्चन विलक्षणविचक्षणो विद्वान्, परमपराक्रमशीलो वसुमतीपतिर्वाभिप्रेतोऽनुभूयते । स स्वपौरुषप्रकटनाय

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जगति प्रतिद्वन्द्विताामनवेक्षमाणः सामान्यान् कोविदकुलान् वसुन्धराधीशसंघातान् वावगणयन् खिन्न इव दरीदृश्यते । अत्रविशेषितो मृगपतिःप्रतिनिधिरूपःएव । पराक्रमित्वेन प्रसिद्धः सिंहः पराक्रमशून्येषु मृगादिषु आक्रमणक्रीडां यथा नैवाभिवाञ्छति, तथैवोद्भटभव्यानां धीमतामसमशीलेषु शास्त्रार्थचिक्रीडिषा नैव रुच्यनुरूपा । श्लोकेऽस्मिन् प्रकटितो भावःकवेरेव स्यान्नवा, परमत्र भावगाम्भीर्यत्वं सार्वकालिकत्वं रमणीयत्वादिकं च समानाधिकरणवृत्तिधर्मत्वेनावस्थितम् इत्यत्र समेषां समाना सम्मतिः । एवं क्वचिच्च कविःविषमपरिस्थितिपीडितान् धैर्यविरहितान् जनान् समाश्वसिति धैर्यं समासादयितुम् । विवर्तमन्येव न वियतिर्नियता । एकं परिभ्रमणं समाप्य चक्रवत् पुनरप्यनुकुलाध्वनि विधिर्विवर्तते । तच्चेत्थं दिशति–

तावत् कोकिल ! विरसान्यापयविवसान् वनान्तरे निवसन् ।
यावान् मिलदलिमालःकोऽपि रसालः समुल्लसति ॥[४] इति ॥

अत्र कोकिलेन कस्यापि गुणवतः प्रतिभाशालिनो विदुषो रसालेन च तद्गुणग्रहिणो जनस्य प्रतीतिर्जायते । विदुषां कवीनामन्येषां पृथक्पराक्रमशालिनां जनानां च न सर्वदा समानरूपेण समादरो दरीदृश्यते धराधाम्नि । परन्त्वैतावता निर्वेदनं नोपयुक्तम् । 'उत्पस्यते तु ममकोपि समानधर्मा । कालो ह्ययं निरवधिर्विपुला च पृथ्वी'[५] इत्युक्तदिशा प्रतीक्षा कार्या, यथा हेमन्तशिशिरादिषु निर्विण्णो पिको वसन्तं प्रतीक्षते । कवेर्कथनेऽत्र कटुत्वातिरिक्तं कमनीयत्वं च निहितम् । प्रतीक्षायाःफलं मधुरं भवतीति लोकोक्तिमपि परिपोषयतीदं पद्यम् । प्रसंगोऽयं प्रतिविषयं प्रतिजनं संगच्छते । तथात्र धीरतायाःमहत्त्वमपरिहार्यत्वमप्यूह्यम् । सुकाव्यस्य एतदेव वैशिष्ट्यं यत् एकं विषयं प्रस्तुत्य विषयान्तरं बोधयति । एवं च कविनात्र 'अल्पविद्याभयङ्करी', 'अर्धो घटो घोषमुपैतिनूनम्'[६] इत्यादिनीतिशास्त्रप्रतिपादितो विषयोऽपि भंग्यन्तरेण प्रस्तुतः । यथा–

नवारयामो भवतीं विशन्तीं, वर्षानदि ! स्रोतसि जैंजायाः ।
न युक्तमेतत्तु पुरो यदस्यास्तरंगभंगान् प्रकटीकरोषि ॥[७] इति ॥

अत्र वर्षानद्याः कश्चिदल्पज्ञो जनप्रतीयते य आत्मानमधिकं मनुते, जैंजया च परिपूर्णः कश्चित् ज्ञानवान् प्रतीतिविषयो भवति, यःशान्तस्वरूपो विद्यते । स्वल्पो जनःयदा किञ्चित् प्राप्नोति जानाति वा तदाखर्वगर्वं तथा प्रकटयति यथा वर्षासु क्षुद्रनद्यः छङ्कारघोषैः समुन्नदन्ति । अल्पज्ञो दुःशीलो वा जनो नान्यत्र एवापितु विज्ञानां शान्तचित्तानां पुरतोऽपि स्वकीयं कौटिल्यं प्रदर्शयति । एतन्न समीचिनमिति पद्यस्यास्याशयः । वर्षाकालिकानद्यमहानदीष्वपि तरंगभंगप्रकटनेन स्वप्रभावमिच्छन्ति तद्वत् मूर्खाणां स्वल्पज्ञानामपि एषा एव कथा । कविना पद्येऽस्मिन् अप्रस्तुतप्रशंसामाध्यमेन तदेवाभिव्यक्तम् । एवमेव गुरुशुश्रूषणमन्तरा महत्त्वप्राप्तेः न किमप्युपायान्तरमित्यपि सोदाहरणं प्रस्तौति यथा–

गीर्भिर्गुरुणां परुषाक्षराभिस्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां न जातु मौलौ मणयो वसन्ति ॥[८] इति ॥

अत्र शिष्यैः कीदृशैर्भाव्यमिति निदर्शनमुखेन कविनाभिव्यक्तम् । ये छात्रा गुरुणां कठोरवचनं सोढ्वापि तेषां सान्निध्यं नैव त्यजन्ति तैस्तिरस्कृता अपि तेषां सेवायां संलग्ना जायन्ते, त एव छात्राः कालान्तरे उच्चैःपदं प्राप्नुवन्ति । लोकपूज्याश्च जायन्ते । उदाहृतं चात्र– यथा शाणेषु कर्षिता मणय एव राज्ञां मौलौ शोभन्ते, अप्राप्तशाणघर्षणा मणयः कदाचिदपि तत्पदं नाप्नुवन्तीति एतत् सत्यम् । कविनात्र जगति सिद्धो व्यावहारिको भावः प्रस्तुतः । कुत्रचित् कविर्मर्मरस्पृशं स्वकीयं मनोभावं सहजतया प्रस्तौति यथा–

पाण्डित्यं परिहृत्य यस्य हि कृते वन्दित्वमालम्बितं
दुष्प्रापं मनसापि यो गुरुतरैः क्लेशैः पदं प्रापितः ।
रुढस्तत्र स चेन्निगीर्य सकलां पूर्वोपकारावलीं
दुष्टः प्रत्यवतिष्ठते तदधुना कस्मै किमाचक्ष्महे? ॥[९] इति ॥

श्लोकेऽस्मिन् कोऽपि परोपकारी पुरुषो विद्यते, यः स्वत्वमपि विहायान्यस्योपकारं कृतवान् । तत्र च स पाण्डित्यं विहाय चाटुकारवत् सञ्जातः, महतायासेन कञ्चिदुन्नतं पदमपि प्रापितवान् । एवं तस्य कृते वहून्क्लेशान् सोढ्वापि सुदुष्करं कार्यं सम्पादितवान् । परं सम्प्रति स उपकृतः पुरुषो निखिलमप्युपकारं विस्मृत्य विपरीतं व्यवहरति । किं बहुना वार्तालापमपि न वाञ्छति । एतादृश्यामवस्थायां कस्मै किमुच्यते, न किमप्युच्यते । यतो हि यद्युपकृतः पुरुषः स्वयं कृतज्ञो नास्ति चेत् अन्यैः सह किमपि कथनेन किं स्यात् । अतो मौनातिरिक्तं न मार्गान्तरम् । श्लोकेऽस्मिन् कविना सांप्रतिकः समाजसिद्धभावः प्रकटितः । विशेषतो राजनीतिक्षेत्रे, समाजसेवाक्षेत्रे, क्षेत्रान्तरेषु चैतादृशी विसंगतिर्दृश्यते । स्वार्थपरायणाः पुरुषाः स्वार्थं साधयितुं सर्वानतिशाय्योपरि गन्तुं वा पूर्वं विनयेनान्यान् सोपानरूपेण प्रयुज्योन्नतं स्थानं भजन्ते, ततःपदाहत्या सोपानमुद्वर्त्य स्वकीयमभीष्टं निष्कण्टकं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
विधास्यन्ति । वस्तुत एतत् सर्वं खलजनसाधारणम् । कविनात्र स्वानुभूतिसिद्धमेव विषयजातं प्रकटितं स्यात् । एवञ्च कविना मर्कटानां स्वभाववर्णनव्याजेन मूर्खानां स्वभावोऽपि रुचिरतया प्रस्तुतः । यथा–

युक्तं सभायां खलु मर्कटानां शाखास्तरुणां मृदुलासनानि ।
सुभाषितं चीत्कृतिरातिथेयी दन्तैर्नखाग्रैश्च विपाटितानि ॥[१०] इति ॥

अत्र मर्कटानां प्रवृत्तिर्वर्णिता । मर्कटानां कृते सभा नोपयुक्ता । सभा तु सभ्यानां कृते एव । तेषां तु तरूशाखा एव मृदुलासनानि, चीत्कार एव सुभाषितानि एवं दन्तैर्नखाग्रैश्च विदारणानि एवातिथिसत्कारः । एतदतिरिक्तं तेषां कृते न स्वभावानुरूपम् । मर्कटवर्णनादत्र मूख ॅवर्णनमभिप्रेतम् । मूर्खाः सभायाःमर्यादामनुशासनं वा नैवावगच्छन्ति । अतःमूर्खजनसंपर्को नोपयुक्त इति कथनस्यास्याशयः । 'न मूर्खजनसंपर्कः सुरेन्द्रभवनेष्वपि'इतिनीतिवचनं चरितार्थयतीदं पद्यं निश्चप्रचम् । मूर्खं प्रति कविःकिञ्चित् रूष्ट इव दरीदृश्यते । स्वकीयेऽस्मिन् काव्यप्रवन्धे मूर्खसंवद्धानि सुभाषितानि कविना बहुभाषितानि, यत् अवलोकनेनैवावगच्छामः । तत्संवद्धमेव पद्यान्तरं यथा–

हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः ।
लेढि जिघ्रति सङ्क्षिप्य करोत्युन्नतमाननम् ॥[११] इति ॥

अत्र मर्कटस्वभाववर्णनादप्रस्तुतात् प्रस्तुतस्य कस्यापि मूर्खस्य प्रतीतिर्जायते । पद्यस्यास्याशयो विद्यते यत्- 'योग्यं योग्यायदातव्य'मिति । प्रस्तुतःमूर्खजनो न कदाचिदपि पात्रं भवितुमर्हति । पात्रत्वाभावविशिष्टं मूर्खं सर्वे यथायथं जानीयुरिति कवेर्हार्दम् । अत एव तत्संबद्धा चर्चासकृत् चर्चिता चारूरचनाचुञ्चुनानेन कविना । एवञ्च काव्यं प्रति कवेरस्य सम्मानपूर्णाभिव्यक्तिर नुभूयते । काव्यमर्मविदां न्यूनतां द्योतयतानेन उच्यतेऽस्मिन् विलासे यत्–

तत्त्वं किमपि काव्यानां जानाति विरलो भुवि ।
मार्मिकःको मरन्दानामन्तरेण मधुव्रतम् ॥[१२] इति ॥

अत्र दृष्टान्तालंकारमाध्यमेन काव्यतत्त्वज्ञस्य प्रायोऽभावःप्रतिपादितः । जगति काव्यकर्तारो बहवः सन्ति । काव्यपाठकानामपि न्यूनता न दृश्यते, परं याथार्थेन काव्यमर्मविदां वैरल्यं निश्चप्रचम् । यथा मकरन्दानां सेवकाः सन्ति सहस्रशोऽन्ये, परं तस्य तत्त्ववेत्ता केवलं भ्रमर एव, तथैव काव्यसम्बन्धिनोऽपि वेविद्यन्त एवासंख्यसंख्यावन्तः परं तेषु मार्मिकःकश्चिदेव पुरुषः संबोभवीतीति तज्ज्ञानां तात्त्विकविचारः । कवेः काव्यज्ञविषये यथा सुविपुला चिन्ता चेतसि चित्रिता तथैव विधेर्व्यवस्थापि न सन्तोषायत्ता । यद्यपि नियतिर्न केनापि नियन्त्रिता तथापि तस्याः तदुच्छृङ्खलत्वं न कोविदजनकमनीयम् । प्रदर्शितं चात्र विधिकृतं विसंगतित्वं यथा–

अयाचितः सुखं दत्ते याचितश्च न यच्छति ।
सर्वस्वंचापि हरते विधिरुच्छृङ्खलो नृणाम् ॥[१३] इति ॥

विधिर्हि सदानभिमतमेव प्रयच्छति । प्रायोऽकाण्डताण्डवं विधेः कृत्यम् । सुखार्थिनं दुःखेन, निष्पृहं च सुखेन यथायथं संयोज्य विधिर्वैपरीत्यं निर्वहति । कदाचित् कस्यचित् सर्वस्वमपि स्वीकृत्य निराधारमपि विदधाति । एतत् विधेर्विधानम् । कोऽपि कथञ्चिदपि तत् समुल्लंघयितुं न पारयति । जनान् पुरस्कृत्य तेषामुपरि नियतेर्या क्रीडा विद्यते तत्र कविः प्रसन्नो नास्ति । कविना स्वान्तर्हृन्निष्ठासन्तुष्टिरत्राभिव्यक्ता परिलक्ष्यते ।

३. उपसंहारः

भामिनीविलासान्तर्गते प्रथमे प्रास्ताविकेऽस्मिन् विलासे रीत्यानयान्योक्तिमाध्यमेन कविना बहवो विषयाःप्रतिपादिताः । नैकविधविषयनिष्णातः कविताभामिनीनाथो जगन्नाथ एतादृशीभी रम्यरचनाभिरितरसाधारणान् कवीश्वरानतिशाय साहित्यशास्त्रमध्यास्ते । वस्तुतोऽस्य काव्यरचनायां सारल्यातिरिक्तं स्वतःस्फूर्तत्वं सहजत्वञ्चानुभवन्ति काव्यमर्मविदो विबुधाः । अत एव सुभाषितं भाषितं केनचित्–

कवयति पण्डितराजे कवयन्त्यन्येऽपि विद्वांसः ।
नृत्यति पिनाकपाणौ नृत्यन्त्यन्येऽपि भूतवेतालाः ॥[१४] इति ॥

सूक्तीयं नातिशयमाधत्ते । यस्य जयिनःकाव्यविशिखा रसिकजनेषु न जातु जीर्णाः शीर्णाश्च । देशकालादिपरिच्छेदमतिक्रम्य वर्तमानोऽस्य कवितासविता कदाचिदपि नैवास्तमेतीति तदीयकाव्यवन्धसम्वद्धहृदयानां सतोषडिण्डिमघोषः सर्वैरस्माभिर नुभूत एव । वस्तुतो जगन्नाथस्य काव्यमन्यस्य काव्यापेक्षया विलक्षणं विभाति, एवञ्च काव्यसिद्धान्तसंवद्धो लाक्षणिको ग्रन्थो रसगंगाधरोऽप्यन्येषां लाक्षणिकग्रन्थापेक्षया विलक्षण एव वेविद्यते । अस्य कवेः प्रवृत्तिरप्यनितरसाधारणास्तीत्यत्र न केऽपि संशेरते । एको देवः केशवो वा शिवो वा इतिअन्येषां विचारः, परं न तत्रास्य संमतिः । अयं महानुभावस्तु निलिम्पनिर्झर्याः विलोलवीचिवल्लरीं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समुपास्ते भक्तिसिञ्चितचेतसा। समुद्घोषयति च सगर्वं समेषां पुरतः–

तवालम्वादम्ब ! स्फुरदलघुगर्वेण सहसा
मया सर्वेऽवज्ञासरणिमथ नीताः सुरगणाः।
इदानीमौदास्यं यदिभजसि भागीरथि ! तदा
निराधारो हा ! रोदिति कथय केषामिह पुरः ॥[१५] इति ॥

इत्थं गंगां प्रति कवेर्नैसर्गिकी भक्तिर्दृश्यते। स्वरचनायां जननीकल्पां जाह्नवीं सदैव स्मरति। यद्यपि प्रकृतग्रन्थेऽनेन गंगासंबद्धं पद्यपुष्पं नैव प्रकटितं तथापि अन्यत्रैदम् प्राथम्येन तत् परोक्षतया प्रत्यक्षतया वा स्मृतमनुभूयते। गंगाकृपावलम्बितोऽयं भक्त्युद्रेकात् स्वयमादिशति जननीम्– 'जगन्नाथस्यायं सुरधुनि ! समुद्धारसमयः'इति। अतो गंगाभक्तोऽयं सुरभारतीसाहित्ये विलक्षणस्रष्टृत्वेन विराजते। लक्षणग्रन्थकारेष्ववर्वाचीनत्वेन परिगणितःपण्डितराजो न केवलं संस्कृतसमुपासकानामपित्वन्येषां विदुषामपि समादरणीयः स्मरणीयश्च मन्यते। एतस्य काव्यपठने पाठकानामन्तर्हृदि काप्यनीर्वचनीया भावाभिव्यक्तिर्जायते। हेलया खेलया च काव्यकिसलयमाकलयितुं प्रभवस्य जगन्नाथस्य सम्मानं तत्काव्यचिन्तनेनैव भवतीति तदेवानुष्ठितमत्र। 'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्'[१६] इति नीतिशास्त्रसरणिमनुसृत्य विहितमिदं भामिनीविलासचिन्तनं समेषामेव पाठकानां विलासाय विलसेदिति।

पादटिप्पणी

१. भामिनीविलासः, भूमिका पृ. ५।
२. सुभाषितरत्नभाण्डागारम्, पृ. ३५।
३. भीमनीविलासः, श्लो. १।
४. भामिनीविलासः, श्लो. ६।
५. शिवराजविजयभूमिका,पृ. ३।
६. पञ्चतन्त्रम्, पृ. ५०।
७. भामिनीविलासः, श्लो. ४४।
८. भामिनीविलासः, श्लो ७२।
९. भामिनीविलासः, श्लो. ७६।
१०. भामिनीविलासः, श्लो. ८३।
११. भामिनीविलासः, श्लो. ९६।
१२. भामिनीविलासः, श्लो. ११४।
१३. भामिनीविलासः, श्लो. १२४।
१४. सुभाषितरत्नभाण्डागारम, पृ. २५।
१५. गंगालहरी, पृ. ३७।
१६. हितोपदेशः, पृ. ५०।

सन्दर्भग्रन्थाः

अम्बिकादत्तव्यासःशिवराजविजयः, बौद्धभारती, वाराणसी, सन् १९९८।
जगन्नाथःगंगालहरी, मोतीलालवनारसीदास, वाराणसी, सन् २००२।
जगन्नाथःभामिनीविलासः, चौखम्बाविद्याभवन, वाराणसी, सन् १९७५।
विष्णुशर्मा पञ्चतन्त्रम्, चौखम्वाविद्याभवन, वाराणसी, सन् १९८७।
सुभाषितरत्नभाण्डागारम् (सं. काशीनाथशर्मा) चौखम्बाविद्याभवन, वाराणसी, सन् १९८०।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हलन्त्यम् इति सूत्रेऽद्वैततत्त्वम्

उपाध्यक्ष स्वामी केशवानन्दगिरिः
महेशसंस्कृतगुरुकुलविद्यापीठम्

१. विषयप्रवेशः

विदितचरमेव विद्वद्भिः प्राचीनकालाद् आधुनिकसमयं यावद् निर्झरिणी ज्ञानगङ्गा निरन्तरं स्यन्दनशीला विद्यते । तत्र च संसारे यावदपि ज्ञानं प्रावर्तत तावतः सर्वस्यापि आदिस्रोतोऽस्ति भगवती श्रुतिः । सा च श्रुतिः शब्दमूलिकैव । एतेन व्याकरणशास्त्रस्याप्यादिमूलं वेद इति निश्चप्रचम् । व्याकरणन्तु वेदपुरुषस्य आननमेव विद्यते । उक्तञ्च पाणिनीयशिक्षायाम् - "मुखं व्याकरणं स्मृतम् ।"

वेदवदनीभूतमिदं व्याकरणशास्त्रं मूलतः शब्दरूपमेव । अतो वेदतत्त्वार्थज्ञानाय व्याकरणशास्त्रज्ञानं नितान्तमावश्यकम् । उक्तञ्च भर्तृहरिणा - "अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् । तत्त्वाववोधः शब्दानां नास्ति व्याकरणादृते ॥" वा.प.ब्र.का.१३ सर्वं शब्देन भासते इत्युक्त्यापि शब्दज्ञानमन्तरेण भाषाज्ञानं न प्रभवति । प्रभास्वरूपशब्दसूर्येण लोकोऽयं प्रकाशितः । उक्तञ्च दण्डिना -

"इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥"

द्वितीयाद् वै भयं भवतीति श्रुत्यनुसारेणाद्वैतज्ञानं विना भयस्य विनाशो न भवति । अद्वैतज्ञानञ्च द्वितीयत्वज्ञानं नाशयति । एवञ्च जीवपरमात्मनोः साक्षात्कारद्वारा दुःखानां निवृत्तिर्भवति । तदेव मुक्तिशब्देन उच्यते वेदान्तशास्त्रे । उक्तञ्च - मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ॥[1] द्वयोर्भावो द्विता । सैव द्वैतमिति । स्वार्थे अण्-प्रत्ययः । न द्वैतमद्वैतम्, द्वैताभावः । तदस्यास्तीत्यद्वैतम् । अत्राद्वैतं ब्रह्म[2] । उच्यते च सान्तं शिवमद्वैतं चतुर्थं मन्यन्ते । स आत्मा स विज्ञेयः[3] इति । एकमेवाद्वितीयं ब्रह्म[4] । सर्वं खल्विदं ब्रह्म, नेह नानास्ति किञ्चन इत्यादिभिः श्रुतिवचनैः तदेतदद्वैततत्त्वं पौनःपुन्येन समुद्घोष्यते । इदमद्वैततत्त्वं प्रत्यक्षानुमानोपमानानुपलब्ध्यर्थापत्त्यादिप्रमाणद्वारा प्रमाणयितुं नैव शक्यते, अपितु शब्दप्रमाणेनैव प्रमाणयितुं शक्यते । यतो हि इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यः शब्दराशिः वेदयत इति स एव वेदः इति वेदस्य व्युत्पत्तिः । अतऽलौकिकोपायस्य बोधकत्वं वेद एव । ज्योतिष्टोमदर्शपूर्णमासादिरिष्टप्राप्तिहेतुरात्मतत्त्वस्य श्रवणमनननिदिध्यासनद्वारा स्वस्वरूपस्यानुसन्धानं कृत्वा जीवब्रह्मणोः साक्षात्कारद्वाराद्वैतात्मतत्त्वस्य प्राप्तिहेतुर्वेद एव । उक्तञ्च- आत्मावारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः[5] । वेदस्य महनीयताविषये विविधेषु शास्त्रेषु विभिन्नाः खलूक्तयः प्रसिद्धाः सन्ति । उक्तञ्च -

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुद्ध्यते ।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥ इति

एतादृशस्य महनीयस्य वेदस्याङ्गभूतं खलु पाणिनीयव्याकरणम् । वेदस्य यः सिद्धान्तः स एव सिद्धान्तः तदङ्गभूतस्य पाणिनीयव्याकरणस्यापि । उक्तञ्च महर्षिणा महाभाष्यकारेण पतञ्जलिना- सर्वं वेदपारिषदं हीदं शास्त्रम् । तत्र नैकः पन्था शक्य आस्थातुमिति ।

२. दर्शनपरिचयः

दृश्यते अनेन इति दर्शनम् । दृशिर्-प्रेक्षणे इत्यस्माद् धातोः ल्युट्-प्रत्यये विहिते सति दर्शनशब्दो निष्पद्यते । दर्शनशब्दः खलु ईश्वरजगज्जीवादीनां विषये प्रतिपादितानां यथार्थस्वरूपप्रदर्शकसिद्धान्तानां कथनं विधत्ते । उपनिषत्प्रतिपाद्यस्य ब्रह्मस्वरूपस्य विलोकनं, दर्शनं, ग्रहणं वा मनुष्यबुद्धिद्वारा कर्तुमर्हति[6] । शास्त्रस्य मनुष्याधिकारित्वाद् दर्शनशास्त्रेऽपि मनुष्यमात्रस्य प्रवृत्तिः । सर्वेऽपि मनुष्याः स्वस्वबुद्ध्यनुसारेण वस्तुस्वरूपनिर्णयं कुर्वन्तीति तेषां मौलिको स्वभावः । परमस्यैव भावस्यानेकविचारकैः

---

१ ईशादि दश उपनिषद्, मन्त्र ७, डा.स्वामी रामानन्द गिरि, (व्याख्या, महेश-संस्कृत-गुरुकुलम्, देवघाटधाम, तनहूँ), पृ.३३ ।

२ पाणिनीयव्याकरणेऽद्वैतवादः, आचार्यः श्रीरामप्रसादः त्रिपाठी, सारस्वती सुषमा, वर्ष ४१, अङ्कः १-४, सम्पूर्णानन्दसंस्कृतविद्यालयानुसन्धानपत्रिका, पृ.२५५ ।

३ ईशादि दश उपनिषद्, पूर्ववत्, पृ.३२३

४ छान्दोग्योपनिषद् ६२१ गीताप्रेस गोरखपुर, ग्यारहवाँ संस्करण २०६१ पृ. ५२५

५ वृहदारण्यकोपनिषद् २४५ पूर्ववद् पृ. ५४७

६ ब्रह्मावलोकधीपणमुदमापदेवः । भागवत, ३० औं संस्करण, गीताप्रेस गोरखपुर, २०६५, पृ.५७८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तर्कात्मकचिन्तनसरण्या ऊहापोहरूपेण प्रतिपाद्य स्थीरीकरणे च स एव सिद्धान्तो दर्शनरूपतां धत्ते । यद्यपि - सम्यग्दर्शनसम्पन्नाः कर्मभिर्न निबध्यते इति वचनानुसारं दृश्यते इति भावव्युत्पत्त्या ज्ञानमेव दर्शनपदवाच्यम् । वृहदारण्यकोपनिषदि च "आत्मावारे द्रष्टव्यः, श्रोतव्यो, मन्तव्यः...." इत्यत्र दर्शनशब्देन ज्ञानमेवाभिप्रेतम्, तथापि दार्शनिकसमाजे "दृश्यते अनेन" इति करणव्युत्पत्त्या ज्ञानसाधनमेव दर्शनपदेन प्रसिद्धम् । एका च प्रसिद्धा परिभाषा वर्तते-

सम्पूर्णाया दृश्यसृष्टेर्यद्भवेन्मूलकारणम् ।
तज्जिज्ञासा तदर्थश्च प्रयत्नो दर्शनं स्मृतम् ॥

दर्शनशब्दस्य समानार्थकत्वेन पाश्चात्त्ये प्रसिद्धस्य (Phylosophy) फिलोसोफि[७] इति शब्दस्य अर्थो भवति - "विद्यां प्रत्यनुरागः" इति । कल्पनाकुशलाश्चिन्तका येन विचारेण मनो विनोदयन्ति, स एव विचारः तत्र दर्शनपदेन व्यवह्रियते । पौरत्यसंस्कृतौ दर्शनशास्त्रं वस्तुतत्त्वज्ञानद्वारा तापत्रयविनाशकमिति स्वीकृतं वर्तते, परन्तु पाश्चात्त्यसंस्कृतौ स्वस्वमनोविनोदसाधनमेव[८] । इत्थं प्राच्यसंस्कृतौ तच्छास्त्रमेव दर्शनं यज्जगतो यथार्थस्वरूपकथनेन भ्रान्तिमूलकानां शोकमोहादीनामुन्मूलनं विधाय मनुष्याणां कल्याणं कुर्यात् । जगत्कारणतत्त्वस्य वस्तुनः सिद्धिर्विचारेणैव भवति - वस्तुसिद्धिर्विचारेण । सनातनस्य परमज्ञातस्य वस्तुनो ज्ञाने दर्शने वा केवलं विचार एव उपाय इति हेतोः पौरस्त्यसंस्कृतौ तत्त्वचिन्तनमेव दर्शनपदेनाभिधीयते ।

३. दर्शनपृष्ठभूमिः

यत आरभ्य अस्मिन् जगति ब्रह्मावलोकनक्षमामनुष्यबुद्धिः स्वकारणतत्त्वस्यान्वेषणे प्रवृत्ताः, तत एव दर्शनानां बीजभूता विचाराः समुत्पन्नाः । सरित्-शैल-समुद्र-कानन-सूर्य-शशि-तारादिभिर्विचित्ररचनारूपाया विशालतमायाः सृष्टेर्दर्शनेन भयवशादाश्चर्यवशाद्वा निमीलितनयना मनुष्यनामकाः प्राणिनो विचारद्वारा अनेकरूपेऽपि जगति एकस्यैव चेतनतत्त्वस्य अवस्थानमन्वेषयामासुः । सृष्टेः पूर्वं किमासीत् ? इदं जगत् कथमुत्पन्नम् ? अस्य जगत आधारः कः ? कुत्र च विलीयते ? इति मननेन समुत्पन्नज्ञान एको मन्त्रद्रष्टा ऋषिः ऋक्संहितायामवोचत्- न मृत्युरासीदमृतं न तर्हि न रात्र्याऽह्नऽआसीत् प्रत्येकः, आनीदवातं स्वधया तदेकं तस्माद् धन्यन्नपरः किञ्च नाशः ॥[९] इति

अर्थात् सृष्टेः पूर्वं न मृत्युः, न च अमरत्वमेवासीत् । रात्रिदिवसयोर्भेदोऽपि नासीत् । स्वधाशक्तियुक्तमेकमेव तत्त्वमासीदिति ।

केचन विचारकाः विशालायां सृष्टा एव सहस्रहस्तपादशिरःसंयुक्तस्य विराट्पुरुषस्य दर्शनमकार्षुः । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सभूभिं सर्वतस्पृष्ट्वा त्यतिष्ठ दशाङ्गुलम् ॥[१०]

अर्थात् समेषु लोकेषु व्याप्तः परमात्मा वर्तते । तस्य सहस्रं शिरांसि सन्ति । सहस्रं नेत्राणि सन्ति । सहस्रं पादाः सन्ति । तेन पुरोदृश्यमानं समष्टिरूपं व्यष्टिरूपं च पाञ्चभौतिकं प्रपञ्चं व्याप्तं वर्तते । स एव परमात्मा अस्माकं नाभेः दशाङ्गुलपरिमितं भूमिमतिक्रम्य स्थितो वर्तते । स एव च परमात्मा अस्माकहार्दाकाशे अन्तर्यामिरूपेण स्थितोऽस्ति ।

अन्ते च उपनिषत्प्रचारका मुनयो जगद्रूपेण दृश्यमानं तदेव चित्तत्त्वं प्रतिशरीरमनेकरूपेण विभाव्यमानं परं सर्वदा एकरूपं प्राणिनां हार्दाकाशे दहरे वा स्थितस्यात्मन एव स्वरूपं जगत्कारणतत्त्वाभिन्नत्वेन पश्यन्त उद्घोषितवन्तः - तत्त्वमसि[११] ।

इत्थं मननशीलैः वेदतत्त्वार्थावगन्तृभिर्मुनिभिर्मनसि साक्षात्कृतं मन्त्ररूपेणाभिव्यक्तं वेदार्थमालोडयन्तोऽर्वाचीना दार्शनिकाः तत्रैव स्वाभिमतार्थस्य संगतिं प्रदर्श्य नैकविधान् सिद्धान्तान् प्रचारयामासुः । केचन तु मन्त्रद्रष्टृणामृषीणामनुभवविचारान् अनपेक्ष्यैव स्वतन्त्ररूपेण जगत्कारणतत्त्वचिन्तने प्रवृत्ताः।एवं प्राच्यसंस्कृतौ प्रमुखाणां द्वादशदर्शनानामेव पृष्ठभूमित्वेन वेदोपनिषत्स्मृत्यादिवाङ्मयो ग्रहणीयः । तत्र वेदोपनिषदां तदर्थप्रतिपादकस्मृतिपुराणादीनाञ्च प्रामाणिकत्वं निःसन्देहं स्वीकुर्वन्ति, तदनुकूलं मुनीनामनुभवविषयञ्च विचारयन्ति । तानि दर्शनानि आस्तिकदर्शननाम्ना अभिधीयन्ते चेत् स्वानुभूतिबलात् स्वविचारबलाद्वा तत्त्वनिर्णयं कुर्वन्ति । शास्त्रप्रमाणनिरपेक्षाणि अन्यानि दर्शनानि नास्तिकदर्शननाम्ना अभिधीयन्ते ।

४. दर्शनानां प्रयोजनम्

पाश्चात्त्यदार्शनिकाः कौतूहलवशादेव तत्त्वचिन्तने प्रवृत्ताः । अतस्तेषां तात्कालिकजिज्ञासानिवृत्तिरेव फलम् । परं प्राच्यदर्शने

---

७ The study of the fundamental nature of knowledge.,oxford dictionary, tenth edition page.1073
८ भारतीयदर्शनम्, वलदेवोपाध्यायः, पृ. ४
९ शोध, गुरूप्रसाद सुवेदी , पृ. १६९
१० शु.वेदः, ३१/१
११ छान्दोग्योपनिषद्, शांकरभाष्यम्, एघारहवाँ संस्करण, गीताप्रेस, गोरखपुर, पृ.६४४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वस्तुतत्वनिर्णयद्वारा अज्ञानवशात् आध्यात्मिक-आधिभौतिक-आधिदैविक-त्रिविधतापतप्तानां सांसारिकजनानां तापनिवृत्तिरेव फलम्। पाश्चात्त्ये परम्पराप्राप्तो धर्मो जीवने प्रयुज्यते। परं दार्शनिकविचारः केवलं व्यक्तिगतमनोविनोद एव पर्यवस्यति चेत् पौरस्त्ये क्रियापरकं धर्मशास्त्रं, ज्ञानपरकं च दर्शनशास्त्रमुभयमपि मानवीयजीवने सहैवोपयुज्येते[१२]। अत्र पण्डितविचारकानां व्यक्तिगतमनोविनोद एव न दर्शनम्, अपितु संसारतापतप्तानामज्ञानिनां सामान्यप्राणिनां क्लेशनिवृत्तिरेव दर्शनस्य प्रयोजनं विद्यते। आहारनिद्राभयमैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम्।

ज्ञानं हि तेषामधिको विशषो ज्ञानेन हीनाः पशुभिः समानाः॥[१३]

अर्थाद् आहार-निद्रा-भय-मैथुनानि मनुष्येषु पशुषु च समानधर्माः। परमाहारनिद्रादीनां चिन्ताभिर्मुक्तः पुरुष एव ज्ञानी भवति। स एव च पुरुषः दर्शनविचारे प्रभवति। अत एव सनातनो धर्मः समेषां प्राणिनां क्लेशनिवृत्त्यर्थं प्रयासाय प्रेरयति। अत्र धर्मः सर्वभूतदयामुपदिशति चेद् दर्शनशास्त्रं सर्वेषु भूतेषु तिष्ठन्तं सेवनीयमेकमेव परमेश्वरं प्रदर्शयति। प्रतिश्वासं धर्मदर्शनयोरित्थं दुर्लभमैकात्म्यमध्यात्मचिन्तनद्वारैव प्राप्यते। तत्रापि विशेषतः सर्वभूतैकत्वरूपवेदार्थनिर्णय उपनिषत्सु प्रकटितः।

अध्यात्मविद्या सर्वविद्याप्रतिष्ठिता वर्तते इति मुण्डकोपनिषदि श्रूयते चेद् गीतानामपि श्रीकृष्ण उपदिशति - अध्यात्मविद्या विद्यानामिति[१४]। सर्वमपि शास्त्रीयं ज्ञानं केवलं नामरूपमेव। तद्द्वारा केवलं कौतूहलनिवृत्तिर्भवति। न च क्लेशनिवृत्तिरिति। इत्थं वेदशिरोभिः उपनिषद्भिर्दर्शनरूपविचारस्य तत्त्वसाक्षात्कारद्वारा शोकनिवृत्तिरूपे फले उपदिष्टे ब्रह्मविचारातिरिक्तदर्शनानि व्यवहारेऽङ्गत्वेन तमेवोपकुर्वन्तीत्यवधेयम्। अतः समेषां दर्शनानां तत्रापि विशेषतः आस्तिकदर्शनानां प्रयोजनं शोकनिवृत्तिः। परं तत् कुत्रचित् परम्पराद्वारा, कुत्रचिच्च स्वरूपत एवेति विशेषः।

दर्शनानि खलु भागद्वये विभक्तानि सन्ति- आस्तिकदर्शनानि, नास्तिकदर्शनानि चेति। आस्तिकनास्तिकादीन् शब्दान् विवेचयन् पाणिनिः स्वकीये सूत्रे स्मरति - अस्ति नास्ति दिष्टं मतिः[१५] अर्थात् अस्ति परलोकं मतिर्यस्य आस्तिकः। नास्ति परलोकं मतिर्यस्येति नास्तिकः। मनुश्च नास्तिको वेदनिन्दकः[१६]। एतं मतमेव स्वीकृत्य दर्शनपरम्परायां मन्त्रब्राह्मणात्मकस्य शब्दराशेर्वेदस्य प्रामाण्यं यः स्वीकरोति स आस्तिकः। यश्च स्वीयबुद्धिबलादेव शास्त्रनिरपेक्षत्वेन तत्त्वनिर्णये प्रवर्तते स नास्तिक इति विभागः कृत इति। विचित्ररचनारूपेऽस्मिन् जगति स्वबुद्धिबलादेव तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् इतिवत् पारं यान्ति न वा इत्यत्र सन्देहः। मनोवचसामगोचरः परमात्मा शास्त्रीयचिन्तनप्रणाल्या एव समधिगम्यः। स च परमात्मा स्वानुभवरूपः। न च इन्द्रियगम्यः। स तु साक्षादपरोक्षः, चिद्रूपः, प्रकाशरूपः, आनन्दस्वरूपः, बोधस्वरूपः, अनुभवस्वरूपश्च। अतः पौरस्त्यदर्शने परमात्मस्वीकारापेक्षयापि वेदस्वीकारो गरीयान्। वेदप्रामाण्यस्वीकाराच्च वैशेषिकदर्शनम्, न्यायदर्शनम्, सांख्यदर्शनम्, योगदर्शनम्, मीमांसादर्शनम्, वेदान्तदर्शनञ्चेति षड् आस्तिकदर्शनानि। अन्यानि च माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिक-चार्वाक-जैनानि षड् नास्तिकदर्शनानीति ज्ञेयम्। मनुमते तु आत्मदर्शनस्यैव परमधर्मत्वाद् ब्रह्मदर्शनोपायभूतं ब्रह्मविचाररूपं वेदान्तदर्शनमेव शास्त्रप्रतिपाद्यत्वं सर्वाधिकं स्वीकरोतीति तस्यैवास्तिकवरिष्ठत्वमित्यवधेयम्।

५. वेदान्तदर्शनम्

वेदस्य अन्तो निर्णयः = वेदान्तः इति व्युत्पत्या वेदान्ततात्पर्यनिर्णायकस्य उपनिषत्खण्डस्य अभिधानमेव वेदान्त इति। ज्ञानस्यादिस्रोतोद्भूता उपनिषदः सर्वं खल्विदं ब्रह्म, तत्त्वमसि, ब्रह्मैवेदं सर्वं सच्चिदानन्दरूपम्[१७] इत्यादिमन्त्रैः ईश्वरजगज्जीवानां ब्रह्मस्वरूपं निःसन्देहरूपेण साधयन्तीति हेतोर्वेदान्ते ब्रह्मणोऽद्वितीयत्वं, तद्व्यतिरिक्तस्य कृत्स्नस्यापि प्रपञ्चस्य मिथ्यात्वमङ्गीक्रियते। उपनिषदामेकवाक्यताकरणे यत्तात्पर्यं निःसृतम्, तदेव विचारशास्त्रं वेदान्तदर्शनम्[१८]। नात्र नवीनसिद्धान्तः प्रतिपादित इति वेदान्तदार्शनिकानामुद्घोषः। वेदान्तदर्शनेऽस्मिन् श्रुतिस्मृत्यादिप्रतिपादितानां कर्मभक्तिज्ञानध्यानादिसिद्धान्तानां परम्पराबद्धः समन्वितक्रमोऽधिकं निरूप्यते इति आधुनिकमनुष्याः शास्त्रचिन्तका विद्वांसश्च युक्तियुक्तस्यैतस्यैव वादस्याधिकं समर्थनं कुर्वन्तीति हेतोरपि वेदान्तदर्शनस्य मूलवैदिकसिद्धान्त एवायमित्यनुमीयते। तत्र वेदान्तदर्शनम् अनाद्यनिर्वचनीमायाशक्त्या ब्रह्मण एव ईश्वरजगज्जीवादिवाच्यता स्वीक्रियते। सत्त्वरजस्तमोगुणेषु चित्प्रतिबिम्बाः

१२ भारतीयदर्शनम्, बलदेवोपाध्यायः, पृ. ९

१३ नीतिशास्त्रम्

१४ श्रीमद्भगवद्गीता, १०/३२

१५ अष्टाध्यायी, ४/४/६०

१६ मनुस्मृतिः,

१७ १०८ उपनिषद्, श्रीरामशर्मा आचार्य(सम्पादक), ब्रह्मवर्चस(शान्तिकुञ्जहरिद्वार),

१८ वेदान्तो नामोपनिषत्प्रमाणम्, वे.सा., पूर्ववत्, पृ.५।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ईश्वरजगज्जीवरूपाः भवन्ति, पारमार्थिकव्यावहारिकप्रातिभासिकरूपसत्तात्रयस्वीकारेण वेदान्तिनो जीवस्य ब्रह्मरूपत्वं साधयन्ति। पञ्चकोशविवेकक्रमेण तैत्तिरीये, अवस्थात्रयविवेकत्रयेण च बृहदारण्यकच्छान्दोग्यमाण्डूक्यादिषूपनिषत्सु जीवस्य ब्रह्मरूपत्वं साधितम् । भ्रमकालेऽनिर्वचनीयरजतोत्पत्तिवादिनामेतेषामनिर्वचनीयख्यातिः प्रसिद्धास्ति । दार्शनिकचिन्तने मायाया भावरूपत्वं दृष्टान्तयन्तः एते तमसोऽपि भावरूपत्वं साधयन्ति । ब्रह्म सच्चिदानन्दरूपमस्ति, तत्राध्यस्तत्त्वादेव जगत्यपि सच्चिदानन्दांशानां प्रतीतिर्भवति, नामरूपांशौ तु मिथ्याभूतौ वर्तेते । वस्तुतः न आत्मनो बन्धः, न चास्य वस्तुतो मोक्षः, अपि तु अज्ञातं ब्रह्मैव बद्धम्, तदेव स्वस्वरूपज्ञानद्वारा ब्रह्मरूपं सन्मुक्तं भवती[१९]ति वेदान्तिनां मोक्षसिद्धान्तः ।

वेदान्तदर्शने प्रत्यक्षानुमानोपमानागमार्थानुपलब्धिरूपाणि षट् प्रमाणानि विद्यन्ते। तत्र प्रत्यक्षप्रमाणनिरूपणावसरे इतरदर्शनापेक्षया काप्यपूर्वता दृश्यतेऽत्र। तथा हि न्यायादिषु इन्द्रियाणामेव प्रत्यक्षप्रमाणत्वमङ्गीक्रियते, परं वेदान्ते भ्रमकाले इन्द्रियाणां प्रत्यक्षप्रमाणत्वस्य व्यभिचाराद्, अन्तःकरणवृत्तिनिष्ठचैतन्यस्यैव प्रमाणत्वं[२०] स्वीक्रियते । तच्च लौकिकघटादिज्ञाने स्याद् वा औपनिषदपुरुषस्य ज्ञाने । इन्द्रियद्वारा निर्गता चित्प्रतिबिम्बसहिता बुद्धिवृत्तिर्बहिर्देशे घटाद्यवच्छिन्नचैतन्यनिष्ठमज्ञानं नाशयति, ततश्च चैतन्याभेदेन वस्तु प्रकाशितं भवतीति विशिष्टं वेदान्तमतम् । अनुमानप्रमाणनिरूपणे च नैयायिकाभिमतपञ्चावयवेषु मध्ये अवयवत्रयाणामेव स्वीकारः, केवलान्वय्यनुमानस्यासिद्धिः केवलव्यतिरेकिणोऽर्थापत्तावन्तर्भावः इत्यत्रान्वयिमात्रमेकमेवानुमानं स्वीक्रियते । वेदानामपौरुषेयत्वम्, शब्दानां सिद्धार्थबोधकत्वमित्यादयो विशिष्टसिद्धान्ता एतद्दर्शनस्य । शाब्दनिर्णयदीपिकातत्त्वप्रदीपिकाद्वैतसिद्ध्यादिषु एते विषयाः बहुशो विचारिता विद्यन्ते ।

वेदान्ते विवरणप्रस्थानं भामतीप्रस्थानञ्चेति मतद्वयं प्रसिद्धम् । ब्रह्मणः स्वतः सिद्धैकतायां दत्तभूरिविचारा दार्शनिका दृष्टान्तशब्दादीनां प्रयोगवैचित्र्ये उदासीनाः सन्तो मतवैविध्यमिव प्रकटयन्ती[२१]ति सिद्धान्तलेशसंग्रहे अप्पयदीक्षितस्य कथनमस्ति । जीवस्य प्रतिबिम्बत्वाभासत्त्वावच्छिन्नत्वादिचिन्तनेऽपि तथैवाविद्यायाः ब्रह्माश्रिततत्त्वजीवाश्रिततत्त्वविषये च वेदान्ते मतभेदो वर्तते । जीवस्य नानात्वमेकत्वं वा इत्यादयोऽपि विषयाः स्वस्वविचारानुरूपं प्रतिपादिताः सन्ति, परं सिद्धान्ते न तावत् कश्चन भेदः ।

६. हलन्त्यम् १/३/३

आचार्यः पाणिनिः "वृद्धिरादैच्"[२२] इति सूत्रामारभ्य "अ अ"[२३] इति सूत्रं यावद् वेदस्यैवार्थमनुसरति । तत्र खलूपक्रमोपसंहाराभ्यां ज्ञायते - आकाराद् ब्रह्मणः वृद्धिं प्राप्तमिदं जगत् अन्ते च वासुदेवमये अकारे परमात्मन्येव अवतिष्ठते । अयमेव पाणिनीयव्याकरणस्याद्वैतत्वम् । वृद्धिरादैच् इति सूत्रे आकारः खलु स्रष्टा ब्रह्मैव । उक्तञ्च - अः विष्णुः प्रतिषेधः आः पितामहवाक्ययोः[२४] ॥ ब्रह्मा खलु वृद्धिं = सृष्टिं करोति । एतच्च पाणिनिना वृद्धिरादैच् इति सूत्रे स्पष्टं कृतम् । एवञ्च चरमेण "अ अ" इति सूत्रेण पाणिनिना निर्धर्मकं विशुद्धं मायातत्कार्यरहितं ब्रह्म सूचितं वर्तते । तच्च अव्ययम् । अन्ते च एतत्सर्वं भूतं भव्यं जगत् तत्रैव विलीयते । वृद्धिरादैच् इत्यनेन सृष्टं जगत् अन्ते च "अ अ" इत्यव्यये ब्रह्मणि विलीयते । तैत्तिरीये च यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्ति अभिसंविशन्ति तद्ब्रह्म[२५] इति ।

"अ अ" इत्यत्रायमकारो मायारहितं शुद्धं ब्रह्मैव । अत्र खल्वव्ययपदेन विशुद्धं निर्धर्मकं मायोपाधिशून्यं विशुद्धं ब्रह्म संकेतितमस्ति ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

एतेन ज्ञायते पाणिनीयव्याकरण अद्वैतब्रह्मणः प्रतिपादनं विद्यते । अत्र हलन्त्यमिति सूत्रस्याद्वैतदर्शनानुसारि व्याख्यानं विधीयते ।

हलन्त्यमित्यत्र हल् अन्त्यमिति द्विपदमिदं सूत्रम् । हल् इति प्रथमं प्रथमान्तं पदम् । अन्त्यमिति द्वितीयं प्रथमान्तं पदम् । अत्र

---

१९ ब्रह्मैव सन् ब्रह्माप्येत, ई.श.उ, पूर्ववत्, पृ.१९५

२० प्रमाणं चित्प्रतिबिम्बधारिणी बुद्धिवृत्तिस्तत्प्रतिबिम्बितं वा चैतन्यमे, प्र.त.प्र., स्वामी योगीन्द्रानन्द, (चौखम्बा विद्याभवन, वाराणसी), पृ.२

२१ प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परम् । सन्नह्यद्भिरनादरात् सरणयोः नानाविधा दर्शिता ।
सि.ले.सं., मूलशंकरव्यासः, (अनु.), (अच्युतग्रन्थमाला कार्यालय, काशी : सन् १९९३), पृ.२

२२ अष्टाध्यायी, १/१/१

२३ अष्टाध्यायी, ८/४/६८

२४ शब्दकल्पद्रम, राधाकान्तदेव, राष्ट्रियसंस्कृतसंस्थान, नयी दिल्ली, पृ.१६०

२५ ईशादि दश उपनिषद्, तैतिरीयोपनिषद्, भृगुवल्ली, प्रथम अनुवाक, पूर्ववत्, पृ.४११,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

खलु उपदेशेऽजनुनासिक इत्[२६] इत्यस्मात् सूत्राद् इत्, उपदेशे इति पदद्वयमनुवर्तते। "सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र[२७]" इति नियमानुसारेणानुवर्तते। एतेन सूत्रार्थो भवति - उपदेशे हल् अन्त्यम् इत् च भवति।

स्वयं राजन्ते इति स्वराः। अचः स्वराः। अचः खलु स्वयं प्रकाशरूपेण वर्तन्ते। अतः पाणिनीयव्याकरणे अचः स्वरपदेन उच्यन्ते - अचः स्वराः इति[२८]। अन्यैः–स्वरैः व्यञ्ज्यते प्रकाश्यत इति व्यञ्जनम्। व्यञ्जनञ्च हल् वर्णः। हलः स्वतन्त्ररूपेण उच्चारणं न भवति। न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणं भवति। अत एव पाणिनीयव्याकरणे लघुसिद्धान्तकौमुद्यामुल्लिखितमस्ति - हकारादिष्वकार उच्चारणार्थः[२९]। अत्र हल्-पदार्थः खलु अचः स्वयंप्रकाशस्य स्वरवर्णस्य साहाय्यं विना प्रक्रियायां नैव प्रयुज्यते। वेदान्तदर्शनानुसारेण ब्रह्म खलु स्वररूपं वर्तते। तच्च स्वयंप्रकाशरूपम्। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते[३०] इति। एतेन स्वयंप्रकाशरूपस्य स्वररूपस्य ब्रह्मणः सत्तां प्राप्यैव हल् प्रक्रियायां संलग्नो भवति। अत्र हल्-पदेन मायाकल्पितः प्रपञ्चो गृह्यते। प्रपञ्चः खलु माया, तत्कार्याणि पञ्चमहाभूतानि, शरीरेन्द्रियमनोबुद्ध्यादीनि। एवञ्च स्त्रीपुत्रादयोऽपि प्रपञ्चपदेनाभिधीयन्ते। तानि च हल्-स्वरूपाणि। हल् खलु अन्यस्मात् सत्तां प्राप्य सत्तावान् भवति। अत्र हल इत्थं व्युत्पत्तिर्विहिता वर्तते- हलति = कर्षति अन्यान् इति हल्। अन्ते भवः अन्त्यम्। हल् खलु अन्त्यं भवति अर्थाद् नाशवद्भवति अन्ते च तस्य विनाशः सुनिश्चितो वर्तते। एवञ्च उपदेशेऽजनुनासिक इत् इति सूत्राद् इत् अनुवर्तते। एति गच्छतीति इत्। नाशवद् हल् अन्ते परब्रह्मणि गत्वा एकीभवतीति सूत्रस्याशयः। सांसारिकाः ये केऽपि पदार्थाः सन्ति, ते खलु सर्वेऽपि पदार्थाः क्षणिकाः सन्ति। तेषां स्वकीयसत्ता नास्ति। ब्रह्मणः सत्तां प्राप्यैव ते सत्तावन्तः सन्ति। ब्रह्मण एव समुद्भूताः पदार्थाः अन्ते च ब्रह्मण्येव विलीयन्ते, परन्तु जन्मान्तरीयेण संस्कारेण गुरोरभावेन च सर्वेऽपि प्राणिनः तत्त्वसाक्षात्कर्तुं नैव प्रभवन्ति। जीवब्रह्मणोरैक्यं साक्षात्कर्तुं तु न शक्नुवन्ति। तत्त्वसाक्षात्कारं विना मुक्तिर्न सम्भवति। ज्ञानं विना च मुक्तिर्न भवति। ऋते ज्ञानान मुक्तिरिति वचनानुसारेणापि मुक्तये ज्ञानमपेक्षितम्। ज्ञानं च गुरूणां शास्त्राणां च कृपां विना न सम्भवति। अत एव हलन्त्यमिति सूत्रेऽपि उपदेशेऽजनुनासिक इत् इति सूत्राद् उपदेशे इति पदमनुवर्तते। उपदेशशब्दस्यार्थो भवति- तत्त्वकथनम्। शास्त्रे च उक्तं वर्तते - शास्त्राचार्योपदेशजन्यसंस्कारसंस्कृतं मन आत्मदर्शने करणम्। एतेन ज्ञायते शास्त्रकृपां गुरुकृपां च विना आत्मदर्शनं न भवति। आत्मबोधो न भवति अर्थात् जीवब्रह्मणोरैक्यसाक्षात्कारश्च न भवति। संसारयाथात्म्यावबोधो न भवति। अत उपदेशे सत्येव हलः शरीरस्य जगतो वा अन्त्यं नाशो भवति। इतश्च परमात्मसाक्षात्कारो भवति। तत एव मुक्तिर्जायते। अत एव भट्टोजिदीक्षितो हलन्त्यमिति सूत्रस्यार्थं करोति- उपदेशेऽन्त्यं हलित् स्यात्। गुरुणा तत्त्वमस्यादिवाक्योपदेशानन्तरं हलोऽस्य शरीरस्यान्त्यं भवति। तदनन्तरम् इत् जीवब्रह्मणोरैक्यं साक्षात्कारश्च भवति।

७. निष्कर्षः

दृश्यतेऽनेनेति दर्शनम्। दृश्-धातोर्निष्पन्नो दर्शनशब्दो जगज्जीवेश्वराणां यथार्थस्वरूपप्रदर्शनपूर्वकं तत्सिद्धान्तानामभिधानमभिधत्ते। दर्शनं खलु वस्तुतत्त्वज्ञानद्वारा तापत्रयविनाशपूर्वकं जगज्जीवेश्वराणां यथार्थस्वरूपकथनेन भ्रान्तिमूलकानां शोकमोहादीनामुन्मूलनं कृत्वा मनुष्याणां हितं करोति। पौरस्त्यदर्शनानुसारेण तत्त्वविचार एव दर्शनपदेनाभिधीयते। पौरस्त्यसंस्कृतौ षड् आस्तिकदर्शनानि वैशेषिक-न्याय-सांख्य-योग-मीमांसा-वेदान्तदर्शनानि सन्ति। एवञ्च माध्यमिक-योगाचार-सौत्रान्तिक-वैभासिक-चार्वाक-जैनानि षड् नास्तिकदर्शनानि सन्ति। आत्मदर्शनस्यैव परमधर्मत्वाद् ब्रह्मदर्शनोपायभूतं ब्रह्मविचाररूपं वेदान्तदर्शनमेव शास्त्रप्रतिपाद्यत्वमिति सर्वाधिकं स्वीक्रियते।

वेदस्याङ्गभूतं खलु व्याकरणशास्त्रं तत्रभवता पाणिनिना अष्टाध्यायी व्यरचि। अष्टाध्याय्यां प्रायश्चतुःसहस्रं सूत्राणि सन्ति। वेदाङ्गभूतत्वाद् व्याकरणशास्त्रं खलु वेदार्थपरम्। वेदार्थश्च तत्त्वचिन्तनमेव। तत्त्वं खलु एकमेव ब्रह्म। तस्य चिन्तनमेव व्याकरणस्य परमोद्देश्यम्। जीवब्रह्मणोरैक्यसाक्षात्कारं विना मुक्तिर्न भवतीति वेदाज्ञानुसारेण पाणिनीयसूत्रेऽपि तत्त्वचिन्तनस्य सरणिरूपदिष्टा। सा च सरणिः समेषु सूत्रेषु प्राप्यते। अत्र खलु हलन्त्यम् इति सूत्रेऽद्वैतवेदान्तदर्शनानुसारेण चिन्तनं विहितं विद्यते। अत्र हलन्त्यम् इति सूत्रे हल् खलु व्यञ्जनम्। व्यञ्जनं च न स्वयंप्रकाशरूपम्। तच्च शरीरवत् जडरूपम्। अन्यस्य सत्तां प्राप्यैव सत्तावद् भवति। यथा शरीरमात्मनः सत्ताद्वारा चेष्टादिकार्यं करोति तथैव हलपि शरीरमेव। तस्य च अन्त्यं सुनिश्चितमस्ति। यस्य

---

२६ अष्टाध्यायी, १/३/२

२७ लघुसिद्धान्तकौमुदी, गीताप्रेस, गोरखपुर, पृ. १०।

२८ लघुसिद्धान्तकौमुदी, संज्ञाप्रकरण, गीताप्रेस, गोरखपुर, आठवाँ पुनर्मुद्रण २०६७, पृ.१३

२९ पूर्ववत्, पृ.१०

३० ईशादि दश उपनिषद्, पूर्ववत्, पृ. १७६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यस्योत्पत्तिर्भवति तस्य च विनाशः सुनिश्चितः। सूत्रे निर्दिष्टं हल् जगदेवास्ति। तच्चोत्पत्तिमद् विनाशशालि चास्ति। कथं विनाशो जायते इति जिज्ञासायां गुरुमुखाच्छास्त्राणामुपदेशानन्तरं जीवब्रह्मणोरैक्यसाक्षात्कारे सति हल्-शरीरम्, अन्त्यम्-नाशं गच्छति। इच्च भवति अर्थात् परमात्मनि विलीयते। जीवब्रह्मणोरैक्यसाक्षात्कारद्वारा ब्रह्मविदब्रह्मैव भवतीति श्रुतिवचनानुसारेण ब्रह्मरूपो जीवो ब्रह्मैव भवति। ॐ अस्तु ॥

सन्दर्भग्रन्थसूची

- आचार्य पाणिनिः अष्टाध्यायी
- आचार्य वरदराज लघुसिद्धान्तकौमुदी, गीताप्रेस गोरखपुर, आठवाँ पुनर्मुद्रण, सं २०६७
- आचार्य शङ्कर छान्दोग्योपनिषद्, शांकरभाष्यम् (अनुवादसहित) एघारहवाँ संस्करण, गीताप्रेस, गोरखपुर
- आचार्य शङ्कर बृहदारण्यकोपनिषद्, शांकरभाष्यम् (अनुवादसहित) दशम संस्करण, गीताप्रेस, गोरखपुर
- आचार्य श्रीरामशर्मा (संपा) १०८ उपनिषद्, ब्रह्मवर्चस्, शान्तिकुञ्जहरिद्वार
- उपाध्याय, बलदेव भारतीयदर्शनम्, चौखम्बा ओरेन्टीयल वाराणसी सन् १९७९
- गिरि, डा. स्वामी रामानन्द(व्या) ईशादी दश उपनिषद्, महेशसंस्कृतगुरुकुल, वि.सं. २०७३
- त्रिपाठी, आचार्यः श्रीरामप्रसादः पाणिनीयव्याकरणेऽद्वैतवादः,सारस्वती नीतिशास्त्रम् मनुस्मृतिः,
- महर्षिवेदव्यासः श्रीमद्भागवतमहापुराण(अनुवादसहित) ३० औँ संस्करण, गीताप्रेस गोरखपुर, २०६५
- मूलशंकरव्यासः, (अनु.), सिद्धान्तलेशसंग्रह अच्युतग्रन्थमाला कार्यालय, काशी : सन् १९९३), पृ.२
- राधाकान्तदेव, राजा शब्दकल्पद्रमः, राष्ट्रियसंस्कृतसंस्थान, नई दिल्ली
- स्वामी योगीन्द्रानन्द प्रत्येकतत्त्वप्रदीपिका, चौखम्बा विद्याभवन, वाराणसी शुक्लयजुर्वेद श्रीमद्भगवद्गीता
- Persall, Judy oxford dictionary, oxford university press, tenth edition,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वाल्मीकिरामायणे राजनीतिशिक्षा

उपप्रा. डा. जनार्दनउपाध्यायः
वाल्मीकिविद्यापीठम्

वार्तमानिके काले विश्वमानवसमुदाये राजनीतिपरका शिक्षा केवलमर्थपरकैव समायोजितास्ति। पाश्चात्यजगति विद्यमानेषु राष्ट्रेषु सा शिक्षा न खलु समा दरीदृश्यते। प्रतिराष्ट्रं राजनीतिः शासनपद्धतिश्च पृथग्विधा नियोजिता वर्तते। पश्चवर्तिनि समये कतिपयेषु राष्ट्रेषु धर्ममार्गात् स्खलितानां जनपीडकानां राज्ञामधोगतिरभवत्। जनभावनामज्ञात्वैव केवलं स्वार्थसाधनसंलग्नो भूत्वा जनान् प्रपीडयन् आर्थिकशोषणं विधाय लोकशासनसंलग्ना भूपाला एव क्षयतां गता इत्यनुभूयते। यस्मिन् देशे राजा धार्मिका जनमानसरञ्जका भवन्ति तस्मिन् देशे जनाः सुखसमृद्धियुता भवन्ति तस्य देशस्य राजा च स्थिरो भवति। यथा जापानवेलायतादिदेशेषु राजानो वर्तमानकालेऽपि विद्यमानाः सन्ति। परं यस्मिन् देशे नृपा जनविरोधिकर्मणि संलग्नाः सञ्जातास्ते खलु राज्यात् भ्रष्टाः समभवन्। राजधर्मविषयेऽस्माकं धर्मार्थकाममोक्षसाधनभूनेषु पौराणिकग्रन्थेषु बहुविधा चर्चा विहितास्ति। अस्माकं देशस्य नेपालस्य राजसंस्था कथं समाप्तिं प्राप्तेति विषये सकलेष्वार्यसंस्कृतिप्रतिपादकेषु ग्रन्थेषु लिखितानां विषयाणामध्ययनं परमावश्यकं भवति। यदास्माकं देशस्य राजा सुशासनविषये पौराणिकग्रन्थेषु लिखितविषयाद् वैपरीत्य गतस्तदैवास्य देशस्य राजसंस्था समाप्तिं प्राप्ता।

यस्मिन् राष्ट्रे राजा स्वधर्मानुसारेणानुचरति स कदापि स्वकीयात् स्थानात् न स्खलति जना अपि स्वकर्तव्यपरायणा भवन्ति। तत्र लिखितन्यायव्यस्थापि नैवानिवार्या भवति। उदाहरणार्थं बेलायतनामाख्ये राष्ट्रे राज्यसञ्चालनार्थं लिखितन्यायव्यवस्था नैवासीत्। तस्मिन् देशेऽधुनापि धर्माचार्यस्य सम्मानजनकं स्थानं स्थापितमस्ति। राज्यसञ्चालनकार्ये कदाचित् काचिदपि समस्या समुत्पद्यते चेद् धर्माचार्यस्य मतमनुगम्यते। परं तत्र केवलं मौखिकरूपेणैव नीतिनिर्देशनानां परिपालनं कुर्वन्ति स्म जनाः।[1]

तस्मिन् देशेऽधुनापि राज्यसञ्चालनं समीचीनतया विहितमस्ति। तत्र ५५५ जना औद्योगिकक्षेत्रे कार्यरताः सन्ति ६५जनाः कृषिकर्मणि संलग्नाः सन्ति ततोऽवशिष्टा लोका वाणिज्यजगति, राजसेवायां तथान्ये कर्मणि निरताः सन्ति। तस्य देशस्य सर्वेऽपि जनाः सुखिनः सम्पन्नाः सन्ति।[2]

पश्चवर्तिनि समये स्थापितेषु राष्ट्रेषु सन्ति पाश्चात्यजगति विविधाः देशाः। तेषां पंक्तौ संयुक्तराज्यस्यामेरिकानामधेयस्य नाम महनीयतरं दृश्यते। तस्मिन् देशे सुशासनं सुस्थिरं सुस्थिरञ्चास्तीति मन्यते। तस्मिन् राष्ट्रे जनकल्याणपरका शासनव्यवस्था विद्यते। तस्मिन् देशे सुशासनत्वाज्जनाः शासकवर्गेण प्रताडिता नैवावलोक्यन्ते। तस्मिन् देशे जनाः स्व स्वकर्मणि निरताः सुखिनः सम्पन्नाश्च सन्ति। भौतिकसमुन्नतिपथमवलम्बनेन तत्र खलु नगराणां विकास आधिक्येन जातः। अतस्तत्र केवलं एकतृतीयांशसंख्यका जना एव ग्रामीणक्षेत्रे निवसन्ति, अन्ये सर्वेऽपि नगरेषु निवसन्ति।[3]

समाजवादपरकगणराज्यरूपेण परिचितः सोभियतसंघनामा देशो श्रमजीविनां, कृषकाणां, बौद्धिकवर्गस्य च निखिलानामप्याशापूरकत्वेन स्थापितो दरीदृश्यते। राष्ट्रेऽस्मिन् सकलानामपि जनानाङ्कृते हितकरं शासनं सञ्चालितमस्तीति लिखितमस्ति।[4]

वार्तमानिके भारतदेशेऽपि राज्यव्यवस्था सुकरा वर्तत संविधाने लिखितमस्ति। तत्र संवैधानिकरूपेण सर्वेषु जनेषु सामाजिकी स्वतन्त्रता वर्तते। धार्मिकं स्वातन्त्र्यं, सांस्कृतिकं स्वातन्त्र्यं, पितृसंपद्विषयकं स्वातन्त्र्यं तथा शोषणस्य विरोधविषयकं संवैधानिकं न्यायाधिकारं जनसमाजे समत्वेन प्रदत्तमित्युल्लिखितमस्ति। अनेन तस्य राष्ट्रस्य सर्वाङ्गीणो विकासः सञ्जात इत्यनुभूयते।[5]

नेपालदेशे प्राचीनकालादारभ्याद्यपर्यन्तं विविधै शासकैः स्वानुकूलविधिना राज्यसञ्चालनकार्यं विहितमस्ति। आभीरकालादारभ्य

---

१. The british constitution has not been made, but has not grown and there is no paper.anupchand kapur, jenninge, select constitution, 1983, p.1

२. आज पनि बेलायत संसारको औद्योगिक राज्यको रूपमा रहेको छ। यसका ५५५ जनता औयोगिक प्रतिष्ठानमा कार्यरत छन्। खालि ६५ जनता कृषिकार्य गर्दछन्। बाँकी जनता मध्यमवर्गीय हुन् र यिनीहरूले व्यापार, नोकरी तथा अन्य पेशा अपनाएका छन्। गोपाल शिवाकोटी, धुव श्रेष्ठ, शिव ढकाल, तुलनात्मक राजनीतिक व्यवस्था, (काठमाडौं, रत्नपुस्तक भण्डार, दोस्रो संस्करण, २०४८) पृष्ठ ७२।

३. यसको दुई तिहाइ जनसंख्या शहरमा बसोवास गर्छन् भने ग्रामीण इलाका एक तिहाइ जनसंख्याले ओगट्न पुगेको छ। पूर्ववत्, पृष्ठ ८४।

४. सोभियत समाजवादी गणराज्य संघ मजदूर, किसान, बुद्धिजीवी, देशका सबै राष्ट्र र राष्ट्रियता, श्रमजीवी जनताका आकांक्षा र हितहरू अभिव्यक्त गर्ने सम्पूर्ण जनताको समाजवादी राज्य हो। पूर्ववत्, पृष्ठ १०२।

५. जनतालाई समानता, स्वतन्त्रता, धार्मिक, सांस्कृतिक एवं पैतृक सम्पत्ति, शोषण विरुद्ध संवैधानिक उपचार जस्तो मौलिक हक एवं अधिकारहरू प्रदान गरिएको छ। पूर्ववत्, पृष्ठ १२२।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्तमानकालपर्यन्तं किरातैः, लिच्छविभिः, मल्लैश्च यथाकाले स्वविवेकानुसारेण राज्यसञ्चालनं कृतमस्ति । आधुनिकसमयेऽपि शाहवंशोद्भवै नृपैः बहुकालपर्यन्तं राजधर्मानुसारेण देशेऽस्मिन् शासनं विहितमस्ति । तर्हि शाहकालस्यान्तिमचरणे राज्यसञ्चालनकार्ये धर्मसंस्कृतिवैपरीत्यानि कतिपयानि कार्याणि शासकेन ज्ञात्वा वाऽज्ञात्वैव सम्पादितानीति दृष्टिगोचरीभवति । अस्माकं धार्मिकग्रन्थेषु राजधर्मविषयकं वर्णनं स्थाने स्थाने विहितमस्ति । तत्र राज्ञः कर्तव्यानि कानि ? अकर्तव्यानि च कानि ? राज्यसञ्चालनक्रमे कीदृशी व्यवस्था स्थापनीया ? कर्मचारिणः कीदृशाः नियोजनीयाः ? इत्यादिविषयाणां वर्णनं विशद्रूपेण विहितमस्ति । तेषु ग्रन्थेषु कस्यामवस्थायां राजा राज्याद् भ्रष्टो भवतीत्यपि लिखितमस्ति । परं कतिपयवर्षपूर्वं नेपालस्य राजा चास्माकं धर्मग्रन्थेषु लिखितविषयाणामध्ययनं परित्यज्य केवलं पाश्चात्यविद्याध्ययनं कृत्वा स्वकीयं धर्मसंस्कृतिं परित्यज्य शासनं कृतवान् । तस्मात् कारणादद्य नेपालदेशस्य राजसंस्था समाप्तिं प्राप्ता । अस्मिन् विषये कस्यापि दृष्टिपातो नाभवत् ।

अधुना नेपालदेशे विद्यमानायां राज्यव्यवस्थायां वैधानिकरूपेण जनकल्याणकारिणी न्यायव्यवस्था स्थापितास्तीति लिखितमस्ति । राष्ट्रे समुपलब्धानां स्रोतसां सर्वजनहिताय परिचालनं विधीयत इति सामाजिकी व्यवस्था स्थापितास्ति । अर्थपरकाणां साधनानां सर्वेषां कृते न्यायोचितं वितरणं विधीयत इत्यपि समुल्लिखितमस्ति । जातीयं, लैङ्गिकं, जन्मगतञ्चार्थिकं शोषणं निषिद्धं विधाय आर्थिकसमानातायाः नीतिनिर्देशनानां निर्माणं विहितमस्ति । पुनश्च वैयक्तिकानां सार्वजनिकानाञ्च स्वदेशीयानां व्यवसायानां विकासं विधाय राष्ट्रस्य समुन्नतिं कारयित्वा जनसमुदाये सम्मानं, स्वावलम्बनं, स्वातन्त्र्यं, समुन्नतिञ्च स्थाप्यत इत्युद्देश्यं लिखितरूपेण स्थापितमस्ति ।[६]

पाश्चात्यजगति लब्धख्यातस्य प्लेटोमहोदयस्य सिद्धान्तानुगमने ज्ञायते यस्य कस्यापि जनस्य कृते विंशतिवर्षपर्यन्तं प्राथमिकशिक्षार्जनार्थं निर्धारितमस्ति ।[७] प्रारम्भतोऽष्टादशवर्षपर्यन्तं विधीयमाने विद्याध्ययने संगीतविद्या तथा व्यायामविधिः प्रमुखत्वेन मन्यते ।[८] अष्टादशतो विंशतिवर्षाणियावद् उत्साहात्मनियन्त्रणानुशासनवृद्धिपूर्वकं सैनिकशिक्षा प्रदीयते । एतादृशी शिक्षा सभ्यनागरिकत्वाप्तिहेतो विधीयते ।[९] विंशतिवर्षतस्त्रिंशद्वर्षपर्यन्तं माध्यमिकशिक्षाप्राप्तिकालः निर्धारितोऽस्ति । कालेऽस्मिन् गणिततर्कशास्त्रदर्शनज्यौतिषादिशिक्षा पठ्यते ।[१०]

तत्पश्चात् पञ्चत्रिंशद्वर्षपर्यन्तमुच्चशिक्षोपलब्धिकाल इति कथ्यते । अस्मिन् काले दर्शनस्य विशिष्टाध्ययनं विधीयते । तथैव द्वन्द्वविद्याया उपलब्धिरपि भवति । अनेनास्मिन् काले व्यावहारिकज्ञानमेवोपलभ्यते । अस्मात् कारणात् शिक्षाध्ययनं पूर्णत्वं नाप्नोति । अतः पञ्चत्रिंशद्वर्षतः पञ्चाशद्वर्षपर्यन्तं यथार्थजीवनस्य व्यावहारिकविद्योपलब्धये व्यवस्था विहितास्ति ।

अतो येन केनापि पञ्चाशद्वर्षपर्यन्तं विद्योपार्जनं कर्तव्यमिति व्यवस्था प्लेटोमहाभागस्य समये विहिता आसीत् । अनेन प्रकारेण समाप्तासु सर्वासु विद्यासु जनो राजनीतिकक्षेत्रे प्रवेष्टुं शक्नोति नान्यथेति लिखितमस्ति । एवं प्रकारेण प्लेटोमहाभागस्य सिद्धान्तानुसारेण मनुष्यः प्राप्ते च पञ्चाशद्वर्षाणां वयसि राजनीतिनिपुणो भवतीति ज्ञातुं शक्यते ।[११]

राजनीतिकव्यवस्थायां कीदृशोऽमात्यो नियोजनीय इति विषये कौटलीयेऽर्थशास्त्रेऽपि लिखितमस्ति । तत्रोल्लिखितमस्ति सदैव दृष्टशौचासामर्थ्यत्वात् सहाध्यायिनः विश्वास्याः एवामात्यपदे नियोक्तव्याः भवन्ति । ते खलु समानशीलव्यसनत्वात् सहक्रीडत्वात् परिभवन्ति । ते खलु मर्मज्ञभयान्नापराध्यन्तीति लिखितमस्ति ।[१२]

---

६ नेपालमा उपलब्ध आर्थिक स्रोत र साधनलाई सीमित व्यक्तिहरूमा केन्द्रित हुन नदिई सामाजिक न्यायको आधारमा आर्थिक उपलब्धिको न्यायोचित वितरणको व्यवस्था मिलाई कुनै पनि जाति, लिङ्ग, वर्ग,उत्पत्ति वा व्यक्ति उपर आर्थिक शोषण हुन नपाउने व्यवस्था गरी आर्थिक असमानता हटाउँद स्वदेशी निजी एवं सार्वजनिक उधमलाई प्राथमिकता र प्रश्रय दिई राष्ट्रिय अर्थतन्त्रलाई स्वतन्त्र, आत्मनिर्भर एवं उन्नतिशील गराउनु राज्यको मूल भूत आर्थिक उद्देश्य हुनेछ । हरिकृष्ण श्रेष्ठ, नेपालको सरकार र प्रशासन, (लुम्बिनी प्रकाशन, काठमाडौं, २०६६-६७) पृष्ठ १०२ ।

७ प्लेटोले आरम्भिक शिक्षा २० वर्षको उमेर सम्मको लागि व्यवस्था गरेका छन् । गोपाल शिवाकोटी, राजनीतिक विचारधाराको इतिहास, (काठमाडौं, रत्नपुस्तक भण्डार, दोस्रो संस्करण २०४९) पृष्ठ ७२ ।

८ १८ वर्षक आयुसम्मको शिक्षाके प्रमुख विषयमा व्यायाम तथा संगीत राखेका छन् । गोपाल शिवाकोटी, राजनीतिक विचारधाराको इतिहास, (काठमाडौं, रत्नपुस्तक भण्डार, दोस्रो संस्करण २०४९) पृष्ठ ७२ ।

९ ८ वर्षदेखि २० वर्षको दुई वर्ष साहस, आत्मनियन्त्रण र अनुशासन वढाउनको लागि सैनिक शिषा दिइन्छ । प्रारम्भिक शिक्षा असल नागरिक वनाउनको लागि हो । (गोपाल शिवाकोटी, राजनीतिक विचारधाराको इतिहास (काठमाडौं, रत्नपुस्तक भण्डार, दोस्रो संस्करण २०४९) पृष्ठ ७२ ।

१० २० वर्षदेखि ३० वर्षसम्मको उमेरमा माध्यमिक शिक्षाको व्यवस्था गरिएको छ । यस अवस्थामा गणित, तर्कशास्त्र, दर्शन तथा जोतिपीको शिक्षा दिइने व्यवस्था छ । गोपाल शिवाकोटी, राजनीतिक विचारधाराको इतिहास, (काठमाडौं, रत्नपुस्तक भण्डार, दोस्रो संस्करण २०४९) पृष्ठ ७२ ।

११ उच्च शिक्षाको उद्देश्य दार्शनिक बनाउनु हो । यसमा ३५ वर्षको उमेरसम्म द्वन्द र दर्शनको शिक्षा दिन्छ । ३५ वर्षसम्मको शिक्षा व्यावहारिक ज्ञान नभएकोले अपूर्ण हुने हुँदा ३५ वर्षपछि १५ वर्षसम्म यथार्थ जीवनमा व्यावहारिक शिक्षाको व्यवस्था गरिएको छ । ५० वर्षको आयुमा ....। (गोपाल शिवाकोटी, राजनीतिक विचारधाराको इतिहास, (काठमाडौं, रत्नपुस्तक भण्डार, दोस्रो संस्करण २०४९) पृष्ठ ७३ ।

१२ सहाध्यायिनोऽमात्यान् कुर्वीत दृष्टशौचासामर्यत्वात् इति भारद्वाजः ते ह्यस्य विश्वास्याः भवन्ति ।
नेति विशालाक्षः सहक्रीडित्वात् परिभवन्त्येनम् । ये ह्यस्य गुह्यसधर्माणस्तानमात्यान् कुर्वीत, समानशीलव्यसनत्वात् ते ह्यस्य मर्मज्ञभयान्नापराध्यन्तीति । (विष्णुगुप्त, कौटलीयार्थशास्त्रम्, चतुर्थं प्रकरणम्, अमात्योत्पत्तिः । (मैसूरु, प्राच्यविद्यासंशोधनालयः, मैसूरुविश्वविद्यालयः, सन् १९६०) पृष्ठ १६ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनेन प्राचीनेतिहासकालादद्यपर्यन्तं विविधैर्विद्वद्भिः विविधेषु कालेषु राजनीतिकक्षेत्रे कीदृशी नीतिरवलम्बनीया भवतीति विषये लिखितमस्ति । तर्ह्यधुना कतिपयेषु देशेषु सा नीतिः शासकैः परिपालिता कतिपयेषु नैवावलम्बितेति दृष्टिपथमायाति । परं शासकैर्राज्यशासनं कथं कर्तव्यमितिविषये प्राचीनार्यसभ्यताप्रदर्शनकुशलेन महर्षिणा वाल्मीकिना विरचिते श्रीमद्वाल्मीकीरामायणेऽपि विशद्रूपेण वर्णनं कृतमस्ति । राजनीतिकशिक्षोद्घाटनपरकेषु तत्र वर्णितविषयेषु अयोध्याकाण्डस्य शततमे सर्गे श्रीरामेण भरतंप्रति निदर्शिता राजनीतिपरका शिक्षा कीदृशी वर्तत इति विषयस्य सिंहावलोकनं विधीयतेऽत्र । तत्र वनभुवि निवसिते रामे तत्र प्राप्तं भरतमुद्दिश्य अयोध्याया विषये कौशलं प्रश्नं प्रकटयन् रामेणोक्ता वाग्धारा विशेषेण मननीयानुगमनीया च वर्तत इत्यनुभूयते ।

विद्वान् धार्मिको महाद्युतिर्ब्राह्मण उपाध्याय एव सदैव राजभवने पूजनीयो भवति । राजपरिवारस्य जेष्ठाः श्रेष्ठाश्च सर्वेऽपि सदस्याः कौशल्याकैकयीसुमित्रादयः सुखिनः सन् स्थातव्याः भवन्ति । पुरोहिताः कीदृशा भवितुमर्हन्तीति विषयेऽपि लिखितमस्ति सदैव विनयसम्पन्नो बहुश्रुतोऽनुद्रष्टा कुलपुत्रो पुरोहित एव सत्कारयोग्यो भवति नान्यथा । हवनकर्मणि नियुक्तो हवनविधिज्ञो बुद्धिमान् सरलो ब्राह्मणो यथाकाल आगत्य सम्पादितस्य हावनकर्मणो विषये करिष्यमाणस्य कर्मणो विषये सूचयतु । पुनश्च देवाः पितरो भृत्या गुरवो वृद्धा वैद्या ब्राह्मणाः सदैव पितृसदृशाः समादरणीयाः सम्मान्या भवन्ति । एवञ्च समन्त्रास्त्रसाधकोऽमन्त्रास्त्रसाधको तथार्थशास्त्रविशारदो राजनीतिनिपुणो विद्वान् सदा सम्मानयोग्यो भवति । अस्मिन् विषये भरतम्प्रति समुद्दिश्य सुधन्वानस्य विषये तस्यैव सर्गस्य त्रयोदशतमे चतुर्दशतमे च पद्ये लिखितमस्ति ।[१३]

राजनीतिनिपुणेन नृपेण मन्त्रिणः कीदृशा नियोजनीया भवन्तीति विषयेऽपि तत्र मुल्लिखितमस्ति । आत्मसमाः शूराः श्रुतवन्तो जितेन्द्रियाः कुलीना इङ्गितज्ञा मनुष्या एव मन्त्रिपदमाकलयितुं योग्या भवन्ति । शास्त्रकोविदैरमात्यैर्मन्त्रिभिः गुप्तमन्त्रणेनैव राजा विजयमाप्नोति नान्यथा । असमये निद्रा यथाकाले जागरणं चतुर्थप्रहरेषु रात्रिषु चार्थसिद्धये विचारणं शासनकुशलस्य राज्ञो लक्षणं भवति । राज्ञा सदैव गुप्तमन्त्रणं द्वाभ्यां चतुर्भिर्वा सुयोग्यमन्त्रिभिः सह विधातव्यम् न खलु बहुभिः सह । सा मन्त्रणा कथमपि वहिर्नगच्छेत् । अत एव सा मन्त्रणा बहुभिः सह नैव कथनीया । अयोग्येन सह कृता मन्त्रणा राष्ट्रघाताय भवति । स्वल्पेनैवायासेन बहुलाभं दृष्टिगोचरीभूतं कार्यं शीघ्रमेव विनिश्चित्य कर्तव्यम् नैव विलम्बनीयम् । राज्ञः कार्याणि सदैव गोपनीयानि भवन्ति । कार्यसमाप्तिपश्चादेव तानि कार्याणि सूचनीयानि न तु कार्यारम्भे मध्ये वा । राज्ञो गुप्तमन्त्रणा कदाप्यन्यैर्नैव ज्ञातव्याः परमन्यस्य गुह्यं ज्ञातव्यं भवति । अर्थसंकटकाले विद्वानेव साहाय्यभूतत्वात् राज्ञा सदैव सहस्रं मूर्खं विहायैको पण्डितो वाञ्छनीयो भवति । सहस्राणामयुतानां वा मूर्खाणां साहाय्येन राज्ञोऽर्थसिद्धिर्नैव भवितुं शक्नोति परमेकोऽपि मेधावी शूरो दक्षो विचक्षणोऽमात्यो राज्ञो महतीं श्रियं कारयितुं समर्थो भवितुमर्हति । राज्ञा सदैव महत्सु कार्येषु प्रधानाः, मध्यमेषु कार्येषु मध्यमा लघुकार्येषु च जघन्याः कर्मचारिणो नियोजनीयाः । पितृपितामहादीनां कालादेव कर्मणि नियुक्ता अनुपघाताः शुचयः श्रेष्ठाः कर्मकुशला अमात्या एव श्रेष्ठकर्मणि नियोक्तव्याः । यदि मन्त्रिभिः उग्रदण्डेन जनाः ताड्यन्ते चेत् राजा सद्य विनश्यति । जनेभ्योऽधिकं करं नैव ग्रहणीयम् । करभारपीडनात् जनास्तादृशमुग्रप्रतिग्रहीतारं राजानं तिरस्कुर्वन्ति । सामदामाद्युपायकुशलं राजनीतौ निपुणं राज्ञः सद्भृत्यसंदूषणे रतं शूरं राजैश्वर्यलुब्धं पुरुषं यो राजा न हन्ति स झटित्येव विनश्यति । अतस्तादृशं दुष्टं राजा सद्य घातयेत् ।

राज्ये सेनापतिः कीदृशः नियोजनीय इति विषयेऽपि तत्रोल्लेखनं कृतमस्ति । देशभक्तः, सदा संतुष्टः, शूरः, धीरः, बुद्धिमान्, विशुद्धहृदयस्तथा कुलीनः सेनापतिपदस्य योग्यो भवति । सेनाप्रमुखानां समीचीनतया परीक्षणं विधातव्यम् । परीक्षणानन्तरं बुद्धियुतान्, शुद्धान्, युद्धविशारदान्, पराक्रमशीलान् सेनानायकपदेषु नियोक्तव्यम् । तान् काले काले सम्मानं कर्तव्यम् । अनेन ते कर्तव्यनिष्ठाः स्वामिभक्ताश्च भवन्ति नापराध्यन्ति च । राज्यशासनकर्मकुशलेन शासकेन सकलेभ्यः कर्मचारिभ्यः समयोचितं वेतनं दातव्यम् । तच्च यथासमय एव दातव्यम् नैवविलम्बनीयमित्यप्युल्लिखितमस्ति । कालातिक्रमणे तु ते कूप्यन्ति । अत उचितसमय एव दातव्यम् ।[१४]

सर्वेऽप्यमात्याः प्रधानाधिकारिणश्च स्वामिभक्ताः समर्पणभावेन स्वकर्मणि निष्ठितहृदयाः स्युरित्युल्लिखितमस्ति । एवमेव स्वदेशवासी, विद्वान्, कार्यदक्षः, प्रतिभायुतः, यथार्थवक्ता तथा विवेकवानेव राजदूतपदे नियोक्तुं योग्यो भवति । शत्रुपक्षस्याष्टादशतीर्थानि स्वपक्षस्य च पञ्चदशतीर्थानि गुप्तचरैः ज्ञातव्यानि राज्यशासकेन । राज्याद् बहिः कृतः पुनः तत्रायात शत्रुः कदापि दुर्बलो नैव ज्ञातव्यः । वाक्चातुर्येण स्वात्मानं पण्डितमानिनं धर्मशास्त्रविरुद्धं वचनं प्रवदन् परमार्थादन्यान् विरतं कारयितुं कुशलं नास्तिकब्राह्मणं कदापि राज्ये नैव ग्रहणीयम् । कृषिकर्मणि निरतान् सदैव साहाय्यम् कर्तव्यम् । राष्ट्रे विद्यमानाः नागराः ग्रामीणाश्च जनाः शासकेन

१३ कच्चिद् देवान् पितृन् भृत्यान् गुरुन् पितृसमानपि । वृद्धांश्च तात वैद्यांश्च ब्राह्मणाश्चाभिमन्यते ॥१३॥ इष्वस्त्रवरसम्पन्नमर्थशास्त्रविशारदम् । सुधन्वानमुपाध्याय कच्चित् त्व तात मन्यसे ॥१४॥ वाल्मीकि, श्रीमद्वाल्मीकीयरामायण, अयोध्याकाण्ड, सर्ग १००, (गोरखपुर, गीताप्रेष, २८ औं संस्करण, २०६१)

१४ कच्चिद् बलस्य भक्तं च वेतनं च यथोचितम् । सम्प्राप्तकालं दातव्यं ददासि न विलम्बसे ? ॥३२॥ कालातिक्रमणे ह्येव भक्तवेतनयोर्भृताः । भर्तुरप्यतिकुप्यन्ति सोऽनर्थः सुमहान् कृतः ॥३३॥ वाल्मीकि, श्रीमद् वाल्मीकीयरामायण, अयोध्याकाण्ड, सर्ग १००, (गोरखपुर, गीताप्रेष, २८ औं संस्करण, २०६१)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सदा संरक्षणीयाः भवन्ति न तु पीडनीयाः । नार्यः सदैव सन्तुष्टाः सुरक्षिताः भवितुमर्हन्ति । राज्ये विद्यमानाः वन्यपशवश्च शासकै रक्षणीयाः न तु हन्तव्याः । प्रतिदिनं जनसमूहे प्रतिपथं गत्वा जनानां स्थितिज्ञानकार्यमपि कुशलशासकस्य कर्तव्यमस्ति । शासकमवलोक्य जना भयमाप्नुवन्ति चेत् स शासकः शीघ्रमेव नश्यति । जनाः शासकं विगणय्य अतिसमीपमनुतिष्ठन्ति तर्हि शासकोऽवमन्यते । अतः जनाः नातिदूरं नातिसमीपमनुतिष्ठेयुः । राज्यकोशः सर्वदा कुपात्रात् संरक्षणीयः । राज्यस्य व्यय आयादधिको न स्यात् । राज्ये चौरलुण्ठकाद्यपराधिनः कथमपि विमुक्ता न भवेयुः । लोभात् निरपराधिनोऽपि दण्डभागिनो न स्युः । कैरपि कर्मचारिभि निर्दोषा जनाः पीडिता न भवेयुः । देवतार्थे मित्रार्थे ब्राह्मणार्थे सज्जनार्थे च द्रव्यसाठ्यं कदापि न विधातव्यम् । मिथ्याभिशस्तानां नयनेभ्य निपतितान्यश्रूणि राजानमेव पातयन्ति । तस्मात् कारणात् शासनाधिकारिणोऽपि लोलुपाः न स्युः येन न्यायनिर्णयेऽन्यायो न स्यात् ।

वाल्मीकिविरचिते रामायणे वर्णितविषयाधारेण एतादृशं राज्यशासनं राजनीतिकुशलः शासकः करोति चेत्तर्हि स शासकः जनसमुदाये प्रियो भवितुमर्हति । अस्माकं देशे नेपालराष्ट्रे प्राचीनकालादारभ्य वर्तमानकालपर्यन्तं विविधै शासकैः राज्यसञ्चालनं विहितम् । मल्लकाले कतिपयाः राजानः विद्वांश आसन् । जयस्थितिमल्लसदृशो नीतिनिपुणो राजाप्यासीत् । महीन्दमल्लसदृशो जनप्रियशासकोऽपि समभवत् । शाहकालेऽपि न्यायक्षेत्रे लब्धख्यातस्य रामशाहस्य नाम अग्रपंक्तावायाति । तथान्ये विविधा राजानः शासनकुशला आसन्निति ज्ञायत ऐतिहासिकपृष्ठानामवलोकनेन । परमधुना अस्य देशस्य राजसंस्था समाप्तिं प्राप्ता । अस्य कारणं किमिति विषये केनाप्यनुसन्धानं नैव विहितमस्ति । यदा राजा स्वकर्तव्यमार्गात् वहिर्गच्छति तदा स शीघ्रमेव नश्यतीति शास्त्रे लिखितस्ति । अस्य देशस्य राजा यदा संस्कृतभाषायां निबद्धेषु पुराणादिग्रन्थेषु विद्यमानां सर्वज्ञानमयीं विद्यां विहाय केवलमाधुनिकीं विद्यामधीत्य "अल्पविद्या भयङ्करी" इत्युक्तिं सार्थकं कृतवान् तदैव राज्ञां पतनस्यारम्भो जातः । २०४४ तमे वैकमाब्दे सर्वप्रथमं देवस्वहरणकार्यं समारब्धं राज्ञा । विविधेषु कालेषु विविधैर्भक्तजनैः स्थापिता गोष्ठीभूताः भूमयः वैयक्तिकीकरणार्थं नवव्यवस्था स्थापिता । तेन विविधेषु देवमन्दिरेषु प्रचलिता सांस्कृतिकपरम्परापि प्रभाविता जाता । अनेन धार्मिकसांस्कृतिकक्षेत्रे समुत्पन्ना महती समस्या । अस्य कार्यस्य प्रारम्भो राज्ञो वीरेन्द्रस्य काले जातः । अस्य कार्यस्य फलं किमिति प्रसङ्गे महाभारतस्य आश्वमेधिकपर्वणि लिखितममति । अस्मात् कारणादपि नेपालस्य राजसंस्था समापितेति भवितुं शक्नोति ।[१५]

पुनश्च नेपालस्य शासकै विविधेषु समयेषु ब्रह्मस्वहरणकार्यमपि कृतिमिति स्मरणीयो विषयो वर्तते । राणाशासनकाले बहवो ब्राह्मणाः सर्वस्वहरणं विधाय राज्याद्वहिर्निस्काशिताः । तेन कारणेन राणाशासकानां पतनमभवदिति ज्ञातुं शक्यते । तथैव राज्ञः वीरेन्द्रस्यान्त्येष्टिकाले ब्राह्मणाय दानरूपेण प्रदत्तानि वस्तूति पुनरपहृतानीति पिषयः सर्वविदितोऽस्ति । तस्य कार्यस्य प्रभावेण राज्ञः कीदृशी स्थितिः सञ्जातेति स्फुटीभवति ।[१६] राज्ञः शासनव्यवस्थायां समाप्तायां प्रजातान्त्रिकव्यवस्थामवलम्ब्य अनेकाः शासकाः राज्यसंचालनं चक्रुः कुर्वन् सन्ति च । एतेऽपि दुःशासनमेव कुर्वन्ति चेत् तदा कदैतेषां पतनं भविष्यतीति विचारणीयो विषयः ।

सन्दर्भसूची

jenninge, select constitution, 1983.

वाल्मीकि, श्रीमद्वाल्मीकीयरामायण, अयोध्याकाण्ड, सर्ग १००, गोरखपुर, गीताप्रेष, २८ औं संस्करण, २०६१ ।

विष्णुगुप्त, कौटलीयार्थशास्त्रम्, चतुर्थं प्रकरणम्, अमात्योत्पत्तिः । मैसूरु, प्राच्यविद्यासंशोधनालयः, मैसूरुविश्वविद्यालयः, सन् १९६० ।

व्यासः, महाभारत, आश्वमेधिकपर्वः, अध्याय ९२, गोरखपुर, गीताप्रेस ।

शिवाकोटी गोपाल, राजनीतिक विचारधाराको इतिहास, काठमाडौं, रत्नपुस्तक भण्डार, दोस्रो संस्करण २०४९ ।

श्रेष्ठ ध्रुव आदि, तुलनात्मक राजनीतिक व्यवस्था, काठमाडौं, रत्नपुस्तक भण्डार, दोस्रो संस्करण, २०४८ ।

श्रेष्ठ हरिकृष्ण, नेपालको सरकार र प्रशासन, लुम्बिनी प्रकाशन, काठमाडौं, २०६६-६७ ।

१५ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः । स तिष्ठति कालसूत्रे यावच्चन्द्रदिवाकरौ ॥ व्यासः, महाभारत, आश्वमेधिकपर्वः, अध्याय ९२, (गोरखपुर, गीताप्रेस) पृष्ठ ५६६८ ।

१६ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः । स तिष्ठति कालसूत्रे यावच्चन्द्रदिवाकरौ ॥ व्यासः, श्रीमद्देवीभागवतम्, नवमस्कन्धः, अध्यायः १०, (काशी, पण्डित पुस्तकालयः, सं.२०२६) पृष्ठ ५९६ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धर्मशास्त्रेषु पुराणेषु च संख्यावाचकशब्दानां गणितीयविषयाणाञ्चोल्लेखः

सहप्रा. जयन्तआचार्यः
वाल्मीकि विद्यापीठम्

धर्मशास्त्रीयग्रन्थेषु याज्ञवल्क्यमनुस्मृत्यादिषु ऽष्टादशपुराणेषु च गणितसम्वद्धविषयाणां गणितीयप्रयोगाणां संख्यावोधक शब्दांञ्च प्रयोगाः प्रचुरमात्रेण कृता दृश्यन्ते । पाञ्चभौतिकशरीरस्य क्षणभङ्गुरताया ज्ञानं दत्त्वा पाञ्चभौतिकदेहे मोहो मा भवतु इति विचार्य आत्मतत्त्वज्ञाने मानवा प्रवृता भवन्त्विति च विचार्य पाञ्चभौतिकशरीरनिर्माणाय प्रयुक्तानां रसरक्तादीनां हेयत्ववर्णनं कृतं दृश्यते । यथा

अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।

चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥ ७६ ॥

जराशोकसमाविष्टं रोगायतनमातुरम् ।

रजस्वलमतित्यं च भूतवासमिमं त्यजेत् ॥७७॥ (मनुस्मृतौ ६ अध्याये)

मनुस्मृतौ शिराधमनीनां संख्या नैवोल्लिखिता, याज्ञवल्क्यस्मृतौ (महर्षि, २०४७ वि.सं: ४६०) तेषां परिगणना कृता दृश्यते । तत्र शरीरे सप्तशतानि शिरा भवन्ति, अङ्गप्रत्यङ्गसन्धिबन्धरूपाः स्नायवो नव शतानि भवन्ति चेन्नाभितः समुद्भूताः प्रमुखा धमन्यस्तु शतद्वयप्रमिता भवन्ति तथैव पेश्यतु पञ्चशतसंख्यकाः शरीरे भवन्तीति यथा

शिराः शतानि सप्तैव नव स्नायुशतानि च

धमनीनां शते द्वे तु पञ्च पेशीशतानि च ॥ १००॥ (महर्षि, २०४७ वि.सं: ४६०)

अत्र केवलं प्रमुखाणां शिराधमन्यादीनां परिगणनां स्थूलरूपेण कृत्वा तेषामेव शाखाप्रशाखानां गणना विस्तृतरूपेण कुर्वन् याज्ञवल्क्यस्तत्रैव वर्णयति

एकोनत्रिंशल्लक्षाणि तथा नवशतानि च ।

षट्पञ्चाशच्च जानीत शिरा धमनिसंज्ञिताः ॥ १०१ ॥ (महर्षि, २०४७ वि.सं : ४६१)

अर्थात् धमनीनां शिराणाञ्च शाखाप्रशाखानां संख्या २९००९५६ मिता भवन्तीति ।

मानवशरीरे श्मश्रुकेशानां संख्या त्रिलक्षमिता (३०००००) भवन्ति चेत् मर्मस्थानानि सप्तोत्तरशतमितानि (१०७) भवन्ति तथैव अस्थीनां सन्धयो द्विशतमिता (२००) भवन्तीति ।

त्रयो लक्षास्तु विज्ञेयाः श्मश्रुकेशाः शरीरिणाम् ।

सप्तोत्तरं मर्मशतं द्वे च सन्धिशते तथा ॥ १०२ ॥ (महर्षि, २०४७ वि.सं: ४६१)

विज्ञानेश्वरस्तु स्नायुशिरादिसन्धयस्तु अनन्ता भवन्तीति पुनरपि स्पष्टयति ।

सकलशरीरछिद्रादिसंख्यां वर्णयन् तत्रैव

रोम्णां कोट्यस्तु पञ्चाशच्चतस्रः कोटचएव च

सप्तषष्टिस्तथा लक्षाः सार्धा स्वादायनैः सह ॥ १०३ ॥

वायवीयैर्विगण्यन्ते विभक्ताः परमाणवः ।

यद्यप्येकोऽनुवेत्त्येषां भावनां चैव संस्थितम् ॥ १०४ ॥ (महर्षि, २०४७ वि.सं: ४६१)

अर्थात् मानवशरीरे स्वेदमार्गाः स्वेदस्रवणछिद्राणि ५४६७५०००० मितानि भवन्तीति

शरीरस्थरसादि परिमाणं वर्णयनग्रे स्थूलशरीरस्य हेयत्वं प्रतिपादयन्नाह तत्रैव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रसस्य नव विज्ञेया जलस्याञ्जलयो दश ।

सप्तैव तु पुरीषस्य रक्तस्याष्टौ प्रकीर्तिताः ॥ १०५ ॥

षट् श्लेष्मा पञ्च पित्तं तु चत्वारो मूत्रमेव च ।

वसा त्रयो द्वौ तु मेदो मज्जैकोर्ध्वं तु मस्तके ॥ १०६ ॥

श्लेष्मौजसस्तावदेव रेतसस्तावदेव तु ।

इत्येतदस्थिरं वर्ष्म यस्य मोक्षाय कृत्यसौ ॥ १०७ ॥ (महर्षि, २०४७ वि.सं: ४६२)

अर्थात् स्वस्थमानवशरीरे सम्यक् परिणताहारस्य सारो रसस्तस्य परिमाणं नवाञ्जलयः । जलम् १० अञ्जलयः । पुरीषम् ७ अञ्जलयः, रक्तम् ८ अञ्जलयः, कफम् ६ अञ्जलयः, पित्तम् ५ अञ्जलयः, मूत्रम् ४ अञ्जलयः, वसा ३ अञ्जलयः, मेदो द्वावञ्जली, मर्ज्जा १ अञ्जलिः मस्तके तु अर्धाञ्जलि १/२ मज्जा भवति, श्लेष्माऽपिप्य अर्धाञ्जलिः वीर्यमपि १/२ अर्धाञ्जलिः एभिः क्षणभङ्गुरैः पदार्थैर्मिलित्वा निर्मितं शरीरमस्थिरमेव । स्थिरतार्थं किं करणीयमित्यत्राऽपि तत्रैव स्पष्टीकृतं यथा तत्रैव

द्वासप्त-सहस्राणि हृदयादभिनिःसृताः

हिता हिता नाम नाडचस्तासां मध्ये शशिप्रभम् ॥ १०८ ॥

मण्डलं तस्य मध्यस्थ आत्मादीप इवाचलः ।

स ज्ञेयस्तं विदित्वेह पुनराजायते न तु ॥ १०९ ॥ (महर्षि, २०४७ वि.सं: ४६३)

अर्थात् हृदयान्निसृता हिताहितनाडचः ७२००० सन्ति । तेषां मध्ये चन्द्रप्रभासदृशं मण्डलं वर्तते तस्मिन् मण्डले आत्मा निर्वातस्थदीप इवाचलो देदीप्यमानो विराजते । स ज्ञातव्यः । तस्मिन् ज्ञाते सति इह संसारे पुनर्जन्म न जायते । अर्थात् मुक्तिर्भवतीति । इत्थं मुक्तिमार्गवर्णनंव्याजेन स्थूलाङ्गानां (संख्यानां) वर्णनमत्र कृतं दृश्यते ।

मनुस्मृतौ तु इत्थं शरीरावयवानां संख्या वर्णिता न दृश्यते । दृश्यते च सत्यत्रेतादीनां युगानां संख्यापरिमाणं तथा ब्राह्मदिनस्य रात्रेश्च संख्यापरिमाणञ्च वर्णितं यथा (प्रथमाध्याये)

चत्वार्याहुः सहस्राणि वर्षाणां तत् कृतं युगम् ।

तस्य तावच्छतीसंन्ध्यां सन्ध्यांशश्च तथाविधः ॥ ६९ ॥

इतरेषु सन्ध्यषु ससन्ध्यांशेषु च त्रिषु ।

एकापायेन वर्तन्ते सहस्राणि शतानि च ॥ ७० ॥ (भट्ट, १९८३ इ.सं: २०)

अर्थात्

कृतयुगप्रमाणम्

४००० दिव्यवर्षाणि + ४०० सन्ध्या + ४०० सन्ध्यांश = ४८००

४८००× ३६० = १७२८००० मानुषवर्षाणि ।

तथैव

त्रेतायुगप्रमाणम्

३००० दिव्यवर्षाणि + ३०० सन्ध्या + ३०० सन्ध्यांश = ३६००

३६००× ३६० = १२९६००० मानुषवर्षाणि ।

द्वापरयुगप्रमाणम्

२००० दिव्यवर्षाणि + २०० सन्ध्या + २०० सन्ध्यांश = २४००

२४००× ३६० = ८६४००० मानुषवर्षाणि ।

कलियुगप्रमाणम्

१००० दिव्यवर्षाणि + १०० सन्ध्या + १०० सन्ध्यांश = १२००

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१२००× ३६० = ४३२००० मानुषवर्षाणि ।

इदमेव स्पष्टयन् लिखितम्

यदेतत्परिसंख्यातमादावेव चतुर्युगम् ।

एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥ ७१ ॥ (भट्ट, १९८३ इ.सं: २०)

सत्ययुगप्रमाणम् + त्रेतायुगप्रमाणम् + द्वापरयुगप्रमाणम् + कलियुगप्रमाणम्

४८०० + ३६०० + २४०० + १२०० = १२०००

∴ १२००० × ३६० = ४३२०००० मानुषवर्षाणि ।

ब्रह्मदिनप्रमाणं ब्राह्मरात्रिप्रमाणञ्च वर्णितम् मनुस्मृतौ यथा

दैविकानां युगानान्तु सहस्रं परिसख्यया

ब्राह्ममेकमहर्ज्ञेयं तावतीं रात्रीमेव च ॥ ७२ ॥ (भट्ट, १९८३ इ.सं: २१)

दैवयुगम् × १००० = ४३२०००० × १००० = ४३२००००००० मानुषवर्षप्रमाणेन

∴ ब्राह्मदिनम् = ४३२००००००० मानुषवर्षप्रमाणेन

ब्राह्मीरात्री = ४३२००००००० मानुषवर्षप्रमाणेन

∴ ब्राह्ममहोरात्रम् = ४३२०००००००+ ४३२०००००००

= ८६४००००००० मानुषवर्षप्रमाणेन

मनुस्मृतावेव मन्वन्तरस्य प्रमाणमपि कथितं वर्तते । दैवयुगप्रमाणं यदि एकसप्तत्या (७१) गुण्यते तदेकं मन्वन्तरं भवतीति यथा

यत्प्राक्द्वादशसाहस्रमुदितं दैविकं युगम् ।

तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते ॥ ७९ ॥ (भट्ट, १९८३ इ.सं: २२)

अर्थात् १२०००×७१ = ८५२००० दिव्यवर्षप्रमाणेन भवति चेन्मानुषवर्षप्रमाणेन तु ७५२००० × ३६० = ३०६७२०००० एतावद्भवति । मनुस्मृतौ केवलं द्वादशसहस्रमेक सप्ततिगुणितमिति कथितम् । परं विष्णुपुराणे तु गुणितसंख्या स्पष्टतयैवोल्लिखिता दृश्यते । (विष्णु. १ । ३ । २०-२१) यथा

त्रिशत्कोटचस्तुसम्पूर्णाः सख्याताः सख्यया द्विज ।

सप्तषष्टिस्तथान्यानि नियुतानि महामुने ॥ २० ॥

विंशतिस्तु सहस्राणि कालोऽयमधिकं विना ।

मन्वन्तरस्य संख्येयं मानुषैर्वत्सरैर्द्विज ॥ २१ ॥ (वेदव्यास, २०४१ वि.सं. : १३)

न केवलं मानुषवत्सराणामुल्लेखो विष्णुपुराणे अपितु दिव्यमानानुसारिणी संख्या च तत्रैव वर्णिता यथा

अष्टौ शतसहस्राणि दिव्यया संख्यया स्मृतम् ।

द्विपञ्चाशत्तथान्यानि सहस्राप्यधिकानि तु ॥१९ ॥ (वेदव्यास, २०४१ वि.सं: १३)

अर्थात् ८५००० दिव्यवर्षाणि एकस्मिन् मन्वन्तरे भवन्तीति स्पष्टतयैवोक्तम् । यदि दिव्यमानं ३६० इत्यनेन गुण्यते तदा मानुषमानं समागच्छतीति तु सुस्पष्टमेव । तत्तु पूर्वं दर्शितमपि ।

मत्स्यपुराणे, विष्णुपुराणे, श्रीमद्भागवते (३ -११-१८, १९, २२) मत्स्यपुराणे १६५ अध्याये सत्यत्रेताद्वापरकलीनां वर्षसंख्या वर्णिता विद्यते । तत्र कृतयुग प्रमाणं दिव्यमानेन ४००० वर्षाणां भवतीति 'चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम् । तस्य तावच्छती संन्ध्या द्विगुणा रविनन्दनः ॥ १ ॥' अर्थात् सन्ध्यासन्ध्यांशयुक्तं कृतयुगप्रमाणम् दिव्यमानेन ४०००+८०० = ४८०० वर्षाणि तत् ३६० इत्यनेन गुण्यते तदा मानुषमानेन कृतयुगवर्षाणि (४८००× ३६० = १७२८०००) भवन्ति ।

तथैव त्रेतायुगवर्षप्रमाणं ३६०० दिव्यमानेन भवतीति चेत् मानुषवर्षप्रमाणेन तु ३६००× ३६० = १२९६००० भवतीति त्रीणि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्षसहस्राणि त्रेतायुगमिहोच्यते । तस्य तावच्छती सन्ध्याद्विगुणा परिकीर्त्यते ॥ ६॥ इति

एवञ्च द्वापरयुगस्यमानमपि 'द्वापरं द्वे सहस्रे तु वर्षाणां रविनन्दन । तस्य तावती सन्ध्या द्विगुणा युगमुच्यते ॥ १० ॥ (वेदव्यास, २०६१ वि.सं. : ६७६) इति २००० ४०० ≠ २४०० दिव्यवर्षाणां द्वापरयुगं भवतीति अत्र वर्णितम् । तस्य प्रमाणञ्च मानुषवर्षेण २४०० x ३६० वर्ष मितमर्थात् ८६४००० मितं भवति ।

तथैव कलेः प्रमाणञ्च 'तथा वर्षसहस्रं तु वर्षाणां द्वे शते अपि । सन्ध्यया सह सख्यातं क्रूरं कलियुगं स्मृतम् ॥ १४ ॥ (वेदव्यास, २०६१ वि.सः ६७७) अर्थात् १२०० x ३६० = ४३२००० मानुषबर्षामितम् कलियुगप्रमाणम् ।

ब्राह्मं दिनमपि अस्मिन्नेवाध्याये (१६५ अध्याये) वर्णितं दृश्यते तद् यथा

विद्याद् द्वादशसाहस्रीं युगाख्यां पूर्वनिर्मिताम् ।

एवं सहस्रपर्यन्तं तदहर्ब्राह्ममुच्यते ॥ १९ ॥ (वेदव्यास, २०६१ वि.सः ६७७)

यथोक्तकरणेन

१२००० × १००० = १२०००००० दिव्यवर्षाणि

१२००००००×३६० = ४३२०००००० मानुषवर्षाणि अर्थात् ४३२०००००० मानुषवर्षाणां ब्रह्मदिनं भवतीति सिध्यति । इदं प्रमाणमेव कल्प इत्युच्यते 'कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती २०' (पाण्डेय, २००० वि.सः १३०) इति सूर्यसिद्धान्तमध्यमाधिकारेक्तेः । मन्वन्तरस्य संख्याऽपि मानुषवर्षेणैव कथिता मत्स्यपुराणे १४२ तमेऽध्याये यथा

मन्वन्तरस्य संख्या तु मानुषेण विबोधित ।

एकत्रिंशत् तथा कोटचः संख्याताः सख्यया द्विजैः ॥ ३० ॥

तथा शतसहस्राणि दश चान्यानि भागशः ।

सहस्राणि तु द्वात्रिंशच्छतान्यष्टाधिकानि च ॥ ३१ ॥

आशीतिश्चैव बर्षाणि मासाश्चैवाकिचास्तु षट् ॥

मन्वन्तरस्य संख्यैषा मानुषेण प्रकीर्तिता ॥ ३२ ॥ (वेदव्यास, २०६१ वि.सः ५०५)

अर्थात् मन्वन्तरवर्षाणि ३११०३२८८० मासाः ६ इति अत्र स्पष्टतयोक्तत्वात् संख्यावोधकशब्दानां संख्यावाचकशब्दानां स्थूलाङ्कानाञ्च वर्णनं मत्स्यपुराणे समागतमिति सिध्यति ।

ब्रह्माण्डपुराणे दशगुणोत्तराणां सख्यानां संज्ञा यथा

एकं दश शतञ्चैव सहस्रमयुतं तथा ।

लक्षं च नियुतं चैव कोटिरर्बुदमेव च ।

वृन्दं खर्वो निखर्वश्च शङ्ख(पद्मौ च सागरः ।

अन्त्यं मध्यं परार्धञ्च दशवृद्धया यथाक्रमम् ॥ (जोशी, १९६७ इ.सः ६५०)

प्रचलित ब्रह्माण्डपुराणे तु एतौ पद्यौ न दृश्येते । हलायुध कोषटीकायाम् शंखशब्दस्य स्फुटीकरणप्रसङ्गे एतौ पद्यौ समुद्धृतौ दृश्यते ।

प्रचलिते तु अधस्तनानि पद्यानि दृश्यन्ते (३ । २ । ९२-१०२)

एकं दश शतञ्चैव सहस्रं चैव संख्यया

विज्ञेयमासहस्रं तु सहस्राणि दशायुतम् ॥ ९२ ॥

एकं शतसहस्रं तु नियुतं प्रोच्यते बुधैः ।

तथा शतसहस्राणां दशप्रयुतमुच्यते ॥ ९३ ॥

तथा दशसहस्राणांमयुतं कोटिरुच्यते ।

अर्बुदं दशकोटचस्तु ह्यब्जं कोटिशतं विदुः ॥ ९४ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सहस्रमपि कोटीनां खर्वमाहुर्मनीषिणः ।

दश कोटिसहस्राणि निखर्वमिति तं विदुः ॥ ९५ ॥

शतं कोटिसहस्राणां शङ्कुरित्यभिधीयते ।

सहस्रं तु सहस्राणां कोटीनां पद्ममुच्यते ॥ ९६ ॥

सहस्राणि सहस्राणां कोटीनां दशधा पुनः ।

गुणितानि समुद्रं वैं प्राहुः संख्याविदो जनाः ॥ ९७ ॥

कोटिसहस्रनियुतंमन्त्यमित्यभिधीयते ।

कोटिसहस्रप्रयुतं मध्यमित्यभिसंज्ञितम् ॥ ९८ ॥

कोटि कोटिसहस्रं तु परार्ध इति कीर्त्यते ।

परार्धं द्विगुणं चापि परमाहुर्मनीषिणः ॥ ९९ ॥

शतमाहुः परिवृढं सहस्रं परिपद्मकम् ।

विज्ञेयमयुतं तस्मान् नियुतं प्रयुतं ततः ॥ १०० ॥

अर्वुदंन्यवुदं चैव खर्वुदं च ततः परम् ।

खर्वं चैव निखर्वं च शंकुः पद्मं तथैव च ॥ १०१ ॥

समुद्रमन्त्यं मध्यं च परार्धं च ततः परम् ।

एवमष्टादशैतानि स्थानानि गणनाविधौ ॥ १०२ ॥ (वेदव्यास, २००० वि.सं: २४४)

श्रीमद्भागवते तृतीयस्कन्धस्य एकादशाध्याये सत्यत्रेताद्वापरकलीनां चतुर्णां युगानां संख्यात्मकमानं सूत्ररूपेणाऽऽह वेदव्यासः

कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ।

दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरुपितम् ॥ १८ ॥

चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् ।

सख्यातानि सहस्राणि बहिराब्राह्मणो दिनम् ॥

तावत्येव निशा तात यन्निमीलति विश्वसृक् ॥ २२ ॥ (वेदव्यास, २०३७ वि.सं: १३३)

सन्दर्भग्रन्थसूची

वेदव्यास, २०३७, श्रीमद्भागवतमहापुराणम्, गीताप्रेस, गोरखपुर ।

वेदव्यास, २०००, ब्रह्माण्ड महापुराणम्, कृष्णदास अकादमी वाराणसी

वेदव्यास, २०४१, श्रीश्रीविष्णुपुराण, गीताप्रेस, गोरखपुर

जोशी, जयशङ्कर जोशी, १९६७ हलायुध कोश, हिन्दि समिति सूचना विभाग उत्तरप्रदेश वेदव्यास, २०६१ श्रीश्रीविष्णुपुराण, गीताप्रेस, गोरखपुर

पाण्डेय, प्रो. रामचन्द्रपाण्डेय, २००० सूर्यसिद्धान्त, चौखम्वा सुरभारती प्रकाशन वाराणसी

भट्ट, श्रीकुल्लुकभट्ट १९८३ मनुस्मृतिः, मोतीलाल बनारसीदास दिल्ली, वाराणसी पटना

महर्षि, महर्षि याज्ञवल्क्य, २०४७ याज्ञवल्क्यस्मृति, चौखम्वा संस्कृत संस्थान वाराणसी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तन्त्रशास्त्रोक्ता दश संस्कारा:

उपप्रा. दुर्गामणिसिग्देल:
पूर्वमीमांसा-तन्त्रविभाग:,
वाल्मीकिविद्यापीठम्

१. पूर्वपीठिका

'तनु' विस्तारे धातोः ष्ट्रन्प्रत्ययस्य योगान्निष्पन्नेन तन्त्रपदेन 'इच्छा-ज्ञान-क्रिया'शक्तीनां सङ्कोचावस्थातो विस्तार्य अप्रतिहतावस्थायां प्रापणे प्रेरणा बोध्यते । 'विस्तार्यते ज्ञानमनेन' इति व्युत्पत्तेराशयस्य परिपूर्त्यर्थं तन्त्रशास्त्रानुकूला विधयरूपायाश्चसमुपयोजनीयाः । मलत्रयाणां कार्ममायीयाऽऽणवानामपसारणात् पाशैर्बद्धो जीवोऽज्ञानस्वरूपात् पशोरवस्थातः पतेर वस्थायां प्राप्नोति । ते च मला विधिनियमैर्विद्यायोगक्रियाचर्याभिश्चापसारिता भवन्ति । सर्वश्रेष्ठप्राणिनो मानवाः संस्कारेण विना विधिनियमजपपूजायोगक्रियाचर्यासु नाऽधिकारिणो भवन्ति । उक्तञ्च महानिर्वाणतन्त्रे–

संस्कारेण विना देवि देहशुद्धिर्न जायते ।
नाऽसंस्कृतोऽधिकारी स्याद्दैवे पैत्र्ये च कर्मणि ॥[1]

ननु वैदिकेषु शास्त्रेष्वपि द्विजेभ्यः संस्कारस्यावश्यकता उपदिष्टा विधि-व्यवस्थाश्च सम्पादिताः सन्ति । 'जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते' इत्यादिवचनेन शास्त्रं संस्काराय प्रेरयति च । पुनस्तान्त्रिकाः संस्काराः किमर्थमिति चेदुच्यते- सत्यत्रेताद्वापर युगेषु वेदसम्मतमार्गेणैव मानवाः सुसंस्कृता भवन्ति स्म, अत्र न कोऽपि विवादः । परं विकरालकलिकालकल्मषैः कलुषिता जना अस्मिन् युगे तु परमेश्वरेण शिवेनोपदिष्टागमानुकूलेन मार्गेण संस्कारिता भवन्ति । विशेषतः ब्राह्मणेतराणां वर्णबाह्यानां चोद्धाराय तान्त्रिकविधिव्यवस्था आवश्यकाः । यतो हि विततवैदिकमार्गे किञ्चिज्ज्ञातारः किञ्चित्कर्तारश्च जनाः पारं गन्तुं नैव शक्नुवन्ति । अतो वैदिकसंस्कारात् सूक्ष्मतरः, सङ्क्षिप्ततरः, सरलतरः, सहजतरश्चागमोक्तमार्गोऽवलम्बनीयः ।

२. संस्कारपरिचय:

सम् इत्युपसर्गपूर्वकाद् डुकृ करणे धातोर्घंप्रत्ययसंयोजनानन्तरं (सम्+कृ+घ मेलनात्) संस्कारशब्दो निष्पद्यते । संस्कारशब्दः संस्करण-परिष्करण-परिष्कार-शोभाऽलङ्काराऽऽभूषणादिष्वनेकेषु अर्थेषु प्रयुक्तो भवति । शरीर-मनोभाव-चित्तविशुद्धीकरणमेवेत्याशयः । शुद्धस्य परिपूर्णताप्रदायकः खलु संस्कारः । अनेने हि दोषविकाराणां तिरोधानं भवति । श्रौतस्मार्तसंस्कारैर्मनुष्यशरीरे शुद्धेरापादनं भवति । अतस्तानि कर्माण्यपि संस्काराः कथ्यन्ते[2], येन अन्तःकरणमपि परिमार्जितं भवति । परिष्कारात् सुवर्णं यथा स्वच्छं निर्मलं विकाररहितञ्च भवति तथैव मनुष्यजीवनेऽपि सर्वावस्थानां मलदोषनिवारणार्थं शास्त्रीयमन्त्रात्मकानि कर्माणि विहितानि सन्ति, ते संस्काराः[3]। वस्तुतस्तु शास्त्रेषु गर्भाधानादारभ्यान्त्येष्टिपर्यन्तं षोडशो वा न्यूनाधिका वा संस्कारा प्रसिद्धाः । अस्मिन्नेव प्रसङ्गे तन्त्रशास्त्रे निष्कर्षत्वेन दश संस्कारा विनिर्णीता वर्तन्ते । यः शास्त्रविधिमुल्लङ्घ्य कार्यं करोति स इहलोके परलोके च सिद्धिमानन्दं परां गतिञ्च न प्राप्नोति । गीतायां श्रीकृष्णेन उक्तमप्यस्ति –

"यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥[4]

३. प्रकारा:

वैदिकवाङ्मस्य महत्त्वपूर्णे सूत्रग्रन्थेऽष्टचत्वारिंशत् सङ्ख्यकाः संस्काराः कथिता वर्तन्ते । ते च गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनादयः सन्ति[5] । व्याससमृतौ विभिन्नाः संस्कारा वर्णिताः सन्ति परं तत्र निष्कर्षरूपेण षोडश संस्कारा व्यवस्थिता दृश्यन्ते । ते षोडश संस्काराः १) गर्भाधानम् २) पुंसवनम् ३) सीमन्तोन्नयनम्

---

१ महानिर्वाणतन्त्रम् ९।२

२ संस्क्रियते अनेन श्रौतेन कर्मणा स्मार्तेन वा पुरुषः इति संस्कारः ।
(मुहूर्तचिन्तामणि पीयूषधारा व्याख्या संस्कारप्रकरणस्य भूमिका)

३ ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः
निषेकाद्या श्मशानान्ता तेषां वै मन्त्रतः क्रियाः ।– या. स्मृ., आ. १०

४ श्रीमद्भगवद्गीता, अध्याय १७, श्लोक २३, २४

५ गौतमधर्मसूत्रम् १।८।१४ - २४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) जातकर्म ५) नामकरणम् ६) निष्क्रमणम् ७) अन्नप्राशनम् ८) चूडाकर्म ९) कर्णवेधः १०) उपनयनम् ११) वेदारम्भः १२) केशान्तकर्म १३) समावर्तनम् १४) विवाहः १५) विवाहाग्निपरिग्रहः १६) त्रेताग्निसङ्ग्रहसंस्कारश्च सन्ति।[६] अतो विभिन्नेषु संस्कारेषु मध्ये विशिष्टाधिकारिभ्य उचितान् श्रौतस्मार्तयज्ञरूपान् संस्कारान् त्यक्त्वा षोडश संस्कारा वैदिक वाङ्मयेषु विनिश्चिताः।

तन्त्रशास्त्रेऽपि षोडशसंस्काराणां मौलिकी व्यवस्था वर्तते। यथा महाकालसंहितायां षोडश संस्काराणां विधिः प्राप्यते। ते च १) गर्भाधानम् २) पुंसवनम् ३) सीमन्तः सीमन्तोन्नयनं वा ४) जातकर्म ५) नाम-प्रदानम् ६) अन्नप्राशनम् ७) चौलम् ८) मौञ्जीबन्धनम् ९) प्राजापत्यम् १०) सौम्यम् ११) आग्नेयम् १२) वैश्वदेवः १३) गोदानम् १४) समावर्तनम् १५) विवाहः १६) पितृमेधश्च।

पुनः कर्तृशक्तिं परिलक्ष्योत्तरोत्तरेषु तन्त्रशास्त्रेषु संस्कारचिन्तनस्य परिमार्जनस्वरूपा दश संस्कारा विनिर्णीता वर्तन्ते।

प्राणतोषिण्यां द्विजानां कर्ममात्राधिकारकाः दश संस्काराः समुल्लिखिताः प्राप्यन्ते।[७] शूद्राणां तु नव संस्कारा निर्धारिताः सन्ति।

महानिर्वाणादितन्त्रशास्त्रेऽपि द्विजातीनां कृते दश संस्कारा[८] व्यवस्थिताः सन्ति। शूद्राणां सामान्यजातीनां स्त्रीणाञ्च नव संस्कारा भवन्ति। उक्तञ्च– 'शूद्राणां शूद्रभिन्नानामुपवीतं न विद्यते। तेषां नवैव संस्कारा द्विजातीनां दश स्मृताः॥'[९]

अतस्तेषां दश संस्काराणामनुशीलनमत्र भविता।

सर्वेषु तन्त्रोक्तसंस्कारेषु केचन साधारणा नियमाः पालनीया भवन्ति। अतः शाम्भववर्त्मना नित्यानि कर्माणि कृत्वा तत्तत्तान्त्रिकबीजमन्त्रैः कुशण्डिकापूर्वकं[१०] शास्त्रोक्तविधिना मायाद्यैः (ह्रीं इति) स्वाहान्त्यैर्मन्त्रैर्हुत्वा अग्नेर्बुद्धि-विद्या-वल-प्रज्ञा-श्रद्धा-यशश्-श्री-आरोग्य-तेज-आयुषां प्रसादरूपेण ग्रहणञ्च कृत्वा संस्कारा विधीयन्ते। तेषु कर्मसु जलपूर्णघटेषु सम्वद्धानां देवदेवीनां यथामिलितोपचारैः पूजोपासनाश्च भवन्ति।

३.१ गर्भाधानम्

सत्सन्तानप्राप्त्यर्थं गर्भाधानवेलायां कर्तव्यो गर्भाधानसंस्कारो वीर्यगर्भगतपापनाशको वर्तते।[११] गर्भधारणसंस्कारस्य शुभवेलाया विषये मनोः कथनमस्ति - पर्वकालः (अमावस्या, पूर्णमासी, अष्टमी, चतुर्दशी) मूलमघादीनि नक्षत्राणि वर्ज्याणि। ऋतुदिनात् पञ्चमतः षोडशपर्यन्ता रात्रयो गर्भाधाने शुभा भवन्ति। तेष्वपि एकादशी-त्रयोदशी वर्जित्वा अन्येसु रात्रिषु गर्भाधानसंस्कारः प्रशस्तो भवति। एतास्वपि रात्रिषु युग्मादिनेषु पुत्रा जायन्ते अयुग्मोषु तु पुत्र्यः भवन्ति।[१२] अस्मिन् अवसरे स्वस्वसम्प्रदायानुसारिभिः "गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टके। गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ॥"[१३] इत्यादिभिः शुभमन्त्रैः सम्प्रार्थ्य वेदमार्गेण गर्भाधानं क्रियते। तन्त्रशास्त्रानुसारमस्मिन् ऋतुसंस्कार-जीवसेक-कर्मणि आगमोक्तविधिना हवनयजनपूजनादिकम्[१४] सम्पाद्य आगमोक्त-(क्लीं, ह्रीं, ल्कीं, ह्रीं, स्त्रीं, ह्रीं, स्त्री, ह्रीं, क्लीं, ह्रीं) मन्त्रोच्चारणपूर्वकं पत्न्या सह प्रेम्णा समागमः क्रियते।

बीजमन्त्राणां विषये महानिर्वाणतन्त्रे श्लोकोऽयमस्ति -

"कामेन (क्लीं) पुटितां मायां (ह्री) मायया पुटितां वधूम् (स्त्रीं)।

पुनः कामञ्च मायाञ्च पठित्वाऽस्याः शिरः स्पृशेत्॥"

अत्र गर्भाधानसमयस्य विषये वेदतन्त्रयोर्न कोऽपि विवादः। परं तस्मिन्नवसरे प्रयुक्ता मन्त्रा भिन्ना वर्तन्ते। अत्र जीवसेकावसरे[१५](बीजसेचनसमये) सत्सन्ततये देवः सम्प्रार्थ्यते। इत्थं गर्भाधानसंस्कारे कृते सति कामभावनायाः तिरोधानं भूत्वा सत्सन्तानप्राप्त्यर्थं शुभभावनायाः सम्पादनं भवति।[१६]

---

६ गर्भाधानं पुंसवनं सीमन्तो जातकर्म च। नामक्रिया निष्क्रमणोऽन्नाशनं वपनक्रिया।
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः। केशान्तस्नानमुद्वाहो विवाहाग्निपरिग्रहः।
त्रेताग्निसङ्ग्रहश्चेति संस्काराः षोडशः स्मृताः।–व्यासस्मृति १।१३-१५

७ द्विजानां दश संस्कारा कर्ममात्राधिकारकाः।
शूद्राशूद्रप्रकाराणां विज्ञातव्या नवैव ते।– प्राणतोषिणी, पृष्ठ २३१।

८ जीवसेकः पुंसवनं सीमन्तोनयनं तथा।
जातनाम्नी निष्क्रमणमन्नाशनमतः परम्॥
चूडोपनयनोद्वाहाः संस्काराः कथिता दश॥–महानिर्वाणतन्त्रम् ९।४

९ पूर्ववत् ९।५

१० सर्वेषां शुभकार्याणामादिभूता कुशण्डिका। तस्मादादौ प्रवक्ष्यामि श्रृणु तां देववन्दिते।– पूर्ववत् ९।१४

११ वैजिकं गार्भिकं चैनौ द्विजानामपमृज्यते।-मनुस्मृतिः २।२९

१२ मनुस्मृतिः ३।४५–४८

१३ बृहदारण्यकोपनिषद् ६।४।२१

१४ विरच्य स्थण्डिलं धीरो वह्निस्थापनपूर्वकम्। होमद्रव्याणि संस्कृत्य। –महानिर्वाणतन्त्रम् ९।९३

१५ शुक्रसेकान्तरे विद्वानिमं मन्त्रमुदीरयेत्।–पूर्ववत् ९।११५

१६ तन्त्रविद्यालोकः, पृष्ठः ३४०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३.२ पुंसवनम्

"पुंनाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः । तस्मात् 'पुत्र' इति प्रोक्तः स्वयमेव स्वयंभुवा ॥[१७] इति वचनेन तथा "पुमान् प्रसूयते येन तत् पुंसवनमीरितम्" इति सूक्त्या च परिज्ञायते यत्- वैदिकमार्गे पुत्रप्राप्तये संस्कारोऽयं विधीयते । आगममार्गे तु तादृशी धारणा यत्रकुत्राऽपि नैव प्राप्यते । परमेतादृशी मनोभावना बीजरूपेण तन्त्रमार्गेऽपि विद्यते खलु । 'पुंसवनम्' इति नाम्ना अपीत्थं त्वनुमातुं शक्यते ।

वैदिकवाङ्मयानुसारेण गर्भाधानाद् द्वितीये तृतीये वा मासि पुंसवनम् भवति । तान्त्रिकशास्त्रानुसारेणापि गर्भधारणात् तृतीये मासि पुंसवनाख्यः संस्कारः क्रियते । आगमानुसारेण अस्मिन् संस्कारे पञ्चदेवान् मातृकाश्च सम्पूज्य वसुधारां वृद्धिश्राद्धञ्च कृत्वा पत्न्यै यवमाषमिश्रितं दधि दीयते । तदा देवदेवीनां कृते हवनं भवति । पञ्चमे मासि तु पुंसवनसंस्काराङ्गतया पञ्चामृतं पानार्थं दीयते । उक्तञ्च - 'ततस्तु पञ्चमे मासि दद्यात् पञ्चामृतं स्त्रियै'[१८] इति ॥

वैदिकपद्धतौ पुनर्वसुनक्षत्रे उपवासं कारयित्वा तिष्यनक्षत्रे यवमिश्रितं दधि पत्न्यै प्राशनार्थं दीयते । वटवृक्षस्य नवपल्लवान् कुशमूलस्थं जलं च एकीकृत्य लेपं कृत्वा पतिर्गर्भिणीं पत्न्या दक्षिणनासापुटे प्रवेशयति ।[१९] अवसरेऽस्मिन् वेदमन्त्रपाठोऽपि[२०] क्रियते । पुंसवनकर्माङ्गभूतानि अन्यानि कार्याणि समानानि सन्ति । तथापि वेदागममार्गयोः पुंसवनसंस्कारे काचन भिन्नता वर्तते । तासु भिन्नतासु मुख्या भिन्नता अस्ति यत्– तन्त्रमार्गे पञ्चमे मासि पञ्चामृतपानकर्माऽधिकं दृश्यते । अनेन संस्कारेण गर्भस्थस्य शिशोः संरक्षणं भवति । तदा गर्भपातभयादुन्मुक्तिश्च प्राप्यते । अतोऽस्मिन् संस्कारे गर्भपातादिभयनिवारणार्थं माङ्गलिकः पाठः, विघ्नहर्तृगणेशादिपूजनञ्च भवत्येव ।

३.३ सीमन्तोनयनम्

गर्भधारणात् षष्ठेऽष्टमे वा मासि[२१] सीमन्तोनयनं भवति । तदनन्तरमपि यावदपत्यं न जायते तावत्पर्यन्तं कस्मिँश्चिच्छुभदिने एतत् कर्म क्रियते ।[२२] अस्मिन् कर्मणि आगमोक्तविधिना हवनपूजनादिकं समाप्य पतिः पत्न्याः केशपाशे सीमन्तदेशे च स्वर्णकङ्कतिकां निवेशयति ।[२३] तदा पतिः पत्नीं सम्बोधयित्वा मायाबीजं (ह्रीं) समुच्चरन् 'दशमे मासि सुप्रसूता भव' इति कथयति च ।[२४] ततः स्विष्टकृद्धवनादिकं कर्म[२५] कृत्वा सीमन्तोनयनं समाप्यते ।

वेदवाङ्मयानुसारेण तु गर्भाधानाच्चतुर्थे मासि कृष्णपक्षस्य चतुर्दश्यां श्रवणपुनर्वसुमृगशिरोतिष्यनक्षत्रेषु सीमन्तोन्नयनं विधीयते । तत्र वेदोक्तविधिना हवनादिकं सम्पाद्य पतिर्यज्ञावशिष्टं क्षीरं पत्नीं प्राशयति । तत्राऽऽगमवेदयोः सीमन्तोन्नयनकर्मणि कालविषये विधिविषये च पार्थक्यमस्ति । यतो हि तन्त्रागमे चतुर्थे मासि सीमन्तोन्नयनस्य व्यवस्था नैव विहिता । तथैव क्षीरपानस्य व्यवस्थाऽऽपि तत्र न मिलति । पुराणेषु 'अभिमन्युप्रह्लादनारदादयो गर्भस्थवेलायामेव सीमन्तोन्नयनसंस्कारेण हि चक्रव्यूहादिविषयकं ज्ञानं लब्धवन्तः' इति कथा च प्राप्यते । अस्मात् सीमन्तोन्नयनसंस्काराद् गर्भस्थः शिशुः विशिष्टां विद्यां गृह्णातीति हेतोरस्य संस्कारस्य वैशिष्ट्यं स्फुटं भवति । तन्त्रवाङ्मयानुसारेण तु अनेन संस्कारेण तस्या गर्भवती स्त्री आयुष्मती भवति, विश्वकर्मा तेजोवृद्धिञ्च करोति ।[२६] अतो निष्कर्षयितुं शक्यते यत् सीमन्तोन्नयनेन गर्भस्थस्य सन्तानस्येच्छाज्ञानक्रियाशक्तीनां विकासो भवतीति ।[२७]

३.४ जातकर्म –

शिशुजननानन्तरं सुवर्णदानदेवदेवीपूजनहवनादिकार्याणि सम्पाद्य, पिता कांस्यपात्रे मधुघृतमानीय बीजमन्त्रोच्चारणपूर्वकं (कुमार्यास्तु अमन्त्रकम्[२८]) वाग्भवमन्त्रम् (ऐं) सप्तवारं जपन् शिशुं प्राशयति ।[२९]

अस्य संस्कारस्याऽऽवसरे शिशोरायुस्तेजो-बल-मेधाः संप्रार्थ्य तस्य तस्या वा गोप्यं नाम परिकल्प्यते । देवपितृकर्माणि

---

१७ मनुस्मृतिः ९।१३८

१८ . महानिर्वाणतन्त्रम् ९।१२८

१९ . कल्याणः, धर्मशास्त्राङ्कः, वर्षम् ७०, सङ्ख्या १, पृ. ३६४।

२० . यजुर्वेदः १३।४

२१ सीमन्तोनयनं कुर्यान्मासि षष्ठेऽष्टमेऽपि वा । – महानिर्वाणतन्त्रम् ९।१३१

२२ प्राणतोषिणी, पृ. २४१

२३ तन्त्रविद्यालोकः, पृ. ३४०

२४ प्राणतोषिणी, पृ. २४१

२५ ततः समापयेत्कर्म स्विष्टकृद्धवनादिभिः ।– महानिर्वाणतन्त्रम् ९।१३८

२६ पूर्ववत् ९।१३७

२७ तन्त्रविद्यालोकः, पृ. ३४०

२८ कुमार्याश्चापि कर्तव्यमेवमेवममन्त्रकम् ॥ – महानिर्वाणतन्त्रम् ९।१४६

२९ प्राणतोषिणी, पृ. २४२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्पाद्याऽनन्तरमेव धात्री नालच्छेदनं करोति ।[३०] तदा त्रिदिनाभ्यन्तरे शिशोर्जिह्वायां श्वेतदूर्वाभिर्मधुना ऐं लिख्यते ।[३१] एतस्मिन् कर्मणि कृते सति शिशुः पण्डितो भविष्यतीति विश्वासो दृश्यते । ओष्ठे श्वेतदूर्वया 'ऐं' इति मूलमन्त्रस्य लेखनविधिश्च तन्त्रशास्त्रे व्यवस्थितः प्राप्यते । अनेन कर्मणा बालो वाक्योच्चारणतो वाग्मीं द्रुतकविश्च भवति ।

वैदिकवाङ्मयानुसारेणाऽपि नाभिच्छेदनात् पूर्वं जातकर्म क्रियते । अस्मिन्नवसरे पिता हिरण्यशलाकया अनामिकया वा मधुघृते प्राशयति ।[३२] दीर्घायुःकामनया तत्राऽऽचार्यः पिता वा वनस्पतिम्, ओषधिं, ब्राह्मणम्, अमृतं, व्रतं, स्वधां, दक्षिणां, नदीञ्च प्रार्थयते ।[३३] वेदमार्गे तन्त्रमार्गे चास्मिन् संस्कारे मधुघृते प्राश्येते किल । तत्र द्वयोर्मार्गयोः समुद्देश्यमपि दृश्यते । दीर्घजीवनप्रज्ञापुरुषार्थप्राप्तिरिति उद्देश्यं समानमेव । तथापि तन्त्रशास्त्रे ओष्ठे जिह्वायां वा बीजमन्त्रं लिख्यते । इदं कर्म तु विशिष्टं वर्तते तन्त्रशास्त्रे ।

३.५ नामकरणम् –

जन्मतः षष्ठेऽष्टमे वा मासि शुभदिने माता शौचादिकार्यं सम्पाद्य शिशुं स्वपतेः परतो नीत्वा पूर्वाभिमुखतया तिष्ठति । शिरसि ह्रीं इति बीजमन्त्रेण सह आपोहिष्ठादिभिर्मन्त्रैर्जलसेचनेन पवित्रीकरणं क्रियते । ततो हवनादिकार्यं भवति । हवनं तु पार्थिवसंज्ञके वह्नौ भवति । अग्नये, वासवाय, प्रजापतये, विश्वेभ्यो देवेभ्यो, ब्रह्मणे च हूयते । तदैव शिशुं स्वाङ्के स्थापयित्वा तस्य तस्या वा दक्षिणे कर्णे स्वल्पाक्षरैर्निर्मितमुपयुक्तं परिकल्पितं नाम प्रकाश्यते ।[३४]

लौकिकव्यवहारसिद्धेरायुस्तेजोवृद्धेश्च प्राप्त्यर्थं निगमवर्त्मना एकादशेऽहनि[३५] दशमे द्वादशेऽहनि वा पुण्यतिथौ शुभनक्षत्रे शुभमुहूर्ते नामकर्म विधीयते ।[३६] अस्मिन् कर्मणि वैदिकाः शिशोः ख्यातिकामनया हवनादिकर्मपूर्वकं कुलदेवताः पूजयन्ति । अतो निगमाऽऽगमयोः नामकरणसमयस्य विषये विधिविषये च काचिद् भिन्ना व्यवस्था प्रचलिताऽस्ति । किन्तु परमोद्देश्यं तु समानं परिप्राप्यते ।

३.६ निष्क्रमणम्

सन्तानजन्मानन्तरं प्रथमवारं गृहाद् बहिर्गमनकर्म हि निष्क्रमणम् । महानिर्वाणतन्त्रे[३७] प्राणतोषिण्यामपि[३८] चतुर्थे वा षष्ठे मासि निष्क्रमणकर्मणो व्यवस्था विहितास्ति । अस्मिन् कर्मणि पिता शिशुं स्वाङ्के स्थापयित्वा चन्द्रसूर्यौ पूजयति । तत्र गणेशपूजनपूर्वकं शिशुं स्नापयित्वा नवीनवस्त्रालङ्कारसहितं तं देवदेवीनां पूजनपुरःसरं ह्रीं ब्रह्मा विष्णुरित्यादिमन्त्रोच्चारणपूर्वकं[३९] सानन्दैः स्वजनैर्बन्धुवान्धवैश्च सह स्वगृहाद् बहिर्निष्क्रमणं कारयति । ततः सूर्यदर्शनं क्रियते । तदा गृहमागत्य सूर्यार्घ्यं दत्त्वा स्वजनानां बन्धुबान्धवानां च भोजनानन्तरं कर्म समाप्यते । वैदिकवाङ्मयानुसारेणाऽपि एवमेव कर्म विधीयते । तत्र एतत् कर्म नामकरणकर्मदिने क्रियते । अपितु तन्त्रशास्त्रे नामकरणात् पूर्वमपि निष्क्रमणस्य विधानं दृश्यते ।[४०] तत्र वेदसंहितानुसारेण पाञ्चभौतिकस्य शरीरस्य कल्याणार्थं पृथ्वी-जल-तेजो-वायु-आकाशान् पूजयित्वा तेषामधिष्ठातारः सम्प्रार्थ्यन्ते ।[४१]

एतादृशी व्यवस्था आगमनिगमयोरस्ति । अतः कतिपयेषु विषयेषु विधिव्यवस्था भिन्नाः कतिपयेषु समाना एव बुद्ध्यन्ते ।

३.७ अन्नप्राशनम् –

बालकस्य षष्ठेऽष्टमे वा मासि हवनपूजनानन्तरमलङ्कारेण सुसज्जितं बालकं क्रोडे धृत्वा पिता पितुरभावे पितृव्यो वा पायसं प्राशयति । अवसरेऽस्मिन् नित्यकर्म सम्पाद्य सगणाधिपगौर्यादिषोडशमातृकाश्च पूजयित्वा शुचिनामानमग्निं संस्कृत्य धाराहोमान्तं च क्रियते ।[४२] तत्र अग्नये, इन्द्राय, प्रजापतये, विश्वेभ्यो देवेभ्यः, ब्रह्मणे चाऽऽहुतीः प्रदाय पञ्चप्राणेभ्यश्च स्वाहाकारेण आहुतिं दत्त्वा पिता शेषमन्नं बालकेन खादयति ।[४३] तदा आचमनं कारयति च । तदनन्तरं गीतवाद्यपुरःसरं प्रायश्चित्तहोमादिकर्म

---

३० नालच्छेदं ततो धात्री कुर्यादुत्साहपूर्वकम् । –महानिर्वाणतन्त्रम् ९।१४४

३१ वालकस्य तु जिह्वायां त्रिदिनाभ्यन्तरे न्यसेत् । मधुना श्वेतदूर्वाभिः सुवर्णस्य शलाकया ।
इदं वाग्भवकूटन्तु लिखेद्वै जननान्तरे । मूलमन्त्रं लिखेन्मन्त्री यस्यौष्ठे श्वेतदूर्वया ।
वाक्योच्चारणतो वालो वाग्मी द्रुतकविर्भवेत् । – गन्धर्वतन्त्रम् ।

३२ मनुस्मृतिः २।२९

३३ पारस्करगृह्यसूत्रम् १।१६।६

३४ स्वल्पाक्षरं सुखोच्चार्यं शुभं नाम विचक्षणः । –महानिर्वाणतन्त्रम् ९।१५४

३५ अहन्येकादशे नाम (याज्ञवल्क्य १। १२)

३६ मनुस्मृतिः २।३०

३७ महानिर्वाणतन्त्रम् ९।१५७

३८ प्राणतोषिणी, पृ. २६५

३९ कन्याया निष्क्रमो नाऽस्ति वृद्धिश्राद्धं न विद्यते नामान्नप्राशनं चूडां कुर्याद्धीमानमन्त्रकम् . महानिर्वाणतन्त्रम् ९।१५७

४० पूर्ववत्

४१ अथर्ववेदः ८।२।१४

४२ प्राणतोषिणी, पृ. २६६

४३ क्रोडे निधाय तनयं प्राशयेत्पायसामृतम् । महानिर्वाणतन्त्रम् ९।१६८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृत्वाऽन्नप्राशनं समाप्यते ।[४४]

वैदिकवाङ्मयेऽपि जन्मतः पञ्चममासादष्टममासपर्यन्तमन्नप्राशनस्य विधिर्निर्धारितोस्ति ।[४५] अस्मादन्नप्राशनान्मातृगर्भे निहितं मलाद्यपि शुद्ध्यति। तत्र शुभमुहूर्ते देवीदेवान् सम्पूज्य पितरौ सुवर्णनिर्मितया रजतनिर्मितया वा चमनिकया दुग्धमधुघृतयवतण्डुलमिश्रितं हविष्यान्नं प्राशयतः । तस्मिन् प्रसङ्गे बालकस्य बालिकया वा 'पुष्टिवीर्यौ प्रवर्धकौ भवेतामिति' संप्रार्थ्य यक्ष्मनाशकस्य पापनाशकस्य च वेदमन्त्रस्योच्चारणं[४६] भवति । अतो हि निगमागमेष्वपि काश्चिद् भिन्ना विधिव्यवस्थाः प्राप्यन्ते । पुनरप्यस्माकं समाजे मिश्रिता व्यवस्था प्रचलिता दृश्यते ।

३.८ चूडाकरणम् –

जन्मतः प्रथमे वर्षे व्यतीते तृतीये वर्षेऽव्यतीते चूडाकर्म कार्यम् । तत्र सगणाधिपमातृकादिपूजा च विधीयते । तदा सत्यनामानमग्निं संस्कृत्य धाराहुत्यन्तं कर्म समाप्य विशेषं कर्म भवति । अस्मिन् कर्मणि स्ववामे जननीक्रोडे बालकं निधाय वमिति दशधा जप्त्वा तेनोष्णतोयेन केशान् सम्मार्ज्य मायालक्ष्मीबीजद्वयं त्रिधा जपन् जूटिकां केशञ्च संछिद्य जनको मातुर्हस्ते तान् केशान् निवेशयति ।[४७] माता च तान् केशान् गोमयेन सहिते शरावे स्थापयति । तदनन्तरं नापितो बालकस्य मुण्डनं करोति । तस्मिन्नेवाऽवसरे पूजोपचारं कृत्वा सुवर्णशलाकया लौहशलाकया वा कर्णभेदकल्पनाऽपि[४८] क्रियते । एवमेव गर्भाधानादिचूडान्तानि कर्माणि सर्वजातिषु समानानि भवन्ति । शूद्राणां तु वेदमन्त्रोच्चारणं तत्र न भवति । तान्त्रिकमार्गानुसारेण बीजमन्त्रपूर्वकं समासेन चूडान्तं कर्म क्रियते ।

वेदस्य विभिन्नासु शाखासु प्रथमवर्षादारभ्य सप्तमवर्षपर्यन्तं विषमवर्षेषु यस्मिन् कस्मिनपि वर्षे कुलपरम्परानुसारेण वा एतत् कर्म विधीयते । मनुस्मृत्यनुसारेण तु द्विजातीनां चूडाकर्म प्रथमे तृतीये वा वर्षे भवति ।[४९] पुराणेषु वृद्धिश्राद्धदेवपूजनादिकं समाप्य वस्त्रान्नदानपूर्वकं चूडाविधानं निर्दिष्टम् । अस्मिन् कर्मणि यजुर्वेदमन्त्राः समुच्चार्यन्ते ।[५०] तत्र बालकं सम्बोध्य दीर्घायुः सत्सन्ततिमन्नग्रहणसामर्थ्यमुत्पादनशक्तिमैश्वर्यवृद्धिं च प्रार्थयते । आगमनिगमेषु चूडाकर्मणि समाना विधिव्यवस्था निर्धारिता दृश्यन्ते तथापि समयमन्त्रोच्चारणादिषु काश्चिद् भिन्ना व्यवस्थाः प्राप्यन्ते ।

३.९ उपनयनम् –

पितृदेवकर्म कर्तुमधिकाराय गर्भाज्जन्मादष्टमवर्षादारभ्यषोडशवर्षान्तराले द्विजानामुपनयनं भवति । गौतममनुयज्ञवल्क्याश्च उपनयनसंस्कारस्य समयस्य विषये प्रायः पूर्वोक्तसममतवन्तः सन्ति ।[५१] षोडशाब्दपर्यन्तमप्यनुपनीतः कुमारस्तु दैव्यपित्र्यक्रियायामधिकारी न भवति ।[५२] अतः षोडशवर्षपर्यन्तमवश्यमेव एतत् कर्म कर्तव्यम् । अस्मिन् कर्मणि केशवपनानन्तरं स्नानादिकर्मपूर्वकं कुशण्डिकाविधिना हवनपूजनं भवति । तदनन्तरं मेखलादिकं पीतवस्त्रं च परिधाय कुमारो यज्ञोपवीतं धारयति । पिता मृगचर्मदण्डधारणादिकं कारयित्वा ब्रह्मविद्याग्रहणार्थं गुरुं प्रति गन्तुं प्रेरयति ।

तत्राऽऽगमवर्त्मना ब्रह्मचर्यग्रहणप्रसङ्गे गुरुशिष्ययोः संवादे 'ह्रीं ब्रह्मचर्यं कुरु', 'ह्रीं ब्रह्मचर्यं करोमि' एतादृशे तान्त्रिकबीजमन्त्रे व्यवहृते । मेखलाप्रदाने आचार्यो 'ह्रीं सुभगा मेखला शुभप्रदा स्याद्' इति मन्त्रं तत्र व्याहरति ।[५३] तथैव 'ह्रीं यज्ञोपवितमिति मन्त्रेण यज्ञोपवीतं दीयते । सूर्यदर्शनेऽपि मन्त्रस्याऽऽदौ 'ह्रीं' इति संयोज्यते । अन्येष्वपि मन्त्रेषु 'ह्रीं मम व्रते ते ...... ', 'ह्रीं प्रजापतये वत्स', 'ह्रीं प्रजापतये स्वाहा'[५४] इत्यादि प्रकारेण आदौ 'ह्रीं' इति बीजमन्त्रः प्रयुज्यते ।

सावित्रीप्रदानवेलायां गुरुः शिष्यस्य दक्षकर्णे त्रिधा प्रणवं संश्राव्य सव्याहृतिकां सावित्रीं श्रावयति, तदर्थञ्च प्रकाशयति ।[५५] तदा भिक्षाटनानन्तरं माणवकः काषायवस्त्रं कृष्णवर्णमृगचर्मसंयुतं सूत्रं मेखलां दण्डं भिक्षाकरण्डमर्जितभिक्षाञ्च गुरवे निवेद्य शुद्धयज्ञोपवीतद्वयं शुक्लवस्त्रद्वयञ्च परिधाय तत्रैव गुरुगृहे तिष्ठति । आचार्यस्तु विविधां विद्यां शिष्याय ददाति, हावयति च । गुरुतः पावनीं ब्रह्मविद्यां प्राप्य इन्द्रियं मनश्च पवित्रं कृत्वा शिष्यो गृहस्थाश्रमे प्रविशति । गृहस्थाश्रमे प्रवेशात् पूर्वं कुमारो प्राप्तां

---

४४ पूर्ववत् (प्राणतोषिणी, पृ. २६६)
४५ मनुस्मृतिः २।३४
४६ अथर्ववेदः ८।२।१८
४७ आसाद्य तनयं तत्र जनकः स्वीयवामतः । संस्थाप्य जननीक्रोडे कवोष्णसलिलैश्च तैः ॥– महानिर्वाणतन्त्रम् ९।१७४
४८ पठित्वैनं शिशोः कर्णे स्वर्णमय्या शलाकया । राजत्या लोहमय्या वा कर्णवेधं प्रकल्पयेत् ।– पूर्ववत् ९।१८१
४९ मनुस्मृतिः २।३५
५० यजुर्वेदः ३।६३
५१ गौतमधर्मसूत्रम् १।६।१२, मनुस्मृतिः २।३६, याज्ञवल्क्यस्मृतिः १।१४
५२ प्राणतोषिणी, पृ. २६७
५३ मायामुच्चार्य सुभगा मेखला स्याच्छुभप्रदा ।– महानिर्वाणतन्त्रम् ९।१९४
५४ प्राणतोषिणी, पृ. २६८
५५ पुनः प्रणवमुच्चार्य सावित्र्यर्थं गुरुर्वदेत् ।– महानिर्वाणतन्त्रम् ९।२१४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सदाचारशिक्षां व्यवहारे प्रयोगाय वचनबद्धो भवति । ततः स्विष्टकृद्धोमादि-दक्षिणादानान्तं कर्म कृत्वा एतत् कर्म समाप्यते ।

स्त्रीशूद्रा अस्य संस्कारस्याधिकारिणो न भवन्ति । उपनयनसंस्कारात् पूर्वं त्वाचारविचारेषु, वाक्कायकर्मसु, भक्ष्याभक्ष्येषु च विधिनियमो न भवति । उपनयनानन्तरं हि यज्ञोपवीती विशिष्टेषु नियमेषु निबद्धो भवति । वेदागमस्याऽधिकारी तदा ब्रह्मचर्यनियमपरिपालनेन गायत्रीं जपन् श्रौतागमाचारान् परिपालयति । तदाऽऽसौ मन्त्रविद् भवति । सर्वासु विद्यासु अधिकारी च भवति ।

३.१० उद्वाहकर्म

विवाहसंस्कारोऽयं शुभशकुनानि सम्पाद्य, गणेशपूजनपुरःसरं गणेशमोदकनिर्माणं, भारबन्धनं, वस्त्रच्छेदनं, मातृकापूजनं, वृद्धिश्राद्धं, ग्रहमखञ्च सम्पाद्य शास्त्रोक्तविधिना क्रियते ।

"दाता कामो गृहीतापि कामायादाच्च कामिनीम् ।

कामेन त्वां प्रगृह्णामि कामः पूर्णोऽस्तु चावयोः ।"[५६] इति कामप्रार्थना भवति । सवर्णेषु ब्राह्मादयो विवाहा असमानगोत्रेषु भवन्ति । शैवविवाहे तु समानगोत्रेऽपि चक्रानुष्ठानसमये बन्धुबान्धवसमीपे वीरभावे स्थितः पुरुषो भैरव्याः समूहे स्वविवाहविषये अभिमतं प्रकटयति । तदाऽऽगमोक्तविधिना सपिण्डीभिन्नयोरविवाहितयोर्भैरवीवीरयोः शैवो विवाहो भवति ।

अस्मिन् विवाहे वयसो वर्णव्यवस्थायाश्च परिधिर्नैव वर्तते ।[५७] तयोः समागमेन अनुलोमस्य जातकस्याचरणं मातृ-आचरणवत् भवति, प्रतिलोमस्य जातकस्य तु सामान्यवर्णसङ्करस्याऽऽचारवदाचरणं भवति । तेभ्योऽनुलोमजप्रतिलोमजेभ्यः पितृकर्मसु, कौलकर्मसु, भोजनादिकर्मसु[५८] चाऽधिकारो भवत्येव । 'शैवविवाहेन पुरुषार्थचतुष्टयं यत् प्राप्यते अन्यैर्विवाहैस्तादृक् फलं नैव प्राप्यते' इति आगमवचनमस्ति ।

४. निष्कर्षः

एतावन्तः संस्काराः कतिपये वैदिकानुकूलाः, कतिपये तु शुद्धतन्त्रमार्गानुकूलाः सन्ति । शुद्धतान्त्रिकपरम्परापरिपालकेषु परिवारेषु उपर्युक्ताः संस्कारास्तान्त्रिकविधिना एव भवन्ति । कतिपयेषु कुलपरम्परासु वैदिकसंस्कारेण सह तान्त्रिकः संस्कारो मिश्रिततया प्रचलति । केवलेन तुलनात्मकानुशीलनेन के शुद्धवैदिकसंस्काराः? के शुद्धतान्त्रिकसंस्काराः? के च मिश्रिताः संस्कारा ? इति परिज्ञायते । इति शिवम् ।

सन्दर्भाः

- अथर्ववेदः, सं.आर. रौथ/डब्लु. डि. ह्विट्ने, वर्लिन १८५६ ।
- कल्याण धर्मशास्त्राङ्क वर्ष ७०, सङ्ख्या १, गीताप्रेस, गोरखपुर ।
- गन्धर्वतन्त्रं, सं.आचार्य राधेश्याम चतुर्वेदी, चौखाम्बा संस्कृत सिरिज, ई.सं. २००९ ।
- गौतमधर्मसूत्रं हरदत्तटीकोपेतम्, प्रमोदवर्धनकौण्डिन्न्यायनकृतहिन्दीव्याख्यायुतम्,
- वाराणसीः चौखम्बाविद्याभवन, २०७२ ।
- तन्त्रविद्यालोकः भट्ट विद्यानाथ उपाध्याय, काठमाडौँ, अन्नपूर्णा उपाध्याय भट्ट, वि.सं. २०६२ ।
- महानिर्वाणतन्त्रम्, सं. कपिलदेवनारायण, वाराणसीः, चौखम्बा सुरभारती, २००७ ई.सं.
- मनुस्मृतिः कुल्लुकभट्टकृतटीकासहित, चौखम्बा संस्कृत सिरिज वि.सं. १९९२ ।
- पारस्करगृहसूत्रम्, गुजरातीप्रेस, संस्करण १९१७ ।
- प्राणतोषिणी, सं. पाण्डेय हरिवंशकुमार, वाराणसी, सम्पूर्णानन्द-सस्कृत-विश्वविद्यालय, २०५७ तमे वैक्रमाब्दे ।
- बृहदारण्यकोपनिषद्, गोरखपुर, गीताप्रेस, २०५० ।
- मुहूर्तचिन्तामणिः, सं.जोशी केदारनाथ, मोतिलाल वनारसीदास, १९८८ ।
- याज्ञवल्क्यस्मृतिः, मीताक्षरा टीकासहिता, वाराणसीः, चौखम्बा संस्कृत संस्थान, वि.सं. २०४७ ।
- व्यासस्मृतिः, धर्मशास्त्रसङ्ग्रहखण्ड, कलकत्ता १८७६ ।
- श्रीमद्भगवद्गीता, गोरखपुर, गीताप्रेस ।
- शुक्लयजुर्वेदसंहिता, वाराणसीः, कचौडी गली ।

---

५६ महानिर्वाणतन्त्रम् ९।२५२

५७ पूर्ववत् ९।२७८

५८ भोज्यप्रदानं कौलानां भोजनं विहितं भवेत् ।–पूर्ववत् ९।२८२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाणिनीयव्याकरणे रप्रत्याहारविवेचनम्

सहप्रा. नवराजपाण्डेयः
परमानन्दसंस्कृतगुरुकुलविद्यापीठं देवघट्टम्

संस्कृतभाषा देववाणी सर्वभाषाजनयित्री च वर्तते । तस्याः सुव्यवस्थायै ब्रह्माप्रभृतिः पाणिनिपर्यन्तं बहवो मनीषिणो निरुक्तप्रातिशाख्य व्याकरणग्रन्थान् रचयामासुः । तेषु मध्ये भगवतः शम्भोराराधनया पाणिनिर्वर्णसमाम्नायरूपाणि चतुर्दशसूत्राणि प्राप्तवान् । तानि चेत्थम्-

१. अइउण् २.ऋलृक् ३. एओङ् ४. ऐऔच् ५.हयवरट् ६.लण् ७.ञमङणनम् ८.झभञ् ९.घढधष् १०.जबगडदश् ११.खफछठथचटतव् १२.कपय् १३.शषसर् १४. हल् ।

एभ्यश्चतुर्दशसूत्रेभ्यः पाणिनिरावश्यकान् प्रत्याहारान् निर्ममे । तदित्थम्-

चतुर्दशसूत्रान्त्यहल्वर्णानां "हलन्त्यम्" इति सूत्रेण इत्संज्ञां विधाय तेषां "तस्य लोपः" इति लोपे अन्त्येनेत्संज्ञकवर्णेन सह चतुर्दशसूत्राणाम् आदिमध्यस्थमिष्टवर्णमादाय "आदिरन्त्येन सहेता" इति सूत्रेण प्रत्याहारसंज्ञा भवति । यथा- अइउण् ऋलृक् एओङ् ऐऔच् इति सूत्रचतुष्टयाद्यन्ताक्षरावादाय अच् प्रत्याहारो भवति । अच् प्रत्याहारे च अ इ उ ऋ लृ ए ओ ऐ औ इति नवाक्षराण्यागच्छन्ति । प्रत्याहारेष्वितां न ग्रहणम् इति नियमात् इत्संज्ञकवर्णा प्रत्याहारान्तर्गतं न गृह्यन्ते । एवमन्येष्वपि प्रत्याहारेषु इत्थमेव बोद्धव्यम् । वर्णसमाम्नायनिष्पन्नप्रत्याहारविषये चोक्तम्-

एकस्मान् ङुणवटाद्वाभ्यां षट् त्रिभ्य एव कणमाः स्युः ।
ज्ञेयौ चयौ चतुर्भ्यो रःपञ्चभ्यः शलौ षड्भ्यः। इति शब्दरत्ने ।

अस्याभिप्रायः-ङुणवटाअनुबन्धा एकैकस्मादादिवर्णात्परोच्चारिता एकैकं प्रत्याहारं जनयन्ति । यथा -एङ्,यु,अण,छव्,अट्,झष्,भष्,अक्,इक्,उक्,अण्,इण,यण्,अम्,ङम्,यम्,अच्,इच्,एच्,ऐच्,यय्,मय्,झय्,खय्,यर्,झर्,खर्,चर्,शर्,अश्,हश्,बश्,जश्,वश्,भश्,अल्,हल्,वल्,रल्,झल्,शल् इत्येते प्रत्याहाराश्चतुर्दशसूत्रेभ्यः पाणिनिना गृहीता एकचत्वारिंशत् एव । एवं "चयो द्वितीया शरि" इति वार्तिककारगृहीतचय्प्रत्याहारः"ञमन्ताड्डः" इत्युणादिसूत्रगृहीतो ञम्प्रत्याहारश्च मुनित्रयसम्मतः । एवं वर्णसमाम्नायात् त्रिचत्वारिंशत् प्रत्याहाराः निष्पन्नाः ।

काशिकाकारकैय्यटादयस्तु "उरण् रपरः" इत्यत्र तवल्कारादिरूपसिद्ध्यर्थं लण्सूत्रस्याकारस्य अनुनासिकत्वप्रतिज्ञया इत्संज्ञां विधाय रकारादारभ्य अकारेण रप्रत्याहारं कल्पयन्ति । तत्र रलावागच्छतः,किन्त्वेतत् मुनित्रयसम्मतत्वाभावादनावश्यकत्वाच्चास्मिन् विषये किञ्चिदुच्यते -

अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम् ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये [1] ॥

अत्र "अइउण्" इत्यादि चतुर्दशसूत्रेषु सर्वत्र उच्चारितं अन्त्यं अन्ते भवं वर्णचतुर्दशम् ,पाणिन्यादीनां वैयाकरणानां इष्टसिद्धये अभिमतस्य व्याकरणशास्त्रस्य सिद्धये धात्वर्थं धातुमूलकव्याकरणशास्त्रप्रवृत्यर्थम्,व्याकरणशास्त्रस्य प्रवृत्तिश्च प्रत्याहारनिर्माणदेव तदर्थं समुपादिष्टं सम्यक् उप समीपे आदिष्टं अनुवन्धत्वेन स्वीकृतम् । "अनुबन्धकरणार्थश्च वर्णानामुपदेशः" इति भाष्यात् ।

अस्यां कारिकायां अन्त्यचतुर्दशपदोपादानेन लण्सूत्रघटकानन्त्यस्य अकारस्यानुनासिकत्वमनुबन्धत्वं च नाङ्गीकृतम् ।

लण्सूत्रघटकाकारस्य अनुनासिकत्वप्रतिज्ञाकरणं त्रिमुनिमतविरुद्धम् अस्ति । यदि लण्सूत्रघटकाकारस्य अनुनासिकत्वं प्रकल्प्य रप्रत्याहारं स्वीक्रियते तर्हि "अतो ल्रान्तस्य"[2] इति सूत्रे रान्तस्य इत्येव पठेत् । रप्रत्याहारेणैव लकारस्यापि ग्रहणात् लकारं नोच्चारयेत् । किन्तु सूत्रकारेण तथा न कृतम् । अतः पाणिनिना रप्रत्याहारः स्वीकृतो नास्ति ।

लण्सूत्रघटकाकारस्य इत्संज्ञकत्वे कल्पिते तु बहुषु यण्पदघटितसूत्रेषु अर्धमात्रालाघवानुरोधेन गुरुभूतणान्तप्रत्याहारं विहाय लघुभूतेन अकारान्तेन यप्रत्याहारेणैव सूत्रकारो व्यवहरेत् । तथा च उत्वे गुणे पूर्वरूपे च कृते "इको योऽचि" इति सूत्रस्वरूपं स्यात् । इण्प्रत्याहारश्च लणोऽकारादेव स्यात् । तत्र च इ अ इत्यत्र यणि कृते य प्रत्याहारेण व्यवहरेत् । तथा सति इण् यण् प्रत्याहारयोः सन्देहे "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्"[3] इति परिभाषया तत्र तत्र तत्तद्बोधः स्यात् किन्तु तथा न विहितम् । अतः "तुल्यास्यप्रयत्नं सवर्णम्"[4] इति सूत्रव्याख्याप्रसङ्गे ऋकारलृकारयोः स्थानभिन्नत्वेऽपि "ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्" इति विशेषवार्तिकेन सवर्णसंज्ञायां कृतायां "उरण् रपरः"[5] इति लृकारस्य स्थाने अण् विधीयमाने रपरत्वं स्यादिति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शंकामुद्भाव्य "लृकारस्य लपरत्वं वक्ष्यामि इति भाष्यकारेण विशेषविधिवचनमुक्तम्। ऋकारस्य रपरत्वं लृकारस्य लपरत्वं विधातुं वचनमावश्यकम्।

"लृकारस्य लपरत्वं वक्ष्यामि" इति भाष्यमादाय रप्रत्याहाररूपेण व्याख्यास्यामि इति कैय्यटवचनं हकारादिष्वकार उच्चारणार्थ इत्यत्र लकारे त्वनुनासिकः प्रतिज्ञायते। तेन "उरण् रपरः"इत्यत्र प्रत्याहारग्रहणाल्लपरत्वमपि भवति इति काशिकाकारवचनं[६] तद्व्याख्यानभूतं हरदत्तन्यासकारवचनं "लण्सूत्रेऽकारश्च" इत्यनुनासिकत्वप्रतिज्ञापरं दीक्षितवचनं च प्रौढिवादमात्रम्। सूत्रवार्तिकभाष्यकारव्यवहारविरोधाद् भाष्यकारनन्दिकेश्वरकाशिकादिवचनविरोधाच्च तन्नावलम्बनीयम्।

"प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न"[७] इत्याशंक्य अनुबन्धानामच्प्रत्याहारे ग्रहणाभावे "आचारात् अप्रधानत्वात् लोपश्चवलवत्तरः" इति हेतुत्रयं भाष्यकृता स्वीकृतम्। आचाराद् अनुनासिक इत्यादौ ककारे परे सति यणोऽकरणरूपात् आचार्यस्य पाणिनेर्व्यवहारात्।

अप्रधानत्वात्- अचां अक्षु हलां हल्सु च प्राधान्येन पाठात्। अच् प्रत्याहारे णकारककाराद्यनुबन्धानां पाठस्य अप्राधान्याद् न ग्रहणम्।

अनुबन्धानां प्रत्याहारग्रहणे ग्रहणं न भवति इत्यस्य तृतीयो हेतुः- लोपश्च बलवत्तर इति।

पूर्वं वर्णानामुपदेशस्तदुत्तरकालमित्संज्ञा तदुत्तरं "आदिरन्त्येन सहेता"[८] इति प्रत्याहारसंज्ञा इति सिद्धान्तात् प्रत्याहारसिद्धेः प्रागेव इत्संज्ञालोपाभ्यां अनुबन्धानां निवृत्तेः अजादिपदशक्तिग्रहणवेलायां तेषामनुबन्धानामसत्वात् तद्वर्णनिरूपितायाः शक्तेः "आदिरन्त्येन सहेता" इति सूत्रेण बोधयितुमशक्यत्वात् अजादिप्रत्याहारेण तेषां ग्रहणं न भवति।

लण्सूत्रघटकाकारस्य अनुनासिकत्वप्रतिज्ञया इत्संज्ञकत्वे हलादिप्रत्याहारेऽनुबन्धभूतस्य लणोऽकारस्य ग्रहणाभावे लोपशास्त्रस्य बलवत्वादिति हेतोरप्रसक्तेरनुबन्धमात्रस्य प्रत्याहारग्रहणेन ग्रहणाभावे भाष्योक्तस्य तस्य तृतीयहेतोरल्पदेशवृत्तित्वरूपाव्यापकत्वापत्तिः। हल्प्रत्याहारो यावन्न सिद्ध्यति तावदच्प्रत्याहारसिध्दये अपेक्षिताया च कारस्य इत्संज्ञायां हलन्त्यम्'[९] इति सूत्रेण हल्पदार्थज्ञानाभावात् कर्तुमशक्यत्वाद् हल्प्रत्याहारसिद्धिरच्प्रत्याहारसिद्धेः पूर्वं करणीया। तथा च तस्मिन् काले लण्सूत्रघटकाकार इत्संज्ञामननुभवन् लोपशास्त्रस्यापि प्रवृत्युद्देश्यतां नाप्नोति। एवं रीत्या लोपश्च बलवत्तरः इति हेतोस्तत्राप्रसक्तिः। हल् प्रत्याहारे अनुनासिकाकारस्य ग्रहणेऽपि अणुदित्सूत्र[१०]घटकस्य अण्पदस्य शक्तिग्रहकाले इत्संज्ञालोपाभ्यामकारस्य तस्यासन्निधानात् सवर्णग्रहणेन निरनुनासिकस्य ग्रहणं न स्यात्, अतः प्रत्याहारेषु जातिग्रहणपक्षस्यैव भाष्ये समर्थितत्वात् निरनुनासिकस्यापि ग्रहणम्। एवं च अकारस्य सानुनासिकस्यापि हल् प्रत्याहारग्रहणे अन् धातोः क्विपि "अनुनासिकस्य....."[११] इति दीर्घे सम्बोधने हे आन्! मां आन् त्रायस्व इत्यत्र हल् प्रत्याहारे अकारस्यापि ग्रहणेन मकारस्य "मोऽनुस्वारः"[१२] इत्यनुस्वारः स्यात्।

प्रत्याहारेषु जातिपक्षाश्रयणात् ह्रस्वाकारस्येव दीर्घाकारस्यापि हल्प्रत्याहारे ग्रहणं स्यात्। एवं सोऽस्ति इत्यादावपि अस्त्यादिघटकाकारस्य हल्ग्रहणेन ग्रहणात् एतत्तदोरिति[१३] सूत्रेण सुलोपापत्तिः। अनुनासिकाकारेण निरनुनासिकस्याप्यकारस्य जातिपक्षाश्रयणेन ग्रहणं स्यात्।

लणोऽकारस्यानुनासिकत्वे स्वीकृते "अकः सवर्णे आ" इति सूत्रे विहिते दीर्घसिद्धिर्भवति। यतो हि अइउण् इत्यकारात् लणोऽकारमादाय प्रत्याहारे दीर्घे आ इति। अकः सवर्णे परे आ भवति। अकारस्य सवर्णः आ, इकारस्य ई, उकारस्य ऊ एवं ऋकारलृकारयोश्च। स्वस्मादन्येषां पूर्णरूपेण सवर्णत्वाभावादेव इतरव्यावृत्तिर्भवति। विधानसामर्थ्याद्दीर्घत्वं सिद्धम्। एतादृशं लाघवमनादृत्य गुरुभूतं दीर्घविधानं लणोऽकारस्य अनुनासिकत्वाभावं द्योतयति।

लणोऽकारस्य अनुनासिकत्वाभावेन इत्संज्ञकत्वाभावादेव "प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न" इति शङ्का अच्प्रत्याहारे एव कृता न तु हल् प्रत्याहारे।

लण्सूत्रव्याख्याप्रसङ्गे भाष्यकारेण - अयं णकारो द्विरनुबध्यते पूर्वश्चैवपरश्च इत्युक्त्वा णानुबन्ध एव व्याख्यातो नाकारानुबन्धः। कैय्यटश्च तत्र मौनः। काशिकाकारोऽकारानुबन्धं प्रतिजानीते। हरदत्तन्यासकारौ काशिकानुसारं व्याचक्षाते। दीक्षितोऽपि तेषामनुकरणं चकार।

पाणिनेरष्टाध्याय्यां क्वापि रप्रत्याहारो न स्वीकृतः। यथा -"रषाभ्यां नो णः समानपदे"[१४] "अट्कुप्वाङ्नुम्व्यवायेऽपि"[१५] रामेण -कमलेन। वारिणा-वालिना। रघुणा -लघुना। लूनः ग्लानः, ललना इत्याद्युदाहरणेषु लकारो रप्रत्याहारत्वेन क्वापि न स्वीकृतः।

तथा "रदाभ्यां निष्ठातो नः पूर्वस्य च दः"[१६] इत्यत्रापि न। प्रफुल्त इत्यादौ निष्ठाया नत्वादर्शनात्। "रो रि" "ढ्रलोपे" इत्यत्रापि न रप्रत्याहारः स्वीकृतः। तल्लयः, अल्लोपः, हृल्लेखः इत्यादौ ललोपदीर्घौ न।

नापि "कृपो रो लः"[१७] "अचि विभाषा" इत्यत्र प्रत्याहारो गृहीतः। गिरति,गिलति इत्यादौ रेफस्य लत्वविधानार्थं विभाषा ग्रहणात्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रत्याहारे सति विभाषाग्रहणम् व्यर्थं स्यात् "अचि रः" इति न्यासेनैव कार्यसिद्धेः ।

तथैव पर्यङ्कः, पल्यङ्कः इत्युदाहरणार्थं "परेश्च घाङ्कयोः" इत्यत्रापि विभाषानुवर्तनस्य वैयर्थ्यात् । प्रत्याहारे सति "अचि र ऋतः" इति सावर्ण्यात् कदाचिद् ऋकारस्य लकारश्च स्यात् होतृ लृकारः = होतृकारः इतिवत् । एवं "हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्" इत्यत्र अन्त्यलकारस्य "खरवसानयोर्विसर्जनीयः" इति विसर्गः स्यात् । रप्रत्याहार सत्वे "अचोरहाभ्यां द्वे" इत्यत्रापि प्रत्याहाराश्रयणं स्यात् । तथा सति हय्र्यनुभव इत्यत्रेव कल्पकल्याणादिशब्देषु च पकारयकारादीनां द्वित्वं स्यात् । तवल्कार इत्यत्र "अनचि च" इति द्वित्वं लस्यैव कस्यैव[१८] इति दीक्षितवचनात् लकारस्यापि द्वित्वं भवति रस्य तु क्वापि द्वित्वं न । "अचोरहाभ्यां द्वे" इत्यादौ रकारो द्वित्वस्य निमित्तम् । "नेमौ रहौ कार्यिणौ द्विर्वचनस्य किन्तर्हि निमित्तमिमौ रहौ द्विर्वचनस्य" इति हयवरट् सूत्रे भाष्ये चोक्तम् । प्रत्याहारे लकारस्य द्वित्वं न स्यात् । प्रत्याहारे स्वीकृते "नन्द्राः संयोगादयः" इति लकारस्य द्वित्वं निषेधश्च स्यात् ।

"बालमूललघ्वलमङ्गुलीनां वा लो रत्वमापद्यते"[१९] इति वार्तिकेन रघुःलघुः इत्यादि शब्दानां रकारस्य वैकल्पिक रत्वविधानं व्यर्थं स्यात् ।

लवणः इत्यत्र लूधातोः ल्यु प्रत्यये अनादेशे नन्द्यादिगणे णत्वनिपातनम् इति वचनं व्यर्थं स्यात्, रप्रत्याहारेणैव "रषाभ्याम्-अट् कुप्वाङ्- इत्यनेन णत्वसिद्धेः । रप्रत्याहारार्थम् अकारस्यानुबन्धत्वे णानुबन्धो व्यर्थः । तथा सति "अणुदित्सवर्णस्य चाप्रत्ययः" इति सूत्रस्थोऽण्च अकारानुबन्धमादाय दीर्घे लघुत्वात् आप्रत्याहारे आ+उदित् इत्यत्र गुणे ओदित्सवर्णस्य इति सूत्रन्यासः स्यात् ।

धीवरी, अतिधीवरी इत्यादौ "वनो र च" इति नकारस्य स्थानसाम्यात् लकारः स्यात् । अहरहः, अहर्गणः इत्यादौ च "रोऽसुपि" इति नकारस्य लकार एव स्यात् न तु रकारः । एवं "रादिफः"[२०] इति लकारादपि इफ प्रत्यये लेफ इत्यनिष्टप्रयोगश्च स्यात् ।

अत एव सूत्रवार्तिकभाष्यकारैरस्वीकृतस्य रप्रत्याहारस्य त्रिमुनिव्याकरणे प्रक्षेपणमन्याय्यमनावश्यकञ्च इति शम् ।

१.नन्दिकेश्वरकाशिका ।
२.पाणिनीय सूत्र ७।२।२
३. परिभाषेन्दुशेखर-१
४. पाणिनीय सूत्र १।१।९
५ पाणिनीय सूत्र १।१।५१
६.लण्सूत्रे काशिकावृत्तिः।
७..हयवरट् सूत्रे महाभाष्ये ।
८. पाणिनीय सूत्र १।१।७१
९.पाणिनीय सूत्र १।३।३
१०. अणुदित्सवर्णस्य चाप्रत्ययः- पाणिनीय सूत्र १।१।६९
११. अनुनासिकस्य क्विझलोःक्ङिति- पाणिनीय सूत्र ६।४।१५
१२. पाणिनीय सूत्र ८।३।२३
१३. एतत्तदोः सुलोपोऽकोरनुसमासे हलि । पाणिनीय सूत्र ६।१।१३२
१४ पाणिनीय सूत्र ८।४।१
१५. पाणिनीय सूत्र ८।४।२
१६. पाणिनीय सूत्र ८।२।४२
१७. पाणिनीय सूत्र ८।२।१८
१८.सिद्धान्तकौमुद्यां तवल्कार इत्यत्र ।
१९. सिद्धान्तकौमुद्याम् उणादिप्रकरणस्थं वार्तिकम् ७३१ ।
२०. सिद्धान्तकौमुद्याम् उत्तरकृदन्तस्थं वार्तिकम् ७५७ ।

सन्दर्भग्रन्थसूचिः

सिद्धान्तकौमुदी
अष्टाध्यायी
लघुशब्देन्दुशेखरः
परिभाषेन्दुशेखरः
काशिकावृत्तिः
महाभाष्यम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ज्योतिषशास्त्रीयवायोरध्ययनम्

उपप्रा.नारायणप्रसादनिरौला
वाल्मीकिविद्यापीठम्

१. वायोरध्ययनोपस्थितिः

स्पर्शतन्मात्रात्मको वायुः पञ्चतत्त्वानां मध्ये एकः । स च वायुः सर्वत्राकाशे विद्यमानोऽस्ति । प्राणधारकशक्तिविशेषात्मको वायुस्तु सर्वत्र व्याप्तोऽस्ति । वा धातोः औणादिक-युक् प्रत्यये कृते सति निष्पन्नोऽयं वायुशब्दः (संस्कृतहिन्दीकोशः, १९८६ : १३३२) प्राणधारकशक्तिं ज्ञापयति। स च वायुः पुनः स्थानभेदेन कार्यभेदेन च भिन्नां भिन्नां संज्ञां प्राप्नोति। प्राण-अपान-समान-व्यान-उदानाख्याः एते वायवःतस्यैव एकस्यैव वायोः भेदोऽस्ति । उक्तञ्च–

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥ शरीरस्था इमे...(अमरकोषः २००८ : १।१।६३-६४) ।

शरीरे कुत्र कस्मिन् वायोरूपस्थितिरस्तीति विषये यथा निगदितम्–

हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले । उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः ॥ (अमरकोषः,२००८ : १३)

अर्थात् हृदिस्थाने प्राणः, गुदस्थाने अपानः, नाभिमण्डले समानः, कण्ठप्रदेशे उदानः, सर्वत्र शरीरे व्यानवायुः निवसति । एते प्रमुखाः । एवमेव पञ्चसंख्यका गौणवायवः सन्ति । तेषां मध्ये उद्गरे नागाख्यवायुः, उन्मीलने कूर्मवायुः, क्षुत्कृते कृकलनामको वायुः, विजृम्भणे देवदत्तवायुः, मृतशरीरे धनञ्जयवायुः च निवसति ।

न्यायदर्शने च अस्य वायोरष्टौ गुणाः कथिताः सन्ति। ते यथा स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्वादयः (न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डे) । भूर्लोके विद्यमानः प्राणधारकः तत्त्वविशेषो वायुरस्ति । ज्योतिषशास्त्रेऽपि वायोः स्थानं महत्त्पूर्णमस्ति ।

२. वैदिकसंहितायां ज्यौतिषीयवायुः

विश्वस्य सर्वप्राचीनः ग्रन्थोऽस्ति ऋग्वेदः । वैदिक संहितायां वायोरूपस्थितिक्रमे ज्योतिषीयविषया अपि उक्ता सन्ति । तद्यथा–

ॐ वायो ये ते सहस्रिणो रथास्तेभिरागहि । नियुत्वान्त्सोमपीतये ॥ (ऋग्वेदः, २।४१।१/शु.यजुर्वेदः २७।३२)

अथर्ववेदेऽपि यथा–

द्यौस्तेपृथिव्यन्तरिक्षंवायुश्छिद्रं पृणातु ते ।
सूर्यस्ते नक्षत्रैः सह लोकं कृणोतु साधु या ॥ (अथर्ववेदः, १९।४३)

विशेषतः देवविशेषः वायुरिति । स्वर्गस्थ देवविशेष एव वायुरस्ति । त्रयो हि देवा अग्निवायुसूर्याः । अग्निर्हि भूस्थानीयः, अन्तरिक्षस्थानीयो वायुः, द्युस्थानीयस्तु सूर्यः । सूर्यो हि वायोः वायुश्चाग्नेर्घटकः । यथोक्तमैतरेयब्रह्मणे तैत्तिरीयसंहितायां च –

सवितारं यजति यत्सवितारं यजति तस्मादुत्तरतः पश्वादयं भूयिष्ठं पवमानः पवते सवितृप्रसूतो ह्येष उतत्पवते ॥ (ऐतरेयब्राह्मणः,२।७)

.......स्वाती नक्षत्रं वायुर्देवता.....(तैत्तिरीयसंहिता,४।४।१०)

वैदिकवाङ्मये देवत्वेन वायोरूपस्थिति स्वीकृतोऽस्ति । एवमेव स्वातीनक्षत्राधिष्ठातृदेवताऽपि वायुरस्ति । वैदिकसंहितायामपि ज्योतिषीयसम्बन्धत्वेन वायोः विवेचनमस्ति । ग्रहाणां राजा तु रविः । रवेः सम्बन्धत्वेन वायोरूपस्थितिः वैदिकसंहितायां प्राप्यते ।

३. ज्योतिषशास्त्रे वायोरध्ययनम्

ज्योतिषशास्त्रे वायोरूपस्थितिः यत्र तत्र प्राप्यते । संसारस्याधारशक्तिः वायुरस्ति । वायुं विना ग्रहाणामपि अस्तित्वं न सम्भवति । वायुवशात् सर्वे ग्रहा स्वमार्गे चलन् सन्ति । आकाशीयग्रहनक्षत्राणामवस्थितिवशाद् फलादेशात्मकं शास्त्रमस्ति ज्यौतिषम् । अतः शास्त्रेऽस्मिन् वायोरूपस्थितिः भवितुमर्हति । कतिपयाः वातप्रकृतिकाऽपि ग्रहाः सन्ति । एवमेव वातवशाद् जलवर्षा सम्भवति । प्रवहवायुवशात् ग्रहाः पश्चिमाभिमुखं परिभ्रमन् दृश्यन्ते । एवमेव प्रवहवायुवशादेव नक्षत्रचक्रं चलति ।

३.१. सिद्धान्तज्योतिषे वायोरध्ययनम्

ज्योतिषशास्त्रस्य मूलं सिद्धान्तमस्ति । सिद्धान्तं विना कापि ज्योतिषीयपरिगणना न सम्भवति । यत्र च त्रुट्यादितः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रलयान्तपर्यन्तं कालस्य गणना, सौरचान्द्रादिकमासानां भेदाः, ग्रहचारस्य नियमाः, व्यक्ताऽव्यक्तगणितयोर्विवेचनम्, दिग्देशकालानां ज्ञानम्, भूगोलस्य, खगोलस्य, ग्रहस्थितेर्वेधयन्त्राणाञ्च साङ्गोपाङ्गविवेचनं भवति सः सिद्धान्तः उच्यते (भास्करः,२०११ : १।६) । सिद्धान्तस्कन्धे ग्रहाणामुपस्थितिज्ञानाय वायोरध्ययनं भवति । भचक्रस्य चलनाधारक कः ? इति प्रश्ने तत्र वायोरूपस्थितिर्भवति । सर्वे ग्रहाः वायुवशादेव स्वमार्गे चलन्तीति कथितमस्ति सिद्धान्तज्योतिषशास्त्रे ।

३.२ सूर्यसिद्धान्ते वायुः

ग्रहाणां पूर्वगतित्वकारणप्रसङ्गे प्रवहवायुरुल्लेखितमस्ति । तीव्रप्रवहवायुवशात् ग्रहाः पश्चिामाभिमुखी दृश्यन्ते, परन्तु कुलालचक्रे कीट इव ते पूर्वाभिमुखा सन्तीति कथनमस्ति, यथा सूर्यसिद्धान्तौ –

पश्चाद् व्रजन्तोऽतिजवान्नक्षत्रैः सततं ग्रहाः ।
जीयमानस्तु लम्बन्ते तुल्यमेव स्वमार्गगाः ।
प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः ।
परिणहवशाद् भिन्ना तद्वशाद् भानि भुञ्जते ॥ (सूर्यसिद्धान्तः, १।२५-२६)

ग्रहाणां गत्यन्तरस्य कारणमपि वायुरस्ति । प्रवहवायुवशात् ग्रहाणां पृथक् पृथक् गतिर्भवतीति । तद्यथा –

प्रवहाख्यो मरुत् तांस्तु स्वोच्चाभिमुखमीरयेत् ।
पूर्वापरापकृष्टास्ते गतिं यान्ति पृथग्विधाम् ॥
ग्रहात् प्राग्भगणार्धस्थः प्राङ्मुखं कर्षति ग्रहम् ।
उच्चसंज्ञोऽपरार्धस्थस्तद्वत्पश्चान्मुखं ग्रहम् ॥ (सूर्यसिद्धान्तः, २।३-४)

वायुवशात् शनैश्चरस्योत्पत्तिरिति निगदितमस्ति सूर्यसिद्धान्तौ –

अग्नीषेमौ भानुचन्द्रौ ततस्त्वाङ्गारकादयः ।
तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्चजज्ञिरे ॥ (सूर्यसिद्धान्तः, १२।२४)

३.३ आर्यब्रह्मस्फुटसिद्धान्तशेखरशीष्यधीवृद्धिदादिग्रन्थेषु वायुः

आर्यभट्टीयग्रन्थे प्रवहवायुवशात् भपञ्जरः पश्चिमाभिमुखोभूत्वा भ्रमति । यथा श्लोके –

उदयास्तमयनिमित्तं नित्यं प्रवहेण वायुनाक्षिप्तः ।
लङ्कासमपश्चिमगो भपञ्जरस्सग्रहो भ्रमति ॥ (आर्यभटीयम्,गोलपाद,श्लो.१०)

एवमेव ब्रह्मगुप्तस्यापि ईदृशमेवमतमस्ति । प्रवहवायुवशात् ग्रहाः पश्चिमाभिमुखोभूत्वा परिभ्रमन्ति । तद्यथा –

ध्रुवयोर्बद्धं सव्यगममराणां क्षितिजसंस्थमुडुचक्रम् ।
अपसव्यगमसुराणां भ्रमति प्रवहानिलाक्षिप्तम् ॥ (ब्रह्मस्फुटसिद्धान्तः, गो.अ.,श्लो.४)

श्रीपतिना अपि इदृशमेव प्रतिपादितमस्ति (सिद्धान्त-शेखरः,१५।१५,१६,२७,५२) । लल्लाचार्येण स्वशिष्यधीवृद्धिदग्रन्थे सप्तवायोरुल्लेखः कृतोऽस्ति । प्रवहवायुवशात् ग्रहा पश्चिमगा दरीदृश्यन्ते । अस्मिन् प्रसङ्गे स कथयति –

आवहः प्रवह उद्वहस्तथा संवहः सुपरिपूर्वकौ वहौ ।
सप्तमस्तु पवनः परावहः कीर्तितः कुमरुदावहोऽपरैः ॥
सदैव नित्यं प्रवहेण वायुना निरक्षदेशोपरिगो भपञ्जरः ।
स्वपश्चिमाशाभिमुखोऽपि नीयतेऽसुरामराणामपसव्यसव्यगः ॥ (शिष्यधीवृद्धिदम्, १८।१,३)

३.४ सिद्धान्तशिरोमणौ वायुः

भूमेरूपर्याकाशे सप्तवायूनां क्षेत्राणि निगदितानि सन्ति – भूमेरूपर्यस्माभिर्यद्वायुर्दरीदृश्यते येन च झञ्जावातादिकेन तृणपर्णादिकमितस्ततः आनीयते नेनीयते च न तन्मात्रमेव वायुरपितु तत्तु भूमेरूपर्याकाशे द्वादशयोजनात्मकमेव विद्यमानः आवहनामको वायुः । वर्षाकाले यत्राकाशे वयमम्बुदायकाम्बुदादीन् तज्जन्यविद्युदादीन् च पश्यामः तावन्मात्रं अस्य क्षेत्रम् । परन्तु अस्य नास्ति नियतगतिः । एतदूर्ध्वो यो वायुः सः प्रवहसंज्ञकः । तस्य क्षेत्रञ्चातिविस्तृतमस्तीति प्राचीनज्योतिर्विद्भिः कथितम् । येन चानेन नित्यप्रत्यग्गतिप्रवहानिलेन ग्रहनक्षत्रकक्षासहितो भपञ्जरः पूर्वतः पश्चिमदिशि भ्रममाणो दृश्यते । वस्तुतः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाश्चात्यवैज्ञानिकमतेन विचार्यते चेत् तदा भूमेः स्वाङ्गभ्रमणेन यन्नक्षत्रदिनमुत्पद्यते तेनास्योपपत्तिरूपपद्यते ।

पुनश्च ग्रहाणां या पूर्वाऽभिमुखी गतिर्यया च गत्या तत्तद्ग्रहाणां भगणपूर्तिर्जायते तद् भास्करोक्तमतेन स्पष्टीक्रियते । भास्कराचार्यस्य मतमिदं वर्तते यद् ग्रहाणां प्रवहजन्यगतिर्वास्तविकगतिर्न भवति । अत्र सदृष्टान्तेनानेन स्वमतं दृढीकुर्वन् कथयति । यद् यदा कुलालचक्रभ्रमणं सञ्जायते, तद् विपरीतदिशि यदि केऽपि पिपीलिकादयः गच्छन्ति, तदा कुलालचक्रस्यातिशीघ्रगतित्वात् कीटादीनां च अल्पगतिमत्वाच्च तेषां गतिर्न लक्ष्यते । अस्य प्रवहवायोरूर्ध्वोऽपि पुनः पञ्चवायूनां क्षेत्राणि कथितानि । तत्र प्रवहवायोरूर्ध्वमुद्वहवायोः क्षेत्रम् । उद्वहात् संवहवायोः । संवहात् सुवहवायोः । सुवहात् परिवह वायोः । परिवहादूर्ध्वमन्ते च परावहवायोः क्षेत्रं कथितम् । इत्थं भूमेरूपर्याकाशे ऊर्ध्वोर्ध्वक्रमेण क्रमशः आवहप्रवहोद्वहसंवहसुवहपरिवहपरावहानां सप्तवायूनां क्षेत्राणि कथितानि, तेषु चावहप्रवहयोर्विशेषोपयोगः प्रदर्शितः । यथाऽऽह श्लोके-

भूवायुरावह इह प्रवहतदूर्ध्वः स्यादुद्वहस्तदनु संवहसंज्ञकश्च ।
अन्यस्ततोऽपि सुवहः परिपूर्वकोऽस्माद्बाह्यः परावह इमे पवनाः प्रसिद्धाः ॥
भूमेर्बाहर्द्वादशयोजनानि भूवायुरत्राम्बुदविद्युदाद्यम् ।
तदूर्ध्वगो यः प्रवहः स नित्यं प्रत्यग्गतिस्तस्य तु मध्यसंस्था ॥
नक्षत्रकक्षाखचरैः समेतो यस्मादतस्तेन समाहतोऽयम् ।
भपञ्जरः खेचरचक्रयुक्तो भ्रमत्यजस्रं प्रवहानिलेन ॥ (सिद्धान्तशिरोमणिः, ४।१-३)

ग्रहाणां पूर्वगतित्वे कारणमपि वायुरेवास्ति । खस्थानात् प्रातः काले कश्चित् ग्रहः केनचिन्नक्षत्रेण सह क्षितिजे समुदितो दृष्टः । द्वितीयदिने तन्नक्षत्रस्य गत्यभावात् षष्टिघटिकायां पुनः क्षितिजे समुदेति । ग्रहस्तु प्राग्गत्या स्वकक्षावृत्तेऽधोऽवलम्बितो भवति । अतो नक्षत्रोदयात् किञ्चित् कालान्तरे ग्रह उदेति । परन्तु ग्रहाणां प्राग्गमनं न दृश्यते । यथा पश्चिमाभिमुखभ्रमणशीलकुलालचक्रे पूर्वाभिमुखगच्छन्तः कीटा न भवन्ति, अर्थात् तेषां पूर्वाभिमुखगमनं न दृश्यते, ते च चक्रभ्रमणदिश्येव गच्छन्तीव भान्ति तद्वद् ग्रहाऽपि पूर्वदिशि स्वशक्त्या गच्छन्तोऽपि प्रवहवायोः प्राबल्यात् पश्चिमदिश्येव गच्छन्तीति भान्ति । वस्तुतः ग्रहाणां पूर्वाभिमुख एव गमनं भवति । यथोक्तमाचार्येण -

यान्तो भचक्रे लघुपूर्वगत्या खेटस्तु तस्यापरशीघ्रगत्या ।
कुलालचक्रभ्रमिवामगत्य यान्तो न कीटा इव भान्ति यान्तः ॥ (सिद्धान्तशिरोमणिः, २१।४)

३.५ फलितज्यौतिषे वायुः

फलितज्योतिषे वायोः विशेषमध्ययनमस्ति । कतिपयग्रहाः वातप्रकृतिका सन्ति । यथा चन्द्रस्य ग्रहस्वरूपकथने लघुजातके यथाः

स्वच्छ प्राज्ञो गौरश्चपलः कफवातिको रुधिरसारः ॥
मृदुवाक् घृणी प्रियसखस्तनुवृत्तश्चन्द्रमाः प्रांशुः ॥ (लघुजातकम्, ४।२)

एवमेव शुक्रग्रहोऽपि कफवातप्रकृतिकोऽस्ति (लघुजातक।४।६) । शनिग्रहोऽपि अनिलप्रकृतिकः । यथा शनिस्वरूपकथनप्रसङ्गे–

कृशदीर्घः पिङ्गाक्षः कृष्णः पिशुनोऽलसोऽनिलप्रकृतिः ।
स्थूलनखदन्तरोमा शनैश्चरो स्नायुसारश्च ॥ (लघुजातकः,४।७)

जातकपारिजाते महाभूताधिपति मध्ये शनिस्तु पवनस्याधिपतिरस्ति यथा –

वियत्क्षोणीतेजपवनपयसामेव पतयः ।
सुराचार्यज्ञारद्युमणिसुतदेवारिसचिवाः ॥ (जातकपारिजातकः, २।२७)

जन्मलग्नपतिभौमबुधाः सहैकत्र अशुभभावेस्थिता स्थिताः, अन्या च सौम्यभावे सति अथवा लग्नेशभौमबुधा एकत्र सङ्गताः सौख्यगृहे(चतुर्थे)व्यये द्वादशे भवेयुः । अस्मिन् योगे जातो नरोऽपानरोगं प्राप्नोति । यथा जातकपारिजाते –

लग्नेशभूपुत्रशशाङ्कपुत्राः सह स्थिताः सौम्यतरान्यभावाः ।
अपानरोगं त्वथवाऽपवित्रं पश्यन्ति षष्ठं मुनयो वदन्ति ॥ (जातकपारिजात, ६।७१)

एवमेव वातरोगविषये बृहज्जातको कथां कथयति वराहः –

संस्पृष्ट पवनेन मन्दगयुते द्यूने विलग्ने गुरौ ।
सोन्मादोऽवनिसूनुनास्तभवने जीवे विलग्नाश्रिते ॥....(बृहज्जातकम्, २३।१३)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अर्थात् यस्य जन्मगि मन्दगः सौरो द्यूने सप्तमे युतः स्थितो भवति विलग्ने च गुरुः वृहस्पति स पवनेन वायुना संस्पृष्टो अर्थात् वातरोगी भवति ।

शनेः स्वरूपम् यथा–

मन्दोऽलसः कपिलदृक् कृशदीर्घगात्रः । स्थूलद्विजः परूषरोमकचोऽनिलात्मा । (बृहज्जातक, २।११)

सर्वे ग्रहाः त्रिदोषात्मकाः अर्थात् कफपित्तवातप्रकृतिकाः सन्ति । केचन ग्रहाः वातात्मकाः, कतिपयाः कफात्मकाः कतिपयपित्तप्रकृतिकाः । मुख्यरूपेण शनिराहुकेतवस्तु वातप्रकृतिकाः ग्रहाः अर्थात् एते ग्रहाः व्याधिसूचकाः सन्ति (पाठकः, बृहज्जातकभूमिका,पृ.३१) ।

३.६ संहिताशास्त्रे वायुः

संहिताशास्त्रेषु अपि वायोः विशिष्टाध्ययनमस्ति । वायुवशात् वर्षा सम्भवति । एवमेव बृहत्संहितायां वराहमिहिराचार्येण वातचक्राध्यायद्वारा वातविषयकमध्ययनं कृतमस्ति । आषाढमासस्य पौर्णमास्यां तीक्ष्णांशावर्केऽस्तं गच्छतः यद्यैशान्यां दिशि अनिलो वातो भवेद् वहति च तदा धान्यादीनां सम्पत्तिरुत्तमा भवति । यथा कथयति वराहः –

आषाढपौर्णमास्यां तु यद्यैशानोऽनिलो भवेत् ।

अस्तं गच्छति तीक्ष्णांशौ सस्यसम्पत्तिरुत्तमा ॥ (बृहत्संहिता, २७।१)

पूर्वदिशि अनिलो वहति चेत् तदा मही शोभते शोभायमानं दरीदृश्यते (ऐ. २७।२) परन्तु यदा वायुः वह्नावाग्न्येय्यां दिशि वहति तस्मिन् वर्षे वसुधा भूर्नित्योद्दीप्ता सर्वकालमुज्वलिता भवति (ऐ.२७।३) । यस्मिन् काले याम्याशास्थो वायुः वहति तदा तालीवृक्षविशेषस्तस्य पत्राणि, पर्णानि तथा लतानां विस्तारो भवति । (ऐ.२७।१) । आषाढपौणमास्यां भानोः अस्तमयकाले नैऋत्यां वायुः वहति चेत् तदा तस्मिन् वर्षे भूम्यां बुभुक्षा, तृष्णा, पिपासा भवति । यथा कथयति वराहः–

सूक्ष्मैलालवलीलवङ्गनिचयान् व्याघूर्णन् सागरे ।

भानोरस्तमये प्लवत्यविरतो वायुर्यदानैऋतः ।

क्षुत्तृष्णावृतमानुषास्थिशकलप्रस्तारभारच्छदा

मत्ता प्रेतबधूरिवोग्रचपला भूमिस्तदा लक्षते ॥ (बृहत्संहिता, २७।५)

सूर्यास्तकाले प्रवातश्चण्डनिलो वहति तदा तस्मिन् वर्षे भूमिः सस्यानि बहुनि भवति । बहवो जनाः सङ्ग्रामे बध्यन्त (ऐ.२७।६) । वायव्यो वातो वृद्धवेगश्चण्डशब्दो यदि वहति तदा जना अतिसुखिनः भवन्ति (ऐ.२७।७) । यदा वायुः सौम्यदिशि वहति तदा तस्मिन् वर्षे तोयदा मेघा गां भूमिमम्बुभिर्जलैः पूरयन्ति (ऐ. २७।८) ।

यदा अरुणः लोहितवर्णो भवति तदा अपसव्यवायुः प्रवहति । स तु सस्यक्षयाय भवति इति कथयति दिग्दाहलक्षणप्रसङ्गे वराहः–

दाहो दिशां राजभयाय पीतो देशस्य नाशाय हुताशवर्णः ।

यश्चारुणः स्यादपसव्यवायुः सस्यस्य नाशं स करोति दृष्टः ॥ (बृहत्संहिता, ३१।१)

एवमेव भूकम्पस्य कारणमपि वायुः भवितुं शक्नोति । वायुः स च नभस्थोऽपरेणैवानिलेन निहतस्ताडितः क्षितो पतति, स च पतन् शब्दं भूकम्पं च करोति यथा –

अनिलोऽनिलेन निहतः क्षितौ पतन् सस्वनं करोत्यन्ये ।

केचित्त्वदृष्टकारितमिदमन्ये प्राहुराचार्याः ॥ (बृहत्संहिता, ३२।२)

रवीन्द्वोः किरणाः पवनेन मण्डलीभूता कृतास्ते च तन्वभ्रे प्रतिफलिता नानावर्णाकृतयो दृश्यन्ते । नानाप्रकारो विचित्रवर्णा आकृतिः संस्थानं येषां ते परिवेषा इत्युच्यन्ते यथा कथयति वराहः –

सम्मूर्छिता रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः ।

नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः ॥ (बृहत्संहिता, ३४।१)

अतः संहिताशास्त्रे अपि वायरूपस्थितिरस्तीति वक्तुं शक्यते । वायु वशादेव भूमम्पोल्कापातवर्षासस्यादय शुभाशुभं विचार्यन्ते ।

५. निष्कर्षः

स्पर्शतन्मात्रात्मको वायुः । विशेषतः चराजगतः प्राणधारणत्मकशक्तिरस्ति । वनस्पतीनामपि वायोरावश्यकता दरीदृश्यते । प्राणपानसमानात्मका अनेके वायवः अस्माकं शरीरे विद्यमाना सन्ति । येन श्वासं नीयते तन् प्राणवायुरस्ति । एवमेव अपानक्रमे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अपानवायुः, उदानक्रमे उदान वायुः गच्छति । वायोरभावे प्राणीजगताम् अस्तित्वं नास्ति सम्भवः । रक्तकणिकायामपि अस्योपस्थितिरस्तीति कथयन्ति वैज्ञानिकाः । एवमेव मृत्युपश्चादपि धनञ्जयवायुः शरीरे विद्यमानः भवतीति कथयति गरुडपुराणः । येन प्राणं रक्षति सः प्राणवायुः । वनस्पतिषु प्राणवायु सञ्चरति । सजीवप्राणिनां कृते वायोः नितरामावश्यकता भवति । ग्रहाणां नैमित्तिकीगतिरपि वायुमाश्रित्यैव प्रचलति । एवमेव प्रवहनामकवायुवेगेन ग्रहा पश्चाभिमुखिनः दृश्यन्तेति विषये स्वयं सूर्य सिद्धान्तौ सिद्धान्तशिरोमणौ च वर्णनमस्ति । एवमेव फलितज्योतिषे अपि वायुप्रकृतिका ग्रहाः सन्ति । विशेषतः शनिः वायु कारको ग्रहः । वातप्रकृतिकग्रहभुक्तसमये वातसम्बन्धी रोगमायाति । एवमेव संहिता शास्त्रौ अपि वायोः विशेषमध्ययनमस्ति । अतः प्राणधारको वायुः ज्योतिषशास्त्रेऽपि व्याप्तमस्तीति वक्तुं शक्यते ।

सन्दर्भग्रन्थाः

- अमरसिंहः (सन् २००८), अमरकोषः, वाराणसी : चौखम्वा-सुरभारतीप्रकाशनम् ।
- अथर्ववेदः (ई.सं. १९६०), पञ्जावः विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम् ।
- आचार्यः, वराहमिहिरः(ई. १९९८), लघुजातकम्,वाराणसी : सावित्रीठाकुरप्रकाशनम् ।
- आचार्यः, वराहमिहिरः(वि.सं.२०६३), बृहज्जातकम्, सम्पा.रामचन्द्रपाठकः, चौखम्वाप्रकाशनम् ।
- अर्कसोमयाजी (शक. १८८६), ज्योतिर्विज्ञानम्, वाराणसी : वाराणसेयसंस्कृतविश्वविद्यालयः ।
- आचार्यः, भास्करः (ई.सं.१९९८), सिद्धान्तशिरोमणिः, मुरलीधरचतुर्वेदः (व्याख्या.), द्वि.सस्क., वाराणसी : सम्पूर्णानन्द- संस्कृत-विश्वविद्यालयः ।
- आचार्यः, ब्रह्मगुप्तः (ई.सं. १९६६), ब्रह्मस्फुटसिद्धान्तः(भाग १,२,३), रामस्वरूपशर्मा (सम्पा.), प्र.संस्क., दिल्ली : इन्डियन इन्स्टीट्युट अफ अस्ट्रोनोमिकल एण्ड संस्कृत रिसर्चः ।
- आचार्यः, वराहमिहिरः (सन् १९६८), पञ्चसिद्धान्तिका, सुधाकर द्विवेदी तथा जी.थिब्वुट (सम्पा.), द्वि.संस्क. वाराणसी : चौखम्वासंस्कृतसिरिज अफिसः ।
- ऋग्वेदसंहिता (भाग १-५) (सन् १९७२), सायणव्याख्याः, पुणे : वैदिक-संशोधकमण्डलम् ।
- ऋग्वेदसंहिता (ई.१९६५), मोक्षमूलरः (सम्पा.), वाराणसी : चौखम्वासंस्कृतसिरिजः ।
- ऐतरेयब्राह्मणम् (ई.सं.१९५९), पुणे : आनन्दाश्रमः ।
- व्यासः (वि.सं.२०६५), श्रीमद्भागवतमहापुराणम्, द्वात्रिंश संस्क. गोरखपुरः : गीताप्रेसः ।
- व्यासः (वि.सं.२०६५), वायुपुराणम्, कलकत्ता : मनसुखमोरराय (गुरुमण्डलम्) ।
- वैद्यनाथः, (वि.सं. २०६४),जातकपारिजातः, सम्पा.कपिलेश्वरचौधरी मातृकाप्रसाद पाण्डेय, वाराणसी : चौखम्वासंस्कृतसंस्थान् ।
- शुक्लयजुर्वेदसंसहिता (ई.सं.१९७८), जगदीशलाला शास्त्री (सम्पा.), दिल्ली : मोतीलालावनारसीदास ।
- श्रीपतिः (सन् १९३२), सिद्धान्तशेखरः, बबुआजीमिश्रः (सम्पा.), कलिकता : वि.वि.मुद्रणालय ।
- शतपथब्राह्मणः (सन् १९६४), अलवेरतन वेवरः (सम्पा.), वाराणसी : चौखम्वासंस्कृतसंस्थानम् ।
- सूर्यसिद्धान्तः (वि.सं.२०४४), वाराणसी : सम्पूर्णनन्द-संस्कृत-विश्वविद्यालयः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शब्दशक्तिविवेचने मम्मटविश्वनाथौ

उपप्रा. पराशरआचार्यः
वाल्मीकिविद्यापीठस्थः

शब्दशक्तेश्चर्चा संस्कृतसाहित्यजगति प्राचीना वर्तते । संभाव्यते यदस्याश्चर्चा सर्वप्रथमं व्याकरणे निरुक्ते वाऽभूत् । अर्थावबोधनमेव शब्दस्य एकैव उपयोगितास्ति । शब्दत एवार्थस्य बोधो भवतीत्यत्र न विदुषां विमतिः । वैयाकरणा मीमांसका काव्यशास्त्रीयाचार्याश्च शब्दार्थयोः परस्परं सम्बन्धो नित्य इति मन्वते (सहाय, १९७६:) । इदं निश्चितं यत् कोऽपि विशेषः शब्दः कमपि विशेषार्थं बोधयति । अतः शब्दादर्थप्रतीत्यर्थं नियामकशक्तेः कस्या अपि आवश्यकता भवति । अर्थादर्थावबोधनाय शब्दे शक्तिरावश्यकी यां विनार्थज्ञानं न भवेत् । एषैव शब्दस्यार्थबोधने नियामकत्वेन स्थिता शक्तिरेव शब्दशक्तित्वेन गृह्यते । दर्शनशास्त्रे शक्तिशब्दस्य स्थाने वृत्तिपदस्य प्रयोगः कृतो दृश्यते (सहाय १९७६:) । काव्यशास्त्रे शक्त्यपरपर्यायत्वेन वृत्तिव्यापारयोः प्रयोगः कृतोऽस्ति । विशेषेण काव्यशास्त्रे अभिधा, लक्षणा, व्यञ्जना च शब्दशक्तित्वेन गृह्यन्ते । अस्मिन् शोधात्मके लेखे च शब्दशक्तिसम्बन्धे मम्मटविश्वनाथयोः मतस्य विश्लेषणं सारल्येन कृतमस्ति ।

मम्मटस्य शैली दुरूहेति "काव्यप्रकाशस्यकृता गृहे गृहे टीकाः तथाप्येषः तथैव दुर्गम" इत्यनेनापि बुध्यते । न केवलं संस्कृतवाङ्मयस्यापितु सर्वेषामेव विषयाणां काठिन्यस्य कारणं भाषाया शैली प्रस्तुतिः वा वर्तते । अधुना संस्कृतस्याध्येतारो विद्वांसो वाधिका न सन्ति । संस्कृतभाषायाः पर्याप्तज्ञानेन युक्ता शिक्षका एव दुर्लभा जायमाना इति दृश्यते । एतादृश्यामवस्थायां विद्यार्थिनामवस्था तु अतीव शोच्या संस्कृताध्यायिनामिति । अथ संस्कृतं प्रति रुचेः वर्धनाय जनानामिति हेतोरत्र संस्कृतस्य प्रयोगः यथाशक्ति सारल्येन कृतो वर्तते । कस्यापि विषयस्य सारल्येन प्रतिपादनं तस्य विषयस्य विशिष्टीकरणमिति बोध्यम् । लक्षणशास्त्रस्य काठिन्यस्य कारणमपि तस्य दुरुहप्रस्तुतिरेव । विषयवस्तूनां बोध एव जनानां प्रवृत्तौ निवृत्तौ च तत्र मूलकारणमिति मदीया धारणा वर्तते । अथात्र विशिष्टीकरणधिया मम्मटविश्वनाथयोः शब्दशक्तिसम्बन्धिनी धारणा प्रस्तुता । विस्तरभयादावश्यकस्थल एव सविशेषं विशिष्टीकृता तयोः धारणेति बोध्यम् । इयं प्रस्तुतिः निदर्शनात्मिकास्ति । पश्चादावश्यके सविस्तरमस्यैव अन्यविषयणाञ्च वर्णनं करिष्यते ।

संकेतग्रहस्य स्पष्टता, अभिधालक्षणाव्यञ्जनाख्यानां शब्दशक्तीनां सरलतया बोधनम, लक्षणालक्षणे वाच्यार्थलक्ष्यार्थयोः सम्बन्धस्य सरलतया बोधः, अनेकार्थस्य शब्दस्य एकार्थे नियन्त्रणानन्तरं व्यङ्ग्यार्थबोधस्य सुस्पष्टता इत्यादिन्यस्य लेखस्य वैशिष्ट्यानि सन्ति । अन्त्ये उदाहरणादिप्रदर्शनस्थले लेखविस्तरभयाद् सङ्क्षेपतो निदर्शनात्मको मार्गश्चावलम्बितः ।

नेपालसंस्कृतविश्वविद्यालयान्तर्गतेषु विद्यापीठेषु शास्त्रिप्रथमवर्षे द्वितीयवर्षे च साहित्यदर्पणस्य काव्यप्रकाशस्य चाध्ययनं भवति अतः मम्मटविश्वनाथयोः शब्दशक्तिविषयकीं धारणां विद्यार्थिनः सारल्येन बोद्धुं समर्था भूत्वा परीक्षार्थञ्च लाभान्विता भवेयुरिति अस्य लेखस्याऽन्यतमं प्रयोजनमस्ति । विद्यावारिध्यर्थञ्च प्रकाशितस्य लेखस्यावश्यकता कतिपयविश्वविद्यालयैः दर्शिता अत उपयोगिनि लेखे विद्यावारिधेः शोधार्थञ्चास्य उपयोगः कर्तुं शक्यते ।

मम्मटेन काव्यप्रकाशे शब्दार्थाविति उल्लिख्य काव्ये शब्दार्थयोरेव प्रामुख्यं सूचितम् (मम्मटाचार्यः, १९९५:) । मम्मटेन काव्यलक्षणप्रसंगे शब्दार्थयोरुल्लेखः कृतः पश्चात् तयोः सविस्तरं निरूपणं करोति ।

वाचको लाक्षणिको व्यञ्जकश्चेति शब्दस्य त्रैविध्यं तेन साधु स्वीकृतम् । अथ एते त्रिविधाः शब्दाः क्रमेण वाच्यार्थं लक्ष्यार्थं व्यङ्ग्यार्थञ्च बोधयन्तीति कथयित्वा अर्थोऽपि त्रिविधो वाच्यलक्ष्यव्यङ्ग्यात्मको दर्शितः । यद्यपि काव्यशास्त्रकारैसाहित्यिकैः वा तात्पराख्या वृत्तिः न स्वीक्रियते तथापि कुमारिलभट्टानुयायिनः पार्थसारथिमिश्रादयोऽभिहितान्वयवादिनो मीमांसकास्तु त्रिप्रकारकाद् वाच्याद्यर्थादतिरिक्तं तात्पर्यार्थमपि स्वीकुर्वन्तीति काव्यप्रकाशे सूचयति मम्मटाचार्यः ।

कविराजो विश्वनाथोपि शब्दशक्तिविश्लेषणे मम्मटमेवानुसरन् दृश्यते । तन्मतेऽपि अभिधया वाच्यार्थो लक्षणया लक्ष्यार्थो व्यञ्जनया च व्यङ्ग्यार्थो बोध्यत इति । एतेन विश्वनाथोऽपि शब्दशक्तिः त्रिविधेति सर्वथा स्वीकरोति । अथ क्रमेण मम्मटविश्वनाथयोः शब्दशक्तिविषयको विचारः प्रस्तूयते ।

अभिधालक्षणम्

मम्मटः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वाच्यार्थावबोधने लक्ष्यार्थावबोधने व्यङ्ग्यार्थावबोधने च प्रवृत्ताः शब्दस्य शक्तयः क्रमेणाभिधा लक्षणा व्यञ्जना च कथ्यन्ते। अभिधाविवेचनक्रमे मम्मटो वाचकशब्दं स्पष्टयति। वाचको वाच्यार्थं बोधयति। अभिधया बोध्योऽर्थो वाच्यार्थश्च कथ्यते। मम्मटमते वाचकशब्दस्य व्यापारत्वेनाभिधा समायाता। शब्दस्यशक्तित्वेनात्र व्यापारशब्दस्य प्रयोगः कृतोऽस्ति। सः शब्दस्य व्यापारो अभिधैव वर्तते। वाचकशब्दः पुनः सङ्केतितमर्थं बोधयति। अगृहीतसंकेतस्य शब्दस्यार्थप्रतीतिः न, संकेतसहाय एव शब्दोऽर्थविशेषं बोधयति। स च संकेतितोऽपि चतुर्धा- जातिः गुणः क्रिया यदृच्छा च। परन्तु मीमांसकास्तु जातिरूपमेकप्रकारकमेव संकेतितार्थं मन्वते (सहाय, १९७६:)। मम्मटेन महाभाष्यकारस्यैव मतस्य प्रतिपादनं कृतं यद् जात्यादिषु चतुर्ष्वेव संकेतग्रहः। जात्यादिरूपः चतुर्विध एव मुख्योऽर्थः संकेतितार्थत्वेन बुध्यते। अतः संकेतितार्थावबोधने यः शब्दस्य व्यापारः स एवाभिधाव्यापार इति मम्मटः। अत्रैव मम्मटेनाभिधाशब्दस्य प्रयोगो विहितः स च शब्दस्य व्यापारनाम्ना। सारबोधिनीटीकायां श्रीवत्सलाञ्छनभट्टाचार्येण साक्षात् इति मम्मटकृतस्य शब्दस्यार्थोऽव्यवधानमिति कृतमस्ति। व्यवधानं विना यत्र संकेतग्रहस्तत्राभिधाव्यापार इति।

विश्वनाथः

शब्दशक्तिविवेचनक्रमे कविराजः विश्वनाथः प्रथमं तावदर्थस्य त्रैविध्यं दर्शयति। तत्रादिमोऽर्थो वाच्यः स चाभिधया बोध्यत इति। संकेतितार्थस्य बोधनमभिधाया लक्षणम्। अर्थात् संकेतितार्थः खलु मुख्यार्थः। अथ सः स्पष्टयति संकेतितमर्थं बोधयन्ती शब्दस्य शक्त्यन्तरान्तरिता शक्तिरभिधा नाम। अन्यया शक्त्या न व्यवहिता शक्त्यन्तरान्तरितेति। एषा खलु शक्तिः लक्षणां व्यञ्जनाञ्चानपेक्ष्यैव प्रवर्तत इत्यपि तेन सूचितम्। व्याकरणकोषादिषु प्रसिद्ध एवार्थ मुख्यार्थत्वेन बोध्यः। लक्ष्यार्थाद् व्यङ्ग्यार्थाच्च पूर्वमस्योपस्थितिरतो मुख्यार्थत्वम्। वृद्धव्यवहारः, प्रसिद्धपदसमभिव्यवहार आप्तोपदेश इत्यादयः संकेतग्रहस्योपाया इति विश्वनाथो दर्पणे। एभिरूपायैः कृतस्य संकेतितार्थस्य बोधनं यया क्रियते साभिधाशक्तिरिति तेन स्पष्टीकृतम्। संकेतग्रहः पुनः कुत्र भवतीति जिज्ञासायां स कथयति व्यक्तेरूपाधिभूतेषु जातिगुणद्रव्यक्रियासु संकेतो गृह्यते न तु व्यक्तावानन्त्यव्यभिचारदोषाच्च।

मम्मटविश्वनाथयोरभिधाविवेचने मतं समानमेव दृश्यते। वाचकशब्दः संकेतितार्थं बोधयति। अभिधा खलु शब्दस्य व्यापारः स च संकेतितार्थं बोधयतीति। साक्षात् संकेतितमर्थं बोधयन् शब्दस्य प्रथमो मुख्यो वा व्यापार एवाभिधेति ध्वनिप्रस्थापनपरमाचार्यः। उक्तञ्च "स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते"। (मम्मटाचार्यः, १९९५)

संकेतितार्थं बोधयन्ती शब्दस्याद्या शक्तिरभिधेति विश्वनाथः। उक्तञ्च "तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा"। (विश्वनाथः, १९९८:)

लक्षणालक्षणम्

मम्मटः

संकेतितार्थस्य बोधयिता वाचकः। अथ लाक्षणिकशब्दस्य चर्चा मम्मटस्याभिमता। लाक्षणिकः शब्दो लक्ष्यार्थं बोधयति। प्रथमं तावदभिधा मुख्यार्थं बोधयति ततः सा समाप्तव्यापारा भवति। यत्र वाक्ये मुख्यार्थस्यान्यपदार्थैः सहान्वये बाधा ततो रूढेः प्रसिद्धेः विशेषप्रयोजनप्रतिपादनाय वा मुख्यार्थेन सम्बद्धस्य अन्यार्थस्य येन प्रतितिर्भवति स एव लक्षणाव्यापार इति। इयं लक्षणाऽऽरोपितः शब्दव्यापार इति मम्मटाचार्याः (मम्मटाचार्य : १९९५)। मुख्यार्थे बाधा, लक्ष्यार्थस्य मुख्यार्थेन सह कश्चित् सम्बन्धः, रूढिः प्रयोजनं वा लक्षणाव्यापार आवश्यकतत्त्वानि। उक्तञ्च-

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्यार्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया॥

"कर्मणि कुशलः" इत्यत्र कुशलशब्दस्य कुशग्राहकरूपो मुख्यार्थोऽस्ति, स चान्येन कर्मणीति पदेन सहान्वयबाधितो वर्तते। अतः स एव बाधितः कुशलशब्दः कुशग्राहकरूपमर्थं त्यक्त्वा दक्षरूपमर्थं बोधयति। अत्र दक्षरूपोऽर्थो लक्ष्यार्थो कुशग्राहकरूपोऽर्थो मुख्यार्थश्च, तयोः परस्परं विवेचकत्वादिः सम्बन्धः। दक्षार्थं कुशग्रहणार्थञ्च विवेकशालितया भाव्यम्। विवेकशाली दक्षो भवति विवेकशाल्येव विना कुशसूचिविद्धं सम्यक् कुशाल्लातुं शक्नोति समर्थो वा भवतीति तयोः परस्परं विवेचकत्वं समानो धर्मः। समान एव खलु धर्मः परस्परं सम्बद्ध इति निर्विवादम्। परन्तु केवलं साधर्म्येण लक्ष्यार्थो न बुध्यते। कुशलातिरिक्तेषु अन्येषु पदेष्वपि विवेचकत्वादिधर्मो प्राप्तुं शक्यते परन्तु जनैः कुशलपद एव तत्प्रयुक्तम्। अत्र प्रमाणं प्रयोगप्रवाह एव। अर्थात् कुशलपदे दक्षरूपार्थस्यारोपणे न केवलं विवेचकत्वादिधर्मः पर्याप्तोऽपितु रूढिः प्रसिद्धिर्वावश्यकी।

तथैव "गङ्गायां घोषः" इत्यत्र गङ्गाशब्दो लाक्षणिको वर्तते। गङ्गा च जलप्रवाहरूपे मुख्यार्थे बुध्यते। अतः जलप्रवाहे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

घोषस्यासंभवाद् मुख्यार्थबाधः स्पष्टः । अथात्र सामीप्यसम्बन्धतो गङ्गाशब्दः तटरूपं लक्ष्यार्थं बोधयति । तटगङ्गयोः परस्परं समीपतायाः सम्बन्धः स्फुटः परन्त्वत्र गङ्गातटे घोषस्य कथने रूढिः न कारणम् । अत्र गङ्गाशब्दस्य प्रयोगो न रूढितोऽपितु प्रयोजनविशेषाद् विहितः । शीतलतायाः पवित्रतायाश्च प्रत्यायनमत्र गङ्गाशब्दप्रयोगे विशेषप्रयोजनमिति ।

उपादानलक्षणा लक्षणलक्षणा चादौ लक्षणाया द्वौ भेदौ मम्मटेन दर्शितौ । वाक्ये प्रयुक्तस्यान्यपदस्यान्वयसिद्ध्यर्थमन्यार्थस्याक्षेपस्तथैव मुख्यार्थस्य च ग्रहणादियमुपादानलक्षणा। अन्यपदस्यान्वयसिद्ध्यर्थं सर्वथात्मनोऽर्थस्य परित्यागो लक्षणलक्षणा। इमौ द्वौ केवलं शुद्धालक्षणाय भेदौ न तु गौण्या इति मम्मटः । "कुन्ताः प्रविशन्ति" इत्यत्र कुन्तैः सह लक्ष्यार्थस्य पुरुषरूपार्थस्य च ग्रहणादियमुपादानलक्षणा । "गङ्गायां घोषः" इत्यत्र तु मुख्यार्थस्य गङ्गाशब्दार्थस्य सर्वथा परित्यागः केवलं तटरूपार्थस्यग्रहणादियं लक्षणलक्षणा ।

सारोपासाध्यवसानाभ्यां पुनः गौणीशुद्धयोर् लक्षणयोर् द्वौ भेदौ । आरोप्यमाणविषय आरोपविषयश्च यत्र शब्दत उपस्थितौ तत्र सारोपा चेदारोप्यमाणेनारोपविषयस्य निगीर्णे साध्यवसाना । इमे द्वेऽपि सादृश्यसम्बन्धात् सादृश्येतरसम्बन्धाच्च भेदद्वयं लभेते । सादृश्ये गौणी सादृश्येतरे तु शुद्धा ।

"गौर्वाहिकः" इदं आरोप्यमाणारोपविषययोरूपस्थित्या सादृश्यसम्बन्धाच्च गौणीसारोपालक्षणा, "गौरयम्" त्वारोपविषयस्य निगीर्णात् सादृश्यसम्बन्धाच्च गौणीसाध्यवसाना लक्षणा । "आयुर्घृतम्""आयुरेवेदम्" च सादृश्येतरसम्बन्धाद् विषयस्योपस्थिेश्च निगीर्णाच्च क्रमेण शुद्धा सारोपालक्षणा शुद्धा साध्यवसाना बोध्ये । एवं मम्मटेन लक्षणाया षड्भेदा दर्शिताः । एवं सङ्क्षेपतो लक्षणाया मम्मटमतायाश्चर्चा कृता ।

विश्वनाथः

विश्वनाथस्य लक्षणालक्षणं मम्मटलक्षणालक्षणात् सर्वथा न भिन्नम् । यतो मुख्यार्थबाधे तत्सम्बद्धोऽन्योऽर्थो यया रूढेः प्रयोजनाद् वा प्रतीयते साऽर्पिता शक्तिः लक्षणेति तल्लक्षणम् । अत्रापि मुख्यार्थबाधः, रूढिः प्रयोजनं वा, मुख्यार्थेन सह लक्ष्यार्थस्य कश्चित् सम्बन्ध इति त्रय एव पक्षा लक्षणार्थं स्वीकृताः ।

प्रथमं तावल्लक्षणाया रूढिप्रयोजनाभ्यां भेदद्वयम्, ततः तयोरपि लक्षणलक्षणोपादानाभ्यां भेदद्वयम् । अथ लक्षणा चतुर्धा जाता । पुनः पूर्वोक्तानां सर्वेषां सारोपासाध्यवसानाभ्यामष्टौ भेदा जायन्ते । ततः शुद्धागौणीभेदेन पूर्वोक्ताः षोडशभेदा जाता । अथ केवलं प्रयोजने अष्टौ भेदा लक्षणाया जाताः । ताः प्रयोजनमूलका लक्षणाः प्रयोजनरूपव्यङ्ग्यस्य गूढागूढत्वेन षोडशभेदका भवन्ति । अथ ता अपि धर्मिगतत्वेन धर्मगतत्वेन प्रत्येकं द्विधा भूत्वा द्वात्रिंशद्भेदा अस्या जायन्ते । रूढावष्टौ प्रयोजने च द्वात्रिंशदिति योगाल्लक्षणायाः चत्वारिंशद्भेदाः । उपर्युक्ता लक्षणायाश्चत्वारिंशद्भेदाः पुनः पदवाक्यगतत्वेन द्विधा भूत्वाशीतिसङ्ख्यां प्राप्नुवन्ति । इत्थं लक्षणायाः कविराजेन भेदः दर्शितः । विश्वनाथोक्तलक्षणानां सङ्क्षेपतो केवलं नामतः कथने कारणं पूर्वोक्तमेव । आवश्यके पश्चात् सविस्तरं विश्लेषणं करिष्यते ।

लक्षणाविवेचनक्रमे मम्मटेन मुकुलभट्टस्य अभिधावृत्तिमातृकेति ग्रन्थस्य बहु उपयोगः कृत इत्यवगम्यते । (सहाय, १९७६:) षट्प्रकारका लक्षणा मम्मटाभिमता । शुद्धासारोपादानलक्षणा, शुद्धासाध्यवसानोपादानलक्षणा, शुद्धासारोपालक्षणलक्षणा, शुद्धासाध्यवसानालक्षणलक्षणा, गौणीसारोपालक्षणा, गौणीसाध्यवसानालक्षणा च ।

विश्वनाथेन प्रथमं लक्षणाया द्वौ भेदौ कृतौ रूढिलक्षणा प्रयोजनवती च । पुनः तयोरूपादानलक्षणाभ्यां चतुर्धा भेदाः । चतसृणां लक्षणानां पुनः सारोपासाध्यवसाने भेदके जाते । अथाष्टौ भेदा अपि गौणीशुद्धाभ्यां द्विधा विभक्ता अष्टादशतां भजन्ते । अत्र रूढिलक्षणायाः प्रयोजनवत्याश्च प्रत्येकमष्टौ भेदाः । ततः केवलं प्रयोजनवत्या गूढागूढौ द्वौ भेदौ कृत्वा षोडशभेदतां प्रापिता । पुनः तस्या धर्मिधर्मगतत्वेन द्वात्रिंशद् भेदा जायन्ते । अथ रूढिलक्षणाया अष्टौ प्रयोजनवत्याश्च द्वात्रिंशन् मिलित्वा चत्वारिंशद् भेदा अपि पदवाक्यगतत्वेन द्विधा भूत्वाशीतिसङ्ख्यां प्राप्नुवन्ति । निष्कर्षत्वेनोपस्थापनाय द्वयोः विदुषोः मतं लक्षणाभेदाः पौनरुक्तिं प्राप्ता इति विद्वांस आकलयन्त्येव ।

शुद्धायामेव मम्मटेनोपादानलक्षणलक्षणयोः समावेशः कृतो दृश्यते चेद् विश्वनाथेन तु शुद्धागौण्योरेव तयोरूपस्थितिः दर्शिता । समाप्तश्च लक्षणाविवेचनक्रमः ।

व्यञ्जनालक्षणम्

मम्मटः

लक्षणायां स्थितस्य प्रयोजनस्यः बोधो येन व्यापारेण भवति शब्दस्य स व्यापारो व्यञ्जनात्मक इति मम्मटः काव्यप्रकाशे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रुढिलक्षणा व्यंग्यरहिता चेत् प्रयोजनवती लक्षणा सव्यङ्ग्येति मम्मटः स्पष्टयति । प्रयोजनं खलु व्यञ्जनाव्यापारत एव बुध्यते तच्च व्यंग्यं कुत्रचिद् गूढं काठिन्नेन वोध्यं कुत्रचित्तु अगूढं स्पष्टतया वोध्यं भवति । व्यङ्ग्यार्थो लक्षणातोऽभिधातश्च सर्वथा भिन्नः व्यञ्जनाश्रितः अन्यः शब्दव्यापारः काव्यमार्गे स्वीकृत इति व्यञ्जनालक्षणे मम्मटः । शाव्दी आर्थी च व्यञ्जनाया आद्यौ दौ भेदौ । शाब्दीव्यञ्जनाया अभिधामूला लक्षणामूलेति भेदद्वयं मम्मटेन स्वीकृतम् । तत्रादौ अभिधामूलाया इत्थं लक्षणं काव्यप्रकाशे -

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।

संयोगाद्यैरवाच्यार्थधीकृद्वयापृतिरञ्जनम् ॥

एकस्यैव शब्दस्यानेकार्थता सम्भवति । वक्त्रा कस्मिन्नर्थे तस्य प्रयोगः कृत इति ज्ञातुं वैयाकरणैरेकस्मिन्नर्थे नियन्त्रणोपाया दर्शिताः । अर्थात् संयोगादिभिरनेकार्थस्य शब्दस्य वक्तुरिप्सिततमे एकस्मिन्नर्थे नियन्त्रणं भवति । सोऽर्थः खलु अभिधयैव बुध्यते । अनेन एकस्यैव शब्दस्य नैकार्थे संकेतग्रह इत्यपि बोध्यम् । संयोगादिभिरेकस्मिन्नर्थे शब्दस्यार्थे नियन्त्रिते ततो भिन्नोऽर्थो यया बुध्यते ज्ञायते वा साभिधामूलाव्यञ्जनेति मम्मटः । संयोगादिभिरनेकार्थस्य शब्दस्यैकस्मिन्नर्थे नियन्त्रणोपायैः यदा तस्य शब्दस्य एकस्मिन्नर्थे नियन्त्रणं भवति सोऽर्थ खलु वाच्यार्थः । वाच्यार्थाद् व्यङ्ग्यार्थस्य प्रतीतिरनेकार्थस्य शब्दस्यैकस्मिन्र्थे नियन्त्रिते व्यञ्जनयैव मुख्यार्थबाधाद्यभावान् न लक्षणा न चाभिधा तस्या एकस्मिन्नर्थे नियन्त्रितत्वाच्चेति मम्मटेन स्वीकृतम् । तदुदाहरणम् -

भद्रात्मनो दुरधिरोहतनोर्विशाल-

वंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य।

यस्यानुपप्लवगतेः परवारणस्य

दानाम्बुसेकसुभगः सततं करोऽभूत् ॥

अत्र कस्यचिद् राज्ञः स्तुतिः । अत्र भद्रवंशादिनैकार्थनां शब्दानां प्रकरणादिभिः नियन्त्रणोपायैरेकस्मिन्नर्थे नियन्त्रणं स्पष्टम् । ततो गजपरकोऽर्थो यया बुध्यते सा व्यञ्जना सा चाभिधामूला । तस्मादभिधामूलाव्यञ्जनाया उदाहरणमिदम् । राज्ञो विशेषणवाचकशब्दा गजपक्षे व्यङ्ग्यत्वेनान्विता भवन्ति । तयोः परस्परमुपमानोपमेयभावस्य प्रतीतिश्च भवति । राज्ञो विशेषणवाचकानेकार्थशब्दानां राजपक्षे नियन्त्रिते गजपक्षावबोधनमत्र व्यञ्जनाव्यापारः सोऽपि अभिधामूलक इति ।

अनेकार्थस्य शब्दस्यैकस्मिन्नर्थे नियन्त्रणस्य चर्चोपरि कृता परन्तु के नियन्त्रणोपायाः कानि च तानीति न दर्शितम् । अतः सङ्क्षेपतः तच्चर्चया जिज्ञासा शमनीयेति त उल्लिख्यन्ते । केवलं नामतो नियन्त्रणोपायाः श्लोकेन यथा-

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।

अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।

शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥

सशङखचक्रो हरिरित्यत्र शङ्खचक्रयोः योगाद् हरिशब्दस्य विष्णुवानराद्यनेकार्थस्य विष्णुशब्दे नियन्त्रणं संयोगोपायस्योदाहरणम्। विस्तरभयादन्यान्युदाहरणानि न प्रदर्शितानि ।

लक्षणामूलाया अथ क्रमः -

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।

या लक्षणा सप्रयोजना तत् प्रयोजनं खलु व्यञ्जनाव्यापारेण बुध्यते इति लक्षणाामूलाव्यञ्जनायां मम्मटः । गङ्गायां घोष इत्यत्र शीतलतायाः पावनत्वस्य च यद् बोधनं तद्वोधने नाभिधा न च लक्षणा प्रवृत्ताऽपितु व्यञ्जनैवेति तस्य निष्कर्षः । सा लक्षणामूला गूढव्यङ्ग्यागूढव्यङ्ग्या च भेदद्वयं प्राप्नोतीत्यपि वोध्यम् (मम्मटाचार्यः १९९५ः) ।

आर्थीव्यञ्जना

आर्थीव्यञ्जनाविवेचनक्रमे मम्मटः कथयाति -

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम् ।

योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ।

वक्तृबोद्धव्यकाकूवाक्यादिवैशिष्ट्याद्योऽर्थोऽन्यार्थं व्यङ्ग्यार्थं सहृदयान् बोधयति स आर्थीव्यञ्जनाया व्यापार इति ।

तेषु वक्तृवैशिष्ट्याद् व्यङ्ग्यार्थस्य प्रत्यायकता वाच्यरूपाद् अर्थाद् यथा -

अतिपृथुलं जलकुम्भं गृहीत्वा समागताऽस्मि सखि त्वरितम् ।

श्रमस्वेदसलिलनिश्वासनिःसहा विश्राम्यामि क्षणम् ॥ (प्राकृतविशेषभाषातः संस्कृते)

अत्र वाच्यरूपोऽर्थो वक्तुः जलकुम्भं विपुलं गृहीत्वा त्वरितागमनेन क्लान्तत्वं वर्तते । परन्तु चौररतगोपनाय अनया त्वरितागमादिकारणमुक्तमिति सहृदयप्रतीतिः । चौररतगोपनरूपोऽर्थो व्यङ्ग्यः स चात्र वक्तृवैशिष्ट्याद् बुध्यत इति ॥

आर्थीव्यञ्जनायाः प्रसङ्गे वाच्यलक्ष्यव्ङ्ग्यरूपाणामर्थानां सर्वेषां व्यञ्जकत्वं भवतीति बोध्यम् (मम्मटाचार्यः : १९९५) ।

विश्वनाथः

स्वं स्वमर्थं बोधयित्वाभिधादिषु वृत्तिषु विरतासु या तद्भिन्नार्थं बोधयति सा शब्दस्यार्थस्य च वृत्तिः व्यञ्जनेति विश्वनाथः साहित्यदर्पणे । उक्तञ्च -

विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः ।

सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥

इयं वृत्तिः व्यञ्जनध्वननगमनप्रत्ययनादिभिश्च नामभिः बोध्येति कविराजः (विश्वनाथः : १९९८) ।

अथ व्यञ्जनां विभक्ति दर्पणकारोऽभिधालक्षणामूलाभ्याम् ।

उक्तञ्च -

अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा ।

इमे द्वे व्यञ्जने शाब्दीव्यञ्जनाया भेदौ बोद्धव्याविति ।

अभिधामूलां लक्षयति -

अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते ।

एकार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया ॥

शब्दस्यानेकार्थता ज्ञातैव । तादृशस्य शब्दस्य एकस्मिन्नर्थे संयोगादिभिः नियन्त्रिते या शब्दस्यान्यार्थबुद्धिहेतुः शक्तिः सा व्यञ्जनाभिधामूला। अनेकार्थस्य शब्दस्य संयोगादिभिः खलु अभिधयैव एकस्मिन्नर्थे नियन्त्रणं भवति। अभिधया नियन्त्रणानन्तरमन्योऽर्थो यया शक्त्या बोध्यते साभिधामूला व्यञ्जना । अभिधामूलाव्यञ्जना संयोगादिभिरेकस्मिन्नर्थेऽभिधया नियन्त्रणानन्तरमेव व्यङ्रूपमर्थं बोधयतीति बोध्यम् । अभिधामूलायाः कृतेऽनेकार्थस्य शब्दस्यानिवार्यता दर्शिता (विश्वनाथः १९९८ः) । अनेकार्थशब्दस्थल एवाभिधामूलान्वेष्टव्येत्यस्या वैशिष्ट्यम् ।

एकस्मिन्नर्थे नियन्त्रणोपाया मम्मटविश्वनाथयोः समाना एव । अथ तेषां चर्चोदाहरणे नात्रावश्यके इति नोल्लिखितम् ।

अभिधामूलाया उदाहरणं यथा दर्पणे दर्पणकारः -

दुर्गालुतिविग्रहो मनसिजं सम्मीलयंस्तेजसा

प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः ।

नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्

गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः ॥

अत्रोमावल्लभशब्दस्य गौरीवल्लभरूपोऽर्थो व्यङ्ग्यार्थो यया बुध्यते सा व्यञ्जनाभिधामूलेति । उमावल्लभशब्दे उमाया महादेवीति वल्लभस्य च भानुदेवनृपतिरिति च प्रकरणादिना नियन्त्रितो वाच्यार्थः। तद्भिन्नो गौरीवल्लभश्चाभिधामूलो व्यङ्ग्योऽर्थः।

लक्षणामूलाव्यञ्जना-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम् ।

यया प्रत्याय्यते सा स्याद् व्यञ्जना लक्षणाश्रया ॥

यस्यार्थस्य कृते लक्षणायाः प्रयोगः क्रियते स चार्थो यया वोध्यते सा लक्षणाश्रया व्यञ्जना । अत्र सा लक्षणा सप्रयोजना बोद्धव्या । प्रयोजनवत्यां लक्षणायामेव लक्षणाश्रयव्यञ्जनाया व्यङ्ग्यत्वम् । गङ्गायां घोषः इत्यत्र गङ्गाशब्दस्य जलमयाद्यर्थो वाच्यार्थः स च खलु वाचकेन बुध्यते । अर्थादत्राभिधया वोध्योऽर्थो गङ्गाशब्दस्य जलप्रवाहरूप एव । "शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव" इति नियमाद् विरतायामभिधायां तटरूपार्थो यया बुध्यते सा लक्षणा मुख्यार्थबाधादिलक्षणात् । अत्र गङ्गाशब्दस्य प्रयोगे वक्तुः विशेषप्रयोजनमस्ति तत्तु शीतलतायाः पावनत्वादीनाञ्च वोधनम् । शीतलतायाः पावनत्वस्य च बोधोऽभिधया न भवतीति सुस्पष्टं गङ्गाशब्दस्य जलमयादिरूपेऽर्थे सङ्केतितत्वात् । तटरूपार्थे नियन्त्रिता लक्षणापि शीतत्वादिवोधनाय सर्वथाक्षमा शीतत्वादावर्थे मुख्यार्थबाधादिलक्षणाभावात् । अथ शीतत्वाद्यर्थबोधनायाभिधालक्षणे चाक्षमे जात इति स्पष्टम् । अभिहितान्वयवादिभिः स्वीकृता तात्पर्यापि पदार्थसंसर्गमात्रबोधने क्षमत्वाद् वाच्यार्थ एवान्तर्भूतेति मम्मटादयः (मम्मटाचार्यः १९९५:) । अथ गङ्गायां घोष इत्यत्र प्रयुक्तेन गङ्गाशब्देन शीतत्वादिरूपोऽर्थो बुध्यत इत्यत्र व्यञ्जना सहृदयाश्च प्रमाणम् । सा च व्यञ्जनात्र लक्षणाश्रयत्वाल्लक्षणामूलेति । शाब्दीव्यञ्जनायाः पश्चादार्थीव्यञ्जनायाः क्रमः प्राप्तोऽथ तां स्पष्टयति निम्नपद्येन-

वक्तृवोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः

प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च ।

वैशिष्ट्यादन्यमर्थं या बोधयेत्सार्थसंभवा ॥

वक्तृबोद्धव्यादिवैशिष्ट्यात् प्रकृतादर्थाद् भिन्नो व्यङ्ग्यार्थो यया बोध्यते सार्थसंभवा व्यञ्जनाऽऽर्थी व्यञ्जना वा । तत्र वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्यस्योदाहरणं यथा दर्पणे विश्वनाथः -

कालो मधुः कुपित एष च पुष्पधन्वा

धीरा वहन्ति रतिखेदहराः समीराः ।

केलीवनीयमपि वञ्जुलकुञ्जमञ्जु-

दूरे पतिः कथय किं करणीयमद्य ॥

अत्र वक्तृवाक्यादिवैशिष्ट्याद् कश्चनोपपतिरत्र त्वया प्रेष्यतामिति व्यङ्ग्यार्थो बुध्यते इति विश्वनाथः ।

व्यञ्जनावर्णने च मम्मटविश्वनाथयोः साम्यता सुस्पष्टैव । अभिधामूलायां द्वयोरेव विदुषोः समानकारिकाया उद्धरणमभिमतम् । आर्थीव्यञ्जनायां कविराजो वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्ये स्वनिर्मितस्य पद्यस्योदाहरणं प्रस्तौति । न केवलमभिधालक्षणयोरपितु व्यञ्जनाविवेचने च मम्मटस्यानुसरणं कृतमवगम्यते विश्वनाथेन। प्रयोजनस्य प्रतीतयेऽभिधातात्पर्यालक्षणातिरिक्तस्य कस्यचिच्छब्दस्य वृत्ति व्यापारो वा स्वीकरणीयः । शब्दस्यायं व्यापारो व्यञ्जनेति मम्मटः, दर्पणकारस्तु शक्तिरिति ।

सन्दर्भग्रन्थाः

- मम्मटाचार्यः, काव्यप्रकाशः, व्याख्याकार सिंह, सत्यव्रत, वाराणसी : चौखम्वा विद्याभवन, १९९५
- विश्वनाथः, हित्यदर्पणः, व्याख्याकार अनन्तदास, दिल्ली : भारतीय वुक कार्पोरेशन, १९९८
- सहाय, राजवंश, भारतीय आलोचनाशास्त्र, पटना : विहार हिंन्दी ग्रंथ अकादमी, १९७६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समासपरिचयः

प्रकाशतिवारी
कालिका-संस्कृत-विद्यापीठम्

१. विषयप्रवेशः

समसनं समासः, अनेकपदानामेकपदी भवनम् वा। समासशब्देन पाणिनीयव्याकरणे 'संक्षेपः' इत्यर्थोऽवगम्यते। संस्कृतभाषायाः प्रयोगादेव समासस्य प्रयोगः सञ्जातः। येन भाषायां प्रौढत्वं लघुत्वञ्च प्रतिपाद्यते। अतः वेदोपनिषन्निरुक्तपुराणादिषु लौकिकालौकिकभाषासु अस्त्येवास्य प्रयोगः। समासस्य चर्चापरिचर्चा वेदपुराणेषु च लभ्यते। लौकिकग्रन्थेषु, यथा-वाणभट्टकृतकादम्बर्यां समस्तपदानां दीर्घतमः प्रयोगो दृश्यते। तथाप्यस्य प्रयोगविषयकनियामकन्तु व्याकरणशास्त्रमेव।

विचारविनिमयक्रमे वाक्ये एका विशिष्टा शक्तिर्भवति। तस्या 'वृत्तिः' (शक्ति) इति पदेन च ज्ञायते। कोऽयं वृत्तिः? परार्थाभिधानं वृत्तिः।[1] अभिधीयते अनेन इत्यभिधानं करणे ल्युट्। विग्रहवाक्यावयवपदार्थेभ्यः पर अन्यः योऽयं विशिष्टैकार्थः, तत्प्रतिपादिका वृत्तिः। वृत्तिर्पञ्चधोच्यते।

तथा हि -

पाणिन्यादिभिराचार्यैः शब्दशास्त्र-प्रवक्तृभिः।
भणिता वृत्तयो या हि विशिष्टैकार्थबोधिकाः॥
समासा एकशेषाश्च तद्धिताश्च कृतस्तथा।
सनाद्यन्ता धातवश्च ता एव पञ्चधा मताः॥[2]

एषु पञ्च वृत्तिषु पदार्थातिरिक्तसमुदायार्थस्य प्रतीतिर्भवति।

यथा-

(१) समासवृत्तौ- 'राजपुरुष' इत्यतो राजसम्बन्धी 'पुरुषः' इति विशिष्टार्थो बोध्यते।
(२) एकशेषवृत्तौ- 'पितरौ' इत्यतः मातृपित्रचुभययोर्बोधो भवति।
(३) तद्धितवृत्तौ- 'दाशरथि', इत्यतः दशरथस्यापत्यं पुमान् इत्यर्थो बोध्यते।
(४) कृद्वृत्तौ- 'कुम्भकारः' इत्यतः कुम्भं करोति इति विशिष्टार्थो बोध्यते।
(५) सनाद्यन्तधातुवृत्तौ- 'पुत्रीयति' इत्यतः आत्मनः पुत्रमिच्छति इति विशिष्टार्थो बोध्यते।

२. समासपदनिर्वचनम्

समसनमिति विग्रहे समुपसर्गपूर्वकाद् अस्धातोः भावे घञ्प्रत्ययेऽनुबन्धलोपे 'अत उपधाया' इति सूत्रेण उपधावृद्धौ, वर्णसम्मेलने, कृदन्तत्वनिमित्तकप्रातिपदिकसंज्ञायां विभक्तिकार्येण निष्पन्नस्य समासपदस्य संक्षेपीभवनमित्यर्थो लभ्यते। तत्रादौ कोशानुसारेण समासशब्दस्यार्थः प्रतिपाद्यते।

(क) वाचस्पत्यानुसारेण

सम्+अस्+घु=समासः। (१) संक्षेपः (२) समर्थनम् (३) समाहारः (४) व्याकरणोक्तपदानामेकपदता सम्पादके पदसाधुतार्थके (५) संस्कारभेदे च यथा 'समर्थः पदविधिः' समर्थः संसृष्टार्थः सङ्गतार्थः इति यावत्।[3]

(ख) शब्दकल्पद्रुमानुसारेण

संक्षेपः। यथा मनु।७ २०२। "सर्वेषान्तु विदित्वैषां समासेन चिकीर्षितम्।
स्थापयेत् तत्र तवंश्यं कुर्याच्च समसक्रियाम्॥"

'एकपद्यम्' इति हेमचन्द्रः॥ समसनं पदयोः पदानां वा एकपदीकरणं समासः। इति संक्षिप्तसारव्याकरणम्। "नाम्नां समासो युक्तार्थस्तत्स्थालोप्या विभक्तयः"॥ इति वैयाकरणाः। अभिधानाश्रितलोपाभावदन्यमध्यवर्त्तिविभक्तिशून्यनामसमुदायत्वं

---

१ वरदराजाचार्यः, "लघुसिद्धान्तकौमुदी", गीताप्रेस गोरखपुर, एकत्रिंशत् संस्करण, पृ. १७२।
२ जयन्तमिश्र "संस्कृत व्याकरणोदय" चौखम्वा विद्याभवन वाराणसी, तृतीय संस्करण १९८६, पृ.१४०।
३ तारानाथभट्टाचार्यः, "वाचस्पत्यम्" षष्ठो भागः, चौखम्वा संस्कृत सिरीज, वाराणसी, वि.सं.२०१८, पृ.५२३२।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समासत्वम् ।[४]

(ग) मेदिनि कोशानुसारेण

“स्यात् समासस्तु पुंलिङ्ग सङ्क्षेपे च समर्थने ।” ।

(घ) हलायुधकोशानुसारेण

“समासः स्यात्समाहारः संक्षेपः सङ्ग्रहस्तथा ।”[५]

(ङ) न्यायकोशानुसारेण

संक्षेपः । यथा ‘विष्णुनास्य समस्तस्य समासव्यासयोगतः’ (तत्त्व सं.८।५।) इत्यादौ समासशब्दस्यार्थः संक्षेपः । **समासो नाम** धर्मिमात्राभिधानम् (सर्व.स.पृ.१७१) अनेकेषां पदानामेकपदीभवनम् ।[६]

(ग) संस्कृतशब्दकौस्तुभानुसारेण -

योगः, मेलः । संक्षेपः । समाहारः । एकत्रकरणम् । अनेक पदोंका एकपद बनानेवाला विधान विशेष ।[७] तत्र कोशेषु समासस्य विविधार्थाः कृताः सन्ति । तेष्वत्रः ‘संक्षेपः’ वा अनेकपदानामेकीपदकरणमित्येवार्थो गृह्यते ।

३. समासलक्षणम्

विभिन्नग्रन्थेषु प्रस्तुतं समासलक्षणम् -

(क) शब्दशक्तिप्रकाशिकायाम् -

“यादृशस्य महावाक्यस्यान्तत्वादिर्निजार्थके ।
यादृशार्थस्य धीहेतुः स समासस्तदर्थकः ॥”[८]

अर्थात्-अव्यवहितोत्तरत्वसम्बन्धावच्छिन्नयादृशानुपूर्वावच्छिन्नप्रकारकत्वतलादिविशेष्यकज्ञानंयादृशार्थनिष्ठप्रकारताकत्वतला-र्थविशेष्यकान्वयबोधजनकं महावाक्यघटकतादृशानुपूर्वीमच्छब्दत्वं तादृशार्थे समासत्वम् ।

(ख) समासकलिकायाम् -

समासादिः पदविधिः समर्थः शक्त उच्यते ।
वाक्यार्थस्याऽभिधाने यो विग्रहस्य क्षमो यदि ॥
स समास इति ह्येतदेकार्थं व्यपदिश्यते ।
समसनं समासोऽयमित्यन्वर्थविवक्षया ॥[९]

(ग) प्रतिसंस्कृतासिद्धान्तकौमुद्याम्

“समास एकीकरणं पदयोर्मिलितार्थयोः ।”[१०]

अर्थबोधकलौकिकविभक्त्यवहितपूर्ववर्तित्वप्रकारकज्ञानाविषयकपूर्वपूर्वपदघटितसमुदायत्वं समासत्वम् ।[११] “द्वयोः पदयोर्बहूनां वा परस्पराकांक्षया सम्बद्धानां यत्र द्वित्र्यादिपदसमूहोच्चारणं स समासः ।”

४. समासभेदाः

समासपरिचयादनन्तरमत्र समासभेदाः प्रतिपाद्यन्ते । निरूक्ते तद्धितस्य, समासस्य च निर्वचनक्रमे समासस्य भेदद्वयं कृतम् । उक्तञ्च तत्र- “अथ तद्धित-समासेषु एकपर्वसु चानेकपर्वसु च, पूर्वपूर्वम्, अपरम् अपरं प्रविभज्य निर्ब्रूयात् दण्ड्यः पुरुषः ।[१२] ‘पर्व’ इत्यस्य संन्धि वा ‘योग’ इत्यर्थः । उभयो पदयो मिलित्वा यः समासो भवति सः एकपर्वात्मक समासः । यः तस्याधिकपदानि मिलित्वा कृत समास सानेकपर्वात्मक इत्युच्यते । तथैव प्रतिसंस्कृतासिद्धान्तकौमुद्यामप्युक्तं यत्-

---

४ “शब्दकल्पद्रुमः” पञ्चमो भागः चौखम्वा संस्कृत सिरीज, वाराणसी, सन् १९६१, पृष्ठ २७४ ।

५ हलायुधभट्टः हंलायुधकोशः (अभिधानरत्नमाला) सम्पादक जयशङ्कर जोशी, हिन्दी समिति सूचना विभाग उत्तर प्रदेश लखनउ द्वितीय संस्करण १९६७, पृ. ८८।६९४ ।

६ भीमाचार्यः जालकिङ्कर, वासुदेव शास्त्री, “न्यायकोशः” सन् १९२८, पृ. ९७० ।

७ द्वारिकाप्रसाद शर्मा, तारिणीश झा “संस्कृतशब्दार्थकौस्तुभ” रामनारायणलाल इलाहावाद सन् १९५७, पृ. ११७६ ।

८ पूर्ववत्, ‘शब्दशक्तिप्रकाशिका पृ. १८९ ।

९ जयदेवसूरिविरचिता “समासकलिका” श्री युतपंडित देवशर्मण लक्ष्मीवेंकटेश्वर मुद्रणालये संवत् १९६२ प्रयम सं., पृ.२ ।

१० सोमनाथ शर्मा ‘प्रतिसंस्कृतासिद्धान्तकौमुदी प्रकाशकः नेपाल एकेडेमी काष्ठमण्डपः प्रथम सं. २०१५ ।

११ रामकिशोर त्रिपाठी “वैयाकरणभूषणसारः” दीपिका सं. २००७, चौखम्वा सुरभारती प्रकाशन, वाराणसी, पृ. ३७ ।

१२ यास्क, “निरूक्तम्” प्रकाशकः ज्ञान मण्डली वाराणसी प्रथम संस्करण संवत् २०२२, पृ. १० ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समास एकीकरणं पदयोर्मिलितार्थयोः ।
क्वचिन्नानापदानां च, नित्योऽनित्यश्च स द्विधा ॥[१३]

एवं प्रकारेण जयादित्येनापि नित्यानित्यभेदेन समासस्य द्वैविध्यमुक्तं यत्-

'विभक्तिमात्रप्रक्षेपानिजान्तर्गतनामसु ।
स्वार्थस्य बोधो बोधाभ्यां नित्यानित्यौ समासकौ ॥[१४]

स्वान्तर्गतनां तु विभक्तिमात्रप्रक्षेपेण यल्लभ्यार्थस्याबोधः स नित्यः समासः । यथा कृष्णसर्पनिर्मक्षिकासुरादि कृष्णः सर्पो मक्षिकाया नि, न सुर इत्यादि स्वलभ्यस्य वैजात्यादेरपहात् । यल्लभ्यस्य च बोधः सोऽनियो यथा राजपुरुषपूर्वकायेत्यादि तल्लभ्यार्थस्य राज्ञः पुरुषः पूर्वं कायस्येत्यादिवाक्यादपि प्रतीतेः ।[१५]

प्राचीनवैयाकरणः कौण्डभट्टः स्वकीये ग्रन्थरन्ने वैयाकरणभूषणसारे उक्तवान् चतुर्धेति यथा-

समासस्तु चर्तुधेति प्रायोवादस्तथाऽपरः ।
योऽयं पूर्वपदार्थादिप्रधान्यविषय स च ॥[१६]

तथैव भट्टोजिदीक्षितेन 'सिद्धान्तकौमुद्यामपि'[१७] चतुर्धैवाङ्गीकृताः, तथैव प्रक्रियाकौमुद्यामपि । अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः, द्वन्द्वश्चेति । उक्तञ्च-

पूर्वमध्यान्त सर्वान्यपदप्रधान्यतः पुनः ।
प्राच्यैः पञ्चविधः प्रोक्तः समासो वा भटादिभिः ॥[१८]

क्वचित् समासःपूर्वपदार्थधर्मिकान्वयबोधजनकतया पूर्वपदप्रधान उच्यते, यथा प्राप्तजायार्धपिप्पलीपूर्वकायादिकस्तत् पुरुषः यथा वा उपकुम्भाद्यव्ययीभावः पुरुषसिंहादिकर्मधारयश्च । क्वचिन्मध्यपदार्थधर्मिकधीजनतयैव मध्यपदप्रधानो यथा पटानधिकरणप्रतियोगितामवच्छेदकेत्यादिकस्तत्पुरुषः पटस्य नाधिकरणमित्यादि विग्रहे मध्यपदार्थस्यैव विशेष्यत्वात् । बहुपदे बहुव्रीहिरेवेत्वस्तत्पुरुषादेवह्वनामगर्भत्वाभावे तात्पर्यमित्यये व्युत्पाद्यत्वात् । क्वचिदन्यपदार्थधर्मिकधीहेतुत्वादन्त्यपदप्रधानः । यथा राजपुरुषादिकस्तत्पुरुषो नीलोत्पलादिकः कर्मधारयो द्विगाभ्यांमादिरव्ययीभावश्च । क्वचित् सर्वपदार्थधर्मिकबुद्धिहेतुत्वात् सर्वपदप्रधानः, यथेतरेतरद्वन्द्वो द्वन्द्वमात्रं वा । क्वचित् स्वघटकान्यपदार्थधर्मिकज्ञानजनकत्वादन्यपदार्थप्रधानोयथा-बहुव्रीहिः खलेयवाद्यव्ययीभावञ्च । तदेवं पञ्च भेदानादायैव पञ्चविधत्वं प्राच्यैरूक्तमतो न विरोधः ।[१९] तथैव संस्कृतव्याकरणोदयेऽपि मतपञ्चाङ्गीकुर्वन् प्राहः -

केवलश्चाव्ययीभावस्तथा तत्पुरुषोऽपि च ।
बहुव्रीहिर्द्वन्द्व इति समासाः पञ्च सम्मताः ।[२०]

तथैव लघुसिद्धान्तकौमुद्यामपि ।[२१] समासकारिकायां समासस्य षट् भेदान् स्वीकुर्वन्प्राहः-

अथ सर्वसमासानां साम्प्रतं भेद उच्यते ।
समासः षड्द्विधो नाम्नां ज्ञेयस्तत्पुरुषस्ततः ।[२२]

अग्निपुराणे यथा-

षोढा समासं वक्ष्यामि अष्टाविंशतिधा पुनः ।
नित्यानित्यविभागेन लुगलोपेन च द्विधा ॥[२३]

वैयाकरणभूषणसारे-

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा ।

१३ पूर्ववत् "प्रतिसंस्कृतासिद्धान्तकौमुदी" ।
१४ पूर्ववत्, "शब्दशक्तिप्रकाशिकायाम्" पृ. १९६ ।
१५ पूर्ववत्, "वाचस्पत्यम्" ५२३२ ।
१६ कौण्डभट्ट "वैयाकरणभूषणसारः" चौखम्बा सुरभारती प्रकाशन, वाराणसी, श्लोक २९, पृ. २२७ ।
१७ भट्टोजिदीक्षित, वैयाकरणसिद्धान्तकौमुदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, द्वितीयो भाग पृ. १ ।
१८ पूर्ववत्, "शब्दशक्तिप्रकाशिकायाम्" पृ. १९४ ।
१९ पूर्ववत्, "वाचस्पत्यम्" पृ. ५२३५ ।
२० पूर्ववत्, संस्कृतव्याकरणोदय पृ. १४२ ।
२१ वरदराजाचार्यप्रणीत "लघुसिद्धान्तकौमुदी" गीताप्रेस गोरखपुर, एकतीसवां संस्करण सं. २०५९, पृ. १७२ ।
२२ पूर्ववत्, समासकलिका पृ. २ ।
२३ पूर्ववत्, वैयाकरणभूषणसारः, पृ. ३३२ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सुबन्तेनेति च ज्ञेयाः समासः षड्विधो बुधैः ।[२४]

शब्दशक्तिप्रकाशिकायामपि भेदं प्रतिपादयन्नाहः-

स चायं षड्विधः कर्मधारयादि विभेदतः ।

यश्चोपपदसंज्ञोऽन्यस्तेनासौ सप्तधा मतः ॥[२५]

स चायं निरूक्तः समासः कर्मधारयः, द्विगुः, तत्पुरुषः अव्ययीभावः, बहुव्रीहिः, द्वन्द्वः भेदात् षड्विधः । यश्च कुम्भकारादिरप्युपपदसंज्ञकः समासोऽस्ति, तेन समं समासः सप्तविधः ।

५. निष्कर्षः

तत्र समसनं समासः । समासस्य विभिन्नाधारे विभक्तुं शक्यते । केचित् अव्ययीभावसमासात्, केचित् तत्पुरूषसमासात्, केचित् केवलसमासात्, केचित् कर्मधारयसमासात् प्रारम्भं कुर्वन्ति, तेषां मध्ये प्रायशः अव्ययीभावतः एव । समासभेदसन्दर्भे प्रमुखा चत्वार भेदाः प्रायशः सर्वैः स्वीकृताः । तथापि तत्र भाष्ये 'सह सुपा' इति योगविभागं कृत्वा सुबन्तोत्तरपदतथा तिङन्तोतरपदः समासाङ्गीकृतः, तथैव कौण्डभट्टदीक्षितादिप्रभृतयाचार्यादयोऽपि सिद्धान्ततः षट् प्रकारकं समासमङ्गीकुर्व । अत्र प्रमुखतः अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः द्वन्द्वश्चेति । इत्थं वर्गीकरणं विवेचनञ्चकृत्वा कौण्डभट्टादिभिः स्वीकृत षट्प्रकारकं समासस्योति तथा वर्णनं स्वीक्रियते इति ।

सन्दर्भग्रन्थाः

कौण्डभट्टः, 'वैयाकरणभूषणसारः' चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी ।
जयदेवसूरि, 'समासकलिका' श्रीयुतपंडितदेवशर्मणः लक्ष्मीवेंकटेश्वर मुद्रणालये संवत् १९६२ ।
जयन्तमिश्रः, 'संस्कृतव्याकरणोदयः' चौखम्बा-विद्याभवन-वाराणसी, तृतीयसंस्करणम् १९८६ ।
तारानाथभट्टाचार्यः, 'वाचस्पत्यम्' षष्ठो भागः, चौखम्बा-संस्कृत-सिरीज, वाराणसी, वि.सं.२०१८ ।
द्वारिकाप्रसादशर्मा, तारिणीशझा 'संस्कृतशब्दार्थकौस्तुभ' प्रकाशकः रामनारायणलाल, इलाहाबाद सन् १९५७ ।
भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, द्वितीयो भागः ।
भीमाचार्यः जालकिङ्कर, वासुदेवशास्त्री, 'न्यायकोशः' सन् १९२८ ।
यास्कः, 'निरूक्तम्' प्रकाशकः ज्ञानमण्डली, वाराणसी प्रथमसंस्करणम् संवत् २०२२ ।
वरदराजाचार्यः, 'लघुसिद्धान्तकौमुदी' गीताप्रेस, गोरखपुर, एकत्रिंशत् संस्करणम्- २०५९ ।
वेदव्यासः, 'अग्निपुराणम्' चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी ।
रामकिशोरत्रिपाठी 'वैयाकरणभूषणसारः' चौखम्बा-सुरभारती-प्रकाशन, वाराणसी-२००७ ।
सोमनाथशर्मा 'प्रतिसंस्कृतासिद्धान्तकौमुदी' प्रकाशकः नेपाल-एकेडेमी, काष्ठमण्डपः प्रथमसंस्करणम् २०१५ ।
'शब्दकल्पद्रुमः' पञ्चमो भागः चौखम्बा-संस्कृत-सिरीज, वाराणसी, सन् १९६१ ।
हलायुधभट्टः हलायुधकोशः (अभिधानरत्नमाला) सम्पादकः जयशङ्करजोशी, हिन्दी-समिति-सूचना-विभागः उत्तरप्रदेशः लखनउ द्वितीय संस्करणम् १९६७ ।

२४ पूर्ववत्, "शब्दशक्तिप्रकाशिका", पृ. १९२ ।
२५ वेदव्यासः, "अग्निपुराणम्" चौखम्वा सुरभारती प्रकाशन, वाराणसी, अ. ३५५ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शास्त्रार्थे न्यायदर्शनसम्मतानि निग्रहस्थानानि

उपप्रा.भरतराजज्ञवाली
विश्वविद्यालयविद्यापीठम्

नीयते प्रमाणतोऽर्थतत्त्वसमीपे येन स न्यायः । "प्रत्यक्षागमाश्रितमनुमानं साऽन्वीक्षा= प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षा"१ अन्वीक्षया प्रवर्तते इत्यान्वीक्षिकी=न्यायविद्या=न्यायशास्त्रम्=न्यायदर्शनम् । न्यायदर्शनस्य प्रणेता महर्षिः गौतमः । अनेन न्यायदर्शनस्य मूलभूतग्रन्थरूपेण 'न्यायसूत्रम्' रचितम् । एतत्प्रणीते न्यायसूत्रे वात्स्यायनोद्योतकरभारद्वाजवाचस्पतिमिश्रोदयनाचार्यै भाष्यवार्तिकतात्पर्यपरिशुद्धयष्टीकाप्रटीका अन्यैराचार्यैर्बहवो ग्रन्थाः बह्व्यष्टीकाप्रटीकाश्च विहिताः विद्यन्ते । न्यायदर्शनस्य प्रमुखकार्यमस्ति प्रमाणप्रमेयादिषोडशपदार्थतत्त्वज्ञानेन निःश्रेयसप्रदानम् । उक्तञ्च–"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"२ इति । संसारेऽस्मिन् अनेके सिद्धान्ताः भिन्नभिन्नाः विचाराः वा दृश्यन्ते । सर्वेऽपि 'अस्माकं सिद्धान्तो विचारो वा लोकोपकारकः' इति मन्यन्ते । स्वकीयसिद्धान्तस्य महत्त्वस्थापनाय सर्वश्रेष्ठत्वस्थापनाय वा प्रमाण-तर्क-युक्तिभिः खण्डनमण्डने (शात्रार्थे) उद्यताः दृश्यन्ते सिद्धान्तकाराः सिद्धान्तानुयायिनश्च । स्वसिद्धान्तस्थापनाय अनवधारितार्थस्य निर्णयाय (तत्त्वज्ञानाय) च पक्षप्रतिपक्षयोर्मध्ये शास्त्रार्थो (खण्डनमण्डनं) भवति । उक्तञ्च– "विमृश्य पक्षप्रतिपक्ष्याभ्यामर्थावधारणं निर्णयः"३ इति । शास्त्रार्थवेलायां प्रतिपक्षसिद्धान्तप्रतिकूलप्रमाणतर्कयुक्तिभिः परमतखण्डनं स्वसिद्धान्तानुकूलप्रमाणतर्कयुक्तिभिः स्वमतमण्डनञ्च क्रियते । खण्डनमण्डनवेलायां जातं प्रमाणतर्कयुक्तिप्रयोगादिस्खलनमेव पराजयस्य कारणं भवति । एतादृशान्येव पराजयकारणानि न्यायदर्शने 'निग्रहस्थानानि' इत्युच्यन्ते । खण्डनमण्डनप्रसङ्गे तादृशानि निग्रहस्थानानि गम्भीररूपेण विचारणीयानि भवन्ति । शास्त्रार्थे (खण्डनमण्डने वादविवादे वा) विचारणीयानि न्यायदर्शनसम्मतानि निग्रहस्थानानि क्रमशोऽत्र विविच्यन्ते–

न्यायदर्शने ज्ञातव्यरूपेणोक्तेषु षोडशपदार्थेषु निग्रहस्थानमपि समायाति । यथा– "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां......." इति । निग्रहस्थानस्य प्रयोगो पक्षप्रतिपक्षाभ्यां कृते शास्त्रार्थे (खण्डनमण्डने वा वादविवादे वा विमर्शे वा) भवितुं शक्नोति । निग्रहस्थानं तु न तत्त्वज्ञानसाधकं वरं तत्त्वज्ञानभञ्जक एव, एतादृशः पदार्थः किमर्थं तत्त्वज्ञानाय गौतमेनोक्तः ? इति चेत् निग्रहस्थानस्य सम्यग्ज्ञाने सति एतस्य प्रयोगः स्वयं न क्रियतेऽन्यप्रयुक्तस्याप्येतस्य खण्डनं कर्तुं शक्यते येन स्वपराजयावसरो नायाति तत्त्वज्ञानावसरश्च आयातीति निग्रहस्थानस्य तत्त्वज्ञानमावश्यकं भवति । शास्त्रार्थश्च न्यायदर्शने कथाशब्देन व्यवहृतः प्राप्यते । एतच्च "कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः"४ इति सूत्रस्थेन 'कथाविच्छेदः' इत्यनेन शब्देन ज्ञायते ।

तिस्रः कथा भवन्ति वादो जल्पो वितण्डा चेति ।५ तत्र "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ।"६ "यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ।"७ "स प्रतिपक्षस्थापनाहीनो वितण्डा ।"८ अर्थात् वादकथायां जयेच्छा नास्ति, तत्त्वबुभुत्साऽस्ति । अत एव तत्त्वबुभुत्सोः कथा वादः । जल्पकथायां तत्त्वबुभुत्सा नास्ति, जयेच्छाऽस्ति । अत एव विजिगीषोः कथा जल्पः । वितण्डाकथाऽप्येतादृश्यस्ति, किन्त्वत्र प्रतिपक्षस्थापना नास्ति । अतो जल्प एव प्रतिपक्षस्थापनारहिता सती वितण्डा इति । अथ निग्रहस्थानस्य लक्षणं भेदाश्च प्रस्तूयन्ते–

(क) निग्रहस्थानस्य लक्षणम्

"विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ।"९ तत्र "विपरीता वा कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः"१०, अर्थात् विप्रतिपत्तिर्नाम

१. न्यायभाष्यम्, पृ.६ ।
२. न्यायसूत्रम्, १।१।१ ।
३. तत्रैव, १।१।४ ।
४. तत्रैव, ५।२।१ ।
५. न्यायभाष्यम्, पृ.६८ ।
६. न्यायसूत्रम्, १।२।१ ।
७. तत्रैव, १।२।२ ।
८. न्यायसूत्रम्, १।२।३ ।
९. तत्रैव, १।२।१९ ।
१०. न्यायभाष्यम्, पृ.८७ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विपरीतं ज्ञानम् । यथा अहेतौ हेतुत्वज्ञानमिति । जयन्तभट्टेनापि विप्रतिपत्तिरुदाहृता– "साधनाभासे साधनबुद्धिः दूषणाभासे दूषणबुद्धिः"[११] इति । अप्रतिपत्तिस्तु अज्ञानम् । "विप्रतिपद्यमानः पराजयं प्राप्नोति । अप्रतिपत्तिस्त्वारम्भविषयेऽप्यप्रारम्भः= परेण स्थापितं वा न प्रतिषेधयति, प्रतिषेधं वा नोद्धरति ।"[१२] वाद्युक्तस्य खण्डनयोग्यतायामपि यः खण्डनस्याप्रारम्भः स एवाप्रतिपत्तिः । यत् परेण साधितं परो न खण्डयति, तथा परेण स्वपक्षे प्रदर्शितं खण्डनं न प्रत्याचष्टे सोऽप्रारम्भः । अर्थात् विप्रतिप्रत्तिः= मिथ्याज्ञानम्, अप्रतिपत्तिः= अज्ञानम् । शास्त्रार्थे एताभ्यां द्वाभ्यामेव पराजयो भवति, एतयोर्द्वयोः पराजयकारणत्वमुचितम्, एताभ्यां द्वाभ्यां भिन्नं पराजयकारणं नास्ति । एतयोर्द्वयोर्वास्तविकं दोषत्वमेव विद्यते । अतो 'दूषणा न्यूनताद्युक्तिः' इति निग्रहस्थानलक्षणं सम्पन्नम् ।

(ख) निग्रहस्थानभेदाः

विप्रतिपत्तिः=विपरीतज्ञानम्(मिथ्याज्ञानम्),अप्रतिपत्तिः=अज्ञानञ्चनिग्रहस्थानमित्युक्तम्।तयोःविप्रतिपत्त्यप्रतिपत्त्योर्विकल्पात्= बाहुल्यान्निग्रहस्थानस्य बहवः प्रकाराः भवन्ति । उक्तञ्च न्यायसूत्रे– "तद्विकल्पाज्जातिनिग्रहस्थानवहुत्वम्"[१३] इति । न्यायसारकारेण निग्रहस्थानानि असङ्ख्यातानि भवन्तीत्युक्तम्– "तान्यपि विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पानन्त्यादसङ्ख्यातानीत्यतः सङ्क्षेपत उच्यन्ते"[१४] इति । न्यायदर्शनेन द्वाविंशतिसङ्ख्याकानि निग्रहस्थानान्युक्तानि विद्यन्ते । यथा– "प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि"[१५] इति । एतेषां निग्रहस्थानानां सोदाहरणं परिचयोऽथ दीयते–

१. प्रतिज्ञाहानिः

"प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ।"[१६] अर्थात् स्वदृष्टान्ते प्रतिदृष्टान्तस्वीकारः प्रतिज्ञाहानिः । "साध्ये प्रतिदृष्टान्तधर्माभ्यनुज्ञा प्रतिज्ञाहानिः"[१७] इति न्यायसारकारः । "प्रतिज्ञासिद्धये वादिना साधनेऽभिहिते यत्र प्रतिवादिना च दूषणे उद्भाविते तृतीये वचसि तु वर्तमानो वादी यदि प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽनुजानाति तदस्य प्रतिज्ञा हीयते इति प्रतिज्ञाहानिर्निग्रहस्थानं भवति ।"[१८] यथा 'शब्दोऽनित्यः ऐन्द्रियकत्वात् घटवत्' इत्यत्रापरेण 'दृष्टमैन्द्रियकत्वं सामान्ये नित्ये कस्मान्न तथा शब्दः ?' इत्युक्तौ 'तर्हि घटो नित्योऽस्तु' इति ।

२. प्रतिज्ञान्तरम्

"प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम्"[१९] । अर्थात् प्रतिज्ञातार्थप्रतिषेधे परेण कृते तत्रैव धर्मिणि धर्मान्तरं साधनीयमभिदधतो वादिनः प्रतिज्ञान्तरं नाम निग्रहस्थानं भवति ।[२०] यथा 'अनित्यः शब्दः, ऐन्द्रियकत्वात्' इत्यत्रापरेण 'सामान्यमैन्द्रियकं नित्यम्' इत्युक्तौ 'सामान्यं सर्वगतम्, घटस्तु असर्वगत, एवं शब्दोऽप्यसर्वगतो घटवदेवानित्यः' इति कथनम् । "तत्र 'अनित्यः शब्दः' इति पूर्वा प्रतिज्ञा, 'असर्वगतः' इति द्वितीया प्रतिज्ञा प्रतिज्ञान्तरम् ।[२१]

३. प्रतिज्ञाविरोधः

"प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ।"[२२] यत्र प्रतिज्ञा हेतुना विरुध्यते हेतुर्वा प्रतिज्ञया स प्रतिज्ञाविरोधो नाम निग्रहस्थानं भवति ।[२३] यथा 'गुणव्यतिरिक्तं द्रव्यम् रूपादितोऽर्थान्तरस्यानुपलब्धेः' इति । अत्र हि प्रतिज्ञाहेत्वोर्विरोधोऽस्ति, कथम् ? यदि गुणव्यतिरिक्तं द्रव्यम् तदा रूपादितोऽर्थान्तरेणोपलब्धेन भाव्यम्, यदि रूपादितोऽर्थान्तरं नास्ति तदा कथं गुणव्यतिरिक्तं द्रव्यम् ? इति ।

---

११. न्यायमञ्जरी, निग्रहस्थानप्रकरणे, पृ.१९० ।
१२. न्यायभाष्यम्, पृ.८७ ।
१३. न्यायसूत्रम्, १।२।२० ।
१४. न्यायसारः, निग्रहस्थाननिरूपणे, (न्यायभूषणम्, पृ.३५७) ।
१५. न्यायसूत्रम्, ५।२।१ ।
१६. तत्रैव, ५।२।२ ।
१७. न्यायसारः, निग्रहस्थाननिरूपणे, (न्यायभूषणम्, पृ.३५७) ।
१८. न्यायमञ्जरी, निग्रहस्थानप्रकरणे, पृ.१९२ ।
१९. न्यायसूत्रम्, ५।२।३ ।
२०. न्यायमञ्जरी, निग्रहस्थानप्रकरणे, पृ.१९३ ।
२१. न्यायभाष्यम्, पृ.४४९ ।
२२.न्यायसूत्रम्, ५।२।४ ।
२३ न्यायमञ्जरी, निग्रहस्थानप्रकरणे, पृ.१९४ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४. प्रतिज्ञासन्न्यासः

"पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः ।"[२४] अर्थात् पक्षसाधने परेण दूषिते तदुद्धरणाशक्त्या प्रतिज्ञामेव निन्हुवानस्य प्रतिज्ञासन्न्यासो नाम निग्रहस्थानं भवति ।[२५] यथा 'शब्दोऽनित्य ऐन्द्रियकत्वात्' इत्युक्ते परेण 'सामान्यमैन्द्रियकं न चानित्यम्' इत्युक्तौ यदि "नाहमुक्तवान् 'अनित्यः शब्दः' इति" इति ब्रूयात्, सोऽयं प्रतिज्ञातार्थनिह्नवः (प्रतिज्ञातार्थपरित्यागः) प्रतिज्ञासन्न्यास इति ।

५. हेत्वन्तरम्

"अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ।"[२६] अर्थात् अविशेषाभिहिते हेतौ प्रतिषिद्धे तद्विशेषणमभिदधतो हेत्वन्तरं नाम निग्रहस्थानं भवति ।[२७] यथा 'इदं जलं स्पर्शात्' इत्यत्र स्पर्शस्तु पृथिव्यादावप्यस्तीति प्रतिषिद्धे 'शीतम्' इति योजयित्वा 'शीतस्पर्शात् इति वक्तव्यम्' इति ।

६. अर्थान्तरम्

"प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम् ।"[२८] अर्थात् प्रकृतसाध्ये अप्रतिसम्बद्धार्थं (तदनौपयिकमर्थान्तरमभिदधत्) वाक्यम् अर्थान्तरं नाम निग्रहस्थानं भवति । यथा 'नित्यः शब्दः' इत्यत्र 'अस्पर्शत्वात्' इति हेतुः । हेतुश्च हिनोतेर्धातोस्तुन्प्रत्यये कृते कृदन्तं पदमित्यादि प्रसक्तानुप्रसक्त्या प्रकृतार्थानुपयोगि शास्त्रान्तरमुपदिशतोऽर्थान्तरं नाम निग्रहस्थानमिति ।[२९]

७. निरर्थकम्

"वर्णक्रमनिर्देशवत् निरर्थकम् ।"[३०] अर्थाद् अभिधेयरहितवर्णानुपूर्वीप्रयोगमात्रं निरर्थकं नाम निग्रहस्थानं भवति ।[३१] ' यत्र प्राश्निकप्रतिवादिभ्यां पदार्थोऽपि न विज्ञायते तन्निरर्थकम्'[३२] इति भासर्वज्ञः कथयति । यथा 'नित्यः शब्दः कचटतपानां जबगडदशत्वात् झभुघढधष्वत्' इति । अत्र प्रकृतोपयोगिनोऽर्थस्याप्रतीतेः इदं निरर्थकमुच्यते ।

८. अविज्ञातार्थम्

"परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ।"[३३] अर्थाद् यद् वाक्यं परिषदा प्रतिवादिना च त्रिरभिहितमपि न विज्ञायते श्लिष्टशब्दमप्रतीतप्रयोगमतिद्रुतोच्चारितमित्येवमादिना कारणेन तदविज्ञातार्थम्[३४] नाम निग्रहस्थानं भवति । यथा– अर्थान्तरभूतसर्वार्थग्राहकेन्द्रियज्ञानाधारतथागतविशुद्धज्ञानग्राह्यविषयग्रहणाधारक्षपणक- तीर्थकरादिसत्त्वसमनुगतपटसत्त्वघटो न घटः शशविषाणानुत्पादकत्वात् पटवदिति ।[३५]

९. अपार्थकम्

"पौर्वापर्यायोगादप्रतिसम्बदार्थमपार्थकम् ।"[३६] अर्थात् यत्र अनेकस्य पदस्य वाक्यस्य वा पौर्वापर्येणान्वययोगो नास्ति, तत्समुदायार्थस्यापायादपार्थकं नाम निग्रहस्थानं भवति । यथा– 'दश दाडिमानि, षडपूपाः, कुण्डमजाजिनम्, पललपिण्डः, तस्याः पिता अप्रतिशीनः' इति ।[३७]

१०. अप्राप्तकालम्

"अवयवविपर्यासवचनमप्राप्तकालम् ।"[३८] अर्थात् प्रतिज्ञाहेतूदाहरणोपनयनिगमनवचनं क्रममुल्लङ्घ्यावयवविपर्यासेन

---

२४ न्यायसूत्रम्, ५।२।५ ।
२५ न्यायमञ्जरी, निग्रहस्थानप्रकरणे, पृ.१९५ ।
२६ न्यायसूत्रम्, ५।२।६ ।
२७ न्यायमञ्जरी, निग्रहस्थानप्रकरणे, पृ.१९६ ।
२८ न्यायसूत्रम्, ५।२।७ ।
२९ न्यायभूषणम्, पृ.३६४ ।
३० न्यायसूत्रम्, ५।२।८ ।
३१ न्यायमञ्जरी, निग्रहस्थानप्रकरणे, पृ.१९७ ।
३२.न्यायसारः, निग्रहस्थाननिरूपणे (न्यायभूषणम्, पृ.३६४) ।
३३ न्यायसूत्रम्, ५।२।९ ।
३४ न्यायभाष्यम्, पृ.४५३ ।
३५. न्यायभूषणम्, पृ.३६५ ।
३६. न्यायसूत्रम्, ५।२।१० ।
३७. न्यायभाष्यम्, पृ.४५४ ।
३८. न्यायसूत्रम्, ५।२।११ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रयुज्यमानमप्राप्तकालं नाम निग्रहस्थानं भवति ।[३९] यथा– 'यत्र यत्र धूमस्तत्र तत्राग्निर्यथा महानसम् (उदाहरणम्), तस्मात् पर्वतो वह्निमान् (निगमनम्), वह्निव्याप्यधूमवान् पर्वतः (उपनयः), धूमात् (हेतुः), पर्वतो वह्निमान् (प्रतिज्ञा) इति ।

११. न्यूनम्

"हीनमन्यतमेनाप्यवयवेन न्यूनम् ।"[४०] अर्थात् प्रतिज्ञादीनामवयवानामन्यतमेनाप्यवयवेन हीनं भवति चेत् न्यूनं नाम निग्रहस्थानं भवति । यथा– पर्वतो वह्निमान् (प्रतिज्ञा), यत्र यत्र धूमस्तत्र तत्राग्निर्यथा महानसम् (उदाहरणम्), वह्निव्याप्यधूमवानयं पर्वतः (उपनयः), तस्मात् पर्वतो वह्निमान् (निगमनम्) इति । अत्र हेतुर्नास्ति ।

१२. अधिकम्

"हेतूदाहरणाधिकमधिकम् ।"[४१] अर्थात् एकेनैव हेतुना दृष्टान्तेन वा प्रतिपादितेऽर्थे हेत्वन्तरं दृष्टान्तान्तरं वा प्रयुञ्जानस्याधिकं नाम निग्रहस्थानं भवति ।[४२] यथा– पर्वतो वह्निमान् (प्रतिज्ञा), धूमात् (हेतुः), आर्द्रेन्धनसहितवह्नेः (हेतुः), यथा महानसम्, (उदाहरणम्), यथा पाकशाला (उदाहरणम्), वह्निव्याप्यधूमवानयं पर्वतः (उपनयः), तस्मात् पर्वतो वह्निमान् (निगमनम्) इति । अत्र हेतूदाहरणेऽधिके विद्येते ।

१३. पुनरुक्तम्

पुनरुक्तं द्विविधं भवति– शब्दपुनरुक्तमर्थपुनरुक्तञ्च । यथा 'घटः घटः' इति शब्दपुनरुक्तम्, 'घटः कलशः' इत्यर्थपुनरुक्तम् । अनुवादस्तु पुनरुक्तोऽपि प्रयोजनाय भवति, निष्प्रयोजनकपुनरुक्तमेव पुनरुक्तनिग्रहस्थानं भवति, अर्थादापन्नस्यापि पुनर्वचनं पुनरुक्तदोषो भवति । यथोक्तम्– "शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् । अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ।"[४३] इति । न्यायसारकारः पुनरुक्तनिग्रहस्थानमित्थमुदाहरति– "नित्यश्शब्दो नित्यश्शब्द इति शब्दपुनरुक्तम् । नित्यो ध्वनिरविनाशी शब्द इत्यर्थपुनरुक्तम् । साधर्म्योदाहरणेऽभिहिते वैधर्म्योदाहरणाभिधानम् (अर्थादापन्नस्य पुनरुक्तम्) इति ।"[४४]

१४. अननुभाषणम्

"विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् ।"[४५] अर्थात् परिषदा (मध्यस्थैः) विज्ञातस्य प्रतिवादिना त्रिरभिहितस्यापि वाक्यस्यार्थतः पाठतो वा यदप्रत्युच्चारणं (वादिना) तदनुभाषणं नाम निग्रहस्थानं भवति । 'प्रतिवादिनोक्तमनूद्य तत्खण्डनं कर्तव्यम्' इति शास्त्रार्थमर्यादाया विद्यमानत्वात् ।

१५. अज्ञानम्

यच्च वाक्यं त्रिरभिहितमपि परिषदावगतार्थं प्रतिवादी प्रत्युच्चारयन्नपि नार्थतः सम्यगधिगच्छति, तदज्ञानं नाम प्रतिवादिनो निग्रहस्थानम्[४६] । यथोक्तं न्यायसूत्रे– "अविज्ञातं चाज्ञानम्"[४७] इति ।

१६. अप्रतिभा

परपक्षखण्डनाय उत्तरं न स्फुरति चेत् अप्रतिभानामकं निग्रहस्थानं भवति । यथोक्तम्– "उत्तरस्याप्रतिपत्तिरप्रतिभा ।"[४८] "कथामभ्युपगम्य तूष्णींभावोऽप्रतिभा ।"[४९] इति ।

१७. विक्षेपः

कथायां प्रवृत्तायां= शास्त्रार्थे प्रवृत्तेऽत्यावश्यककार्यव्याजेन कथाविच्छेदो विक्षेपः । अर्थात् स्वपराजयभिया कार्यव्यासङ्गव्याजेन शास्त्रार्थतः पलायनं विक्षेपः, न तु वास्तविकेनात्यावश्यककार्येण कथाविच्छेदो विक्षेपः । यथोक्तम्– "कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः"[५०] इति ।

१८. मतानुज्ञा

---

३९. न्यायमञ्जरी, निग्रहस्थानप्रकरणे, पृ.१९९ ।
४०. न्यायसूत्रम्, ५।२।१२ ।
४१. तत्रैव, ५।२।१३ ।
४२. न्यायमञ्जरी, निग्रहस्थानप्रकरणे, पृ.२०० ।
४३. न्यायसूत्रम्, ५।२।१४-१५ ।
४४. न्यायसारः, निग्रहस्थाननिरूपणे (न्यायभूषणम्, पृ.३६९) ।
४५. न्यायसूत्रम्, ५।२।१६ ।
४६. न्यायसारः, निग्रहस्थाननिरूपणे (न्यायभूषणम्, पृ.३७१) ।
४७. न्यायसूत्रम्, ५।२।१७ ।
४८. तत्रैव, ५।२।१८ ।
४९. न्यायसारः, निग्रहस्थाननिरूपणे (न्यायभूषणम्, पृ.३७२) ।
५०. न्यायसूत्रम्, ५।२।१९ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

"स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा ।"[५१] अर्थात् स्वपक्षे दोषं मत्वा परपक्षे दोषप्रदर्शनम् मतानुज्ञा । "यः परेण चोदितं दोषं स्वपक्षेऽभ्युपगम्य= अनुद्धृत्य वदति- 'भवत्पक्षेऽपि समानो दोषः' इति, स स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषं प्रसञ्जयन् परमतमनुजानातीति मतानुज्ञा नाम निग्रहस्थानमापद्यते ।"[५२] यथा– 'शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वात् घटवत्' इत्युक्तौ परेण 'प्रयत्नकार्यमुत्पाद्यमाविर्भाव्यं च दृश्यते' इत्यनैकान्तिकत्वदोषे दत्ते 'प्रयत्नकार्यानेकत्वात् कार्यसमः' इति 'तव प्रतिषेधेऽपि समानो दोषः' इति कथनम् । 'समानो दोषः' इति कथनेन स्वपक्षेऽपि दोषः स्वीकृत इति सिद्ध्यति ।

१९. पर्यनुयोज्योपेक्षणम्

निग्रहस्थानं प्राप्तोऽपि निग्रहीतुं न शक्यते चेत् पर्यनुयोज्योपेक्षणनामकं निग्रहस्थानं भवति । अर्थात् दोषवतो दोषाप्रदर्शनं पर्यनुयोज्योपेक्षणम् । यथोक्तं न्यायसूत्रकारेण– "निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम्"[५३] इति । नेदं दोषवतैवोद्भाव्यम्, 'मम दोषस्त्वया न दृष्टः' इत्युक्तौ स्वेनैव स्वयमेव निगृहीतत्वापत्तेः, किन्तु अनुयुक्तया परिषदोद्भाव्यम् । परिषदा शास्त्रार्थकर्तारौ द्वौ अपि प्रति वक्तव्यम् 'त्वं दोषवत्वान्निगृहीतः, अयं च दोषाप्रदर्शनान्निगृहीतः, युवां द्वावपि निगृहीतौ' इति ।

२०. निरनुयोज्यानुयोगः

दोषशून्ये दोषवत्त्वारोपः निरनुयोज्यानुयोगः । "अदोषे दोषोद्भावनमित्यर्थः ।"[५४] यथोक्तं गौतमेन– "अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः"[५५] इति । अस्य निग्रहस्थानस्योदाहरणं यथा– 'बहिरिन्द्रियग्राह्यजातीयविशेषगुणवत्त्वं भूतत्वम्' इत्यत्र 'त्वया कृते भूतलक्षणे विशेषपदं निरर्थकं विद्यते' इति । तत्र विशेषपदं निरर्थकं नास्ति, तदभावे बहिरिन्द्रियग्राह्यजातीयसंयोगादिगुणानामात्मादौ विद्यमानत्वात्तत्रातिव्याप्तिप्रसङ्गात् इति ।

२१. अपसिद्धान्तः

"सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ।"[५६] अर्थात् 'एतत्सिद्धान्तानुसारं वदिष्यामि' इति कमपि सिद्धान्तं स्वीकृत्य पश्चात् तत्सिद्धान्तविपरीतवर्णनमपसिद्धान्तनामकं निग्रहस्थानम् । यथा– 'न्यायसिद्धान्तानुसारं वक्ष्यामि' इति प्रतिज्ञायापि पश्चात् तत्सिद्धान्तविपरीतं शब्दस्य नित्यत्वकथनमिति ।

२२. हेत्वाभासाः

हेतुलक्षणाभावादहेतवो हेतुसामान्याद् हेतुवदाभासमानाः[५७] हेत्वाभासाः । न वास्तविकहेतवः किन्तु दुष्टहेतवः इत्यर्थः । हेतोः स्थाने हेत्वाभासस्य प्रयोगो भवति चेत् हेत्वाभासनामकं निग्रहस्थानं भवति । "सव्यभिचार-विरुद्ध-प्रकरणसम-साध्यसम-कालातीताः हेत्वाभासाः"[५८] इति पञ्च हेत्वाभासाः विद्यन्ते । तत्र अनैकान्तिकः सव्यभिचारः[५९], यथा 'नित्यः शब्दोऽस्पर्शत्वात्' इति । सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः[६०], साध्याभावव्याप्यो हेतुर्विरुद्ध इति वा, यथा 'पर्वतो वह्निमान् जलात्' इति । यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः[६१] (सत्प्रतिपक्षितः), यथा 'शब्दोऽनित्यो नित्यधर्मानुपलब्धेः, शब्दो नित्योऽनित्यधर्मानुपलब्धेः इति । साध्याविशिष्टः साध्यत्वात् साध्यसमः[६२] (असिद्धः), यथा 'छाया द्रव्यं गतिमत्त्वात्' इति । कालात्ययापदिष्टः कालातीतः[६३] (बाधितः), यथा 'शब्दो नित्यः संयोगव्यङ्ग्यत्वात्' इति ।

(ग) निष्कर्षः

अस्मिन् विश्वे विद्यमानेषु भिन्नभिन्नसिद्धान्तेषु स्वस्वसिद्धान्तस्य महत्त्व-श्रेष्ठतमत्व-लोकोपकारकत्वस्थापनाय

---

५१. तत्रैव, ५।२।२० ।
५२. न्यायभाष्यम्, पृ.४५७ ।
५३. न्यायसूत्रम्, ५।२।२१ ।
५४. न्यायभूषणम्, पृ.३७४ ।
५५. न्यायसूत्रम्, ५।२।२२ ।
५६ तत्रैव, ५।२।२३ ।
५७ न्यायभाष्यम्, पृ.७२ ।
५८ न्यायसूत्रम्, १।२।४ ।
५९ तत्रैव, १।२।५ ।
६० तत्रैव, १।२।६ ।
६१ तत्रैव, १।२।७ ।
६२ तत्रैव, १।२।८ ।
६३ तत्रैव, १।२।९ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

खण्डनमण्डने वा वादविवादे वा 'बहस'इत्याख्ये वा 'छलफल'इत्याख्ये वा शास्त्रार्थे वा जनाः प्रवृत्ताः दृश्यन्ते । तत्र प्रामाणिक-तार्किक-प्रबलयुक्तियुक्तवचसां प्रभावकत्वं विजयकारणत्वञ्च मन्यते दृश्यते च । शास्त्रार्थे (खण्डनमण्डनप्रसङ्गे) सम्भावितानि अनेकानि पराजयकारणानि विद्यन्ते । तान्येव कारणानि न्यायदर्शनभाषायां 'निग्रहस्थानानि' इति नाम्ना व्यवह्रियन्ते । शास्त्रार्थे सम्भावितानि न्यायदर्शनसम्मतानि निग्रहस्थानानि द्वाविंशतिः सन्ति । यथा– प्रतिज्ञाहानिः, प्रतिज्ञान्तरम्, प्रतिज्ञाविरोधः, प्रतिज्ञासन्न्यासः, हेत्वन्तरम्, अर्थान्तरम्, निरर्थकम्, अविज्ञातार्थम्, अपार्थकम्, अप्राप्तकालम्, न्यूनम्, अधिकम्, पुनरुक्तम्, अननुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपः, मतानुज्ञा, पर्यनुयोज्योपेक्षणम्, निरनुयोज्यानुयोगः, अपसिद्धान्तः हेत्वाभासाश्चेति । एतेषां निग्रहस्थानानां यथार्थज्ञाने सति शास्त्रार्थे वा वादविवादे वा खण्डनमण्डने वा न्यायालयीयमुद्धायां वा निग्रहस्थानानां प्रयोगः स्वयं न क्रियते, प्रतिपक्षेण प्रयुक्तानामपि निग्रस्थानानां खण्डनं कर्तुं शक्यते, येन स्वपराजयावसरो नायाति तत्त्वज्ञानावसरश्च समायातीति निग्रहस्थानानां सम्यग्ज्ञानमावश्यकं विद्यते । अतः निग्रहस्थानानां यथार्थज्ञानं कर्तव्यमित्यलम् ।

सन्दर्भग्रन्थाः

- जयन्तभट्टः, न्यायमञ्जरी (प्रमेयप्रकरणादिनिग्रहस्थानप्रकरणान्तः, द्वितीयो भागः), विषमस्थलविवरेण विभूषिता,
- चौखम्भा-संस्कृत-सिरिज-आफिसः, वाराणसी, द्वि.सं., वि.सं.२०२६ ।
- भासर्वज्ञः, न्यायभूषणम् (न्यायसारस्य स्वोपज्ञव्याख्यानम्), षड्दर्शन-प्रकाशन-प्रतिष्ठानम्, वाराणसी, वि.सं.२०२४ ।
- वात्स्यायनः, न्यायभाष्यम् (प्रसन्नपदव्याख्यया सम्बलितम्), बौद्ध-भारती, वाराणसी, सन् १९९८ ।
- भारद्वाजः, उद्योतकारः, न्यायवार्तिकम्, चौखम्बा-संस्कृत-भवनम्, वाराणसी, पु.मु.सं., वि.सं.२०६४ ।
- आचार्यः, अनिरुद्धः, न्यायभाष्यवार्तिकटीका-विवरणपञ्जिका, मिथिला-इन्स्टिच्युट-अफ-पोष्ट-ग्राजुएट्, विहार, वि.सं. २०२५ ।
- वेङ्कटनाथः, न्यायपरिशुद्धिः (हिन्द्यनुवाद-प्रसादटीकासमलङ्कृता), अनु.शिवप्रसादद्विवेदी, चौखम्वा-विद्याभवनम्, वाराणसी, पु.मु.सं., ई.२००३ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्णानामुच्चारणस्थानविमर्शः

उपप्रा.भवानीशङ्करभट्टराई
पिण्डेश्वरवद्यापीठम्

१. विषयप्रवेशः

देवनागरीलिप्यामनुबन्धितानां स्वरवर्णानां व्यञ्जनानाञ्च कानि स्थानानि ? तानि केभ्यो मुखावयवेभ्य उच्चार्यन्त इति विषये वैदिकव्याकरणप्रातिशाख्यतोऽद्यावधि चिन्तनं तदुपर्यध्ययनं पूर्ववर्त्तिभिः कृते निर्धारणे पुनरवलोकनञ्च समये समये सञ्जातं दृश्यते । विभिन्नैः प्रातिशाख्यकारैः, इन्द्रचान्द्रादिवैयाकरणैः, पाणिनीयशिक्षाकारेण, आधुनिकैर्भाषावैज्ञानिकैश्च कृतेषु स्थानविभागेषु बहवो मतभेदाः प्राप्यन्ते । प्रस्तुते लघुलेखे तेषां सर्वेषामध्ययनमसम्भवम् । अतः पाणिनीयपरम्परायाः स्थानविभागस्याधुनिकेन विभागेन सह तुलनां कृत्वा द्वयोः किं वैभिन्यम् ? किञ्च वस्तुतथ्यमित्यत्र निर्णीयते ।

२. स्थानपरिभाषा

तिष्ठति यत्र वर्णोत्पादको वायुस्तदिति अथवा स्थीयतेऽत्र इति व्युत्पत्तिकाद् गत्यवरोधार्थकात् ष्ठाधातोः करणाधिकरणयोश्चेत्यधिकरणे ल्युटि सति स्थानपदं सिद्ध्यति । स्थानपदस्य कोऽर्थ इति जिज्ञासायामथर्वप्रातिशाख्यकारः प्राह-यदुपक्रम्यते तत् स्थानम् । येनोपक्रम्यते तत् करणम् (उपक्रमो नाम प्रारम्भः) । स्वराणां यत्रोपसंहारस्तत् स्थानम् । (उपसंहारो नाम संश्लेषविशेषः) यदुपसंहरति तत् करणम् । यत्र स्पर्शनं तत् स्थानम् । येन स्पर्शयति तत् करणम् । एतैर्लक्षणैरूपक्रम उपसंहारे स्पर्शने चाधारः स्थानमिति निश्चीयते । अर्थाद् वर्णोच्चारणाय फुस्फुसातो निसृतो वायुः प्रथमतो यत्र तिष्ठति स्पृशति वा तत् स्थानम्, तथा हि कवर्णोच्चारणाय निसृतो वायुः प्रथमतः कण्ठदेशे तिष्ठति/स्पृशतीति ककारस्य कण्ठं/कण्ठ्यं स्थानमिति ।

वर्णोच्चारणसमये ताल्वादिष्वभिघातेन वायोर्गतिरवरुद्धचते तादृशो गत्यवरोधो हि स्थानम् । गत्यवरोधस्तु वायोरेव न तु वर्णानामतस्ताल्वादीनि वर्णोत्पादकवायोरेव स्थानानि । तेषु वर्णस्थानत्वव्यवहारस्तु औपचारिक एव । स्वरवर्णानामुच्चारणकाले कण्ठादिषु देशेषु वायोः सन्निकृष्टतामात्रं भवति चेद् व्यञ्जनानान्तु स्पष्टः स्पर्शो जायते अतो व्यञ्जनानामेवाधुनिकैर्भाषावैज्ञानिकैः कण्ठादीनि स्थानानि निर्धारितानि ।[1]

महामुनिना पाणिनिना स्थानेऽन्तरतमः प्रभृतिषु सूत्रेषु स्थानचर्चां कृत्वापि स्थानं न परिभाषितमतो पूर्ववर्त्तिनामुत्तरवर्त्तिनां वा परिभाषामाश्रित्य स्थानं लक्षणीयं भवति । नैपालका भाषाविदोऽपि स्थानं पूर्ववदेव परिभाषन्ते । भाषाविद् मोहनराजशर्मा स्थानं परिभाषयन् प्राह- मुखतः कण्ठतश्च यो ध्वनिरुत्पद्यते स वर्णोच्चारणविन्दुरवय एव स्थानमिति ।[2] अर्थात् वर्णोच्चारणाधारविन्दु : एव स्थानमिति तदर्थः । वर्णोच्चारणे जिह्वा ओष्ठश्च यत्र स्पृशति तत् स्थानमिति परिभाषापि प्रचलिता दृश्यते । यथा जिह्वया कण्ठदेशे स्पृष्टे कण्ठं/कण्ठ्यं, मूर्धदेशे स्पृष्टे मूर्धा/वर्त्स्यं, दन्तप्रदेशे स्पृष्टे दन्तः/दन्त्यम्, एकेनोष्ठेनापरत्र स्पृष्टे च ओष्ठौ/ओष्ठ्यं स्थानमिति भाषाविदामाशयः ।

उपरि दर्शिताभिः स्थानपरिभाषाभिः कण्ठ-तालु-मूर्धा-दन्तोष्ठादीनां स्थानानां विभाजनाधारः फुस्फुसात उपरि उद्भूतस्य श्वासस्य प्रथमगतिनिवृत्तिरेवाथवा जिह्वायाः सञ्चलनस्थानमेवेति वक्तुं शक्यम् ।

३. ध्वनेरुच्चारणस्रोतः

अकारहकारादीनां वर्णानामुच्चारणं कथं भवति ? फुस्फुसा (नेपालीभाषायां फोक्सो) अन्तर्गतो वायुरकारादिषु वर्णेषु कथ परिवर्तते ? इत्यादिषु प्रश्नेष्वाधुनिकभाषावैज्ञानिक-पाणिन्योर्विचारावंशतो भिन्नौ प्रतीयेते । तत्राधुनिकाः प्राहुः- "ध्वनिर्वस्तुतो वायोर्घर्षणमेवाथवा वायोर्विशेषकम्पनमेव । वर्णाद्युच्चारणक्रमे मस्तिष्कं प्रथमतोऽभिवदनीयानि वर्ण-पद-वाक्यादीनि निर्धारयति । ततो मस्तिष्कमिदं स्नायुं फुस्फुसाञ्च ध्वन्युच्चारणप्रक्रियासञ्चालनाय निर्दिशति । उपर्युक्तनामङ्गानां प्रेरणया फुस्फुसातो निसृतो वायुः प्रथमं स्वरयन्त्रं ततः कण्ठ-तालु-मूर्धा-दन्तादीनभिहन्ति, एतन्मध्ये श्वासप्रवाह-श्वासदिशा-श्वासमात्रा-कण्ठद्वारादीनामपि समुचितं सन्तुलितञ्च योगदानमपेक्षितं भवतीति ।"[3] परं पाणिनीयशिक्षायां तथा तत्परम्परायान्तु स्थानप्रयत्ननिर्धारण

१ मधुकरफटकः (२०२९)पाणिनीयशिक्षायाः शिक्षान्तरैः सह समीक्षा, वाराणसी : लेखकः, पृ.१३१ ।

२ मोहनराजशर्मा (२०६२) शब्दरचना र वर्णविन्यास काठमाडौं : नवीन प्रकाशन, पृ.९ ।

३ टंकप्रसाद न्यौपाने (२०६८) सामान्य र प्रायोगिक भाषाविज्ञान, काठमाडौं : सन लाइट पब्लिकेसन्स, पृ. ४१-४२ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आधुनिकविभागापेक्षया किञ्चिद् भिन्नतरं मतं प्राप्यते। संस्कृतेऽपि वाक्यपदीये वायोर्विकारो वर्ण इत्यस्य विकल्परूपेणाणुमनोविकारौ उल्लिखितौ प्राप्येते। तत्र वाचः तिस्रोऽवस्थाः- पश्यन्ती, मध्यमा, वैखरीति समुल्लिखिता व्याख्याताश्च सन्ति। एताभ्यः प्रागवस्था परा तु योगिनां समाधावेव गम्या, अतस्तस्याध्ययनं भाषाविज्ञानस्य कृते दुस्साध्यमिति वाक्यपदीयकाराभिमतम्। अवशिष्टासु तिसृष्ववस्थासु पश्यन्ती वाक् जीवात्मरूपेणान्तश्चेतसि तिष्ठति। सैव वाग् ध्वनिरूपेण परिवर्तितुकामया प्राणवायौ विवर्तते। ततो जठराग्निना प्रेरितो वायुर्हृदयप्रदेशात् कण्ठप्रदेशान्तमागच्छन् मध्यमारूपतां प्राप्नोति। तत्रैव किं वक्तव्यमिति निर्णीय तदर्थं वर्णकल्पनमपि भवति। ततो मुखप्रदेशाद् निस्सरन् कण्ठ-तालु-दन्तोष्ठ-मूर्धादिष्वभिहत्य वैखरीरूपेण वर्णान् जनयति। तादृशसिद्धान्तं टंकप्रसादन्यौपानेवर्यः स्वकीये भाषाविज्ञानग्रन्थ एवं समुद्धरते-

मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः
पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः।
वक्त्रे वैखर्यथ रुरुदिवोरस्य जन्तो सुषुम्णा
बद्धस्तस्माद् भवति पवनः प्रेरितः वर्णसंज्ञः॥[४]

पाणिनीयशिक्षानुसारेण तु वर्णोच्चारणनिर्देशक आत्मा एव। सोऽयमात्मा बुद्ध्या सहयोगेनार्थनिर्णयाय भावप्रकटनाय वा प्रथमं मनो नियुङ्क्ते। ततो मनः कायाग्निं कायाग्निश्च वायुं नियोजयन् वर्णोच्चारणार्थमभिप्रेरयति। सोऽयं वायुः प्रथमतो हृदयेऽव्यक्तं ध्वनिमुत्पादयति। ततो मुखविवरे प्राप्तेऽनेकान् ध्वनीन् जनयतीति पाणिनीयशिक्षेत्थं सङ्केतयति-

आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया
मनः कायाग्निमाहन्ति सः प्रेरयति मारुतम्।
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः॥
वर्णान् जनयते ...।[५]

एतेषु वायोर्विकारः शब्दः, अणोर्विकारः शब्दः, ज्ञानस्य विकारः शब्द इति त्रिषु भिन्नसिद्धान्तेषु वायुविकार शब्द इत्यभिमतं बहुभिरूररीकृतं दृश्यते। अणोर्विकार शब्द इति पक्षं मनोर्विकार इति पक्षं वाऽन्य आधुनिकचिन्तकाः न कुत्रापि चर्चन्ति।

४. वर्णनिर्धारणाधारः

वर्णोत्पत्तिप्रक्रियायामिव वर्णानामुच्चारणस्थानप्रयत्नयोर्निर्धारणेऽपि पाणिनीय- व्याकरणापेक्षयाऽऽधुनिकं भाषाविज्ञानं सूक्ष्मतरं प्रतीयते। प्राचीना योग-ध्यान-मनन-पुनःपुनरुच्चारणैस्तेषां स्थानादिकं निर्धारयन्ति स्म, परमाधुनिकास्तु ध्वनिरुच्चारकैः- पैलेटोग्राफ (palatograph), ओसिलोग्राफ (oscillograph), इन्क राइटर (ink writer), टेपरिकर्डर (tep recorder), स्पेक्टोग्राफ (spectrograph), स्पिच् ट्रेचर (speech stretcher), पैटर्न प्ले व्याक (pattern playback), काइमोग्राफ प्रभृतिभिर्ध्वनिरूपकरणैः[६] तान् परीक्ष्य निर्धारयन्ति, अतः प्राचीनविभाजनापेक्ष्ययाऽऽधुनिकं विभाजनं सूक्ष्मतरं स्वाभाविकमेवेति मन्तव्यम्। पुनश्चाधुनिकाः पूर्वाचार्यकृते विभाजने कुत्र त्रुटयः सन्तीति विचारणाय संशोधनावसरं प्राप्नुवन्तीति तेषां वैशिष्ट्यपूर्णत्वे स्वाभाविकम्। अत्र तुलनार्थं प्राचीनाधुनिकयोरुच्चारणस्थानविभाजनं प्रस्तूयते-

५. प्राचीनाधुनिकयोः स्थानविभागः

अत्र प्राचीनशब्दतः पाणिनीयं विभाजनं गृह्यते चेदाधुनिशब्देन तु पाश्चात्यमतावलम्बिभिर्नैपालकैर्भाषाविद्भिः कृतं विभाजनमुररीक्रियते, तेषां विभाजनमधः प्रस्तूयते-

अ,क,ख,ग,घ,ङ,ह, विसर्गः	कण्ठम्/कण्ठ्यम्	क,ख,ग,घ,ङ
	-	स्वरयन्त्रमुखम्/कण्ठमूलीयम्ह
इ,च,छ,ज,झ,ञ,य,श	तालु/तालव्यम्	य
ऋ,ट,ठ,ड,ढ,ण,र,ष	मूर्धा	-

४ टंकप्रसाद न्यौपाने (२०५१) भाषाविज्ञानको रूपरेखा, धरानः नेपाल बुक डिपो, पृ. ११२।
५ हरिप्रसादशर्माचार्य (२०६०) अष्टाध्यायी (शारदाप्रभाव्याख्या युता) म.सं.वि.: दाङ नेपाल, पृ. ९५६।
६ भोजराज ढुङ्गेलः (२०६७), सामान्य र प्रायोगिक भाषाविज्ञान, काठमाडौं : एम.के. पब्लिसर्स, पृ ८०।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

-	फलकीयवर्त्स्यम्	च,छ,ज,झ,स
-	शिखरवर्त्स्यम्	न,र,ल
-	वर्त्स्यम्	ट,ठ,ड,ढ
लृ,त,थ,द,ध,न,ल,स	दन्तः/दन्त्यम्	त,थ,द,ध
उ,प,फ,ब,भ,म	ओष्ठम्/ओष्ठ्यम्	प,फ,ब,भ,म,व
व	दन्तोष्ठ्यम्	-
ए,ऐ	कण्ठतालुः	-
ओ,औ	कण्ठोष्ठम्	-
ङ,ण,न,म	नासिका	-
जिह्वामूलीयविसर्गः	जिह्वामूलम्	-

यद्यपि कौमुद्यामकुहविसर्जनीयानां कण्ठ इचुयशानां तालुरित्यादिक्रमेण कृतः स्थानविभागो महर्षिणा पाणिनिना पाणिनीयशिक्षायां वृद्धपाठत्वेन, लघुपाठत्वेन च कृतस्य सूक्ष्मविभागस्य सारसङ्क्षेप एवेति युधिष्ठिरमीमांसकः संस्कृतव्याकरणशास्त्रेतिहासनामके ग्रन्थे पाणिनीयशिक्षां समुद्धरनुल्लिखति।[७] पुनश्चासौ महर्षिणा पाणिनिना- अकुहविसर्जनीयाः कण्ठ्याः, हविसर्जनीयावुरस्यावेकेषामित्यादिक्रमेण वृद्धपाठे तथा लघुपाठेऽपि प्रायः समानैर्वाक्यैः स्थानानि विभाजितान्यासन्निति ज्ञापयति तथापि महर्षिणा पाठद्वयेऽपि कृतो विभागः सुविस्तृतोऽप्याधुनिकविभागापेक्षया भिन्नतरः, कौमुदीकारेण कृतस्य विभागस्याधारश्चेत्यवधेयम् । प्राच्यनवीनयोः स्थानविभाग एतदपि वैषम्यं यत् प्राचीनाः 'मङणनानां स्ववर्गीयं स्थानं नासिकास्थानञ्च स्वीकुर्वन्ति । नवीनास्तु नासिकां प्रयत्नं कथयन्ति ।[८]

६. उभयोर्विभाजनयोर्विश्लेषणम्

प्राचीनाधुनिकाभ्यां कृते स्थानविभागे कतिषु वर्णेषु शाब्दिकभेद एव दृश्यते चेत् क्वचित्तु स्पष्टभेदोऽपि परिलक्ष्यते । तथैव देवनागरीस्वरवर्णेषु संस्कृतज्ञैर्निर्धारितानि कण्ठादीनि स्थानान्याधुनिकैः कथमस्वीकृतानीति विषयेऽपि पुनरन्वेषणमावश्यकम् । तेषां सर्वेषां निरूपणमत्र विधीयते । तेभ्यः प्रथमं स्वराणां कण्ठादिस्थानत्वमुपपद्यते नवेति चर्च्यते ।

क) स्वराणां स्थानत्वम्

स्वयं राजन्त इति लक्षणेन स्वरवर्णा व्यञ्जनानां सहयोगं विनापि उच्चार्यन्त इति ज्ञायते । आधुनिकास्तु वर्णोच्चारणोद्देश्येन फुस्फुसातो निसृतो वायुर्विनावरोधेन बहिरागते स्वरत्वमवरोधेन समागते तु व्यञ्जनत्वमुपपद्यत इति परिभाषन्ते । अतो स्वरलक्षण एव प्राचीनाधुनिकयोर्मतभेदः परिलक्ष्यते । अत्र प्राचीना अवरोधविषयमनुद्भावयन् अकारादीनां कण्ठादीनि स्थानानि परिकल्पयन्ति । यथा- अ=कण्ठः,इ=तालुः, उ=ओष्ठौ, ऋ=मूर्धा,लृ=दन्ताः, एकारैकारौ=कण्ठतालू, ओकारौकारौ=कण्ठोष्ठौ, अनुस्वार :(ं)=नासिका, विसर्गः (ः)=कण्ठ इति । विनाऽवरोधेन वायोर्बहिरागमने स्वराणामुच्चारणमिति पक्षे तेषा कण्ठादिषु देशेषु स्पर्शनं न जायते, अत आधुनिकैः स्वराणां स्थानानि न निर्धारितानि स्युः । परमकारोच्चारणाय समुत्थितो वायुः कण्ठदेशमागत्य क्षणार्धमपि तिष्ठतीति अकारककारयोस्तुलनात्मकेनोच्चारणेन ज्ञायते । तथैव इ-य,उ-व,ऋ-र,लृ-लवर्णानामपि । तत्तद्देशेषु वायुरवरुध्यते चेत्तेषां स्थानत्वं कथं न सम्भवतीति प्रश्नो जागर्त्येव । आधुनिकैर्भाषावैज्ञानिकैर्ध्वनिरूपकरणैर्वर्णान् परीक्ष्य स्थानानि निर्धारितानि ततो निष्कर्षत्वेन स्वराणामुच्चारणे कण्ठादीनामावरोधो नास्ति तेषां सङ्कोच(उपसंहारः)मात्रं जायत इति निर्णीतानि च अतस्तेषां निर्धारणे परीक्षणमात्रं न कारणं प्रातिशाख्यकथनमपि स्रोतः, यथा-

अचां यत्रोपसंहारस्तत् स्थानं क्रियतेऽत्र तु ।
व्यञ्जनानां तु तत् स्थानं स्पर्शनं क्रियते तदा ॥

अर्थात् स्वराणां स्थाननिर्धारणं जिह्वाताल्वादीनां सन्निकृष्टतामात्रेण विधीयते चेद् व्यञ्जनानान्तु स्पर्शेनेति । प्रातिशाख्यस्य प्रकृतं कथनमेवाश्रित्याऽऽधुनिकाः सन्निकृष्टतामात्रेण स्थानत्वं न सम्भवतीति तर्कयन्ति चेत् पाणिन्यादयस्तु सन्निकृष्टतामपि

७ वृद्धपाठे स्थानविभागः अकुहविसर्जनीयाः कण्ठ्याः । हविर्सजनीयावुरस्यावेकेषाम् । जिह्वामूलीयो जिह्वः । कवर्गवर्णानुस्वारजिह्वामूलीया जिह्व्या एकेषाम् । कण्ठ्यनास्यमात्रानित्येके । इचुयशास्तालव्याः । ऋटुरषा मूर्धाः । रेफो दन्तमूलीय एकेषाम् । दन्तमूलस्तु तवर्गः । लृतुलसाः दन्त्याः । वकारो दन्त्योष्ठ्यः । सृक्किणीस्थानमेकेषाम् । उपूपध्मानीया ओष्ठयाः । अनुस्वारयमा नासिक्याः । कण्ठ्यनासिक्यमनुस्वारमेके । यमाश्च नासिक्यजिह्वा । ए ऐ कण्ठतालव्यौ । ओ औ कण्ठचोष्ठ्यौ । 'मङणनमाः स्वस्थाननासिकास्थानाः । द्विवर्णानि सन्ध्यक्षराणि । सरेफ ऋवर्णः । संयुक्ता वर्णाः । लघुपाठे वृद्धपाठाद् विशेषस्तु- कवर्गऋवर्णश्च जिह्व्यः । एदैतो कण्ठ्यतालव्यौ । ओदौतो अण्ठ्योष्ठ्यौ । द्वे द्वे वर्णे सन्ध्यक्षराणामारम्भके भवतः ≠
युधिष्ठिरमीमांसकः (२०४१) संस्कृत व्याकरणशास्त्रका इतिहास (तृतीयो भागः) हरयाणा : लेखकः,पृ. ७३ ।

८ हेमाङ्गराजोऽधिकारी (द्दण्द्धढ) समसामयिक नेपाली व्याकरण, काठमाडौं : कुन्जल प्रकाशन, पृ.ट ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्थानत्वे कारणं मन्यन्ते । आधुनिका मौखिकैः परीक्षणैः सह ध्वनिरूपकरणैरपि वर्णान् परीक्षितवन्तः, पूर्ववर्त्तिभिः कृते निर्धारणे कुत्र त्रुटयः सन्तीति विवेचितवन्तश्च, अतः प्राचीनविभाजनापेक्षयाऽऽधुनिकं कथनं वस्तुतथ्यसन्निकट मस्तीति वक्तुं शक्यते ।

ख) पूर्वनिर्धारितानां स्थानानां तुलना

प्राचीना इचुयशानां तालु ऋटुरषाणाञ्च मूर्धा/वर्त्सस्थानमङ्गीकुर्वन्ति चेदाधुनिकास्तु चवर्गटवर्गनरलसां वर्त्स्यं/जिह्वामूलीयं यकारस्य तु तालव्यमुररीकुर्वन्तीति तालिकायामुपरि प्रस्तुतमेव । तरन्त्यनेन वर्णा इति विग्रहपूर्वकात् तृ इत्यस्माुण् रस्य लकारे च कृते तालुशब्दो निष्पद्यते । तस्यार्थो जिह्वेन्द्रियाधिष्ठानं पर्यायश्च काकुद इति । तालुनो जातः तालुनि भवो वा तालव्यः । भाषावैज्ञानिकाः कण्ठप्रदेशाद् वर्त्स्यान्तं जिह्वोपरिस्थं प्रदेशं तालु इत्युक्त्वा तत् कठोरतालु कोमलतालु चेति द्वेधा विभजन्ते । पुनश्च वर्त्स्यसन्निकटकं भागं कठोरं कण्ठनिकटवर्त्तिनञ्च कोमलमिति निर्धारयन्ति । तत्समीप एव मूर्धा वर्त्सावपि समायातः, अर्थात् कठोरतालुप्रदेशाद् दन्तमूलान्तो भागो वर्त्सः/मूर्धा । चादिझान्तवर्णानां मौखिकोच्चारणे जिह्वाग्र उपरिस्थान् दन्तमूलान् स्पृशतीति त एव प्रकारान्तरेण दन्तमूलीया अपि कथ्यन्ते । परं ॅकारोच्चारणे जिह्वाग्रो दन्तमूलान् न स्पृशतीति तस्य दन्तमूलत्वं विचारणीयम्, परं तस्य नासिकास्थानं तु मुखनासिकाभ्यामुच्चारणात् स्वाभाविकं मन्तव्यम् । आधुनिकाः सकारस्यापि वर्त्स्यं स्थानमङ्गीकुर्वन्ति परं चादिझान्ता वर्णा यथा दन्तमूलत उच्चार्यन्ते सकारो न तथेति मौखिकपरीक्षणेन बोद्धुं शक्यते । मौखिकया पद्धत्या परीक्षिते तु सकारोऽयं दन्तमूलतः पश्चप्रदेशादुच्चार्यत इति निश्चितमतः तस्यापि वर्त्स्यत्वं विचारणीयम् । तथैव महामुनिः पाणिनिः सकारस्य दन्तस्थानमुररीकुरुते परं तस्योच्चारणे जिह्वाग्रस्य दन्तप्रदेशेऽस्पर्शः स्पष्टोऽतस्तस्य दन्तत्वमपि चिन्त्यम् । सकारोऽयं न दन्त इति तु तादिधान्तैः सह तस्योच्चारणेनापि ज्ञायते । टादिढान्तानामुच्चारणे तु जिह्वाग्रो दन्तमूलतः किञ्चित् पश्चवर्त्तिनं वर्त्सप्रदेशं स्पृशतीति परीक्षणेन ज्ञायते । तथैव चवर्गटवर्गयोरुच्चारणेऽपि जिह्वाग्रोऽयमेकस्मिन्नेव स्थाने न स्पृशतीति साधारणेन परीक्षणेनाप्यवबुध्यते, अत टवर्गस्य वर्त्स्यत्वं चवर्गस्य तु दन्तमूलीयत्वं स्वाभाविकम् ।

यद्यपि मौखिकपद्धत्या कृतं परीक्षणं स्थाननिर्धारणे न पर्याप्तम्, यतो हि स्थानभेदेन, कालभेदेन, जातिभेदेन, पारिवारिकस्वरूपभेदेन तथा अन्यैरपि बहुविधैर्भेदैर्वर्णोच्चारणे वैभिन्यं दृग्गोचरी भवति तत् स्वाभाविकमपि, तथापि प्रातिशाख्यकारैः कृतं स्थानविभाजनमाश्रित्य पाणिनीयपरम्परानुयायिभिर्महर्षिभिः इचुयशानां तालुरित्यादिभिर्वाक्यैर्यथा स्थानानि विभक्तानि तानि सर्वाण्यधुना यथावन्न घटन्त इति ज्ञातव्यं भवति, नापि चछजझटठडढनरलसा इति सकला उच्चारणकाले वर्त्स्यदेशं स्पृशन्तीत्याधुनिकैः कृतं विभाजनं वस्तुतथ्यात्मकमस्तीति कथयितुं शक्यम्, यद्यत्र पार्थक्यं नासीच्चेत् प्राचीनैः दन्तस्थानी इति कथितः सकार आधुनिकमते वर्त्स्यः कथं स्यादिति प्रश्नो जागर्त्येव, एवमन्यत्रापि कुत्रचिद् भेदोऽस्तीत्युपरि स्थिता तालिका स्पष्टीकरोति, अतोऽस्मत् कृते देश-काल-समय-जाति-पारिवारिकस्वरूपसापेक्षं यन्त्रेण पुनः पुनः परीक्ष्य स्थाननिर्धारणमावश्यकमिति सारः ।

ग) नासिकेयं स्थानं करणं वा

नासिकेयं स्थानमिति पक्षेऽपि करणमिति पक्षेऽपि समीक्षकेषु मतैक्यं न प्राप्यते । अथर्वप्रातिशाख्ये नासिकां स्थानत्वेन करण- (प्रयत्न) त्वेन च प्रस्तुतमस्ति । पाणिन्यादयो बहवो वैयाकरणा स्थानमिति पक्षमवलम्ब्य- अनुस्वारयमानान्तु नासिकास्थानमुच्यते,ॅमङणनानां नासिकेत्यादिभिर्वाक्यैः स्थानत्वं स्वीचक्रुश्चेद् कतिपये प्रातिशाख्यकारास्तथा आधुनिकवैयाकरणास्तु आस्यञ्चोष्ठादारभ्य काकल(किलकिले इति भाषायाम्) पर्यन्त[९] मिति पक्षमाश्रित्य तां मुखबाह्यत्वमुल्लिखितवन्तोऽतो नासिकाया आस्यबहिर्भूतत्वमन्तर्गत्वमपि विवादग्रस्तं दृश्यते । तुल्यास्यसूत्रे कैयटो वर्णोत्पादकं नासिकास्थानमास्यान्तर्गत्वमेव समुल्लिखितवान् । महर्षिपाणिनिः मुखनासिकावचनोऽनुनासिकः (पा.सू.१-१-९) इति सूत्रे मुखं नासिकाञ्च पृथक्कृत्य प्रस्तुतवान् अतस्तत्समालोचकाः पाणिनिमते नासिकेयमास्यबाह्याऽस्तीति व्याकृतवन्तः । प्रकृतसूत्रस्थं शेखरमुद्धरन् मधुकरफाटको लिखति- मुखनासिकासूत्रे मुखञ्च नासिका चेति विग्रहप्रदर्शनपरस्य भाष्यस्य, तत्रैव सूत्रेऽनुनासिकवर्णविषये प्रासादवासिन्यायप्रदर्शनपरस्य च भाष्यस्य, एवं तुल्यास्यप्रयत्नमित्यत्रास्यस्य स्थानविशेषणार्थकत्वप्रतिपादनपरस्य भाष्यस्य च स्वारस्येन नासिकाया आस्यबाह्यत्वमेव स्वीकर्तुमुचितम् ।[१०] इममेव पक्षमङ्गीकृत्य आधुनिका भाषाविदो नासिकां प्रयत्नं मन्यन्ते, अतस्तेषां मते ङ-न-मवर्णानां नासिकास्थानं नास्ति, परं पाणिनीयपरम्परायां नासिकेयं स्थानं कथं जातमिति विचारणीयम् । अत्र तादृशपक्ष एव व्याख्यातृभ्यः समुचितः प्रतीत इत्यापाततो वक्तुं शक्यम् ।

वस्तुतो नासिकाया आस्यबाह्यत्वं स्पष्टमेव अतस्तस्याः करणत्वं समुचितम् । नासिकाशब्देन महाभाष्यकृततल्लक्षणेन व्याख्यातृप्रस्तुतप्रमाणेन च नासिकाया मुखबाह्यत्वं स्पष्टीभवति, अत एषां करणकोटौ निर्धारणीयेति सारः ।

---

९ आस्यञ्च ओष्ठात् प्रभृति प्राक् काकलात् - पतञ्जलिः (२००९) व्याकरणमहाभाष्यम्, वाराणसी : चौखम्वा विद्या भवन, पृ ३६० ।

१० मधुकरफाटकः (२०२९) पाणिनीयशिक्षायाः: शिक्षान्तरैः सह समीक्षा, वाराणसी : लेखकः, पृ. १३२ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५. निष्कर्षः

वैदिकव्याकरणैर्व्यष्टिरूपेण कृतान् स्थानविभागान् पाणिनीयपरम्परानुयायिनः समष्टित्वेन पुनर्विभक्तवन्तः, अतस्तान् बहव उत्तरवर्त्तिन निःसङ्कोचमात्मसात्कृतवन्तः। अद्यत्वेऽपि नैपालैर्भारतीयैश्च भाषाविद्भिः कृतानामुच्चारणस्थानविभागानामाधारः पाणिनिपरम्परानुसृतो विभाग एव । तदानीं वर्णानामुच्चारणस्थाननिर्धारकाणि पैलेटोग्राफ (palatograph), ओसिलोग्राफ (Oscillograph), इन्क राइटर (Ink Writer) प्रभृतीन्युपकरणानि नासन् तथापि वर्णविश्लेषकाः पुनः पुनरुच्चारणेन, अन्तःसाक्ष्येण, मौखिकपरीक्षणादिना च स्थानानि निर्धारितवन्तः । आधुनिका अत्र पूर्वविभागं किञ्चित् विश्लिष्य कतिषु स्थानेषु संशोधनमपि कृतवन्तश्चेत् पाणिनीयपरम्परानुयायिनस्तु संशोधनं सर्वथाऽस्वीकृतवन्तः।

अत्र प्राच्याधुनिकयोरेतादृशयोर्मतयोस्तोलनेन प्राप्तनिष्कर्षोऽत्र प्रस्तूयते-

तिष्ठति यत्र वर्णोत्पादको वायुस्तत् स्थानमिति व्युत्पत्या फुस्फुसातो निसृतो प्रथमं यत्रावरुद्धो भवति तदेव स्थानम्, अतो वायोर्गत्यवरोधस्थानं हि वास्तविकं स्थानम् । वर्णानां स्थानमिति व्यवहारस्तु औपचारिक एव, न तु वास्तविकः ।

वायोर्विकारो वर्ण इति वाक्यपदीयसिद्धान्ताद् वायोर्विशेषकम्पनम्, शब्दाद्युच्चारणापेक्षया वायोर्बहिरागमनं तन्मध्ये कण्ठताल्वादिष्वभिघात एव वर्णोच्चारणप्रक्रिया । देवनागरीवर्णानां स्थानविभाजनपरम्परा वैदिकव्याकरणतः प्रारब्धा, एतादृशं विभाजनं प्रथमत ऋक्प्रातिशाख्येन प्रारब्धं ततः सामाथर्वयजुरादिभिस्तैत्तिरीयादिभिश्च प्रातिशाख्यैः कृतं दृश्यते ।

प्रातिशाख्यव्याकरणैः कृतं विभाजनमुपजीव्यं मत्वा पाणिनीयपरम्परानुयायिभिः संस्कृतवैयाकरणैः स्थानानि विभक्तानि। तत्र पूर्ववर्त्तीनि व्यष्टिविभाजनानि समष्टीकृत्य कुत्रचित् संशोध्य च पाणिनीयशिक्षाकारेण- अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा, जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च प्रभृतिभिः शिक्षावाक्यैर्वर्णानां स्थानानि निर्धारितानि, तत्क्रमे नासिकाऽपि स्थाने गृहीता । पाणिनीयशिक्षायां कृतः स्थानविभागः तदुत्तरवर्त्तिभिः पतञ्जलि-काशिकाकार-नागेश-कैयट-भट्टोजिदीक्षित-प्रक्रियाकौमुदीकृद्भिः विनापरिवर्तनेन समर्थितः ।

पाणिनीयशिक्षायां निर्धारितानि स्थानानि पाश्चात्यमतावलम्बिभिः नेपालकैर्भारतीयैश्चाधुनिकैर्भाषाविद्भिराधुनिकैर्ध्वनिरूपकरणैः परीक्ष्य किञ्चित् संशोधितानि । एतत्क्रमे कण्ठ्यस्थानतो हकारो, तालव्यस्थानत इचुशाः, मूर्धा/वर्त्स्यस्थानत ऋकारः, दन्त्यस्थानत लृनलसास्तथा ओष्ठ्यस्थानत उकारश्च निष्कासिताः पुनः स्वरयन्त्रमुखे हकारः, वर्त्स्यस्थाने चवर्गनकारलकारसकाराः, ओष्ठ्ये वकारश्च समावेशितः ।

अथर्वप्रातिशाख्ये-नासिकानां नासिकास्थानं नासिकैव करणमित्युक्तं तथाप्यन्यत्रेमां आस्यबहिर्भूतकार्यजननात् स्थानाद् बहिर्गण्यते ।

विभिन्नेषु प्रातिशाख्येषु पाणिनीयशिक्षायाञ्च कृतः स्थानविभागस्तात्कालिकस्तद्देशीयस्तज्जातीनां कृत उच्चारणानुकुलश्चासीत्, तदानीमपि प्राच्योदीच्यादिषु क्षेत्रेषु उच्चारणभेद आसीदिति पाणिनीयसूत्रैर्ज्ञायते ।

भाषा गतिशीला भवतीति पक्षेऽथवा महाभारतोत्तरकालादुच्चारणपद्धतिः क्रमशो विकृताऽभूदिति पक्षेऽपि वर्णानामुच्चारणपद्धतिः च किञ्चित् परिवर्तिता इति सर्वैरपि स्वीकार्या । अतः प्रातिशाख्यस्यकृते, पाणिनीयशिक्षांनिर्दिष्टे स्थानविभागे पुनर्विचार आवश्यक।

सन्दर्भसूची

- न्यौपाने टंकप्रसाद (२०६८) सामान्य र प्रायोगिक भाषाविज्ञान, काठमाडौं : सन लाइट पब्लिकेसन्स ।
- न्यौपाने टंकप्रसाद (२०५१) भाषाविज्ञानको रूपरेखा, धरान : नेपाल बुक डिपो ।
- पतञ्जलिः (२००९) व्याकरणमहाभाष्यम्, वाराणसी : चौखम्बा विद्या भवन ।
- ढुङ्गेल भोजराज : (२०६७), सामान्य र प्रायोगिक भाषाविज्ञान, काठमाडौं : एम.के. पब्लिसर्स ।
- मधुकरफाटकः (२०२९) पाणिनीयशिक्षायाः शिक्षान्तरैः सह समीक्षा, वाराणसी : लेखकः । मोहनराजशर्मा (२०६२) शब्दरचना र वर्णविन्यास काठमाडौं : नवीन प्रकाशन ।
- युधिष्ठिरमीमांसकः (२०४१) संस्कृत व्याकरणशास्त्रका इतिहास (तृतीयो भागः) हरयाणा : लेखकः । रामाज्ञापाण्डेयः (२०४३) व्याकरणदर्शनपीठिका, वाराणसी : सम्पूणानन्द सं.वि. ।
- शर्माचायहरिप्रसार्द (२०६०) अष्टाध्यायी (शारदाप्रभाव्याख्या युता) म.सं.वि. : दाङ नेपाल ।
- अधिकारी हेमाङ्गराजोअधिकारी (२०४९) समसामयिक नेपाली व्याकरण, काठमाडौं : कुञ्जल प्रकाशन ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाणिनीयव्याकरणस्य पञ्चाङ्गानां निरूपणम्

– सहप्रा. भीमप्रसादः कण्डेल
वाल्मीकिविद्यापीठस्थः

विषयावतारः

जगति प्रतीयमानां समेषां मूर्तामूर्तपदार्थानां कालक्रमेण स्वभावतः परिवर्तनं संघटते । अतः पदार्थानाम् उत्पत्तिः, स्थितिः, वृद्धिः, विपरिणतिः, अपक्षतिः, विनष्टिश्चेति षड्भावविकारा सर्वैरनुभूयन्ते । भावप्रकाशनाय आविष्कृता व्यवहाराय सुकरीभूता भाषा खल्वपि कालक्रमे परिवर्तनं स्वीकृत्यैव विकसिता, समृद्धा, नूत्ना च संपद्यते । तत्र क्रमे प्राक्प्रयुक्तशब्दानामुच्चारणवैकल्याद् ईषद्रूपान्तरप्राप्तिः, नूतनाविष्कृतपदार्थानां बोधनार्थमभिनवशब्दानाञ्चाविष्कारः, व्यवहृतशब्दानामपि कालक्रमान्तरालेन अर्थोन्नतिरर्थावनतिरर्थान्तरप्रवृत्तिश्चेति रीत्या भाषाया नव्यप्राच्यभेदाः, स्थलगतभेदाः, व्यक्तिगतभेदास्तथा एकस्या भाषाया भाषान्तराणि चाविर्भवन्ति । तत्र पुनः प्राक्तना भाषा व्यवहारातीता भावं भावं तिरोभवन्ति । एतादृश्यां परिवर्तनपरिस्थितौ यदा या भाषा लोके व्यवहारातीता भवति तदा तस्या भाषायास्तदीयसाहित्यदर्शनादीनाञ्च संरक्षणं विना व्याकरणं न संभवति । अत एव "रक्षार्थं वेदानामध्येयं व्याकरणम्" इति (महाभा.स्प.आ.) महाभाष्यकारः पतञ्जलि र्निजगाद । भाषायास्तन्निबद्धज्ञान-संरक्षणार्थमाविष्कृतं खलु व्याकरणं वेदस्य प्रथितेषु षडङ्गेषु मुखरूपं प्रमुखं स्थानं बिभर्ति । एवं संस्कृतवाङ्मयस्य विविधविधास्वपि गौरवपूर्णं प्राथमिकं विद्यास्थानं भजमानं व्याकरणशास्त्रं प्रतिष्ठते ।

आदौ वेदानां स्वाध्यायप्रवृत्त्या सह यदा जनानां वेदार्थान्वेषणे दृष्टिः समुदिता तदैव शब्दव्युपत्तिद्वारा वेदार्थानुसन्धानप्रवृत्तिः प्रारब्धा । एषा प्रवृत्तिरेव व्याकरणशास्त्रोद्भवे बीजं बभूव । एवंविधाद् बीजात् कालक्रमे अङ्कुरणेन, पल्लवनेन प्रवर्धितस्य व्याकरणशास्त्रस्य गच्छता कालेन मुख्यतो द्विविधा परम्परा विकसिता । एका माहेश्वरी परम्परा अपरा माहेन्द्री परम्परा च । तत्र माहेश्वरीं पराम्परामनुसृत्य प्रणीतानि व्याकरणानि पाणिनीयचान्द्रसारस्वतप्रभृतीनि मन्यन्ते । माहेन्द्रीं परम्परामाश्रित्य प्रणीतं व्याकरणं केवलं कातन्त्रमेवोपलभ्यते सम्प्रतीति व्याकरशास्त्रेतिहासानुशीलका विद्वांसो ब्रुवन्ति (सं.व्या.शा.इतिहा.भा.१पृष्ठ७१)। अनयो र्द्वयोः परम्परयोर्मध्ये माहेश्वरपरम्पराश्रितं पाणिनीयं व्याकरणं सर्वाधिकं लोकप्रियं गतं विलोक्यते । तत्र भगवता पणिनिना स्वकीयस्य व्याकरणस्य परिपूर्णतायै पञ्चाङ्गानि समुपदिष्टानि । तेषां पञ्चाङ्गानां निरूपणमत्र विधीयते ।

१. पाणिनिव्याकरणस्य पञ्चाङ्गानि

पाणिनिना स्वकीयव्याकरणस्य पूर्णतायै प्रमुखाङ्गभूतेन सूत्रपाठेन सह अङ्गान्तररूपाः खिलपाठा अपि निर्मिताः । तत्र खिलपाठाभ्यन्तरे धातुपाठः, गणपाठः, उणादिपाठो लिङ्गानुशासनञ्च चत्वारः पाठाः समाविशन्ति । सूत्रपाठः, धातुपाठः, गणपाठः, उणादिपाठः, लिङ्गानुशासनञ्चेति मिलित्वा पाणिनीयं व्याकरणं पञ्चाङ्गसमन्वितं सत् परिपूर्णतायै कल्पते ॥ एष्वङ्गेषु शब्दानुशासनस्य सूत्रपाठो मुख्योऽन्ये च तत्सहकारिणो मन्यन्ते ते च खिलशब्देनात्र वाच्याः । खिलशब्दस्यानेकेऽर्थाः शास्त्रेषु प्राप्यन्ते । शतपथसांख्यानब्राह्मणयोः "उर्वरयोरसंभिन्नं भवति खिल इति वै तदाचक्षते (श.ब्रा.८।३।४।१) (सां.ब्रा.३०।८) इत्यभिहितम् । तस्यैव व्याख्यां कुर्वता सायणाचार्येण निगदितम्- "उर्वरयोः- सर्वसस्याढ्ययोः क्षेत्रयोः, असंभिन्नमसंस्पृष्टं भवति स्वयमसस्यं भवति, तत्क्षेत्रं खिल इत्युच्यते" इति । तदनुसारेण खिलशब्देन ऊषरभूमिर्बुध्यते । एवमेव गोपथब्राह्मणे मनुस्मृतौ च खिलशब्दो परिशिष्टार्थे प्रयुक्तो दृश्यते । प्रकृते एतावर्थौ नाभिप्रतौ किन्तु न खिल इति अखिल इति व्युत्पत्त्या नञ्घटितः खिलशब्देन कृत्स्नार्थो गम्यते । अतो नञ्रहितेन खिलशब्देन अकृत्स्नार्थः, अर्थात् अवयवार्थोऽभिमतो भवति । स एवार्थः प्रकृते सङ्गच्छते । पाणिनिव्याकरणस्य साकल्येनावबोधार्थं तदङ्गभूतानां खिलपाठानामप्यध्ययनमावश्यकं भवति ।

१.२. सूत्रपाठः

पाणिनेः पूर्वमपि शब्दानामनुशासकाः शाकटायनापिशलिप्रभृतयो व्याकरणकारा बभूवुः । तेषु सत्स्वपि लौकिकानां वैदिकानाञ्च शब्दानां समनुशासनाय पाणिनिमुनिप्रणीतं पाणिनीयं व्याकरणमेव सर्वाणि व्याकरणानि व्यजेष्ट । शब्दानुशासनसरलार्थं प्राक् शब्दे प्रत्ययप्रकृतिविभाजनं स्वीकृत्य पुनः तत्संयोजनप्रक्रियाबोधकानि सूत्राणि प्रणीय एकेनैव सूत्रेण बहुशब्दव्युत्पादनपरां महेन्द्राविष्कृतां पूर्वाचार्यैरनुसृतां सूत्रशैलीमेव पाणिनिरप्यनुससार । तत्र पाणिनिः संज्ञा, परिभाषा, विधिः, नियमः, अतिदेशः, अधिकारश्चेति षड्विधानि सूत्राणि प्रणीतानि । एषां सूत्राणां संकलनात्मकोऽष्टाध्यायीग्रन्थस्तेन निरमायि । तस्य च नामान्तराणि खलु, अष्टकम्, शब्दानुशासनम्, वृत्तिसूत्रम् इति प्रथितानि । पाणिनीयसूत्राणि किल अष्टस्वध्यायेषु प्रविभज्य विरचितानि । अतोऽस्य ग्रन्थस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

'अष्टकम्' 'अष्टाध्यायी' इति द्वे नामधेयेऽन्वर्थतां भजतः । शब्दानुशासनं नाम महाभाष्ये निगदितम्- "अथ शब्दानुशासनम्, शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्" इति (महाभा.प.आ.पृ०१) । वृत्तिसूत्रमिति नामधेयस्य प्रयोगोऽपि महाभाष्ये "समर्थः पदविधिः (२।१।१)" सूत्रे "अनेकमन्यपदार्थे (२।२।२४)" सूत्रे चेति स्थलद्वये उपलभ्यते ।

पाणिनिना सूत्राष्टाध्याय्यां प्रत्यध्यायं चत्वारः पादा अनुस्यूताः । तत्र च प्रथमाध्याये विशेषतः स्वशास्त्रोपयोगिपरिभाषिकसंज्ञाबोधकसूत्राणां परिभाषासूत्राणाञ्चोपदेशो विहितो यत्र एकपञ्चाशतदुत्तरत्रिशतसूत्राणि (३५१) विलसितानि । विभक्त्यर्थविधायकानां (कारकप्रक्रियाविधायाकानाम्), समासप्रक्रियाविधायकानां सूत्राणां सन्निवेशो द्वितीयाध्याये कृतो यत्र अष्टषष्ट्युत्तरद्विशतसूत्राणि (२६८) अनुस्यूतानि । तृतीयाध्याये धातुभ्यो विहितानां प्रत्ययानां बोधकानि सूत्राणि प्रतिपादितानि यत्र च, एकत्रिंशदुत्तरषट्शतानि (६३१) सूत्राणि प्रोतानि । चतुर्थपञ्चमाध्याययोस्तु तद्धितप्रत्ययविधायकानि सूत्राणि विततानि, तत्र द्वयोरध्याययोः, चतुर्थे पञ्चत्रिंशदुत्तरषट्शतसूत्राणि (६३५) सम्बद्धानि पञ्चमे च पञ्चपञ्चाशदुत्तरपञ्चशतसंख्याकानि (५५५) सूत्राणि ग्रथितानि । षष्ठाध्याये प्रकृतिप्रत्ययसंबद्धकार्यापदेशेन तिङ्-सन्धि-स्वरविधायकानां सूत्राणां निरूपणं विद्यते यत्र च षट्त्रिंशदुत्तरसप्तशतसूत्राणि (७३६) रचितानि । सप्तमाध्याये अङ्गाधिकारः प्रकल्पितः । तत्र अङ्गसम्बद्धकार्यविधायकानि प्रसङ्गतः प्रत्ययसंबद्धानां निखिलकार्याणां सम्पादकानि च सूत्राणि न्यस्तानि यत्र किल अष्टत्रिंशदुत्तरचतुःशतसूत्राणि(४३८) सन्निविष्टानि । अष्टमाध्यायस्य प्रथमपादे द्वित्वादिविधायकानि सूत्राण्युपन्यस्य तदनु पूर्वत्रासिद्धमिति सूत्रेण असिद्धप्रकरणं प्रकल्प्य द्वित्व-स्वर-सन्धि -षत्व-णत्वविधायकानि एकोनसप्तत्युत्तरत्रिशतसंख्याकानि (३६९) सूत्राणि त्रिषु पादेषु समावेशितानि । एतावता सम्प्रति प्रकाशितेष्वष्टाध्यायीपुस्तकेषु त्र्यशीत्यधिकनवशतोत्तरत्रिसहस्रसूत्राणि (३९८३) प्राप्यन्ते । इतोऽप्यधिकसंख्यकानि सूत्राणि पाणिनिना प्रणीतानीति अधोनिर्दिष्टः श्लोकः सूचयति । श्लोकश्चेत्थम्-

त्रीणि सूत्रसहस्राणि तथा नवशतानि च ।
षण्णवतिश्च सूत्राणां पाणिनिः कृतवान् स्वयम् ॥ इति

प्रकृतपद्यानुसारेण तु पाणिनिना षण्णवत्यधिकनवशतोत्तरत्रिसहस्रसंख्यकानि (३९९६) सूत्राणि रचितान्यासन् । परन्तु त्रयोदश सूत्राणि इदानीं विलुप्तानीति बुध्यते ।

एतावता पाणिनिः स्वकीयामष्टाध्यायीं निर्माय बहुवारं पृथक् पृथक् काले पृथक् पृथक् स्थले भूयसीः शिष्यसन्ततीः शिक्षयामास । तेन क्वचित् सूत्रेषु पाठभेदोऽपि सञ्जातः । "आकडारादेका संज्ञा (१।४।१)" इति सूत्रभाष्ये "उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः । केचिदाकडारादेका संज्ञा इति, केचित् प्राक् कडारात् परं कार्यमिति" उक्तम् । अष्टाध्याय्याः काशिकावृत्तौ "आचार्योपसर्जनश्चान्तेवासिनि" (६।२।१०४) इति सूत्रव्याख्याने "पूर्वपाणिनीयाः, अपरपाणिनीयाः" इति तथैव न्यासपदमञ्जर्यादिषु ग्रन्थेष्वपि सूत्रपाठभेदस्य चर्चा दृष्टिपथमायाति । आचार्यः पाणिनिः याभ्यः शिष्यसन्ततिभ्यो यादृशं सूत्रपाठं प्रोवाच तादृशः सूत्रपाठः तच्छिष्यसन्ततिसंप्रदाये प्रचलितः । पाणिनिव्याकरणस्य सूत्रपाठस्य तथा खिलपाठस्य च (धातुपाठः, गणपाठः, उणादिपाठः) सूक्ष्मान्वेषणे पाणिनिव्याकरणस्य त्रिविधाः सूत्रपाठाः प्रतीयन्ते- १. प्राच्यसूत्रपाठः २. उदीच्यसूत्रपाठः ३. दाक्षिणात्यसूत्रपाठः ।

१. काशिकावृत्तिसमन्वितोऽष्टाध्यायीपाठः प्राच्यपाठत्वेन प्रचलितः ।
२. क्षीरस्वामिप्रभृतिकाश्मीरदेशजविद्वद्भिः समादृतोऽष्टाध्यायीपाठ उदीच्यपाठत्वेन विदितः ।
३. यं सूत्रपाठमाश्रित्य कात्यायनस्तदुपरि वार्तिकं चकार सोऽष्टाध्यायीपाठो दाक्षिणात्यपाठत्वेन प्रथितः ।

पूर्वोक्ता इमे पाठाः सम्प्रति वृद्धपाठो लघुपाठश्चेति द्विधा विभक्ताः । तत्र प्राच्यपाठो वृद्धपाठः स्वीकृतः । औदीच्यदाक्षिणात्त्यपाठयोर्भेदस्य नैयून्यात् तौ द्वौ एकत्र लघुपाठे समाहितौ । (सं.व्या.इतिहा.भा.१पृ.२४९-५०)

१.२. धातुपाठः

पाणिनिना स्वरचितस्य व्याकरणस्य सर्वाङ्गपूर्णतायै सूत्रपाठेन सह पठितेषु खिलपाठेषु धातुपाठोऽन्यतमः । पाणिनिना पठितो धातुपाठो दशसु गणेषु विभक्तो विलोक्यते । तथा हि-

१. भ्वादयः, २. अदादयः ३. जुहोत्यादयः ४. दिवादयः ५. स्वादयः ६. तुदादयः ७. रुधादयः ८. तनादयः ९. क्र्यादयः १०. चुरादयः,

प्रकृतिप्रत्यययोर्मध्ये घटितविकरणवैशिष्ट्यस्य प्रक्रियानुरोधेन धातूनां गणविवेकः पाणिनिना प्रकल्पितः । तत्र सर्वेषु गणेषु पठितानां धातूनां मध्ये केचन धातवः परस्मैपदिनः केचन धातव आत्मनेपदिनः केचन धातवस्तूभयपदिनो दृश्यन्ते । क्रियापदनिष्पादने धातूत्तरोत्पद्यमानप्रत्ययस्वरूपाधारेण धातूनां परस्मैपदित्वम्, आत्मनेपदित्वम् उभयपदित्वमिति विवेकः क्रियते । धातूनां प्रतिगणं परिगणनञ्चेत्थं ज्ञेयम् -

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१. शब्विकरणा धातवो भ्यादिगणे आयान्ति । तत्र परस्मैपदिनः ६४५ धातवः, आत्मनेपदिनः ३३४ धातवः, तथैवोभयपदिनः ५६ धातवश्च सन्ति । इमे सर्वे मिलित्वा १०३५ धातवो भ्वादिगणे विलसन्ति ।

२. लुग्विकरणा धातवः, अदादिगणे सन्निविष्टाः । तत्र परस्मैपदिनः ४२ धातवः आत्पनेपदिनः, २६ धातवः, एवमेवोभयपदिनः ७ धातवो विद्यन्ते । एते सर्वे मिलित्वा अस्मिन् गणे ७४ धातवः पठिताः सन्ति ।

३. श्लुविकरणान्विता धातवो जुहोत्यादिगणे समाविष्टाः । इह परस्मैपदिनः १४, आत्मनेपदिनः ६, उभयपदिनश्च ४ धातवः सन्ति । सर्वे मिलित्वा २४ धातवोऽत्र निगदिताः ।

४. श्यन्विकरणा धातवो दिवादिगणे परिगणिताः । तत्र परस्मैपदिनः ९६, आत्मनेपदिनः ३९, उभयपदिनः ५ धातवः पठिताः । तेषां सङ्कलनया १४० धातवोऽत्र गणे कथिताः ।

५. श्नुविकरणा धातवः स्वादिगणे संगृहीताः । तत्र च परस्मैपदिनः २४, आत्मनेपदिनौ २, उभयपदिनस्तु ९ धातवः सन्ति । सर्वे संमिल्य ३५ धातवोऽत्र प्रोक्ताः ।

६. शविकरणान्विता धातवस्तुदादिगणे न्यस्ताः । तत्र च परस्मैपदिनः १३४, आत्मनेपदिनः १०, उभयपदिनश्च १२ धातवः सन्ति । ते सर्वे मिलित्वा १५६ धातवोऽत्र निरूपिताः ।

७. श्नम्विकरणा धातवो रुधादिगणे समाविष्टाः । तत्रापि परस्मैपदे १३, आत्मनेपदे ३, उभयपदे ९ धातवो गदिताः, सङ्कलनया २५ धातवोऽत्र दृश्यन्ते ।

८. उविकरणास्तनादिगणे निगदिताः । तत्र हि ८ धातव उभयपदिनः, २ धातू आत्मनेपदिनौ, मिलित्वा १० धातवोऽत्र विराजन्ते ।

९. श्नाविकरणा धातवः क्र्यादिगणे सङ्कलिताः । तत्र च परस्मैपदे ४४, आत्मनेपदे १, उभयपदे च १६ धातवो वर्तन्ते । तेषां संमेलने ६१ धातव इह पठिताः ।

१०. स्वार्थणिज्विकरणा धातवश्चुरादिगणेऽन्तर्भवन्ति । अत्र गणे ४१० धातवो विराजन्ते ।

सर्वगणस्थितानां धातूनामेकत्र सङ्कलने १९७० धातवो भवन्ति (पा.व्या.ऐ.प.)। परन्तु कण्ड्वादिगणमपि मेलयित्वा इतोऽप्यधिका १९९३ धातवः सिद्धान्तकौमुद्यां निरूपिताः प्राप्यन्ते । ततोऽप्यधिका धातवः पाणिनिना पठिता आसन्निति संप्रति तु कतिपयानां धातूनां पाठो भ्रष्ट इति केचन ब्रुवन्ति । सामान्यतया द्विसहस्रकल्पाः पाणिनिनिगदिता धातव इदानीमप्युपलभ्यन्ते ।

१.३. गणपाठः

पाणिनीयव्याकरणस्य खिलपाठान्तर्गतो गणपाठः (प्रातिपदिकपाठः) अन्येषु खिलपाठेषु महत्त्वपूर्णं स्थानं बिभर्ति । यस्य ज्ञानं विना पाणिनीयशब्दव्युत्पादनमपूर्णमेव जायते । सूत्रपाठादतिरिक्तः प्रातिपदिकपाठोऽपि पाणिनये किमर्थमावश्यकोऽभूद् ? इत्यत्र विचार्यते यद्- तत्र खलु सूत्रविदो मनीषिणः सूत्रलक्षणमित्थं प्रतिपादयन्ति-

अल्पाक्षरमसंदिग्धं सारवद् विश्वतोमुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥ इति । (प.उ.पु.)

तदनुसारेण सूत्रेऽल्पाक्षरत्वमपरिहार्यं विद्यते। तेन सूत्रष्वेवापेक्षितानां सकलानां शब्दानामनुस्यूतिः कर्तुमशक्या यतः सूत्रलक्षणस्य व्याघातात् । सूत्रलक्षणपरित्राणार्थं पाणिनना सर्वेषामावश्यकशब्दानां पृथग् गणपाठः स्वीकृतः । गणपठितशब्दानामादिमं शब्दं गृहीत्वा "सर्वादीनि सर्वनामानि", "स्वरादिनिपातमव्ययम्", "गर्गादिभ्यो यञ्", "शिवादिभ्योऽण्" इति सूत्राणि प्रणीतानि । येन सूत्राणामल्पाक्षरत्वादिलक्षणमपि नैव क्षतं शब्दव्युत्पादनेऽपि नैव वैकल्यमिति ।

पाणिनेर्गणपाठोऽपि द्विविधो दृश्यते-१. गणे सर्वेषां शब्दानां साक्षात् पाठः २. आकृतिगणश्च । प्रथमे किल यत्र गणे यावन्तश्शब्दा अपेक्षितास्तेषां समेषां पाठेन तेषामेव गणकार्यं सम्पाद्यं भवति । यथा सर्वादिगणपाठान्ते इति सर्वादिः, स्वरादिगणपाठान्ते इति स्वरादिरिति रीत्या परिच्छिद्यते । द्वितीये शब्दानामियत्ताविरहेन सर्वान् शब्दान् परिगणयितुमशक्यतया शब्दाकृतौ कार्यं दृष्ट्वा तादृशशब्दस्य गणे सन्निवेशः स्वीक्रियते । यथा "नन्दिग्रहिपचादिभ्यः (३।१।१३४)" इत्यत्र पचादिराकृतिगणः, "शिवादिभ्योऽण् (४।१।१२)" इत्यत्र च शिवादिराकृतिगणोऽङ्गीकृतः ।

सम्पूर्णाष्टाध्याय्यां गणपाठगर्भितानि सूत्राणि षट्पञ्चाशदुत्तरद्विशतसंख्यकानि (२५६) प्राप्यन्ते । तत्र प्रथमाध्याये षट् (६), द्वितीयाध्याये चतुर्विंशतिः (२४), तृतीयाध्याये त्रयोदश (१३), चतुर्थाध्याये शतम् (१००) पञ्चमाध्याये षष्टिः (६०) षष्ठाध्याये पञ्चत्रिंशत् (३५) सप्तमाध्याये सप्त (७) अष्टमाध्याये एकादश (११) सूत्राणि गणसंवलितानि सन्ति । (पा.व्या.ऐ.प.) ।

एतादृशां सूत्रसूचितानां गणपाठानां सम्यगनुशीलनेनैव पाणिनिव्याकरणस्याध्येतारः पाणिनीयशब्दानुशासनस्य पूर्णतां प्राप्नुवन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१.४. उणादिपाठः

"नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य तोकम्" इति महाभाष्यकारस्य सूचनानुसारेण 'सर्वे शब्दा व्युत्पन्नाः' इति प्राचीनाः शाकटायनप्रभृतय आचार्या अङ्गीकुर्वते स्मेति गम्यते । पाणिनितः प्राक्तनास्ते वैयाकरणा उणादिसूत्राण्यपि कृदन्तप्रकरणे एव समाविशन्ति न तु तत्खिलपाठे । यदा कतिपये विद्वांसः कतिपयानां शब्दानां प्रकृतिप्रत्ययौ विवेक्तुं काठिन्यमनुभूय तेषां शब्दानां यौगिकत्वं रूढित्वं वेति विषये विवादमुपस्थापयामासुस्तदा कैश्चन वैयाकरणैस्तद्विवादसमाधानाय स्वकीयशब्दानुशासने तादृशशब्दानां कथञ्चिन् निर्वचनेन साधुत्वविज्ञानार्थं कृत्प्रकरणात् स्वतन्त्रः तस्यैव खिलपाठरूपेण उणादिपाठः प्रोक्तः । आचार्यः पाणिनिरपि सर्वे शब्दा न व्युत्पन्नाः किन्तु केचन व्युत्पन्नाः केचिच्च अव्युत्पन्ना इत्यङ्गीकुर्वते । अत एव पाणिनिर्व्युत्पन्नशब्दानां प्रातिपदिकसंज्ञार्थञ्च "कृत्तद्धितसमासाश्च" इति सूत्रं प्रणयते । अव्युत्पन्नानां प्रातिपदिकसंज्ञार्थम् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रं प्रारभते । एवं सत्यपि पाणिनिः स्वकीयशब्दानुशासनस्य कृत्स्नतायै रूढात्मकशब्दानामपि यथाकथञ्चिद् व्युत्पत्त्या साधुत्वविज्ञानार्थं खिलपाठत्वेन उणादिगणपाठं स्वीचकार । कतिपये विद्वांसः, साम्प्रतं प्राप्तानि उणादिसूत्राणि नैव पाणिनीयानि मन्वते । संस्कृतव्याकरणशास्त्येतिहासकारो युधिष्ठिरमीमांसकस्तु मुख्यतया निम्नप्रमाणं पुरस्कृत्य पाणिनीयान्येव स्वीकृतवान् ।

प्रथमं तावत् पाणिनिरेव "उणादयो बहुलम्" इति सूत्रं प्रणीतवान् । तत्र सूत्रे उणादिगणो निर्दिष्टः । सूत्रे संकेतितस्य गणस्य पाठं पाणिनिरन्यगणपाठवद् अवश्यमेव स्वयं पठितवान् अन्यथा तत्सूत्रविधिवैकल्यं स्यात् । संप्रत्युपलब्धेषूणादिसूत्रेषु पञ्चपाद्युणादिपाठो दशपाद्युणादिपाठश्च द्वौ प्रसिद्धौ । एतयोः कतरः पाठः पाणिनीय इति विषयेऽपि विदुषां विसंवादो दृश्यते । कैयटनागेशौ सिद्धान्तकौमुद्या बालमनोरमाटीकाकारो वासुदेवदीक्षितश्च पञ्चपदात्मकोणादिसूत्राणां प्रणेतारं शाकटायनं मन्वते । अपरे पञ्चपादात्मकान्युणादिसूत्राणि पाणिनीयानि दशपादात्मकान्युणादिसूत्राणि शाकटायनीयानीति तर्कयन्ति । युधिष्ठिरमीमांसकोऽपि पञ्चपादी पाणिनीयेति पक्षमेव पोषयति ।

दशपादान्वितपञ्चपदान्वितोणादिसूत्राणां प्रवक्तृविषये सत्यपि विवादे, इदन्त्ववश्यमेव वक्तुं पार्यते यत् पाणिनिः "उणादयो बहुलम्" इति स्वकीयस्य सूत्रस्य गणपूर्तये उणादिसूत्राणां पाठं व्यदधादेवेति । सिद्धान्तकौमुद्यां ग्रथितस्य पञ्चपादात्मकस्य उणादिसूत्रपाठस्य प्रथमपादे १६५, द्वितीयपादे १२२, तृतीयपादे १६१, चतुर्थपादे २४०, एवं पञ्चमे पादे ७१ सूत्राणि निर्मितानि । तानि सर्वाणि मिलित्वा एकोनषष्ट्युत्तरसप्तशतसंख्यकानि (७५९) उणादिगणसूत्राणि प्रथितानि ।

एतावता उणादिसिद्धशब्दानां रूढिं मत्वा प्रतिपत्पाठेनैव निर्वोढुमप्यशक्यतया तेषां शब्दानामपि प्रकृतिप्रत्ययनिदर्शनार्थमुणादिसूत्राणि खिलपाठविधया पठित्वा पाणिनिः स्वकीयं शब्दानुशासनं पूर्णतां नीतवान् ।

१.५. लिङ्गानुशासनम्

पाणिनीयशब्दानुशासनस्य खिलपाठेषु लिङ्गानुशासनमप्यन्यतमः खिलपाठो मन्यते । प्राणिजगति स्त्रीत्वपुंस्त्वनपुंसकत्वरूपं लिङ्गमवयवसंस्थानेन व्यज्यते । तेन महाभाष्यकारो लौकिकं लिङ्गं लक्षयन् आह-

स्तनकेशवती नारी लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥ (व्या.महाभा. ४।१।३)

अर्थात् स्तनभगाद्यङ्गसमवेतः प्राणी स्त्रीपदबोध्यः, शिश्नवृषणाद्यङ्गसमवेतः प्राणी च पुरुषपदवाच्यो भवतः । यत्र प्राणिनि स्त्रीत्वपुंस्त्वाभिव्यञ्जकानां योनिशिश्नाद्यङ्गानां मध्ये कस्याप्यन्यतरस्य भेदो न विभाति किन्तु योनिशिश्नाद्यङ्गानां सहावस्थानं दृश्यते स वै नपुंसकत्वेन व्यवह्रियत इति ।

शब्दगतं शास्त्रीयं लिङ्गं लौकिकलिङ्गमादाय न प्रवर्तते । दाराः, खट्वा आदिषु बहुषु शब्देषु पदार्थानुवृत्तिलिङ्गं नैव प्रतीयते । अतः प्राणिजगति लिङ्गमवयवसंस्थानेन व्यङ्ग्यं मन्यते, वाचि च शब्दगतं विशिष्टं लिङ्गं स्वीक्रियते । शब्दे च क्वचिच्छब्दावयवेन व्यज्यते यथा अजागौरीत्यादिषु । क्वचिच्च स्वतो गम्यते यथा वागुपानदित्यादिषु । तेन शब्दे लिङ्गव्यवस्था द्विधा प्रथिता १- लोकव्यवहारतः २. प्रत्ययानुषङ्गतः ।

यथा प्राणिजगति स्त्रीत्वपुंस्त्वादिलिङ्गं प्रत्येकं व्यक्तीनामवयवसंस्थानेन संबद्धं तथैव प्रत्येकं शब्दानां स्त्रीत्वपुंस्त्वादिलिङ्गमपि शब्दाविभाज्यमङ्गमेव मन्यते । तेन लिङ्गानुशासनं शब्दानुशासनस्याप्यङ्गमेव सम्पद्यते । लिङ्गानुशासनं विना शब्दानुशासनमपूर्णमेव जायते । अतः पाणिनिपूर्ववर्तिभिर्वैयाकरणैरपि स्वशब्दानुशासनस्य पूर्णतायै स्वतन्त्रं लिङ्गानुशासनं प्रणीतम्

आचार्यः पाणिनिरपि शब्दगतलिङ्गव्यवस्थार्थं लिङ्गानुशासकानि स्वतन्त्राणि सूत्राणि रचयामास । तानि खलु सम्प्रत्यपि समुपलब्धानि सन्ति । तत्र पाणिनिप्रोक्ते लिङ्गानुशासने अष्टाशीत्युत्तरैकशतसंख्यकानि (१८८) सूत्राणि प्राप्यन्ते । तत्र स्त्री, पुमान्, नपुंसकम्, स्त्रीपुंसयोः, पुंनपुंसकयोः, अवशिष्टलिङ्गममिति षट् अधिकारप्रकरणानि प्रकल्प्य लिङ्गानुशासनं पाणिनिना प्रस्तुतम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र स्त्र्यधिकारे ३४, पुमधिकारे ८३, नपुंसकाधिकारे ५२, स्त्रीपुंसाधिकारे ५, पुंनपुंसकाधिकारे ७, अवशिष्टलिङ्गाधिकारे ७ सूत्राणि प्रणीतानि सन्ति। एभिश्च सूत्रैः शब्दगतलिङ्गं निधार्यते।

उपसंहारः

भाषायाः परिवर्तनशीलत्वाद् भाषायामाबद्धवाङ्मयस्य संरक्षणार्थं व्याकरणस्यावश्यकत्वमनुभूयते। व्याकरणस्य मूलस्रोतोऽन्वेषणे प्रथमतो वैदिकमन्त्राणामर्थानुसन्धाने जनप्रवृत्तिस्ततश्च शब्दव्युत्पत्तिं प्रति जनाभिरुचि र्जाता। सैव शब्दव्युत्पत्तिप्रवृत्त्या व्याकरणशास्त्रं प्रादुर्भूतं मन्यते। व्याकरणेषु पाणिनिप्रोक्तं व्याकरणं शब्दलाघवमर्थगौरवञ्चादृत्य प्रवर्तितम्। अतोऽत्र व्याकरणे सूत्रपाठः, धातुपाठः, गणपाठः, उणादिपाठः, लिङ्गानुशासनमिति पञ्चाङ्गानि व्यवस्थाप्य सर्वाङ्गानि निपुणं निरूपितम्। तत्र सूत्रपाठे, संज्ञादिषड्विधानि सूत्राणि प्रकल्प्य अष्टस्वध्यायेषु प्रोक्तानि। पाणिणिना रचितानि त्र्यशीत्यधिकनवशतोत्तरत्रिसहस्राणि (३९८३) सूत्राणि संप्रत्यप्युपलब्धानि सन्ति। तेषां प्राच्योदीच्यदाक्षिणात्यपाठभेदोऽपि विकसितो विलोक्यते।

शब्दव्युत्पत्तेर्मूलं धातुः तत्पाठस्याप्यावश्यकत्वात् सप्तत्यधिकनवशतोत्तरैकसहस्रम् (१९७०) धातवः पाणिनिना दशसु गणेषु विभज्य निगदिताः। एवमेव सूत्रेष्वेव सर्वशब्दसन्निवेशेन सूत्रप्रणयने सूत्रस्य स्वल्पता निहता भवेदिति धिया गणसूचकानि षट्पञ्चाशदुत्तरद्विशतसंख्यकानि (२५६) सूत्राणि लाघवानरोधेन कृत्वा पुनः तेषाः पृथग् गणपाठः पाणिनिना विहितः। गणपाठेऽपि केषाञ्चित् गणानामाकृतिगणं मत्वा तादृशशब्दसाधुत्वाय मार्गः प्रशस्तीकृतः। "अर्थवदधातुरप्रातिपदिकम्" इति सूत्रप्रणयनेन पाणिनिमते सर्वे शब्दा व्युत्पन्ना नाभिमता अथापि व्युत्पत्तिज्ञानरसेनैव शब्दार्थबुभुत्सूनां दिङ्निर्देशनाय "उणादयो बहुलम्" इति क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिरित्याद्यर्थकं बहुलमिति परिभाषित उणादिगणः सूचितः। तत्र गणे पञ्चपादात्मकानि एकोनषष्ट्युत्तरसप्तशतसंख्यकानि (७५९) गणसूत्राणि पाणिनिना प्रणीतानि। यानि सूत्राणि रूढाभिमतशब्दानामपि प्रकृतिप्रत्ययविभागेन कथञ्चन साधुत्वप्रकारकज्ञानाय प्रयोजयन्ति, तानि शब्दव्युत्पादकशास्त्रं पूर्णतां प्रापयन्ति। लिङ्गमपि शब्दस्याविभाज्यमङ्गं मन्यते। अतो लिङ्गानुशासनं विना शब्दानुशासनमपूर्णमेव सिद्ध्यतीति धिया पाणिनिना षडधिकारान् प्रकृत्य अष्टाशीत्युत्तरैकशतसंख्यकानि (१८८) पृथक् सूत्राणि शब्दानां लिङ्गानुशासनाय रचितानि।

इत्थं सूत्रपाठः, धातुपाठः, गणपाठः, उणादिपाठः, लिङ्गानुशासनञ्चेति पञ्चाङ्गैः पाणिनेः शब्दानुशासनं परिपूर्णतां प्राप्य संस्कृतभाषायाः शब्दव्युत्पत्तिविषयकजिज्ञासां पूर्णतया समाधातुं सर्वोपरि वर्वर्ति। अतः पाणिनेरेतादृशं शब्दव्युत्पत्तिवैशिष्ट्यं सर्वैः पौरस्त्यपाश्चात्त्यशब्दकोविदैः समाद्रियते।

सन्दर्भसामग्री

- दीक्षितः, भट्टोजिः सिद्धान्तकौमुदी तत्त्वबोधिनीव्याख्यासहिता (व्याख्याकारः ज्ञानेन्द्रसरस्वती) प्रकाशनम् चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली इ.सं. १९८५।
- पण्डितराजः, गोपालशास्त्री परिष्कारकः अष्टाध्यायी पदच्छेदवृत्तिवार्तिकटिप्पणीसहिता (संपादकः प्रो. गोपालदत्तः पण्डेय) वाराणसी, चौखम्बासुरभारतीप्रकाशनम् इ०सं १९८७ तृ०सं०।
- पतञ्जलिः व्याकरणमहाभाष्यम् संशोधकः जोशीभार्गवशास्त्री दिल्ली चौखम्बासंस्कृतप्रतिष्ठानम्, इ.सं. १९९१।
- मीमांसक युधिष्ठिरः संस्कृत व्याकरणशास्त्र का इतिहास भाग १-२ प्रकाशकः हरियाणा रामलाल कपूर ट्रष्ट वहालगढ सोनीपतम् वि.सं. २०५१ पं.सं.।
- शर्मा गोविन्दप्रसादः पाणिनीयव्याकरणस्यैतिहासिकं परिशीलनम् प्रकाशकः यतिराजग्रन्थमालाप्रकाशनम् मुद्रकः ब्रह्मदेव प्रिंटिंग प्रेस श्रीअयोध्याजी वि.सं. २०४७।
- सायणाचार्यः माधवीयधातुवृत्तिः, संपादकः स्वामी दारकादासशास्त्री, प्राच्यभारतीप्रकाशनम्, वाराणसी इ.सं. १९६४।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

व्याकरणदर्शनत्वविचारेऽनुस्यूतौ बौद्धार्थधात्वर्थौ

उपप्रा. डा. भोलानारायणरेग्मी
श्रीविन्दुवासिनीसंस्कृतविद्यापीठम्

१. सारः

यथा न्यायमीमांसावेदान्तदिदर्शनशास्त्राणां चरमपुरुषार्थरूपेण मोक्षाख्यं प्रतिपाद्यन्तथैव व्याकरणशास्त्रमपि दर्शनपक्षविधुरं लोके प्रख्यातुं चीरप्रतिष्ठां च न लभते । अत एव व्याकरणशास्त्रस्य प्रक्रिया– दर्शनञ्च पक्षद्वयम्, अथवा प्रक्रिया– परिष्कार– दर्शनञ्च पक्षत्रयं प्रतिपाद्यम् । तेषु तृतीयः पक्षो दर्शनपक्षः । तं पक्षं प्रदर्श्य वैयाकरणानां बाह्यार्थातिरिक्तो बौद्धार्थः कः ? तदर्थप्रतिपादकशब्दस्य मूलकारणीभूतस्य धातोरर्थः कः ? तस्मिन् विषये प्राचीननवीनयोर्नैयायिकमीमांसकयोर्वैयाकरणयोश्च मतं किमिति जिज्ञासायां जायमानायां सत्यां तां जिज्ञासां हृदि निधाय कृतोऽयं विषयप्रवेशः ।

२. विषयप्रवेशः

जगत्यस्मिन् अनादिकालादेव प्रसिद्धस्य दर्शनस्य धाराद्वयी प्रसिद्धा, एका भारतीया, अपरा खलु पाश्चात्या, अनन्तरं भारतीयधारायामपि आस्तिक- नास्तिकभेदेन धाराद्वयं विभक्तम् । तत्र षण्ण्यायवैशेषिकादय आस्तिकाः, जैनचार्वाकादयः षण्णास्तिकाः, एवं द्वादश दर्शनानि प्रथन्त इति । परमत्राकूतम्- यद् एतेषु एव दर्शनशब्दो शक्तिसम्बन्धेन वर्तते नाऽन्यत्र इति वक्तुं नैव प्रभवामः, तथा सति रजनीशदर्शनम्, गान्धिदर्शनमित्यादौ प्रयुज्यमानो (व्यवहियमाणो) यो हि दर्शनशब्दः सोऽनुपपनः स्यात्, परमिदानीं तस्य यत्र तत्र प्रयोगो दृश्यते । अतो दर्शनशब्दो न केवलं द्वाद्वशमात्रे रुढः, योगरुढो वा, अपितु पाचकः पाठकदिशब्दवद् यौगिकः । योगश्च –दृश्यते प्रत्यक्षीक्रिते न तु अनुमीयते नाऽपि शब्दजन्यबोधविषयीक्रियत अनेनेति व्युत्पत्या दर्शन–(प्रत्यक्ष) साधनमेव दर्शनमिति, अर्थात्– दृशिर् प्रेक्षणे[1] इत्यस्माद् धातोः करणे ल्युटि तस्य साधुत्वं बोध्यते । अतः फलति– यैर्यैरूपायैर्दृश्यते तत्वं ते सर्वेऽपि उपाया दर्शनपदव्यपदिष्टा भवितुमर्हन्ति । तथापि व्याकरणस्य दर्शनत्वे किं मानमिति यदि पुनरपि जिज्ञास्यते कैश्चित् व्याकरणैस्तु केवलं शब्दासाधुत्वमेव प्रतिपाद्यते न किमपि प्रत्यक्षीक्रियतेऽनेनेति नेदं दर्शनपदाभाक् चेच्छृणु – यथा कश्चित् सत्सम्प्रदायः प्रपुष्टं दार्शनिकपक्षमन्तरा चिराय प्रतिष्ठातुं न प्रभवति तथैव दर्शनपक्षविधुराणि व्याकरणदिशास्त्राण्यपि नोपयन्ति चिरप्रतिष्ठां लोकपूज्यताञ्च ।

३. व्याकरणस्य दर्शनत्वसाधनम्

अस्मिन् व्याकरणशास्त्रे वैदिकादेव कालादरभ्य शब्दतत्वस्य दार्शनिको राद्धान्तो विवेच्यमानोऽवाप्यते यथा –

चत्वारि श्रृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासोऽस्य ।
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याम् आविवेश ॥[2]

सुवेदोऽसि वरुण यस्य ते सप्त सिन्धवः ।
अनुक्षरन्ति काकुदं सूर्म्यां सुषिरामिव ॥[3]

चत्ववारि वाक्यपरिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥[4]

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्र सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥[5]

उतत्व पश्यन्न ददर्श वाचमुतत्वश्रृण्वन्नश्रृणोत्येनाम् ।

---

१ पणिनीयधातुसंख्या १०१३
२ महाभाष्ये पस्पशाह्निके पृं सं ४०
३ तत्रैव पृं सं ४९
४ तत्रैव पृं सं ४२
५ तत्रैव पृं सं ४५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उतत्वस्मै तन्वं विसस्रे जायेवपत्य उशती सुवासाः॥[६]

इत्यादिभिरपौरुषेयैर्वचनैर्विश्रवविश्रुतायां श्रुतिविद्यायां सर्वविद्याऽधारभूमौ ऋग्वेदे वाढं निरूपितम् ।

यद्यपि – द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च तत् ।

शब्दब्रह्मणि निष्णातः परं ब्रह्माऽधिगच्छति ॥[७]

इत्यादिवचनैः केचन परब्रह्मतत्वावाप्तिसाधनं शब्दतत्वं (शब्दब्रह्म) इति स्वीकुर्वन्ति । तथापि शाब्दिकैस्तु परब्रह्मैव शब्दब्रह्मपदेनोच्यते ।

तत्प्राप्त्युपायत्वञ्च – तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।

तस्य प्रवृत्तितत्वज्ञस्तद्ब्रह्मामृतमश्नुते ॥[८]

तथा च – प्रणृत्तितक्रान्तं वाचस्तत्वे व्यवस्थितः ।

क्रमसंहारयोगेन संशत्यात्मानमात्मनि ॥[९]

वाचः संस्कारमाधाय वाचं ज्ञाने निवेश्य च ।

विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम् ॥[१०]

ज्योतिरान्तरमासद्यच्छिन्नग्रन्थिपरिग्रहः ।

परेण ज्योतिषैकत्वं छित्वा ग्रन्थीन् प्रपद्यते ॥[११] इति ।

एवंविधा ये खलु शब्दब्रह्मतिरिक्तं भिन्नं परं ब्रह्म मन्यते तैरपि व्याकरणस्य दर्शनत्वमकामेनापि स्वीकर्तव्यमेव । शब्दब्रह्मणि निष्णातः परं ब्रह्मधिगच्छति, इति रीत्या परब्रह्मणः प्रत्यक्षसाधनं निर्विवादमेव । तथा चेदं शास्त्रं व्याकरणदर्शनं कथायितुं शक्यते ।

यद्यपि व्याकरणशास्त्रे प्रतिपादनभेदेन पक्षभेदाः पूर्वाचार्यैः गृहीताः, तत्र प्रक्रियापक्षः, परिष्कारपक्षः, दर्शनपक्षञ्च । केचन प्रक्रियायामेव परिष्कारञ्चादाय पक्षद्वयं वाञ्छन्ति तेषु शुद्धदार्शनिकपक्षधरा बहवो ग्रन्थाः सन्ति । यथा –महाभाष्यं पस्पशाह्निकम्– मञ्जूषात्रयी, भूषणद्वयम्, वाक्यपदीयमित्यादयः ।

४. बौद्धार्थविचारः

तत्राऽस्माभिः शुद्धदर्शनपक्षस्यैव बुद्धयधिकरणीभूतोऽप्यस्ति अर्थः कश्चन तस्य वाच्यत्वं, बौद्धार्थवाच्यत्वमिति प्रकृतविषये शास्त्रान्तरसाधकबाधकप्रमाणपुरस्सरं किञ्चित् प्रकाश्यते ।

व्याकरणनये– अयं सास्नादिमानर्थो गौरित्यर्थकाल्लोकानां व्यवहाराच्छब्दार्थयोस्तादात्म्यं स्वीक्रियते तच्च तादात्म्यं तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्, अभेदस्याध्यस्तत्वाच्च न तयोर्विरोधः, भेदस्योदभूतत्वविवक्षायाम्, अस्यार्थस्यायं वाचकः, तस्य वाचकः प्रणवः, इत्यादौ षष्ठी भवति, अभेदस्य तत्त्वविवक्षायान्तु प्रथमा, यथा– वृद्धिरादैच् । रामेति द्वयक्षरं नाम मानभङ्गपिनाकिनः । ओमित्यकाक्षरं ब्रह्म इत्यादौ ।

अत्र शङ्क्यते – शब्दार्थयोस्तादात्म्यस्वीकारे अग्न्यादिशब्दोच्चारणे मुखदाहाद्यापतिः, मधुशब्दोच्चारणे च माधुर्यरसस्वादापत्तिस्तु न अभेदस्याध्यस्तत्वात्, अध्यासो नाम भ्रमः, आहार्यज्ञानं वा ।

तत्र बौद्धार्थेन सह बौद्धशब्दस्य तादात्म्यं वर्तते । बौद्ध इत्यस्य बुद्धिरूपाधिकरणदेशस्थ इत्यर्थो न तु बुद्धिविषयत्वम्, यतो हि बाह्यस्यापि बुद्धिविषयत्वात् । अतो बौद्धार्थ एव शक्यः पदमपि तथैव तयोरभेदः, बौद्धैश्च न दाहादिमत्वम् । एवञ्च बौद्धार्थसत्वे किं प्रमाणं इत्याशंकायां तत्र प्रमाणपक्रमो मञ्जुषाकारेण कृतः – शक्यार्थो बुद्धिसत्तासमाविष्ट एव न तु बाह्यसत्ताऽऽविष्ट सत्तायां प्रत्ययो यथा स्यात्, सर्वो हि पदार्थो न सत्तां व्यभिचरति इति मतुप्सूत्रीयभाष्यत् । घट इत्यत एव सत्तावगमेन घटोऽस्ति इति प्रयोगे गतार्थत्वात्, अस्तीतिप्रयोगानापत्तेः । सत्तया विरोधाद् घटो नास्ति इत्यनापतेञ्च । बौद्धार्थस्वीकारे तु बुद्धिसतो बाह्यसत्तातदभावबोधनाय अस्तिनास्तीति प्रयोगः संगच्छते । एवञ्च भूतभविष्यतोः गोमानासीत्,

---

६ तत्रैव पृं सं ४४

७ मैत्रायण्युपनिषदि ५/२

८ स्फोटदर्शने पृं सं ७५

९ तत्रैव पृं सं ७५

१० तत्रैव पृं सं ७५

११ तत्रैव पृं सं ७६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गोमान् भविता इत्यादौ न बाह्यसत्तास्ति किन्तु बुद्धिकल्पितैव इत्युक्तभाष्यञ्च संगच्छते । तथा च यावद् बुद्ध्या पदार्थो न विषयीकृतस्तावत्पदरूपप्रयोगभावः, तस्मात् बुद्धिसत्तासमाष्टिोऽर्थो विधिनिषेधजननादिभिः सम्बध्यते वृक्षोऽस्ति, वृक्षो जायते इति अत्यन्तासतोऽपि शशविषाणादीन् अर्थान् बुद्ध्या विषयीकृत्य शशविषाणादिपदप्रयोगः तस्मात् बुद्ध्यारुढापचरिता सत्ता शब्दप्रयोगाश्रयत्वादव्यभिचारेत्यर्थः । सवै तु बुद्धिसत्ता प्रयोक्तृप्रतिपतृणां बहीरूपतया भासते इत्यादि कैयटोक्तिञ्च बौद्धार्थत्वे महत्प्रमाणाम् । किञ्च शशश्रृङ्गो नास्ति, अङकुरो जायते, इत्यतो बोधानापतिः, मम तु बुद्धिसन्नङकुरो बाह्यरूपेण जायत इत्यर्थः । यतो हि अत्र अभावज्ञाने आहार्यमेव प्रतियोगिज्ञानं कारणम्, न तु अनाहार्यप्रतियोगिज्ञानं सम्भवति अन्यथा नीलं सरोजं भवत्येव इति क्रियासङ्गत एवकारस्थले नीलत्वायोगस्य सरोजेऽप्रसिद्धत्वाद्, अत्यन्ताऽयोगव्यवच्छेदो न लभ्येत, उक्तषु स्थलेषु बाह्यसत्ताया अभावान्न निषेधः प्राप्तौ सत्यां निषेधः इति नियमात्, इत्याशङ्कमाना बौद्धार्थमादायैव परास्ता न केवलं बाह्यर्थमात्रेण ।

एष बन्ध्यासुतो यति खपुष्पकृतशेखरः । कूर्मक्षीरचये स्नातः शशश्रृङ्गधनुर्धरः ॥[१२]

इत्यत्र शशश्रृङ्गादीनां बाह्यर्थशून्यत्वेऽपि बुद्धिपरिकल्पितं शशश्रृङ्गवाच्यार्थमादाय प्रातिपदिकत्वं सिद्ध्यति बौद्धार्थाऽस्वीकारे तु अर्थवत्वाभावेन प्रातिपदिकत्वभावात् स्वाद्युत्पतिर्न स्यात् ।

एवञ्च वेदान्तिनां मते इच्छादीनामन्तः करणनिष्ठतया तत्र विषयस्य सामानाधिकरण्येनैव कारणत्वौचितयेन बौद्धपदार्थसत्ताऽऽवश्यकी । एवञ्च बौद्धार्थमादायैव उपदेशेऽजनुनासिक इत् इति सूत्रभाष्ये – को देवदत्तः ? इति प्रश्ने अङ्गदी, कुण्डली, व्यूढोरस्कः, वृत्तबाहुः, ईदृशो देवदत्त इति सङ्गच्छते, अन्यथा एकस्यां देवदत्तव्यक्तौ भेदाभावत्, ईदृश इत्यस्याऽसङ्गतिः । स्वीकारे तु एतैः शब्दैर्यादृशोऽर्थो बुद्धौ भासते तादृशो बाह्य इत्यर्थः । तदुक्तं हरिणा –

शब्दोपहितरूपाँस्तु बुद्धेः विषयतां गतान् ।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ॥[१३]

जन्मादिसूत्रे वाचस्पतिरप्याह – चेतनो हि नामरूपे बुद्धावालिख्य घट इति नाम्ना काबुग्रीवादिरूपेण च बाह्यं घटं निष्पादयति । नित्यत्वस्यापि घटस्य अन्तः सङ्कल्पात्मना सिद्धस्य कर्मकारकत्वं घटं करोतीत्यादौ । गौतमोऽपि असत एवोत्पत्तिकर्तृत्वं कथम् ? इत्याशङ्क्य सूत्रितवान् – बुद्धिसिद्धन्तु तदसत् तत्कार्यमुत्पत्तेः पूर्वं नाशोत्तरञ्चासदपि बुद्धिविषयतया (तु) सिद्धमिति सूतार्थः गौतमेन न्यायसूत्रं लिखितम् –

नासत् न सत् न सदसत् सदसतो वैधर्म्यात् उत्पतेः पूर्वं कार्य न असत्, यतो हि असत् यतो हि असत उत्पत्यसम्भवात् । यदि असत उत्पत्तिः स्वीक्रियते तदा शशविषाणास्य सिकतासु तैलस्ययोत्पत्तिरपि स्यात् न तथा । एवमुत्पत्तेः पूर्वं कार्यं सदपि न वक्तुं शक्यम् किञ्च सतः उत्पत्तिरेव न भवति, यदि स्वीक्रियते तदापि उत्पत्तिधाराया अविरामाद् अनवस्था स्यात् । एवं कार्यस्य सदसदुभयात्मकमपि न वक्तुं शक्यते, यतो हि तयोः सदसतोर्वैधर्म्यात् सामानाधिकरण्यमेव न स्यात् । अस्यापत्तेर्वारणार्थं न्यायभाष्यकारेणोक्तम् उत्पत्तेः पूर्व कार्यमसदेव । तच्च सूत्रम् – उत्पादव्यदर्शनात् अर्थात् कार्यमात्रस्योत्पत्तिविनाशप्रत्यक्षसिद्धत्वाद् उत्पत्तेः पूर्वं कार्यमसदेव, इत्थं स्वीकारे पूर्वोक्तशशविषाणोत्पत्तेः सिकतासु तैलोद्भवस्य च दोषस्य तदवस्थत्वादेव सूत्रमुट्टङ्कितम् – बुद्धिसिद्धन्तु तदसत्, अर्थात् कार्यस्योत्पत्तेः पूर्वं नाशोत्तरं वा असत्वेऽपि बुद्धिविषयत्वात् सिद्धमेव । एतत्सूत्रभाष्यदर्शनात्, नैयायिकैरपि बौद्धार्थः स्वीक्रियत एव इति निश्चीयते ।

स्मृतावपि लिखितम् –

विप्र पृथ्व्यादिचित्तस्थं न बहिष्ठं कदाचन ।
स्वप्न – भ्रम मदाद्येषु सर्वैरवानुभूयते ॥
बहिर्न किञ्चिदप्यस्ति खाद्य्रव्ध्युर्वीदिगादिकम् ।
एतत्स्वचित्त एवास्ति पत्रपुञ्जमिवाङ्कुरे ॥
फलादि स्फारतामेति यथैव बहिरङ्कुरात् ।
बहिः प्रकटतां याति तथा पृथ्व्यादिचेतसः ॥
सत्यं पृथ्व्यादिचित्तस्थं न बहिष्ठं कदाचन ।
आबालमेतत्पुरुषैः सर्वैरेवानुभूयते ॥
स्वप्नभ्रममदावेगरागरोगादिदृष्टिषु ।

---

१२ परमलघुमञ्जूषायाम् पृ. सं. ३९

१३ वाक्यपदीये पृ. सं. ८९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एवं विधानि प्रमाणानि बहूनि सन्ति बौद्धार्थसत्वे । अतः सर्वैरपि वेदान्तादिदार्शनिकैः बौद्धार्थः स्वीक्रियत एव । व्याकरणे तु अतिदेशविधायकानि वत्यर्थघटितानि वतिप्रत्ययघटितानि सर्वाण्यपि सूत्राणि बौद्धार्थसत्तामेव पोषयन्ति । तथा लौकिकप्रयोगान्यपि बौद्धार्थसत्वे प्रमाणानि । यथा – कुम्भकारः घटं करोति इत्यादिघटस्य कर्मसंज्ञा भवति, सा च संज्ञा बौद्धार्थऽस्वीकारे न स्यात्, यतो हि कारकं सत् कर्मसंज्ञा भवति । कारकन्नाम क्रियाजनकं सर्वत्रैव क्रियाजनकत्वपक्षस्यैव कारकत्वव्यवहारः । कारकत्वे सति क्रियानिरुपितफलाश्रयत्वेन कर्मत्वं स्यात् । अतो बौद्धार्थमन्तरा कर्मत्वन्न स्यात् । तथा च लौकिकप्रयोगोऽपि व्यकुप्येत, अतो बौद्धार्थसत्वे नास्ति शङ्कापङ्कलङ्कावसरः ।

५. धात्वर्थविचारः

सर्वञ्च नामधातुजमाह इति शाकटायनवचनानुरोधेन सर्वेषामपि लौकिकवैदिकोभयव्यवहारत्मकानां शब्दानां कारणीभूतो धातुर्वर्तते । तस्य धातोः कोऽर्थः? कानि च दार्शनिकानां प्रारस्परिकमतानि इति जिज्ञासायां समुपपद्यमानायां धात्वर्थविषये विवन्दते दार्शनिकाः । तत्र प्राचीननैयायिकाः मीमांसकाश्च फलमात्रं धात्वर्थो व्यापारस्तु प्रत्ययार्थ इति स्वीकुर्वन्ति । तेषां मते धातूनां सकर्मकत्वाकर्मकत्वं भञ्ज्यात् एतदर्थमुट्टङ्कयन्ति नव्यवैयाकरणाः –

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः । फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥[१४]

कारिकायामस्यां फलञ्च व्यापारश्चेति फलव्यापारौ तयोः फलव्यापारयोरितिरेतरद्वन्द्वेन परवल्लिङ्गत्वात् पुंलिङ्गस्य सप्तम्यन्तस्य सप्तम्या विभक्तेर्निरूपितत्वमर्थः । एवञ्च – फलनिष्ठं व्यापारनिष्ठञ्च यद् वाच्यन्तन्निरूपितवाचकतावत्वं धातौ वर्तते । अर्थात् फले व्यापारे च धातुपदस्य शक्तिः । तिङर्थास्तु आश्रयाः । कस्याश्रया इत्याशङ्कायामुपस्थिततत्वात् फलाश्रया व्यापाराश्रया च इत्यर्थः ।

फले प्रधानं व्यापार इत्यस्य तु फलापेक्षया व्यापारः प्रधानमिति भावः। तिङर्थास्तु कर्तृकर्मादयः धात्वर्थे विशेषणं स्मृताः । स्मृत इतयत्र स्मृताश्च स्मृतश्च इति एकशेषेण तिङः स्मृताः, धात 'स्मृत इति ज्ञेयः । परं धात्वर्थविषये मीमासकनैयायिकादयो दार्शनिका बहुधा विचारं प्रकुर्वन्ति । वैयाकरणमतोन्मज्जनीनामधेये पुस्तके दार्शनिकविचारमन्थनं सुविस्तृतम् । अत्र फले व्यापारे च पृथक् पृथक् शक्तिरिति केचन, केचन एकैव शक्तिरेकवृन्तगतफलद्वयफलत्रितयवत् स्वीकुर्वन्ति । परन्तु फलव्यापारायोरित्यत्र द्विवचनदर्शनात् फले व्यापारे च धातोर्भिन्ना भिन्ना शक्तिः प्रतिभाति ।

तत्र मीमांसकमते द्वितीयाया निष्ठत्वमर्थः, परन्तु धातोः फलमात्रमर्थः व्यापारस्तु प्रत्ययार्थः । प्राचीननैयायिकाः–व्यापारमात्रं धात्वर्थः फलन्तु द्वितीयार्थः एतन्मतद्वयेऽपि धातोः सकर्मकत्वाकर्मकत्वव्यवस्था भञ्ज्यात् । अतः प्राचीननवीनोभयवैयाकरणाः फले व्यापारे च खण्डशः शक्तिं स्वीकुर्वन्ति । नव्यनागेशभट्टमहोदयस्तु फलावच्छिन्ने व्यापारे, व्यापाराछिन्ने फले च धातोः शक्तिः स्वीकरोति । तत्र कर्तृकर्मप्रत्ययानां नियामकत्वं वाञ्छति, कर्तरि फलावच्छिन्ने व्यापारे, कर्मणि च व्यापारावछिन्ने फले शक्तिमुररीकरोति । तथा च देवदत्तः ग्रामं गच्छति, इति वाक्यात् देवदत्ताभिन्नैककर्तृकवर्तमानकालिकग्रामभिन्नैककर्मकगमनानुकूलो व्यापार इति व्यापार मुख्यविशेष्यकः शब्दबाधो भवति ।

पुनश्च "देवदत्तेन ग्रामो गम्यते" इति कर्मप्रत्ययस्थले तु देवदत्तभिन्नैककर्तृकवर्तमानकालिकव्यापारजन्यग्रामनिष्ठसंयोग इति फलमुख्यविशेष्यकः शब्दबोधो जायते। एतस्मादेव फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्, फलसमानधिकरणव्यापारवाचकत्वमकर्मकत्वम्[१५], इति सकर्मकाकर्मकव्यवस्थापि स्थैर्यताम्भजते । उक्तञ्च वैयाकरणभूषणसारे– फलव्यापारयोर्धातुरित्यादिः अनेनार्धेन श्लोकेन वाक्यार्थः, अर्धेन च पदार्थो वर्ण्यते । मञ्जूषायामत एवोक्तम् नागेशेन – फलावच्छिन्ने व्यापारे व्यापारवच्छिन्ने फले च क्रमशः कतृकर्मस्थले शक्तिः इयान्तु विशेषः – फलव्यापारयोः, उभयोर्धातुवाच्यत्वे समानेऽपि प्राचीनवैयाकरणैर्दीक्षितादिभिः सर्वत्र अख्यातस्थले व्यापरमुख्यविशेष्यक एव शब्दबोध अङ्गीकृतः । नागेशादिभिस्तु – कर्मप्रत्ययस्थस्ले फलमुख्यविशेष्यक एव कर्तृपत्ययस्थले च व्यापारमुख्यविशेष्यक एव शाब्दबोध अङ्गीकृतः ।

एवमेव नव्यनैयायिकैरपि फले व्यापारे च धातोः शक्तिरङ्गीकृता । परन्तु नैयायिकरीत्या प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधः कर्तृप्रत्ययस्थलेऽपि, वैयाकरणास्तु व्यापारमुख्यविशेष्य एव शाब्दबोधं वाञ्छति ।

नैयायिकानाम्–"देवदत्तःग्रामंगच्छतीत्यत्रकर्तृप्रत्ययस्थलेबोधस्तु-वर्तमानकालिकग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलकृतिमान्

---

१४ वैयाकरणभूषणसारे पृ. सा. १२

१५ वैयाकरणसिद्धान्तलघुमञ्जूषायाम् पृ सं. ८९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

देवदत्तः। अत्र समन्वयस्तु- कालस्य परिच्छिन्नत्व सम्बन्धेन व्यापारेऽन्वयः, ग्रामस्य निष्ठत्वसंबन्धेन संयोगेऽन्वयः, तस्य = संयोगस्य अनुकूलत्वसम्बन्धेन व्यापारेऽन्वयः, व्यापारस्य च जनकत्वसंबन्धेन कृतावन्वयः, तस्या = कृतेः समवायसंबन्धेन देवदत्तेऽन्वयः एवञ्चोक्तबोधः फलितः।

६. निष्कर्षः

वस्तुतस्तु "अर्थ बुद्ध्वा शब्दरचना" इति सिद्धान्तो लौकिकन्यायसिद्धः। अर्थोऽपि शक्य–लक्ष्य–व्यङ्ग्य तात्पर्यभेदेन चतुर्धा भवति। तेषु यथा लोके यदा कदा अनुभूयते विलक्षणार्थः। सः कः? इति जिज्ञासायाः शान्तिर्बौद्धार्थमादय वैयाकरणैर्विहितः। शशश्रृङ्गादिपदानां साधुत्वप्रतिपादनञ्च बौद्धर्थमाध्यमेनैव भवतीति हेतोर्बौद्धार्थः सम्पन्नः। दर्शनन्नाम विचारः, वैयाकरणराद्धान्ते विविधविषये गोमुखवत् गभीरविचाराणां नैय्युन्यन्नास्ति। अतो व्याकरणस्य दर्शनत्वे नापत्तिः। दर्शनत्वसाधने शब्दस्य नितान्तरूपेणावश्यकतां हृदि निधायोपस्थापितोऽयं धात्वर्थविषयः। अत्र विषयत्रयाणां संक्षेपेण प्रतिपादनेऽपि मुख्यविषयस्य संग्रहे प्रयतवानहम्।

सहायकग्रन्थसूची

- पतञ्जलिः, महाभाष्यम् , वारणसी, चौखम्बा संस्कृत प्रतिष्ठान सन्, १९८७
- पाठकः, रङ्गनाथः, स्फोटदर्शनम्, पटना, बिहार राष्ट्रभाषा परिषद्, वि.सं. २०२४
- भट्टः, नागेशः, वैयाकरणसिद्धान्तलघुमञ्जूषा, नई दिल्ली, राष्ट्रिय सस्कृत संस्थानम्, सन् १९८३
- भट्टः, नागोजी, परमलघुमञ्जूषा, वाराणसी, चौखम्बा संस्कृत प्रतिष्ठान, सन् १९९२
- भट्टः, कौण्डः, वैयाकरणभूषणसारः, वारणसी, चौखम्बा ओरियन्टालिया, सन् १९८५
- दीक्षीत, भट्टोजी :, वैयाकरणसिद्धान्तकौमुदी, बम्बई, वेङ्कटेश्वर प्रेस वि.सं. २०४०
- भर्तृहरिः, वाक्यपदीयम्, चौखम्बा संस्कृत संस्थानम्, सन् १९९६
- गौतमऋषि, न्यायसूत्रम्, (वात्स्यान भाष्यम्), वाराणसी, सं.सं.वि.वि., सन् १९७८
- मैत्रेय्युपनिषद्, वारणसी, चौखम्बा विद्याभवन, सन्, १९९१
- स्वामी, द्वारिकादासः, न्यायदर्शनम् वारणसी, चौखम्बा संस्कृत सीरीज सन्, १९८९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कवेः टीकारामस्य 'मातृभूशोकदुर्दिनम्' कविताया विश्लेषणम्

–उपप्रा. डा. महानन्दतिमिल्सिना
पिण्डेश्वरविद्यापीठम्

१. पृष्ठभूमिः

संस्कृतभाषायां वेदोपनिषदितिहासपुराणधर्मशास्त्रदर्शनकाव्यसदृशानि वहुविधानि ग्रन्थरत्नानि रचितानि सन्ति । भाषेयं विश्वस्यैव प्राचीनतमा च मन्यते । मूलतोऽस्या भाषाया विकासः प्राधान्येन भारतदेशात् सञ्जातः । अधुना युरोप-अमेरिकान्तर्गतेषु देशेष्वपि अस्या भाषाया महत्ता प्रतिदिनं संवर्धिताऽवलोक्यते । कालिदास-भारवि-माघादिभिः कविभिर्गुणगरिमयुतानि काव्यानि विरचय्य संस्कृतसाहित्यस्य महत्ता विश्वसाहित्येऽपि प्रकाशिता । नेपालदेशेऽपि कुलचन्द्रगौतम-सोमनाथसिग्देल-दधिराममरासिनी-पूर्णप्रसादव्राह्मण- माधवप्रसाददेवकोटा- उमानाथपन्थी- हरिप्रसादाचार्य- भीमकान्तपन्थी- भरतराजमन्थलीय- टीकारामपन्थी - वेणीमाधवढकालप्रभृतिभिर्विद्वद्भिः संस्कृतसाहित्यस्य विकासे समुल्लेख्यं योगदानं विहितम् । अस्यामेव संस्कृतसाहित्यपरम्परायां टीकारामाधिकारिणोऽपि विशेषमवदानं संलक्ष्यते ।

नैपालकस्य कास्कीमण्डले सञ्जातेनानेन संस्कृतसाहित्यसेवकेन टीकारामेण 'चन्द्रप्रभा' काव्यं संरचितम् । अनेनान्यान्यपि काव्यरत्नानि संरचय्य संस्कृतभाषायाः क्षेत्रे साहित्यस्य प्रवर्द्धने च महती भूमिका प्रदर्शिता । अस्य कवेः शान्तिप्रियो भवतु नूतनवत्सरोऽयम्, सुरवाक् शुभकामना, जयजगदम्बे, योगिनरहरिवन्दना चेत्याद्या रचनाश्च २०७० तमे वैक्रमाब्दे जयतु संस्कृतमिति संस्थया प्रकाशिते संस्कृतकवितासङ्ग्रहे सङ्कलिता विद्यन्ते । अस्य कवेर्टीकारामस्य मातृभूशोकदुर्दिनमिति विश्लेष्या कविताऽपि अस्मिन्नेव सङ्ग्रहे सङ्गृहीताऽवलोक्यते । नैपालकस्य सुरम्यायाः प्रकृतेश्चित्रणे कविरसौ सिद्धहस्तो विद्यते । नेपालदेशे विद्यमानानां सौन्दर्यसूचकानां हिमालय-नदी-वन-पर्वत-निर्झरप्रभृतीनां तत्त्वानां सूक्ष्मरूपेण वर्णनेऽसौ ख्यातो दृश्यते । समाज-धर्म-संस्कृति-राजनीति-नीत्युपदेशप्रतिपादनेऽप्यस्य कविताः प्रसिद्धाः सन्ति । प्रासङ्गिक्यामस्यां कवितायामप्यनेन विविधैर्दुःखैः समाक्रान्ताया मातृभूमेश्चित्रणं कृतमस्ति ।

२. 'मातृभूशोकदुर्दिनम्' कविताया विश्लेषणम्

जयतुसंस्कृतम् इति संस्थया प्रकाशिते संस्कृतकवितासङ्ग्रहस्य द्वितीये पुष्पे सङ्कलिता कवेर्टीकारामस्य मातृभूशोकदुर्दिनमिति त्रयोदशश्लोकान्विता कविता देशभक्तिमूला राष्ट्रप्रेम्ण भावनया मण्डिता च वर्तते । कवितैषा विविधकवितातत्त्वानामाधारेण विश्लेष्यते ।

२.१ शीर्षकः

प्रस्तुतायाः कवितायाः शीर्षको मातृभूशोकदुर्दिनम् विद्यते । अस्माकं मातृभूमिर्नेपालोऽधुना विविधैः शोकैर्दुर्दिनं मेघाच्छन्नं वा वर्तते । एषा भूमिर्खलजनैः प्रपीडिताऽस्ति । अस्माकं देशे शान्तिर्नास्ति । समये समये सर्वकारस्य विपक्षे आन्दोलनं जायते । प्रजातन्त्रस्य लोकतन्त्रस्य गणतन्त्रस्य च नाम्नि जायमानेनान्दोलनेन देशस्य सामाजिकी सांस्कृतिकी अन्या चावस्था दयनीया विद्यत इति कविताया भावं सम्प्रेषयितुमयं शीर्षकः सफलं दृश्यते ।

२.२ छन्दः प्रयोगः

कविताया महत्त्वपूर्णं तत्त्वमेव छन्दो वृत्तं वा । छन्दःप्रयोगेणैव कविता श्रुतिमधुरा गेयात्मिकी च भवति । अस्यां कवितायां सुन्दरीवृत्तस्य प्रयोगो विद्यते । अस्मिन् वृत्ते प्रथमतृतीयपादयोः सगणौ, एको जगणः, एको गुरुवर्णश्च भवति, तथैव द्वितीयचतुर्थचरणयोः सगण-भगण-रगणाः, एको लघुवर्णः, एको दीर्घवर्णश्च भवति ।[1] अस्याः कविताया एकं पद्यम्, यथा-

कथमद्य विषाक्तधूमवद् गगनं भ्रान्तपतत्त्रिसङ्कुलम् ?
हिमशैलमनोहराऽटवी रुचिहीना ज्वलतीव हा ! भुवि ॥[2]

विविधैः शोकैर्दुःखितायाः स्वकीयाया जन्मभूमेरवस्थां जनयितुमिदं सुन्दरीवृत्तं समुचितं संलक्ष्यते ।

---

१ अयुजोर्यदि सौ जगौ युजोः, सभरा ल्गौ यदि सुन्दरी तदा ।
कान्तिचन्द्रभट्टाचार्यः, काव्यदीपिका (टीका : वेणीमाधवढकालः), काठमाडौं : विद्यार्थी पुस्तक भण्डार, पृ. ३१७ ।

२ विष्णुप्रसादशर्मा देवकोटा एवमन्ये (सम्पा.), संस्कृतकवितासङ्ग्रहः, काष्ठमण्डपम् : जयतुसंस्कृतम्, पृ. ४८ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२.३ कविताया उद्देश्यम्

कविताया: संरचने कवे: किमप्युद्देश्यं भवत्येव । कवेरुद्देश्यं भावो वा कवितायां संलक्ष्यते । मातृभूमौ विद्यमानाभिर्नैकाभिर्विसङ्गतिभिर्द्रवीभूतस्य कविहृदयस्य माध्यमेन कविता निःसृता दृश्यते । अस्माकं नेपालदेशे प्राकृतिकी शोभा वर्तते । अत्र हिमशैला विद्यन्ते । हरितानि वनानि, निर्मला नद्यश्च सन्ति । अत्र धार्मिकी सांस्कृतिकी च विविधता वर्तते, परमत्र राजनीतिकी स्थिरता आर्थिकी समृद्धता नास्ति । अत्र मनोहरा अटवी अपि रुचिहीनाऽस्ति, गिरिनिर्झराणां मनोहरध्वनिरपि आर्तिध्वनिना गुञ्जितो विद्यते । इयं स्थिरा भूमिरपि अस्थिरा जाता, इयं खलैरपाकृता पीडिता च वर्तते । जन्मभूमेर्वक्षसि युद्धरतानां मनुजानां शोणितैर्नदी प्रवाहिता वर्तते । नैपालका बहुसङ्ख्यका जना निर्धनाः सन्ति । एतान् धनयुतान् विधातुं सर्वकारः किमपि कर्तुं न शक्नोति । क्षुधार्ता जनाः परस्परं युद्धं विदधति । देशे आर्थिकी समुन्नतिर्नास्ति । विकासनिर्माणस्य कार्यमपि सन्तोषप्रदं न, अद्यतना नेतारः स्वार्थपरायणा विद्यन्ते, राष्ट्रस्य समुन्नत्यै कोऽपि न चिन्तयति । अतो मातृभूमिरियं दुःखिता वर्तते । नेतृवर्गस्य राष्ट्रघातकं कार्यं विलोक्यैषा भूमिर्खिन्ना जाता, कान्तिहीना च दृष्टा । स्वकीयां मातृभूमिं प्रसन्नां समुज्ज्वलां च विधातुमस्माकं कर्तव्यमस्ति । अन्ये देशा विकसिता धनान्विताश्च जाताः, परमस्माकं देशोऽतीव निर्धनः । वयं स्वकीयात् कर्तव्यात् च्युताः स्मः । अस्माकं पूर्वजैर्देशस्य शुभाकाङ्क्षया कार्याणि विहितानि परमधुनाऽस्माभिर्देशस्य समुन्नत्यै किमपि न विहितम् । अस्माभिः परस्परं मतभेदं परित्यज्यैकीभूय देशे विद्यमानं शोकस्य दुर्दिनं निवारणीयमिति कविः कथयति -

शुभमेष्यति शोकदुर्दिनं जनताजाड्यतुषारसम्भवम् ।
कथितं विपदन्तरं सुखं विपदुन्मूल्य सुखोन्नताभवम् ॥ (श्लो.१३)

स्वकीया जन्मभूमिर्दुर्दिनमुक्ता समृद्धा आदर्शान्विता च भवेदित्याकाङ्क्षा एव कवेः कवितालेखनस्योद्देश्यं संलक्ष्यते ।

२.४ अलङ्कारप्रयोगः

अलमुपपदपूर्वकात् कृधातोर्घञ्प्रत्यये सत्यलङ्कारशब्दो निष्पद्यते । अलं क्रियते अनेनेत्यलङ्कार इति करणप्रधानव्युत्पत्त्याऽलङ्कारशब्दः शरीरसुषमावर्द्धकानां हारादीनामिव काव्यशोभासम्पादकानामनुप्रासोपमालङ्काराणां वाचकः । अलङ्कृतिरलङ्करणं वाऽलङ्कारः इति भावप्रधानोऽलङ्कारशब्दः सर्वेषां साहित्यसौन्दर्याधायकतत्त्वानां वाचकः ।[३] मम्मटप्रतिपादितस्यालङ्कारस्य लक्षणानुसारेणाङ्गिनं रसमनुप्रासोपमादयोऽलङ्काराः शब्दार्थमाध्यमेनोपकुर्वन्ति, परं सर्वदैव न कदाचिदेव ।[४] कवेर्टीकारामस्य मातृभूशोकदुर्दिनमिति कवितायां बहूनामलङ्काराणां प्रयोगोऽवलोक्यते । कवितायां प्रयुक्ताः कतिपयेऽलङ्कारा अत्र प्रदर्श्यन्ते-

२.४.१ अनुप्रासः

स्वरवैसादृश्येऽपि व्यञ्जनवर्णानां साम्येऽनुप्रासः । अस्यापि द्वौ भेदौ दृश्येते । अनेकस्य व्यञ्जनस्य सकृत् सादृश्यं छेकानुप्रासः तथैवैकस्यानेकस्य वा व्यञ्जनस्य द्विर्बहुकृत्वो वा सादृश्यं वृत्त्यनुप्रासः ।[५] अस्यां कवितायामनुप्रासालङ्कारस्योदाहरणम्-

गिरिनिर्झरझर्झरध्वनिः कथमार्तिस्वनगुञ्जितोऽजनि ।
गजगोमृगसुन्दरी दरी मनुजैरासवभूः कृता भुवि ॥(श्लो.२)

अत्र झ-र-गवर्णानां असकृत् साम्याद् वृत्त्यनुप्रासः ।

२.४.२ यमकम्

अर्थे सत्यर्थभिन्नानां वर्णानां तेनैव क्रमेणावृत्तिर्यमकालङ्कारः ।[६] यथा-

'भवती सुरसृष्टिरुत्तमा सुरसावत् सुरसाऽऽवृता क्षुधा ।'(श्लो.८)

अत्र 'सुरसा-सुरसा' इत्यत्र यमकालङ्कारः ।

२.४.३ उपमा

---

३ कल्याणभारती, माघेऽलङ्कारविमर्शः, जयपूरम् : उषा पब्लिसिङ् हाउस, ई. १९७८, पृ. ८ ।

४ उपकूर्वन्ति तं सन्तं येऽङ्गद्वारेण जातूचित् । हारादिवदलङ्कारास्तेऽनूप्रासोपमादयः ॥
मम्मटः, काव्यप्रकाशः, ८/६७ द्वि.सं. वाराणसी : चौखम्बासंस्कृतप्रतिष्ठान, ई. १९९४ पृ.३८५ ।

५ वर्णसाम्यमनुप्रासः छेकवृत्तिगतो द्विधा ।
सोऽनेकस्य सकृत्पूर्वः एकस्याप्यसकृत्परः ॥
मम्मटः, काव्यप्रकाशः, ९/७९, पूर्ववत् ।

६ सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहते ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥
विश्वनाथः, साहित्यदर्पणः, १०/८, पं.सं., वाराणसी : कृष्णदास अकादमी, ई. १९९५, पृ. ७७७ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भिन्नयोरपि उपमानोपमेययोः साधर्म्ये उपमालङ्कारो भवति। एषोपमा पूर्णालुप्ताभेदेन द्विविधा।[७] अस्यां कवितायामुपमालङ्कारस्य प्रयोगोऽनेकत्र प्राप्यते । यथा -

'वसुधाऽसि सुधेव वल्लभा ससुराणाञ्च विपश्चितां शुभा ।' (श्लो.३)

अत्र वसुधा सुधा इव वल्लभा इत्युपमालङ्कारः । यथा वा -

'विवुधैः कवितेव सेविता कथमद्यासि खलैः प्रपीडिता ? ।' (श्लो.७)

अत्र विवुधैः कविता इव भूपतिभिर्भूमिः सेविता इत्युपमालङ्कारः ।

२.४.४ मालोपमा

यत्र एकस्योपमेयस्य बहूनि उपमानानि वर्णितानि भवन्ति तत्र मालोपमा ।[८] यथा-

त्वमसि प्रमदेव सुन्दरी सुकुमारीव शिरीषमञ्जरी ।
विकसद्गुणगौरवाञ्चिता वत ! सीतेव खलैरपाकृता ॥ (श्लो.६)

अत्र उपमेयभूताया भूमेः प्रमदेव शिरीषमञ्जरीव सीतेवेत्यादीनि बहूनि उपमानानि प्रस्तुतानि सन्ति, अतो मालोपमालङ्कारः ।

२.४.५ उत्प्रेक्षा

प्रकृतस्यार्थस्य असम्भविनोपमानेन सह यत्सम्भावनं क्रियते सैवोत्प्रेक्षा ।[९] यथा -

'हिमशैलमनोहराऽटवी रुचिहीना ज्वलतीव हा ! भुवि ।' (श्लो.१)

अत्र मनोहरायामटव्यां ज्वलनस्य सम्भावनाद् उत्प्रेक्षालङ्कारः ।

२.४.६ रूपकम्

उपमानोपमेययोरभेदारोपे रूपकालङ्कारः ।[१०] रूपकालङ्कारे उपमानोपमेययोरतिसाम्याद् भेदप्रतीतिरपह्नुता भवति । यथा-

'तव चित्तसरोजमव्ययं क्षतवैक्लव्यमयं धरे !' (श्लो.४)

अत्र चित्त-सरोजयोरभेदारोपात् रूपकालङ्कारः ।

२.४.७ विरोधाभासः

वस्तुगत्या विरोधाभावेऽपि यत्र विरुद्धमिवाभिधानं स विरोधाभासः ।[११] यथा-

'कथमद्य कृताऽस्थिरा स्थिरा जननि ! त्वं निजसन्ततिप्रिया ? ॥'(श्लो.३)

अत्र स्थिरा कथं अस्थिरा इत्यत्र विरोधाभासालङ्कारः ।

२.५ रसध्वनिगुणानां प्रयोगः

अस्यां कवितायां नेपालभूमेर्दीनावस्थायाश्चित्रणं प्राप्यते । अत्र दुःखिताया भूमेः कारुणिकी अवस्था प्रदर्शिता वर्तते । यथा-

अहहा ! तव शोकदुर्दिनं विषवन्मे हृदयं निकृन्तति ।
किमु मातुरवस्थयाऽनया सुरलोकोऽपि सदैव खिद्यते ? ॥ (श्लो.१०)

अत्र प्राधान्येन करुणरसः प्राप्यते। कवितायां कवेर्मातृभूमिविषयको रतिभावश्च प्रकटितोऽस्ति। कवितायामसंलक्ष्यक्रमरूपध्वनिरपि ध्वनिता प्राप्यते। अत्र कवितायाः श्लोकेषु स्वल्पसमासेनासमस्तपदप्रयोगबाहुल्येन च माधुर्यगुणस्य वैदर्भीरीतेश्च बाहुल्यमवलोक्यते। यथा-

विपिने रुदतीव वानरः करवालैर्दलितोऽथवा नरः ?
इति साध्वसभग्नमानसे ! सह पीडामधुना वसुन्धरे ! (श्लो.११)

अत्र माधुर्यगुणस्य वैदर्भीरीतेश्चानुकूलाः वर्णरचनाः प्रयुक्ता विद्यन्ते । अस्यां कवितायां स्वभाविकी भाषा शैली च प्राप्यते ।

---

७ साधर्म्यमूपमा भेदे पुर्णा लूप्ता च, साऽग्रिमा ।
मम्मटः, पुर्ववत्, १०/८७, पृ.४३८ ।

८ मालोपमा यदेकस्योपमानं बहू दृश्यते ।

९ सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।
मम्मटः, पुर्ववत्, १०/९२, पृ.४५८ ।

१० तद्रूपकमभेदो य उपमानोपमेययोः ।
मम्मटः, पुर्ववत्, १०/९३, पृ.४६४ ।

११ आभासत्वे विरोधस्य विरोधाभास इष्यते ।
अप्पयदीक्षितः, कूवलयानन्दः ७६, (व्याख्याकारः डा.भोलाशङ्करव्यासः), च.सं., वाराणसी : चौखम्वाविद्याभवनम्, ई. १९९७, पृ.१४१ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. निष्कर्षः

टीकारामस्य मातृभूदुर्दिनमिति कवितया स्वकीयं देशं नेपालं प्रति कवेरगाधा भक्तिः प्रकटिता । यदि नैपालका जनाः खिन्ना अभवन् चेन्नेपालभूमिरपि चिन्तायुता व्याकुला च भवति । अस्माकं नेतारः कर्तव्यपरायणा देशभक्ता न विद्यन्ते । ते देशस्य कृते जनतायाश्च कृते निःस्वार्थतया कार्याणि विधातुं न शक्नुवन्ति, वैयक्तिके स्वार्थे तल्लीना दृश्यन्ते । अस्माकं पूर्वजैस्त्यागस्य भावनयैकीकरणभूतं देशमेनं समृद्धं विधातुं नेतृब्रुवा दत्तचित्ता न, अपि तु स्वार्थपरायणा एव दृश्यन्ते । प्राकृतिकदृष्ट्या धार्मिक-सांस्कृतिकदृष्ट्या च समृद्धेऽस्मिन् देशे नेतृत्ववर्गस्य दूरगामिनो चिन्तनस्याभावेन देशो रुग्णो जातो विद्यते । अतो देशस्य समुत्थाने अस्माभिरपि चिन्तनं कार्यमिति कविना सङ्के नेपालदेशस्य वास्तविक्यां स्थित्यां प्रस्तुता कविता समर्था वर्तते । विविधैरलङ्कारैरलङ्कृतेयं तितमस्ति कविता समुत्कृष्टाऽवलोक्यते, नैपालकस्य संस्कृतसाहित्यपरम्परायामस्याः कवितायाः महद्वैशिष्ट्यं संलक्ष्यते ।

सन्दर्भग्रन्थसूची

- अप्पयदीक्षितः, कुवलयानन्दः, (व्याख्याकारः डा.भोलाशङ्करव्यासः), च.सं., वाराणसी : चौखम्बाविद्याभवन, ई. १९७६ ।
- आचार्यरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, वाराणसी : चौखम्बाविद्याभवन, २०१० ।
- कल्याणभारती, माघेऽलङ्कारविमर्शः, जयपुरम् : उषा पब्लिसिङ् हाउस, ई. १९७८ ।
- कान्तिचन्द्रभट्टाचार्यः, काव्यदीपिका (टीका : वेणीमाधवढकालः), काठमाडौं : विद्यार्थी पुस्तक भण्डार, २०६७ ।
- मम्मटः, काव्यप्रकाशः, द्वि.सं., वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान ई. १९९४ ।
- विश्वनाथः, साहित्यदर्पणः, पं.सं., वाराणसी : कृष्णदास अकादमी ई.१९९५ ।
- विष्णुप्रसादशर्मा देवकोटा एवमन्ये (सम्पा.), संस्कृतकवितासङ्ग्रहः, काष्ठमण्डपः जयतुसंस्कृतम्, २०७० ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अरस्तुभरतयोः नाट्यसिद्धान्तः[1]

सहप्रा.डा.मुकुन्दप्रसादलामिछाने
वाल्मीविद्यापीठम्

१. विषयप्रवेशः

प्राचीनग्रीसदेशस्य विश्वविश्वविख्यातो महामनीषी अरस्तुः चतुर्थे ईशवीयशतके (३८४-३२२) स्वकीयया असाधारणप्रतिभया यथा ज्ञानविज्ञानदर्शनराजनीत्याद्यनेकविधानां मेरुदण्डो बभूव तथैव काव्यशास्त्र-जगत्यपि स्वीयामसाधारणीं प्रतिभाविभूतिं विस्तार्य निखिलपाश्चात्यकाव्यसिद्धान्तानां मानदण्डायमानो बभूव । तद्विरचितं काव्यशास्त्रम्, भाषणशास्त्रञ्चाद्यापि प्राच्यपाश्चात्यमनीषिमरालानां मानसानि मोदयतितराम् । तत्रापि एतदीयं काव्यशास्त्रं तु पाश्चात्यपरम्परायाः आर्षग्रन्थतया अस्माकं वेदग्रन्थ इव लब्धादरातिशयं प्रमाणशास्त्रं मन्यते । तद्विरचितेषु ग्रन्थेषु षड्विंशत्यध्यायेषु निबद्धे काव्यशास्त्रे मूलतो नाट्यसिद्धान्त एव प्रतिपादितो वीक्ष्यते काव्यसमीक्षकैः । सम्भवतः अस्मिन्नेव प्राचीनकाले महामुनिर्भरतः भारतवर्षमलञ्चकार येन ज्ञानविज्ञानकलारत्नाकरं नाट्यवेदत्वेन लब्धादरं नाट्यशास्त्रं प्रणीतम् । षड्त्रिंशदध्यायात्मकेऽस्मिन् ग्रन्थरत्ने नाट्यविषये यावन्ति विषयजातानि सन्निविष्टानि सन्ति न तावन्ति इदानीं यावद् भूमण्डलस्य यस्मिन् कस्मिन्नपि ग्रन्थे । भिन्नभूभागसंस्कृतिसमुत्पन्नयोरप्यनयोः काव्यशास्त्रनाट्यशास्त्रयोर्विद्यमाना सादृश्य-समानताविभूतिः काव्यशास्त्रिणां मानसानि सहसा समावर्जयति । अरस्तुमहोदयप्रतिपादिताः अनेके नाट्यसिद्धान्ता भरतप्रतिपादितनाट्यसिद्धान्तसंवादिनो विलोक्यन्ते ।

२. अरस्तुप्रतिपादितो नाट्यसिद्धान्तः

मूलतो नाट्यसिद्धान्तं, तत्रापि त्रासदीसिद्धान्तं प्रतिपादयता अरस्तुमहाशयेन नाटकस्य इव सर्वेषां काव्यानां रचनायाः मूलतत्त्वन्तु अनुकरणमेवेति साधितम् । तदीयपदावल्यां -"'चित्रकार इव अथवाऽन्यः कोऽपि कलाकार इव कविरपि अनुकर्ता अस्ति"[२] । तदीयानुकरणसिद्धान्तः सर्वकाव्यप्रकारव्यापिमहासिद्धान्ततया चकास्ति पाश्चात्यकाव्यसिद्धान्तपरम्परायाम् । अत एव तेन काव्यस्य सर्वेषु तत्त्वेषु अनुकरणतत्त्वमेव भासमानं विलोकितम् । तस्यैव पदावल्यां "'महाकाव्य-त्रासदी-कामदी-स्तुतिकाव्यानि (रौद्रस्तोत्रादीनि) बहुधा वंशीवीणावादनानि च मुख्यतोऽनुकरणस्य प्रकारास्तथापि तानि अनुकरणस्य माध्यम-विषय-रीति -दृशा त्रिधाऽन्योन्यं विभज्यन्ते"[३] । 'माइमेसिस' इति ग्रीसदेशीयो अनुकरणशब्दो मूलतः लोकानुकृतित्वाद् नाटक एवान्वर्थतां भजमानोऽनुभूयते । अनेन सर्वकाव्यप्रकारव्यापितया सिद्धान्तोऽयं विवेचितः । अतः एव तेनोक्तम् "यद्यपि प्रथमतः काव्यमनुकरणस्वरूपमेव तथापि तत्र आदर्श एव यथार्थमतिक्रम्य तिष्ठति । अतः मानवजीवनस्य भावोद्रेकाय आदर्शभूता प्रस्तुतिर्भवति कलाकृतिः"[४] । अरस्तुमते सामान्यचित्रात्मक-मनुकरणम् अनुकरणं नास्ति । तस्यैव वाक्यावल्याम्- '"अनुकारकाणाम् अनुकरणविषयः कर्मरतमानवः,... ततो वास्तवजीवने मनुष्या यथा सन्ति, तत्तुलनयाऽनुक्रियमाणा मनुष्या उच्चतरा नीचतरा सदृशा वा भवन्ति । चित्राङ्गनेऽपि तद्रूपम्"[५] । इत्थम् अरस्तुदिशा कविः त्रिविधमनुकरणं सम्पादयति-वस्तुनः यादृशं रूपं प्रतीयते तादृशस्य प्रतीयमानरूपस्य, वस्तुनः यादृशरूपं भवितुमर्हति तादृशस्य सम्भाव्यरूपस्य, वस्तुनः आदर्शरूपस्य च । यथा यथा नाटके अभिनेता जनसामान्यस्य कदाचित् सामान्यं बाह्यमनुकरणं सम्पादयति अथवा कोऽपि इतिहासकारः इतिहासरचनायां शुष्कमनुकरणं सम्पादयति कस्यापि वंशादिकस्य, काव्ये कविः तथाविधं शुष्कं नीरसं वानुकरणं नैव सम्पादयति । अतः अरस्तुमहाशयेन सुस्पष्टाभिः पदावलीभिः प्रोक्तम्- '"उभयोर्मध्ये प्रकृतमिदं पार्थक्यं यद् एको घटितस्य अपरश्च घटनीयस्य वर्णनं करोति । काव्यस्य विवृतिः सार्वकालिकी, इतिहासस्य विवृतिस्तु व्यक्तिविशेषस्य । तेन काव्यमितिहासापेक्षया अधिकं व्यापकं गुरुत्वपूर्णञ्च"[६] । इत्थम् अरस्तुमहाशयस्य

---

१ लेखेऽस्मिन् 'पेरिपोइतिकेस' इति नाम्नः अरस्तुप्रणीतकाव्यशास्त्रस्य नाट्यसिद्धान्तसम्बद्धानि सर्वाणि उद्धरणानि डा.भरतचन्द्रनायकृताद् संस्कृतानुवाद् गृहीतानि सन्ति चेद् आङ्लानुवादश्च पादटिप्पणीसु यथास्थलं प्रस्तुतानि सन्ति ।

२ The poet being an imitator, like a painter or any other artist, must of necessity imitate one of three objects—things as they were or are, things as they are said or thought to be, or things as they ought to be..-Critical theory Since Plato . poetics-XXV.

३ Epic poetry and tragedy,comedy also and dithyrambic poetry,and the music of the flute and of lyre in most of their forms,are all in their general conceptation modes of imitation .They differ, however,from one another in three aspects-the medium, the the objects, the manner or mode imitation, being in each case distinct. - poetics-I

४ Poetry is primarily an imitation. The ideal must surpan the actual.A work of art is thus an idealized presentation to sense of human life . poetics-XXVI

५ Since the objects of imitation are men in action, and these men must be either of a higher or a lower type (for moral character mainly answers to these divisions, goodness and badness being the distinguishing marks of moral differences), it follows that we must represent men either as beer than in real life, or as worse, or as they are. It is the same in painting. poetics-II

६ The poet and the historian differ not by writing in. verse or in prose. The work of Herodotus might be put into verse, and it would still be a species of history, with meter no less than without it. The true difference is that one relates what has happened, the other what may happen. Poetry, therefore, is a more philosophical and a higher thing than history: for poetry tends to express the universal, history the particular. poetics-IX

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनुकरणसिद्धान्तः विवृतिप्रधानानां विषयाणामपेक्षयापि कल्पनभावनप्रधानान् सर्वविधान् काव्यप्रकारान् व्याप्नोति । अथापि पाश्चात्यकाव्यसिद्धान्तस्य आद्याचार्येण अरस्तुमहाशयेन स्वीये काव्यशास्त्रे मूलतः नाट्यशास्त्रमेव प्रतिपादितम् । यद्यपि काव्यशास्त्रे तेन कामदीमहाकाव्ययोश्च आंशिकी चर्चा कृता परं चर्चेयं त्रासदीविवेचनतुलनायामत्यन्तं गौणा । काव्यशास्त्रे तेन स्थाने स्थाने प्रयुक्तानि पदानि तत्र कामदीमहाकाव्ययोः विवेचनांशस्य खण्डिततत्वं निवेदयन्ति । अतः साम्प्रतमुपलब्धम् अरस्तुप्रणीतं काव्यशास्त्रं तस्य नाट्य-सिद्धान्तशास्त्रमेव । नाट्यशास्त्रेऽपि काव्यशास्त्रमिदं मूलतो त्रासदीमेव सविशदं विवेचयति। त्रासदीविवेचने सूत्रबद्धतया सन्निहितानि तदीयानि पदानि नैकविधानि नाट्यतत्त्वानि प्रतिपादयन्ति -"करुणाभयभावस्य रेचनाय तत्तद्भावोद्दीपकघटनासम्बलितस्य भिन्नेषु स्थलेषु भिन्नभावेन व्यवहृतालङ्कृतभाषामाध्यमेन तथा च अभिनयपद्धत्या (न तु वर्णनात्मकपद्धत्या) एकस्य गुरुगम्भीर-स्वयंपूर्णकार्यस्य अनुकृतिः त्रासदी ।"[७] अरस्तुमहोदयस्य अस्मिन् त्रासदीविवेचने अधोनिर्दिष्टानि त्रासदी-तत्त्वानि आविर्भवन्ति-

(क) त्रासदी कार्यविशेषस्यानुकृतिः अस्ति ।

(ख) त्रासदीनिबद्धं कार्यं गम्भीरं भवति ।

(ग) त्रासदीसम्बद्धं कार्यमाद्यन्तविषयवस्तुपरिपूर्णं भवति ।

(घ) त्रासदी निश्चितायामयुता भवति ।

(ङ) त्रासदी वर्णनात्मकं न भवति परं प्रदर्शनात्मकं भवति ।

(च) त्रासद्या भाषा आलङ्कारिकी, छन्दोगीतलयादिविशिष्टा भवति ।

(ज) त्रासद्यामनेकभावोद्दीपकघटनानां वर्णनं भवति ।

(झ) त्रासद्यां परस्परं विपरीतप्रधानमनोभावरूपयोः त्रासकरुणयोः उद्रेकमाध्यमेन सर्वेषां मनोविकाराणां समुचितं विरेचनं विधीयते ।

रेचकौषधग्रहणाद् यथा शूलरोगिणः बहुविधशरीरविकारविरेचनमाध्यमेन स्वस्थाः सन्तः आनन्दमनुभवन्ति तथैव त्रासद्यां भावकाः अनेकभावसंपृक्तयोः त्रासकरुणरूपयोः प्रधानभावयोः समकालिकविरेचनेन स्वस्थाः सन्तः परमानन्दमनुभवन्तीति वैद्यपुत्रस्य अरस्तुमहाशयस्य त्रासदीसिद्धान्तस्य मूलभूता स्थापना । मनोभावानां वस्तुगतविरेचनाय अरस्तुदिशा त्रासद्यामनिवार्यतया षडङ्गानि भवन्ति यानि तत्त्वानि तस्याः समग्रं सौन्दर्यं समुल्लासयन्ति (१) कथावस्तुविधानम् (२) चरित्रविधानम् (३) पदविधानम् (४) विचारविधानम् (५) दृश्यविधानम् (६) गीतविधानञ्च ।[८]

षडङ्गेष्वेतेषु कथावस्तुचरित्रविचारतत्त्वानि अनुकृतेर्विषयाः सन्ति, दृश्यविधानम् अनुकरणस्य माध्यमः अस्ति, गीतपदविधाने चानुकरणस्य विधिरूपे स्तः । काव्यशास्त्रस्याधिकांशभागेषु अरस्तुमहाशयेन त्रासदीसम्बद्धानाम् उक्ताङ्गानामेव विशदं विवेचनं विहितम् । तेन कथावस्तुविषये यादृशी विशदा विवेचना प्रस्तुता न तथा अन्याङ्गानां विषये । तन्मते त्रासद्यां कथावस्तुयोजना भवति सर्वाधिकमहत्त्वपूर्णा । अरस्तु सज्जीभूतां घटनाश्रेणीं कथावस्तुनः परिभाषां मेने[९] । असौ "घटनानां संहतिः सर्वाधिकं महत्त्वपूर्णा"[१०] इत्यादिवाक्यविन्यासविधिना कथावस्तुपक्षे विशिष्टां मान्यतां स्थापयामास । तन्मते सर्वाधिकमहत्त्वपूर्णमङ्गं कथावस्तु एव विद्यते। तेन काव्यशास्त्रे "'कथावस्तु त्रगाद्या आत्मा"[११] इति उद्घोषश्च कृतः । या च कथावस्तु पुनः सुखदुःखकर्ममयजीवनमनुकरोति सैव सर्वाधिकं महत्त्वपूर्णा इति काव्यशास्त्रीया तदीया पदावली ज्ञापयति-

"तत्त्वतः त्रगादी न तु मनुष्यजीवनस्य अपि तु सुखदुःखपूर्णकर्ममयजीवनस्य अनुकरणम्"[१२] । अरस्तु-महाशयेन त्रासद्यै नातिस्वल्पा नातिदीर्घा च कथा अभ्यर्थिता काव्यशास्त्रे-"प्राणिवस्तुनोः सौन्दर्याय यद्वत् एको निर्दिष्टाकारः आवश्यकः, तद्वत् कथावस्तुनः स्मरणसाध्यः एको निर्दिष्टाकारो अपेक्षते"[१३] । तन्मते त्रासद्याः कथावस्तूनि वक्ष्यमाणाः मौलिकगुणाः भवन्ति - (अ) एकान्वितिः (आ) पूर्णता (इ) सम्भाव्यता (ई) सहजविकासः (उ) कुतूहलम् (ऊ) साधारणीकरणम् ।

---

७ Tragedy, then, is an imitation of an action that is serious, complete, and of a certain magnitude; in language embellished with each kind of artistic ornament, the several kinds being found in separate parts of the play; in the form of action, not of narrative; through pity and fear effecting the proper purgation of these emotions.poetics–VI

८ hese elements have been employed, we may say, by the poets to a man; in fact, every play contains spectacular elements as well as character, plot, diction, song, and thought. poetics–VI

९ But most important of all is the structure of the incidents. Now character determines men's qualities, but it is by their actions that they are happy or the reverse. Dramatic action, poetics–VI

१० But most important of all is the structure of the incidents. poetics–VI

११ The plot, then, is the first principle, and, as it were, the soul of a tragedy: poetics–VI

१२ For tragedy is an imitation, not of men, but of an action and of life, and life consists in action, and its end is a mode of action, not a quality. poetics–VI

१३ As, therefore, in the case of animate bodies and organisms a certain magnitude is necessary, and a magnitude which may be easily embraced in one view; so in the plot, a certain length is necessary, and a length which can be easily embraced by the memory.poetics-VII

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अरस्तुश्चरित्रचित्रणाय त्रासद्यां द्वितीयं स्थानं ददौ। अरस्तोः भाषायां "'येन मर्मणा कर्तृषु वयं कतिपयनैतिगुणान् आरोपयामः तच्चरित्रम्"[१४]। '"कर्तृ रुचिज्ञानं प्रदर्श्य यत् तस्य नैतिकमुद्देश्यं प्रकटीकरोति तच्चरित्रम्"[१५]। अरस्तुमहाशयेन त्रासद्यां भावकानां विरेचनसिद्धये वक्ष्यमाणगुणविशिष्टः साधारणासाधारणोभयविधगुणविशिष्टो नायकः अभ्यर्थितः- "मध्यस्तरीयो मानवः अवशिष्यते यो न तु अतिशयेन साधुः, न च न्यायपरायणः, यस्य दुर्भाग्यं पापभ्रष्टतावशाद् अभूत्वा भ्रमदुर्वलतावशाद् भवति सः ऐदिपोथुअस्तसदृशः अथवा तद्परिवाराणां ख्यातजनतुल्यः अत्यन्तं प्रसिद्ध समृद्धश्च भवेत्"[१६]। अर्थात् अरस्तुदृष्ट्या त्रासचै तादृशो नायकः समीचीनो भवति यः खलु नातिशयेन न्यायपरायणः, सदाचारी च स्यात् परं साधारणमनुजसुलभभ्रम-दुर्वलतादिगुणसमन्वितो मध्यमस्तरीयतां भजन्नपि लोकविख्यात-वंशोत्पन्नः स्यात्। तथा सति तादृशस्य नायकस्य पतने भावकानां त्रासकरुणोद्रेकमाध्यमेन मनोविकाराणां विरेचनं सुकरं भवति। अरस्तुदृष्टौ कथावस्त्वनन्तरं महत्त्वपूर्णा भूमिका भवति चरित्रविधानस्य। चरित्रचित्रणे अरस्तुदृष्टिर्मूलतो नायककेन्द्रिता दृश्यते। असौ काव्यशास्त्रे चरित्रचित्रणस्य एतान् मौलिकसिद्धान्तान् विवेचयामास- (अ) भद्रता (आ) औचित्यम् (इ) जीवनानुरूपता (ई) एकरूपता (उ) सम्भाव्यता (ऊ) यथार्थादर्शयोः समन्वयश्च।

अरस्तुमहोदयेन विचारविधानाय तृतीयं स्थानं दत्तं दृश्यते काव्यशास्त्रे। तेन चरित्रप्रकाशनसमर्थाः चिन्तनपद्धतिरेव विचारतत्त्वतया व्याख्याता-"'चिन्ता एका प्रज्ञाशक्तिः या कस्मिँश्चित् विशिष्टक्षेत्रे प्रासङ्गिकी सम्भाव्या वा भवेत्। ....ततो यः संलापः एतत्प्रकाशयितुम् असमर्थः, स चरित्रप्रकाशक्षमो न भवति"[१७]। अरस्तो भाषायां "'किञ्चिद् निर्दिष्टं साधारणं वा सत्यं प्रतिपादयतां तेषां चिन्ताशक्तिः संलापमाध्यमेन प्रकाश्यते"[१८]। अरस्तुमहोदयस्य विचारतत्त्वे उभयविधानां बुद्धिभावतत्त्वानां समावेशो दृश्यते "त्रासद्यां विचारतत्त्वं तदीयभाषाजनितप्रत्येककार्ये परिलक्ष्यते, यथा प्रमाणं खण्डनञ्च भयक्रोध-करुणादिभावानां जागरणम् घटनामहत्त्वस्य वर्द्धनम् अल्पीकरणं वा"[१९]। "'इदानीम् एतत् स्पष्टं यत् कारुण्यभयमहत्त्व-सम्भाव्यतानां जागरणे मानसिकगत्या सह कायिकगतिः समताला"[२०]।

त्रासद्याः कृते अरस्तुश्चतुर्थस्थाने शब्दमाध्यमेन भावप्रकाशरूपां शब्दयोजनां स्थापयामास[२१]। शब्दद्वारा अर्थस्य अभिव्यक्तिः, अर्थाद् 'अर्थप्रतिपादकः शब्दः' एव अरस्तुमते पदरचना अस्ति। अरस्तुमहोदयेन त्रासचै सालङ्कारा भाषा अभीष्टेति विवेचिता। तस्यैव भाषायां "...अलङ्कृतभाषया ममाभिप्रायः तादृशभाषया वर्तते यत्र लयसामञ्जस्यगीतानां समावेशो भवति"[२२]। "' अवशिष्टयोः द्वयोरङ्गयोः सङ्गीतं त्रगाद्याः सर्वेषु आनन्दप्रदवस्तुषु श्रेष्ठम्"[२३] तथापि महाकाव्यादिषु अस्योपयोगः न कुत्रापि कर्तुं पार्यते। भावगताकर्षणवर्धकं दृश्यविधानमपि अरस्तुमहोदयेन रङ्गमञ्चसज्जा-विषयत्वेनैव उल्लिख्य तत्र कलागतो न्यूनचमत्कारः दृष्टः- "अवश्यं प्रेक्षायाः भावगतमाकर्षणं विद्यते, किन्तु कलापाटवे इयं सर्वन्यूना, तथा च काव्यकलया सह अस्य सम्पर्को नीतरां क्षीण। अभिनेतृभिः त्रगादी यद्यपि न अभिनीयेत, तथापि अस्याः प्रभावो अनुभूयेत। अपरं च प्रेक्षाप्रभावो मुख्यतो मञ्चकलायाः विषयः, न तु काव्यकलायाः"[२४]। अतः महाकाव्यविवेचने अस्य चोपयोगः नैव सम्भवः। महाकाव्ये सर्गाध्यायादिष्वेव दृश्यपरिवर्तनानि भवन्तीति सहृदयहृदयमेव प्रमाणम्। अरस्तुमहोदयेन काव्यशास्त्रे उक्तानां षण्णामङ्गानां मध्ये कथावस्तुचरित्र-विधानयोश्चर्चाऽनेकत्र विहिता। विचारतत्त्वस्य च विवेचना स्थाने स्थाने जाता दृश्यते। परं पदावली चर्चा क्वाचित्कतयैव जाताऽस्ति चेत् संगीतदृश्यविधानयोस्तु

---

१४ By character I mean that in virtue of which we ascribe certain qualities to the agents. poetics-VI

१५ Character is that which reveals moral purpose, showing what kind of things a man chooses or avoids. Speeches, therefore, which do not make this manifest, or in which the speaker does not choose or avoid anything. poetics-VI

१६ There remains, then, the characters between these two extremes- that of a man who is not eminently good had just, yet whose misfortune is brought about not by vice of depravity, but by some error or frailty. He must be one who is highly renowned and prosperous-a personage like Oedipus, Thyestes, of other illustrious men of such families. poetics-XIII

१७ Third in order is thought—that is, the faculty of saying what is possible and pertinent in given circumstances. In the case of oratory, this is the function of the political art and of the art of rhetoric: and so indeed the older poets make their characters speak the language of civic life; the poets of our time, the language of the rhetoricians. Character is that which reveals moral purpose, showing what kind of things a man chooses or avoids. Speeches, therefore, which do not make this manifest, or in which the speaker does not choose or avoid anythingwhatever, are not expressive of character. Thought, on the other hand, is found where something is proved to be or not to be, or a general maxim is enunciated. poetics-VI

१८ Character is that which reveals moral purpose, showing what kind of things a man chooses or avoids. Speeches, therefore, which do not make this manifest, or in which the speaker does not choose or avoid anythingwhatever, are not expressive of character. poetics-VI

१९ Under thought is included every effect which has to be produced by speech, the subdivisions being—proof and refutation; the excitation of the feelings, such as pity, fear, anger, and the like, the suggestion of importance or its opposite. poetics-XIX

२० Now, it is evident that the dramatic incidents must be treated from the same points of view as the dramatic speeches, when the object is to evoke the sense of pity, fear, importance, or probability. poetics-XIX

२१ Fourth among the elements enumerated comes diction; by which I mean, as has been already said, the expression of the meaning in words; and its essence is the same both in verse and prose. poetics-VI

२२ प्राच्यपाश्चात्यसौन्दर्यशास्त्रपरम्परायाम् अरस्तुः पृ.१०८

२३ Of the remaining elements song holds the chief place among the embellishments. poetics-VI

२४ The spectacle has, indeed, an emotional araction of its own, but, of all the parts, it is the least artistic, and connected least with the art of poetry. For the power of tragedy, we may be sure, is felt even apart from representation and actors. Besides, the production of spectacular effects depends more on the art of the stage machinist than on that of the poet. poetics-VI

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एकत्रैव । अरस्तुमहोदयस्य उक्तमनुकरण-विवेचनं नाट्यनाट्याङ्गविवेचनं चास्माकमाचार्यस्य भरतस्यानुकरणतत्त्वविवेचनेन नाट्यनाट्याङ्गविवेचनेन च सहाधिकपक्षेषु सामञ्जस्यं प्रकटयति ।

३. भरतप्रतिपादितो नाट्यसिद्धान्तः

प्राच्यकाव्यशास्त्रस्याद्याचार्येण भरतेन अनेकाभिः पदावलीभिः लोकवृत्तानुकरणमेव नाट्यमिति सिद्धान्तितम् । नाटकपरिभाषां वितन्वता तेन लोकत्रयस्य निःशेषस्य भावानुकीर्तनमेव नाट्यं कथ्यते ।[२५] तत्र लोकानुकरणविधौ नाटककारेण निखिलस्यापि स्वर्गमर्त्यपातालात्मकस्य त्रिभुवनस्य नैकविधावस्था-सम्बद्धानेकभावानुकीर्तनं विधीयते ।[२६] लोकत्रयसम्बद्धानां भावानां, लोकत्रयस्यैव व्यवहारक्रियाकलापानां, सप्तद्वीपनिवासिनामेव कार्यव्यापारमनोभावानामनुकरणं नाटके सम्पद्यते । अतो भरतभाषायां "देवानाम्, मुनीनाम्, भूपालानाम्, कुटुम्बिनाञ्च नाटककारेण कृतमनुकरणं नाट्यं निगद्यते ।"[२७] लोकस्वभावानाञ्च अनुकरणान्नाटके सात्त्विका भावाश्चानुक्रियन्ते । इत्थं भरतदिशा लोकवृत्तानुकरणावस्थानुकरणलोक-स्वभावानुकरणादिभि[२८]र्नाटकं बाह्यतः आभ्यन्तरतश्चानुकरणस्वरूपमेव । नाट्यसिद्धान्तं प्रतिपादयता भरतेन नाट्यशास्त्रे "केनापि नाटककारं भविष्णुना रचनाकारेण सुश्लिष्टपञ्चसन्धिसमन्वितम्, स्वभिनेयम्, आनन्दप्रदम्, सरलकोमलपदाञ्चितं नाटकं विरचनीयमिति"[२९] नाट्यमार्गदर्शनं विहितम् । सरलकोमलपदानां विधानेन नाटककाराः भावकानां हृदये परितोषममन्दमुत्पादयितुं प्रभवन्तीति भरतीया नाट्यदृष्टिः ।[३०] अनेन नाट्यशास्त्रस्यानेकत्र सुश्रव्यकोमल-पदानामाग्रहो विहितः । सरलकोमलपदार्थयुतं, क्लिष्टार्थरहितम्, सहृदयहृदयानन्दजनकम्, भावकहृदयनर्तन-समर्थम्, अनेकरसाभिव्यक्तिमञ्जुलम्, अनेकसन्धिसध्यङ्गमनोहरं नाटकमेव प्रेक्षकाणां कृते परितोषकरं भवतीति बहुधा सिद्धान्तितम् ।[३१] इत्थञ्च नाटकसिद्धान्तशिरोमणिना भरतेन प्राच्यकाव्यसिद्धान्तपरम्परायां समग्रतोऽनुकरणमेव नाटकस्य जीवितमिति प्रतिपादितं प्रतिभाति । नाट्यशास्त्रे भरतमुनिना प्रयुक्तिमानीतानि लोकवृत्तानुकरणम्, सप्तद्वीपानुकरणम्, लोकस्वभावानुकरणम्, कृतानुकरणञ्चेत्याद्यनुकरणपदानि आपाततः नाट्याभिनयकाले रामाद्यनुकार्याणां कार्यकलापानामभिनय-स्वरूपमेवानुकरणं प्रतिभासयन्ति । भरतवितता आङ्गिकवाचिक-सात्त्विकाहार्यनामानोऽभिनयप्रकाराश्च तदेवानुकरणमुल्लासयन्ति। पुनश्च तथाविधानुकरण-विवृतिं दर्शयतां भट्टलोल्लटशङ्कुकाभिनवगुप्त-धनञ्जयधनिकविश्वनाथसदृशानां "मुख्यया वृत्त्या रामादौ अनुकार्ये तद्रूपानुसन्धानान्नर्तकेऽपि प्रतीयमानो रसः"[३२], "नहि नटो रामसादृश्यं स्वात्मनः शोकं करोति, सर्वथैव तस्य तत्राभावात्, भावेनानुकारत्वात्"[३३],"अवस्थानुकृतिर्नाट्यम्"[३४], "काव्योपनिबद्धधीरोदात्ता-द्यवस्थानुकारश्चतुर्विधाभिनयेन तादात्म्यपत्तिर्नाट्यम्"[३५], "अनुकार्यस्य रत्यादेः उद्बोधो न रसो भवेत्"[३६], "अनुकर्तगतञ्चास्य निरस्यति"[३७] इत्यादिवाक्यपदावलीभ्यश्च पुनः प्रेक्षालयस्य अग्रतो रङ्गमञ्चे अनुकारकनटेन प्रदर्शितं धीरोदात्तादिनायकानां विविधानामवस्थानामाङ्गिक-वाचिकाहार्य-सात्त्विकाभि-नयरूपं प्रयोगात्मकमेवानुकरणं प्रतीतिपथमवतरति । तत्त्वतः समीक्षायां कृतायां सत्यां भरतप्रयुक्ता-नुकरणपदं जागतिकपदार्थस्य वर्णनात्मकं कविकर्मरूपानुकरणञ्च व्याप्नोति । भरतानुकरण-सिद्धान्तश्च अरस्तुप्रणीतानुकरणसिद्धान्त इव नवनिर्माणात्मकं कविव्यापाररूपमप्यनुकरणम् आत्मसात् करोतीति वक्तुं शक्यते । "नाटकं सर्वेषु भावेषु रसेषु, सर्वेषु कर्मक्रियाकलापेषु च सर्वोपदेशप्रदं भविष्यति । नाटकं धर्मायुष्यकीर्तिहितप्रज्ञादीनां वर्धकं लोकोपदेशकञ्च भविष्यति । सर्वविधं ज्ञानम्, सर्वविधं शिल्पम्, सर्वविधाः, कलाः, सर्वविधाः विद्याः, नैकविधो योगः, सर्वाणि कार्याणि नाट्याङ्गत्वं व्रजन्ति । मदीयं नाट्यशास्त्रं वेदविद्येतिहासानाम् आख्यानोपाख्यानानि प्रकाश्य यथोचितसमये मनोविनोदं विधास्यति । सर्वविध-शिल्पादिशास्त्राणि, अनेकविधानि कार्याणि, मदीये नाटके नाट्याङ्गत्वेन मया समाविष्टानि सन्ति ।"[३८] "कवयः मदीयनाट्यशास्त्रीयसिद्धान्तानुरूपमेव

---

२५ त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् । ना.शा. १/१०८

२६ नानाभावोपपन्नं नानावस्थान्तरात्मकम् । लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् ॥ ना.शा.१/११३

२७ सप्तद्वीपानुकरणं नाट्ये ह्यस्मिन् प्रतिष्ठितम् । देवतानामृषीणाञ्च राज्ञामथ कुटुम्बिनाम् ॥ कृतानुकरणं लोके नाट्यमित्यभिधीयते ॥ ना.शा.१/१३३ श्लोकस्य पादटिप्पण्याम्।

२८ लोकस्वभावानुकरणाच्च नाट्यस्य सत्त्वमीप्सितम् ।

२९ सुश्लिष्टसन्धियोगं च सुप्रयोगं सुखाश्रयम् । मृदुशब्दाभिधानञ्च कविः कुर्यात्तु नाटकम् ॥ ना.शा.१९/१४१

३० मृदुशब्दं सुखार्थञ्च कविः कुर्यात्तु नाटकम् । ना.शा.१९/१५२

३१ मृदुललितपदार्थं गूढशब्दार्थहीनं बुधजनसुखयोग्यं बुद्धिमन्नृत्ययोग्यम् । वहुतरकृतमार्गं सन्धिसन्धानयुक्तं भवति जगति योग्यं नाटकं प्रेक्षकाणाम् ॥ ना.शा.१६/१२९

३२ काव्यप्रकाशे चतुर्थोल्लासस्य पृ.१०१

३३ अभिनवभारत्याम्, पृ.३७

३४ दशरूपके १/७

३५ तत्रैवालोकटीकायाम्

३६ साहित्यदर्पणे ३/४८

३७ तत्रैव

३८ एतद्रसेषु भावेषु सर्वकर्मक्रियासु च । सर्वोपदेशजननं नाट्यमेतद् भविष्यति ॥ ना.शा.१/११५
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् । लोकोपदेशजननं नाट्यमेतद् भविष्यति ॥ ना.शा.१/११५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चतुषष्टि-सन्ध्यङ्ग-समवेतैः एकविंशत्याः सन्ध्यन्तरैः, षट्त्रिंशल्लक्षणैरूपेतं, गुणालङ्कारसमन्वितम्, महारसम्, परमानन्दजनकम्, उदात्तवचोभिः समलङ्कृतम्, महामानवगुणानुवादपेशलम्, सदाचारिजनवृन्दप्रियम्, सुश्लिष्टसन्धिसमन्वितम्, सरलतया अभिनेयम्, आनन्ददम्, कोमलकान्तपदावलीललितञ्च नाटकं रचयेयुः । नानावस्थान्तरात्मकः यो लोकस्वभावो भवति स साङ्गाभिनयेन नाट्यस्वरूपं विभर्त्ति । समग्रतः नाटककारैः सर्वभावरसकर्म-प्रवृत्तिविषय-बाहुल्यगुणाढ्यं नानालोकावस्थाभिव्यञ्जकं नाटकं विधाय लोकरञ्जनं विधीयते । तत्रापि जनसामान्यनिष्ठानां भावानां बलाबलं निरीक्ष्य लोकसुखायैव नाट्यसाधकैः नाटकानि लेखनीयानि ।"[३९] इत्यादिभरतवाक्यपदावली-जातानि कविव्यापारस्वरूपमपि लोकवृत्तानुकरणं भरतस्याभिप्रेतमिति स्पष्टीकुर्वन्ति । तस्माद्धेतोः मुनिना न केवलं रङ्गमञ्चोपयोगिनां बहिरङ्गरूपाणां चतुर्विधाभिनयानामेव विशदं निरूपणं विततमपि तु नाट्यान्तरङ्गरूपाणामपि काव्यात्मस्वरूपाणां रसभावादीनामपि सविस्तरं वर्णनं कृतम् । अनया दिशा भरतस्यानुकरणात्मके नाट्यसिद्धान्तेऽपि अरस्तुमहोदयस्य इव कवेः प्रतिभाव्युत्पत्त्यभ्यास-समवायनिष्पन्नं लोकवृत्तानुकरणं नियतिकृतनियमरहितं ह्लादैकमयं सहृदयान्त-श्चमत्कारकारि नवनिर्माणात्मकं भवति । यद्यपि अनुकार्यरामादीनामनुकर्तृभिः कृतमनुकरणमपि तादात्म्यापादनस्वरूपतयैव सफलं सहृदय-हृदयाह्लादकं च भवति तथापि कविकृतलोकवृत्तानुकरणं किमप्यलौकिकमनन्यपरतन्त्रं कविप्रतिभा-समुल्लासमनोहरं सौन्दर्यम् आविष्करोति । भरतस्य नाट्य-सिद्धान्ताभिप्रेतमनुकरणं बाह्याभ्यन्तरोभयविधम् अनुकरणं व्याप्नोतीति कथने नास्ति सन्देहावसरः ।

४. अरस्तुभरतयोः नाट्यसिद्धान्तसामञ्जस्यम्

अरस्तुभरतयोर्नाट्यसिद्धान्ते नैकविधविषयेषु सामञ्जस्यं विलोक्यते । मूलकाव्यसिद्धान्तयानुकरणसिद्धान्ते, नाट्याङ्गानां नाट्यकथावस्तुनि, चरित्रविधाने, विचारतत्त्वप्रस्तुतौ, भाषाशैलीविधाने, दृश्यविधाने च अरस्तुभरतयोः अकल्पनीयं सामञ्जस्यं विभाव्यते ।

४.१ अरस्तुभरतयोः अनुकरणसिद्धान्तसामञ्जस्यम्

अरस्तुभरतयोर्मूलभूतो नाट्यसिद्धान्तस्तु अनुकरणमेव । यथा अरस्तुप्रतिपादितमनुकरणं केवलं नीरसं अनुकार्यस्य अनुकर्तृकृतमनुकरणमात्रं नास्ति तथैव भरतसिद्धान्तितमनुकरणमपि बाह्यानुकरणमात्रं नास्ति । यथा अरस्तुप्रोक्तेऽनुकरणे यथार्थमतिक्रम्य आदर्शभूता कलात्मिकी अनुकृतिः प्राधान्यं भजते तथैव भरतनिरूपितेऽनुकरणेऽपि आङ्गिकवाचिकाहार्यानुकरणापेक्षयाऽपि रसभावादिसात्त्विकभावप्रधाना अनुकृति काव्यात्मतया भासमाना मन्यते । यथावदनुकरणमुभयत्राप्यमान्यम् । यथावदनुकरणं निरस्य प्रेयःश्रेयः-समन्वितमादर्शरूपमनुकरणं प्रतिपाद्य अरस्तुमहाशयेन यथा अनुकरणस्य सङ्कुचितार्थः अस्वीकृतः तथैव महामुनिन भरतेन च केवलं बाह्यमनुकर्तृकृतमनुकरणमस्वीकृतम् । अरस्तुमते काव्यमितिहासाद् भव्यं स्वरूपमाकलयति यतो हि इतिहासः केवलं घटितस्य वर्णनं करोति काव्यं तु घटनीयस्य । काव्यमैतिहासिकं यथावद्वर्णनमपहाय घटनां तथा वर्णयति यथा तया घटनया भाव्यम् । इतिहासस्य कथावस्तु देशकालादिपरिच्छिन्नं भवति चेत् काव्यस्य प्रस्तुतिः सार्वभौमिकी, सर्वकालिकी च भवति । अतः काव्यमितिहासाद् महत्तरमिति अरस्तुमहोदयस्य सिद्धान्तः । लोकस्वभावानुकरणमञ्जुला प्रस्तुतिः दृश्यकाव्यस्य विशिष्टं लक्षणमिति भरतस्य मतम् । यथा अरस्तुमहाशयेन अनुकरणे काव्यस्य सर्वे प्रकाराः विलोकितास्तथैव भरतश्च लोकवृत्तानुकरणलोक-स्वभावानुकरणसप्तद्वीपानुकरणादिनानानुकरणविवेचनेन प्रकारान्तरेण अनुकरणे काव्यस्य बहुविधं सौन्दर्यं क्रोडीकरोति ।

४.२ अरस्तुभरतयोः नाट्यकथावस्तुसामञ्जस्यम्

अरस्तुमहोदयेन त्रासद्याः कृते ऐतिहासिककाल्पनिककथापेक्षया जातीयदन्तकथामूलकथायै (पौराणिक-कथायै) अधिकमहत्त्वं दत्तम् । पौरस्त्यमहामुनिना भरतेन च कविकल्पितकथापेक्षायां पुराणेतिहासादि-कप्रसिद्धायाः आधिकारिककथायाः महत्त्वाधायिनी प्रतिष्ठा कृता । पुराणादिप्रसिद्धमितिवृत्तं नाटकस्य शरीरं मन्वानेन अनेन कथा पञ्चसन्धिपरिच्छिन्ना घटनावलीरूपेण चित्रिता, अपि च सा कथा आधिकारिकी, प्रासङ्गिकी च भवतीति विवेचिता कारिकासु-

---

तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला । न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते ॥ ना.शा. १९/१४३
सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च । अस्मिन्नाट्ये समेतानि तस्मादेतत् मया कृतम् ॥ ना.शा.१/११९
वेदविद्येतिहासानामाख्यानपरिकल्पनम् । विनोदजननं काले नाट्यमेतद् भविष्यति ॥ ना.शा.१/१२३

३९ पञ्चसन्धि चतुर्वृत्ति चतुषष्ट्यङ्गसंयुतम् । षट्त्रिंशल्लक्षणोपेतं गुणालङ्कारभूषितम् ॥
महारसं महाभोगमुदात्तवचनान्वितम् । महापुरुषसञ्चारं साध्वाचारजनप्रियम् ॥
सुश्लिष्टसन्धियोगञ्च सुप्रयोगं सुखाश्रयम् । मृदुशब्दाभिधानञ्च कविः कुर्यात्तु नाटकम् ॥ ना.शा. १९/१३९-१४१
यो यः स्वभावो लोकस्य नानावस्थान्तरात्मकः । साङ्गाभिनयसंयुक्तो नाट्यमित्यभिनीयते ॥ ना.शा. १९/१४४
सर्वभावैः सर्वरसैः सर्वकर्मप्रवृत्तिभिः । नानावस्थान्तरोपेतं नाटकं संविधीयते ॥ ना.शा. १९/१४७
तदेवं लोकभाषाणां प्रसमीक्ष्य बलाबलम् । मृदुशब्दं सुखार्थञ्च कविः कुर्यात्तु नाटकम् ॥ ना.शा. १९/१५२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इतिवृत्तं तु काव्यस्य शरीरं परिकीर्तितम् । पञ्चभिः सन्धिभिस्तस्य विभागाः परिकीर्तिताः ।
इतिवृत्तं द्विधा.............................. । आधिकारिकमेकं तु प्रासङ्गिकमथापरम् ॥[४०]

अरस्तुमहोदयेन च कथावस्तु घटनानां विन्यासरूपेणैव विवेचितम् । यथा भरतमते कथावस्तुनः सहजविकासः नाट्यसन्धिसन्ध्यङ्गद्वारा सम्पद्यते तथैव अरस्तुमतेऽपि संवृति-विवृति-स्थितिविपर्यया-भिज्ञानद्वारा कथावस्तुनः सहजविकासो जायते। अरस्तुमते कथावस्तु एव नाटकस्यात्मा अस्ति । परन्तु भरतेन तस्मै केवलं काव्यस्य शरीरस्थानमेव प्रदत्तम् । तेन नाट्ये शरीररूपतया स्थितात् कथानकाद् "नहि रसादृते कश्चिदर्थः प्रवर्तते"[४१] इति मान्यतामङ्गीकृत्य नाट्ये प्रधानीभूतस्य रसस्यात्मरूपत्वं प्रतिष्ठापितम् । इत्थमत्र अरस्तुमहोदयस्य कथावस्तुप्रधाना भरतस्य च रसप्रधानादृष्टिः परस्परं वैषम्यं भजमाना इव दृश्यते । परं परमार्थतो गवेषणायां कृतायां सत्यां यथा भरतेन रसाभिव्यक्तिसमुचिता कथा अभ्यर्थिता दृश्यते तथैव रसकल्पयोः त्रासकरुणयोः उद्रेकाय उपयोगिनी कथा सिद्धान्तिता । अरस्तुमते त्रासदायां व्यक्तिविशेषस्यानुकरणं न भवति अपि तु कर्ममयजीवनस्य अनुकरणं भवति । जीवनञ्च कार्यव्यापारस्यैव नामान्तरम् । अतो जीवनस्यानुकृतौ कार्यव्यापारस्यैवानुकरणं सम्पद्यते । भरतस्य लोकवृत्तानुकरणे, लोकस्वभावानुकरणे च मूलतः कर्ममयजीवनस्यैव अनुकरणं भवति । अतस्तथाविधानुकरणे उभयत्रैव साम्यं वीक्ष्यते । अरस्तुमहाशयेन त्रासकरुणभावयोरुद्रेकाय एव पौराणिक-कथावस्तुविधानं महत्त्वाधायकं मतम् । आचार्यभरतेन च रसभावाभिव्यक्तये आधिकारिकी कथा महत्त्वाधायिनी साधिता ।

कथावस्तुनः आयामविषयेऽपि अरस्तुभरतयोः आपाततः काऽपि भिन्नताऽनुभूयते । अरस्तुमते कथावस्तुनः आयामो यथासम्भवं सूर्यस्यैकपरिक्रमणस्य (अहोरात्रस्य) किञ्चित्तदधिकसमयस्य वा सीमायाम् आबद्धो दृश्यते । परं भरतस्य नाट्यशास्त्रे एतादृशं समयसीमाबन्धनं नावलोक्यते । अथापि अधिकांशपौरस्त्य-नाटकानि अरस्तुसीमाबन्धनं नैवोल्लङ्घयन्ति । यतो हि पौरस्त्यनाटकेषु अपवादं विहाय न किमपि नाटकं महाकाव्यानामिव विपुलाकृतिमासादयति । भरतादिसिद्धान्तिते संस्कृतनाट्यशास्त्रे आधिकारिक-कथाम् अवलम्ब्यैव पञ्चसन्धिप्रयोगपुरस्सरं प्रासङ्गिकानामन्येषां कथानकानां वर्णनस्य विधानं दृश्यते, यथा च तेषां सर्वेषां निर्वहणसन्धौ एकपुरुषार्थसिद्धिप्रदर्शनमाध्यमेन कार्यान्वितेनिर्वचनं दृश्यते, तथैव अरस्तुमहोदयस्य काव्यशास्त्रे एकान्वितेर्विषये सुस्पष्टं प्रतिपादनं दृश्यते । अरस्तुनिरूपितायामेकान्वितावपि प्रधानकथायाः अवयवत्वेनैव परस्परं सम्बद्धानां कथान्तराणां योजना विधेयेति निर्दिष्टं वर्तते । अरस्तोः एकान्वितौ कालान्वितेः, स्थानान्वितेश्च समावेशः अस्ति परं भरतेन सुस्पष्टैः पदैः तयोः प्रतिपादनं विहितं नैव विलोक्यते । कथायाः मौलिकगुणानां विवेचनविधौ अरस्तुमहाशयेन पूर्णताख्यो गुणश्च प्रतिपादितः । अरस्तुविवेचने आदिमध्यान्तावयवपरिपूर्णायां कथायामेव पूर्णताख्यो गुणो द्रष्टुं शक्यः । परं भरतप्रभृतिपौरस्त्य-काव्यशास्त्रिप्रणीतनाट्यसिद्धान्ते नाटकस्य सफलतायै आदिमध्यावसानयुक्तत्तामात्रं पर्याप्तं न भवति । तेषां दृष्टौ भावकानां जिज्ञासापरितोष एव नाटकस्य सफलतायाः निकषः । अरस्तुविवेचिता कथावस्तुगता सम्भाव्यता भरतस्यापि अभिमता एव । उभयोरपि सिद्धान्ते सम्भाव्यतयैव नाटकस्य काम्यत्वं सरसत्वं प्रयोजकत्वञ्च सिद्ध्यति । अन्यथा असम्भाव्यतया नीरसतया च तत्र भावकानां प्रवृत्तिरेव न स्यात्, परितोषस्य वार्ता तु दूरे तिष्ठतु । अरस्तुमहोदयेन कथाविवेचनविधौ कुतूहलाख्यो गुणश्च निरूपितः । तन्मते नाटकीयकथानके कुतूहलस्य च तत्परितोषस्य वर्णनं सुतरामावश्यकम् । नाटके घटनानामाकस्मिकी उपस्थितिः भावकेषु कौतुहलमुत्पादयन्ति । कौतुहलस्य सफलतायै पुनस्तत्राकस्मिकघटनायामपि अविच्छिन्ना कारणकार्य-शृङ्खला अपरिहार्या भवति । भरतमुनिना च नाट्यशास्त्रे सन्धिप्रयोजनप्रतिपादनविधौ "आश्चर्यवद-भिख्यातम्"[४२] इति निगद्य घटनानामाकस्मिकतायाः कुतूहलस्य प्रतिपादनं विहितं वर्तते। नैतन्मात्रं कौतूहलोत्तरावेशो विज्ञेया परिभावना"[४३] इति परिभावनारूपप्रभेदे तथा "अद्भुतस्य च सम्प्राप्तिरूपगुहनमिष्यते"[४४] इति निर्वहणसन्धेरूप-गूहनरूपभेदे कुतूहलस्य सुस्पष्टं प्रतिपादनं विलोक्यते । त्रासद्याः संघटनार्थ अरस्तुमहोदयेन प्रस्तावानो[४५] पाख्यानो[४६] पसंहाराणां[४७] चर्चा कृता तथा पौरस्त्यनाट्य-शास्त्रे च प्रस्तावना-प्रासङ्गिककथावस्तु-फलागमादीनां विवेचने तेषामन्तर्भावो विहितो दृश्यते ।

४.३ अरस्तुभरतयोः चरित्रविधानसामञ्जस्यम्

अरस्तुमते कथाविधानापेक्षया चरित्रविधानस्य महत्त्वं नितरां न्यूनम् । तन्मते चरित्राणि तु केवलं घटनानुकरणस्योपादानानि।

४० ना.शा. १९/१-२
४१ ना.शा.भा.१ पृ.३३
४२ ना.शा.१९/५२
४३ ना.शा.१९/५४
४४ ना.शा.१९/१०२
४५ Prologue.
४६ Episode.
४७ Exode.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तस्यैव पदावल्यां "कार्यस्यानुकरणार्थं चरित्रमानुषङ्गिकोपादानमात्रम्। ततः सज्जीभूता घटनाराजिः अथवा कथावस्तु त्रगाद्या लक्ष्यं तथा च इदं लक्ष्यं श्रेष्ठस्थानमधिकरोति। पुनश्च घटनां विना त्रगादी न सम्भवति"[४८]। जीवनं कार्यव्यापारस्यैव अपरं नाम, अतः जीवनस्यानुकरणे कार्यव्यापारस्य प्राधान्यं भवितुमर्हति। काव्यगतप्रभावस्य स्वरूपं सुखं दुःखं वा भवति, अपि च तत् कार्यं प्रति निर्भरति। तस्मात् कार्यं घटना वा त्रासद्याः साध्यम्। चरित्रं कार्यव्यापारेण सह गौणरूपेण स्वयमेव उपस्थितिं जनयति। "पुनश्च घटनां विना त्रगादी न सम्भवति, चरित्रं विना तु सम्भवेत्"[४९] इत्यादीनि अरस्तुनिर्वचनानि तस्य नाटकस्य चरित्रसम्वद्धां दृष्टिं प्रकटयन्ति। अथवा कथावस्तुविधानं प्रति तस्य सर्वाधिकमवधानं दर्शयन्ति।

अथापि अरस्तुर्नाटकस्य चरित्रचित्रणाय द्वितीयं स्थानं ददौ। अरस्तुदृष्टौ नाटके नैतिकोद्देश्यसाधकस्य चरित्रस्य विधानं विधेयम्। तस्यैव पदावल्यां "'येन मर्मणा कर्तृषु वयं कतिपयनैतिगुणान् आरोपयामः तच्चरित्रम्"। '"कर्तॄ रुचिज्ञानं प्रदर्श्य यत् तस्य नैतिकमुद्देश्यं प्रकटीकरोति तच्चरित्रम्"। अरस्तुदृष्ट्या त्रासद्यै जनसामान्यसुलभ-भ्रमदुर्वलतादिदोषयुक्तः, नातितरां सच्चरित्रः, नातितरां न्यायपरायणश्च उच्चकुलोत्पन्नः लोकविख्यातस्तादृशो मानवो नायको विधेयः, यस्य पतने तन्निष्ठाः भ्रमदुवर्लतादयो गुणा एव उत्तरदायिनो भवेयुः। तेन नाटकस्य भावकास्त्रासकरुणोद्रेकमाध्यमेन मनोविकाराणां यथोचितं विरेचनं च कुर्युः। असौ दुःखान्तस्य कृते भद्रतौचित्य-जीवनानुरूपता-एकरूपता-सम्भाव्यता-यथार्थादर्शयसमन्वयगुणविशिष्टं नायकमुपयुक्तं मेने। आचार्येण भरतेनाऽपि नाट्यशास्त्रे "महापुरुषसञ्चारं साध्वाचारजनप्रियमि"त्युक्त्वा नाटके महापुरुषविशेषो नायकः अभ्यर्थितः। विभावरूपनायकसम्बद्ध-भरतमतानुसारिणा विश्वनाथेन च सुस्पष्टैः पदैः लोकविख्यात-वंशीयः, प्रतापशाली, धीरोदात्तगुणविशिष्टः, शूरतावीरताद्यनेकविधगुणगणगौरवोल्लसितः, राजा, ऋषिः, देवः, मनुष्यत्वाभिमानी देवः, मानवश्च नाटकस्य नायको विधेयः इति प्रतिपादितः साहित्यदर्पणे-

प्रख्यातवंशो राजर्षिधीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः॥[५०]

अरस्तुमहाशयेन विरेचनसिद्धये सदोषाणां महामानवतां नायकत्वं निर्दिष्टमस्ति चेत् निर्विघ्नरसाभिव्यक्ति-सिद्धये भरतादिभिः प्राच्यनाट्यसिद्धान्तकारैः निर्दोषमहामानवस्य नायकत्वमभीष्टं मतम्। सिद्धान्ततः निर्दुष्टेष्वपि अपि प्राच्यनाट्यशास्त्रिभिः लक्ष्यितेषु रामभरतदशरथादिषु नायकेषु व्यवहारतः भ्रम-दुर्बलतादयो मानवीयदोषाः विलोक्यन्त एव नाटकप्रबन्धादिनिरूपितेषु। अतः सदोषनायकत्वं सिद्धान्तयतः अरस्तुमहोदयस्य निर्दुष्टनायकत्वं सिद्धान्तयतां भरतादीनाञ्च मध्ये व्यवहारतः पर्याप्तं साम्यमवलोकयितुं पार्यते। आपाततो "वियोगान्तं न नाटकम्" इति सिद्धान्तं प्रतिपादयन्ती प्राच्या दृष्टिः "संयोगान्तं विशिष्टं नाटकं न" इति सिद्धान्तयन्ती पाश्चात्या दृष्टिश्च स्वभावतः परस्परं वैभिन्यं भजत्येव। परम् अरस्तुप्रोक्तनैतिकोद्देश्यसिद्धये पौरस्त्या निर्दुष्टाः नायकाः स्पृहणीया भवन्ति चेद् व्यवहारतो भ्रमदुर्बलतादिदोषान् दर्शयन्तो रामदशरथभरतादयो नायकाः अरस्तुमहोदयस्य सदोषनायकत्वसिद्धान्ताय अनुपयुक्ता नैव दृश्यन्ते।

४.४ अरस्तुभरतयोः विचारतत्त्वविधानसामञ्जस्यम्

विचारतत्त्वम् अरस्तुमहोदयस्य नाट्यसिद्धान्ते नाटकस्योपादानेषु तृतीयं स्थानमधिकरोति। नाटके यस्मिन् कस्मिन्नपि प्रसङ्गे प्रासङ्गिकी सम्भाव्या वा प्रज्ञाशक्तिरेव अरस्तुसिद्धान्ते विचारतत्त्वमस्ति। तन्मते चरित्रप्रकाशनार्हा चिन्तनपद्धतिरेव विचारशक्तिः। सा विचारशक्तिः नाटके कुशीलवानां संवादमाध्यमेन अभिव्यक्ता भवति। अरस्तुमहोदयस्य विचारतत्त्वे उभयविधानां बुद्धिभावतत्त्वानां समावेशो दृश्यते तस्यैव वाक्यावल्याम् -"त्रासद्यां विचारतत्त्वं तदीयभाषाजनितप्रत्येककार्ये परिलक्ष्यते, यथा प्रमाणं खण्डनञ्च भयक्रोधकरुणादिभावानां जागरणम्, घटनामहत्त्वस्य वर्द्धनम् अल्पीकरणं वा"। "'इदानीम् एतत् स्पष्टं यत् कारुण्यभयमहत्त्वसम्भाव्यतानां जागरणे मानसिकगत्या सह कायिकगतिः समताला"। समग्रतः अरस्तुमहोदयस्य विचारतत्त्वेषु प्रमाणप्रतिवादखण्डनभयक्रोधकरुणादिभाव-तद्वृद्धिह्रासादयोऽनेके विषयाः समायान्ति। भरतदिशा च नाटके सर्वविधानां भावानाम्, सर्वविधानामुपदेशानाम्, आनन्दविनोदबुद्धि-वर्धनादीनाम्, नैकविधानां कलायोगशास्त्राणाञ्च समावेशः परमार्थतो विचारतत्त्वानि एव विजृम्भयति-

एतद्रसेषु भावेषु सर्वकर्मक्रियासु च। सर्वोपदेशजननं नाट्यमेतद् भविष्यति॥
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्। लोकोपदेशजननं नाट्यमेतद् भविष्यति॥
तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला। न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥

४८ Dramatic action, therefore, is not with a view to the representation of character; character comes in as. subsidiary to the actions. Hence the incidents and the plot are the end of a tragedy; and the end is the chief thing of all. poetics–VI

४९ Again, without action there cannot be a tragedy; there may be without character. poetics–VI

५० साहित्यदर्पणे ६/९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च । अस्मिन्नाट्ये समेतानि तस्मादेतत् मया कृतम् ॥
वेदविद्येतिहासानामाख्यानपरिकल्पनम् । विनोदजननं काले नाट्यमेतद् भविष्यति ॥[५१]

४.५ अरस्तुभरतयोः भाषाशैलीविधानसामञ्जस्यम्

अरस्तुमहोदयेन नाटकस्य कृते आलङ्कारिकी भाषा अपरिहार्या मता । तस्यालङ्कारिकभाषायां छन्दोलय-गीतादीनामन्तर्भावः अस्ति । सर्वविधालङ्कारसमन्विता भाषा अरस्तुमते नाटकस्य कृते उपयोगिनी प्रमाणिता । आचार्यो भरतश्च नाट्यशास्त्रे "षट्त्रिंशल्लक्षणोपेतं गुणालङ्कारभूषितम्", "शब्दानुदारमधुरान् प्रमदाभिनेयान्"[५२], "मृदुललितपदार्थं गूढशब्दार्थहीनम्" इत्युल्लिख्य नारीपात्राभिनेयान् उदारमधुरान् सरलान्, कोमलांश्च गुणालङ्कारभूषितान् शब्दान् नाटकस्य कृते उपयुक्तान् मेने ।

४.६ अरस्तुभरतयोः संगीतदृश्यविधानसामञ्जस्यम्

अरस्तुप्रोक्तनाटकस्य षण्णामुपादानां मध्ये तन्मते संगीतदृश्यविधानयोः स्थानं क्रमशः पञ्चमं षष्ठञ्चास्ति । तेन संगीतदृश्यविधानयोर्मध्ये संगीतस्य विशेषमहत्त्वं स्थापितम् । तेनोक्तम् -"'अवशिष्टयोः द्वयोरङ्गयोः सङ्गीतं त्रगाद्याः सर्वेषु आनन्दप्रदवस्तुषु श्रेष्ठम्" । भरतादिनाट्यसिद्धान्तानुसरतां भासकालिदास -भवभूतिश्रीहर्षादीनां नाटकेषु चेटिनायिकादयः गीतं गायन्त्येव । परं तेषु संगीतस्य तथाऽनिवार्यता न दृश्यते यथा अरस्तुमहाशयस्य सिद्धान्ते संगीतं पूर्ववृन्दगानतया उत्तरवृन्दगानतया च नाटके विशिष्टभावगतप्रभावमुल्लासयति । अरस्तु-महोदयेन दृश्यविधानाय सर्वन्यूनं महत्त्वं निर्धारितम् । अथापि तेन तत्र भावगतं विशेषाकर्षणं तु दृष्टमेव । तेनोक्तम् "अवश्यं प्रेक्षायाः भावगतमाकर्षणं विद्यते, किन्तु कलापाटवे इयं सर्वन्यूना, तथा च काव्यकलया सह अस्य सम्पर्को नीतरां क्षीणः । अभिनेतृभिः त्रगादी यद्यपि न अभिनीयेत, तथापि अस्याः प्रभावो अनुभूयेत। अपरं च प्रेक्षाप्रभावो मुख्यतो मञ्चकलायाः विषयः, न तु काव्यकलायाः" । अरस्तुतुलनायामाचार्येण भरत-मुनिना नाटकस्य दृश्यविधानान्तर्गतत्वेन प्रेक्षालयस्य रङ्गमञ्चस्य च सुविशदा वैज्ञानिकी विवेचना प्रस्तुता । तत्र प्रस्तुतः रङ्गमञ्चनिर्माणविधिः, प्रेक्षालयनिर्माणविधिश्च तथा विशदो वैज्ञानिकश्चास्ति यथा तादृशं वस्तुगतं विवेचनं विश्वस्मिन् विश्वे न कुत्रापि द्रष्टुं पार्यते। अतः दृश्यविधानसिद्धान्तनिरूपणे अरस्तुमहोदयस्य अपेक्षायां भरतो नितरां व्यापकः ।

५. निष्कर्षः

सूत्रशैल्यामाबद्धम् अरस्तुमहोदयस्य नाट्यशास्त्रापरपर्यायार्हं काव्यशास्त्रं लध्वाकारेषु षड्विशत्यध्यायेषु सीमितं वर्तते परं व्यासशैल्यां विरचितं भरतस्य नाट्यशास्त्रं बृहत्कायेषु सप्तत्रिंशदध्यायेषु विततम् । अरस्तुमहोदयस्य काव्यशास्त्रं पाश्चात्यकाव्यसिद्धान्तस्य नाट्यसिद्धान्तस्य च मूलाधारग्रन्थो विद्यते चेद् भरतस्य नाट्यशास्त्रं नाट्यसिद्धान्तस्य विश्वकोष एव। अरस्तुमहोदयेन काव्यशास्त्रे त्रासदीसिद्धान्तस्य व्यापकं कामदी-महाकाव्ययोश्च आंशिकं विवेचनं प्रस्तुतं परं नाट्यशास्त्रकृता भरतेन समग्रतः नाट्यसिद्धान्तमात्रं विवेचितम् । अरस्त्वनुयायिभिः पाश्चात्यैरपेक्षाकृतहीनतरपात्रचित्रणप्राणं संयोगान्त-मुत्कृष्टकोटिकं दृश्यकाव्यं भवितुं नार्हतीति मान्यता प्रतिष्ठापिता दृश्यते चेद् "वियोगान्तं न नाटकमि"ति सिद्धान्तयद्भिर्भरतानुयायिभिः प्राच्यैः संयोगान्तनाटकेषु देवकोटिकानां महामानवानां चित्रणं विधाय उत्कृष्टनाटकतया तेषां प्रतिष्ठा विहिता दृश्यते । अस्यामवस्थायामरस्तुभरतयोर्भिन्नता च पूर्वपश्चिमयोरेव भिन्नता कल्पयितुं शक्या परमुभयोः नाट्यसिद्धान्तयोः तलस्पर्शे विहिते सति यथा तयोस्तत्त्वविवेचनस्य साम्यस्थलानि आविर्भवन्ति न तथा वैषम्यावेदकानि स्थलानि । अरस्तुमहोदयेन नाटकस्य कथानकम्, चरित्रम्, विचारतत्त्वम्, पदरचना, संगीतम्, दृश्यविधानञ्चेति षडुपादानि नामतो निर्दिष्टानि । भरतस्य नाट्यतत्त्वविवेचनायाञ्च तानि सर्वाणि तत्त्वानि प्रकारान्तरेण भाषान्तरेण चाविर्भवन्ति । यथा अरस्तुमहोदयेन कथावस्तुविवेचने काव्यशास्त्रे बुद्धिव्ययः कृतस्तथैव भरतेन रसविवेचने स्वीया मनीषा व्ययीकृता । परमुभयोर्विवेचनयोर्गर्भे रसभावाभिव्यक्तिरेव प्राधान्यं भजते । यया दृष्ट्या अरस्तुस्त्रासकरुणयोरुद्रेकमाध्यमेन अनेकमनोवेगानां विरेचनस्य सिद्धान्तप्रणयने व्यग्रः अस्ति तयैव दृष्ट्या भरतो भयानककरुणशृङ्गारादिरसभावानामभिव्यक्तेः सिद्धान्तस्य प्रणयने दत्तसर्वावधानो विभाव्यते । चरित्रविधानस्य अरस्तुमहोदयस्य विख्यातवंशीयत्वभद्रतौचित्यादयोऽनेके सिद्धान्ता भरतस्य धीरोदात्त-दिव्यादिव्यराजर्षिप्रभृतिनायकविधानसिद्धान्तेन सह संवादिन एव विलोक्यन्ते यद्यपि आपाततः अरस्तुनायकाः सदोषा विलोक्यन्ते, भरतनायकाश्च निर्दुष्टाः । विचारतत्त्वविधानेऽपि अरस्तुमहोदयेन येषां बुद्धितर्कभावादीनां समावेशः कृतः, भरतेन तद्विरोधितया न कस्यापि विचारस्य प्रतिष्ठा विहिता यद्यप्यत्रापि आपाततो भरतस्य विचारतत्त्वेषु व्यापकविषयाणां समावेशो दृग्गोचरी भवति चेद् अरस्तुमहोदयस्य विचारतत्त्वेषु सीमितविषया विभाव्यन्ते। भाषाशैलीविधाने तु अरस्तुभरतयोर्नैकस्मिन् अपि पदे वैषम्यं विलोक्यते । एवमेव संगीतदृश्यविधानपक्षेऽपि उभयोर्मध्ये उल्लेखनीया भिन्नता नैव दृश्यते। अरस्तुमहोदयेन यथा दृश्यविधानविवेचनविधौ रङ्गमञ्चप्रेक्षालयादिनिर्माणविधिनिरूपणे यादृशी विशिष्टाऽभिरुचिः

५१ ना.शा.१/११०-११६
५२ ना.शा. १७/१२१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रकटिता न तथा अरस्तुमहोदयेन । समग्रतः अरस्तुमहोदयः समासशैल्यां सर्वाणि नाट्यतत्त्वानि प्रतिपाद्य नाट्यसिद्धान्तं प्रतिष्ठापयामास, आचार्यो भरतश्च व्यासशैल्यां नाटकस्य सर्वाणि अङ्गोपाङ्गविषयजातानि प्रकाश्य विश्वमानवसमाजाय नाटकस्य विश्वकोषमुपायनीचकार । निसर्गतः अरस्तुदृष्टिर्वस्तुप्रधाना दृश्यते चेद् भरतस्य रसभावप्रधाना ।

सन्दर्भग्रन्थाः

- अभिनवभारती (१९६४) व्या.अभिनवगुप्तः, भरतकृतनाट्यशास्त्रस्य १-६ अध्यायात्मिकी, बडौदा : गायकबाड ओरियण्टल सीरीज
- काव्यप्रकाशः (ई. २०१०) मम्मटः, (हि.व्या.आचार्यविश्वेश्वरसिद्धान्तशिरोमणिः) तृ.सं., पु.मु.सं. (सम्पा. नगेन्द्र) वारणसी : ज्ञानमण्डल लिमिटेड ।
- दशरूपकम् (२०५७) धनञ्जयः, श्रीधनिककृतावलोकटीकासहित-'प्रदीप'-हिन्दीव्याख्यया समलङ्कृतम्, प्र.सं. (हि. व्या. केशवराव मुसलगाँवकर), वाराणसी : चौखम्वा संस्कृत भवन ।
- नाट्यशास्त्रम् (२०४८) भरतः, भा. १, अभिनवभारतीसहितम् (सम्पा. पारसनाथद्विवेदी), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।
- नाट्यशास्त्रम् (२०५२) भरतः, भा. २, अभिनवभारतीसहितम् (सम्पा. पारसनाथद्विवेदी), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।
- नाट्यशास्त्रम् (२०५७) भरतः, भा. ३, अभिनवभारतीसहितम् (सम्पा. पारसनाथद्विवेदी), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।
- नाट्यशास्त्रम् (२०६१) भरतः, भा. ४, अभिनवभारतीसहितम् (सम्पा. पारसनाथद्विवेदी), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।
- प्राच्यपाश्चात्त्यसौन्दर्यशास्त्रपरम्परायाम् अरस्तुः (ई. २०१२) श्वेपद्मा शतपथी, वाराणसी : भारतीय विद्या प्रकाशन ।
- साहित्यदर्पणः (२०५८) विश्वनाथः (लक्ष्मीटीकायुतः) वाराणसी : चौखम्वा संस्कृत संस्थान ।
- Aristotle's Poetics Sanskrit Translation & Critical study. (2010). Bharat Chandra Nath. Kolkata: punthi pustak publishers 136\4B Bidhan Sarani.
- Critical theory Since Plato. Hazard Adams. Ed. (1992). Florida: Hartcourt Brace Jovanovich Inc.
- Poetics. (1992). Aristotle., Critical Theory Since Plato. Ed. Hazard Adams. Florida: Hartcourt Brace Jovanovich Inc.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाणिनिव्याकरणे धात्वनुबन्धप्रयोजनम्

सहप्रा. डा. मोहनीलालनेपालः
रूरु-संस्कृत-विद्यापीठम्

१. विषयप्रवेशः

व्याकरणशास्त्रस्य मूलं वेदः । अस्य व्याकरणस्य वेदमूलत्वात् तस्य प्राचीनता स्वतः सिद्धा । व्याकरणेषु च पाणिनेः व्याकरणं सर्वातिशायि विद्यते इति जानन्त्येव विज्ञाः । पाणिनिव्याकरणे प्रयुक्तायाः कस्याश्चनसंज्ञायाः गोपथब्राह्मणे[1] स्पष्टोल्लेखो वर्तते । एतदतिरिक्तमपि रामायणात्[2] महाभारतात्[3] निरुक्तादिग्रन्थोल्लेखादपि व्याकरणशास्त्रस्य प्राचीनता स्पष्टप्रतीतिपथमायाति । व्याकरणस्य वेदाङ्गत्वात् वेदस्य अनादित्वाद् व्याकरणस्यापि अनादित्वं सिद्ध्यति । नैतावत् परोक्षं प्रेक्षावतां यद् वेदार्थप्रतिपादकेषु प्रसिद्धेषु षट्सु वेदाङ्गेषु प्रधानं व्याकरणमेवेति । तथा हि प्रधाने च कृतो यत्नः फलवान् भवति इति भाष्यकाराः ।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम् । वि+आङ् पूर्वककृधातोः करणे ल्युट्विधानाद् व्याकरणशब्दस्य सिद्धिर्भवति । प्रकृतिप्रत्ययादिभिः शब्दस्य व्युत्पत्तिः साधुत्वनिष्पत्तिः येन शास्त्रेण क्रियते तद् व्याकरणम् । साध्वनुशासनेऽस्मिन् व्याकरणे साधुशब्दानामनुशासनं क्रियते । तेन असाधुशब्दा निवृत्ता भवन्ति । यतो हि एकस्य शब्दस्य बहवोऽपभ्रंशाः सन्ति । यथा एकस्य गोशब्दस्य गावी, गोणी, गोता, गापोतलिकेत्यादयो बहवोऽपभ्रंशाः सन्ति । तत्र गच्छतीति गौरिति व्युत्पत्त्या गम्धातो र्डोप्रत्ययविधानात् डित्वसामर्थ्यादभस्यापि टेर्लोपे गोशब्दः साधुर्भवति स एव प्रयोक्तव्यः । इत्थं गावी गोणीत्यादयोऽपभ्रंशाः स्वतो व्यावृता भवन्ति । अत एव उक्तं भर्तृहरिणा-

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः[4].. ।

शब्दज्योतिरखिलं जगद् अभिव्याप्य अखण्डमर्थजातं प्रकाशयल्लोकव्यवहारोपयोगिभाषास्वरूपे परिणमति । यथा चाह आचार्यो दण्डी-

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥

वेदोऽखिलो धर्ममूलम् । वेद एव सकलज्ञानस्य भाण्डागारो वर्तते । वेदस्य षडङ्गानि सन्ति ।

उक्तञ्च पाणिनीयशिक्षायाम्-

छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते[5] ॥

तानि शिक्षा, कल्पः, व्याकरणम्, ज्योतिषम्, निरुक्तम्, छन्दश्च । एतेष्वङ्गेषु व्याकरणं प्रधानम् ।

पाणिनिपूर्वमपि विविधा व्याकरणसम्प्रदाया आसन् । कुत्रचिद् अष्टौ सम्प्रदायाः कुत्रचिन्नवसम्प्रदाया व्याकरणस्य समुल्लिखिता उपलभ्यन्ते । तेषु ऐन्द्रसम्प्रदायः शैवसम्प्रदायश्च प्रसिद्धपथमागतौ प्रधानभूतौ वर्तेते । तयोरैन्द्रव्याकरणमतिविशालमासीत् तदपेक्षया पाणिनीयं यद् इदानीं त्रिमुनिव्याकरणनाम्ना प्रसिद्धं तत् वैज्ञानिकं परिपूर्णञ्चास्ति । अतः शैवसम्प्रदायप्रतिनिधिभूतं पाणिनिव्याकरणं सर्वैरपि सुगम्यते । यद्यपि पाणिनेः पूर्वमनेके वैयाकरणा बभूवुः, परं तेषां ग्रन्था साकल्येन नोपलभ्यन्ते । यत्र तत्र विविधेषु ग्रन्थेषु तेषाम् उद्धरणानि अवलोक्यन्ते । अतः तेषां विद्यमाने न कोऽपि सन्देहः । पूर्वेषामप्याचार्याणां कृतयः सूत्ररूप एव निबद्धा आसन् । परम्परानुसारमनेन कुलगुरुणा पाणिनिना च सैषा व्याकरणस्मृतिःसूत्रेषूपनिबद्धा । तानि च सूत्राणि अष्टभिरध्यायैर्गुम्फितत्वाद् 'अष्टाध्यायी'ति नाम्ना व्यवह्रियते । अस्याष्टाध्याय्यां लौकिकवैदिकोभयविध-शब्दप्रक्रियानिर्वचनं विलसति । अनेन लोकवेदोभयमार्गेण सञ्चरमाणः स एष पाणिनिमुनिः अक्षरसमाम्नायादारभ्य शब्दसिद्धिप्रतिपादनपर्यन्तं विलक्षणं

१ गोपथब्राह्मणे (१।२४)।
२ रामायणे किष्किन्धाकाण्डे(३।२९)
३ महाभारते (उद्योगपर्वणि ४२।६०)
४ वाक्यपदीये ब्रह्मकाण्डे ,१४१ ।
५ पाणिनीयशिक्षा (४१ -४२) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तन्त्रं प्रणिनाय, यस्मिन् पथि पाणिनेः प्राक् कोऽप्याचार्यो न सञ्चचार। इदमेव पाणिनिव्याकरणस्य व्याकरणान्तरेभ्यो वैशिष्ट्यम्। अतो वैशिष्ट्यविरहादेव प्राक्तनानि व्याकरणान्तराणि सहजमत्या विस्मृतिपथं गतानि। अस्य पाणिनिव्याकरणस्य व्यापकतां गम्भीरतां सूक्ष्मेक्षिकतां विश्वभाषासूपयोगिताञ्च दृष्ट्वा न केवलं भारतवर्षस्य विद्वांसः अपितु विश्वस्य भाषाविज्ञानसमीक्षका विद्वांसो नतमस्तकाः सन्ति।

अष्टाध्यायी पाणिनेः सूत्रात्मकव्याकरणकृतिः वर्तते। अष्टाध्याय्यां धातुपाठ-सूत्रपाठ-गणपाठ-उणादिपाठ-लिङ्गानुशासनपाठा वर्तन्ते। पञ्चपाठी व्याकरणमिति कथनं प्रसिद्धं विद्यते। अस्मिन् व्याकरणे सौत्रधातून् विहाय अद्यतनप्रचलिते सिद्धान्तकौमुदीग्रन्थे भ्वादितः चुरादिपर्यन्तं १९४४ धातव उपलभ्यन्ते। तेषां मध्ये कतिपयधातुषु विद्यमानमनुबन्धप्रयोजनं प्रस्तूयते -

२. धातुलक्षणम्

डुधाञ् धारणपोषणयोः धारणपोषणार्थकाद् अनुबन्धविनिर्मुक्तकाद् धाधातोर्दधाति धीयते वा इति व्युत्पत्तौ 'सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्' इति औणादिकसूत्रेण तुमुन् प्रैत्यये धातुशब्दो निष्पद्यते। दधाति=धारयति क्रियारूपमर्थमिति धातुः। अथवा दधाति=सर्वञ्च धातुजमाह इति सिद्धान्तात्, प्रातिपदिकानि पुष्णातीति वा धातुः। तथापि 'भूवादयो धातवः' इति सङ्केतकरणात् पारिभाषिकोऽयं शब्दः। वृद्धि.-धातु-नद्यादिपदं पारिभाषिकम्, शास्त्रकारादिसङ्केतितत्वात्। एवञ्च प्रकृते क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वम्।

पाणिनिमुनिः शुद्धान् प्रत्ययान्तान् च धातून् प्रतिजानीते। तत्र प्रत्ययान्तधातूनां 'सनाद्यन्ता धातवः[६]', ...इति सूत्रेण धातुसंज्ञा भवति। शुद्धधातूनां 'भूवादयो धातवः[७]' इति सूत्रेण। शुद्धानां भ्वादिधातूनां ''भूवादयो धातवः' इति धातुत्व भवति।

सन् -क्यच् -काम्यच् -क्यङ् क्यषोऽथाचारक्विब् णिज्यङौ तथा।

इगाय ईयङ् णिङ् चेति द्वादशामी सनादयः। एते प्रत्यया येषामन्ते विद्यन्ते ते प्रत्ययान्ता धातवः तेषां 'सनाद्यन्ता धातवः' इति धातुत्वं भवति।

अत्र सन् आदिर्येषान्ते सनादयः। तेऽन्ताः =अवयवा येषान्ते सनाद्यन्ताः। तद्गुणसंविज्ञानो बहुव्रीहिः। तेन सनन्तस्यापि संज्ञा सिद्ध्यति। अन्तशब्दोऽत्रावयववाची। धातुशब्दोऽत्र स्वरूपपरो न भूवादिपरः अनेकसंज्ञाकरणे प्रयोजनाभावात्[८]। सर्वप्रकारेभ्योऽपि धातुभ्यः तिङ् कृतश्च प्रत्यया भवन्ति। एवञ्च प्रातिपदिकप्रकृतिकाः सुपःतद्धिताश्च, धातुप्रकृतिकाः तिङ् कृतश्च इति ज्ञेयम्।

३. अनुबन्धलक्षणम्

अनुबन्धशब्दो हि अनेकार्थकः।

अनु =पश्चाद् वध्यते योऽसावनुबन्धः। अनुबध्यते इति ' अकर्तरि च कारके संज्ञायाम्[९]'इति सूत्रेण कर्मणि घञ्।

'अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्'। इति गीता। (अष्टादशाध्याये पञ्चविंशतितमश्लोकः।

तेन आचार्यकर्त्तृकलक्ष्यसमवायातिरिक्तकार्यसमर्पकोच्चारणविषयत्वमनुवन्धत्वम्। शास्त्रादौ वक्तव्येषु विषयप्रयोजनसम्बन्धाधिकारिषु अनुबध्यतेऽनेनेति करणे घञ्।

अविच्छिन्ने 'सानुबन्धाः कथं न स्युः संपदो मे निरापदः', इति रघुवंशे। प्रथमसर्गे ६४ तमश्लोकः।

व्याकरणे केषुचिद्धातुषु इण्नुमादिकार्यविशेषोपयोगिताया आदावन्ते आद्यन्तयोर्वा योजिता धातुस्वरूपबहिर्भूता वर्णा वर्णसमूहा वा अनुबन्धा दृश्यन्ते। अत एवानुबन्धपदार्थज्ञा आहु :-

आदावन्ते च सम्वद्धा वर्णा धातुषु केषुचित्।

इण्नुमादिविशेषार्था अनुबन्धा अपायिनः'। इति। (प्रतिसंस्कृतायां सिद्धान्तकौमुद्यां तिङन्तप्रकरणारम्भे।)

इत्संज्ञकत्वमनुबन्धत्वमिति दीक्षितादयः। सर्वे इत्यादौ 'जसः शि' इति सूत्रेण अनेकालत्वेन सर्वादेशो विधीयते सर्वादेशात् प्राक् शित्त्वस्य प्रत्ययत्वअभावेन इत्संज्ञाया एवाभावेन अनुबन्धत्वाभावात्। अत एव 'अनेकाल्शित्सर्वस्य' अत्र स्थितस्य शित उदाहरणम् 'इदम् इश्' इशि इतः इति। (प्रकृत -सूत्रे प्रौढमनोरमा, सर्वे इति प्रयोगसिद्धौ सिद्धान्तकौमुदी च।)

नागेशास्तु इत्संज्ञायोग्यत्वमनुबन्धत्वं स्वीकुर्वन्ति। अत एव 'जसः शि' इत्यादौ शीति शकारस्येत्संज्ञायोग्यतया 'नानुबन्धकृतमनेकाल्त्वम्

६ पा. सू. ३।२।३२।

७ पा. सू. १।३।१

८ प्रकृतसूत्रे प्रक्रियाप्रकाशे श्रीशेषकृष्णः।

९ पा. सू. ६।४।२७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

' इति निषेधप्रवृत्त्या शित्त्वादेवात्र सर्वादेशः । शित्त्वञ्च इत्संज्ञायोग्यशकारवत्त्वम् ।
अतः इत्संज्ञकत्वमित्संज्ञायोग्यत्वं वा अनुबन्धत्वमिति अनुबन्धलक्षणम् ।

धात्वनुबन्धानामयं सङ्ग्रहः -

इवर्णोवर्णआदेदोद्ऋदॢदिरुट्टिट्डुषाः ।

क-ण- ङ -पाश्चैव धातूनामनुबन्धाः प्रकीर्त्तिताः । इति ।

अनुबन्धा व्याकरणे धातुषु, प्रातिपदिकेषु, प्रत्ययेषु, आगमेषु विकरणेषु च आसज्ज्यन्ते ।

धातुषु यथा-

एध वृद्धौ इत्यत्र अकार, कमु कान्तौ, कटे वर्षावरणयोः इत्यत्र उकार- एकारौ । डुकृञ् करणे, इत्यत्र डुकारुकारौ । शीङ् शयने इत्यत्र ङकारः । ओहाक् त्यागे इत्यत्र ओकारः । टुवेपृकम्पने इत्यादौ टुकार ऋकारश्च ।

प्रातिपदिकेषु यथा-

नदट्,चोरट्,देवट् इत्यादयः । नदडादिषु टित्वं 'टिड्ढाणुद्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठुकुक्वरपः[१०]' इति ङीबर्थम् ।

प्रत्ययेषु यथा-

सु-जस्-तिप्-महिङ् -ठकादिषु उकार-जकार-पकारादयोऽनुबन्धाः । ते च केचन विशेषणार्थाः, केचन तङ्, तिङ् इति प्रत्याहारार्थाः केचन च वृद्धिस्वराद्यर्थाः, इति यथायथं विज्ञेयाः ।

आगमेषु यथा-

धुट् - वुगादयः, तेषु टकारादयो ऽनुबन्धाः । ते च 'आद्यन्तौ टकितौ[११]' इति प्रवृत्तये ।

विकरणेषु यथा-शप्-श्लु-श्ना-श-श्नमादिषु शकारमकरादयोऽनुबन्धाः,'मिदचोऽन्त्यात्परः' 'तिङ्शित्सार्वधातुकम्[१२]' इत्यादिप्रवृत्तये अनुबन्धाः सन्ति ।

अनुबन्धा इत्त्वेन लुप्यन्ते । अन्त्यानां हलां हलन्त्यम् इत्यनेन, अनुनासिकाचाम् 'उपदेशेऽजनुनासिक इत्[१३]' इत्यनेन । इर इत्संज्ञा वाच्या इत्यनेन इरः । धातूनामादौ पठितानां ञिटुडूनाम् 'आदिर्ञिटुडवः[१४]' इत्यनेन इत्संज्ञायां सत्यां 'तस्य लोपः' इति लोपो भवति । षकारस्य 'षः प्रत्ययस्य[१५]' इत्यनेन, शकारस्य 'लशक्वतद्धिते[१६]' इत्यनेन, प्रत्ययादौ चवर्गटवर्गाणां 'चुटू[१७]' इत्यनेन इत्संज्ञायां सत्यां 'तस्य लोपः' इति लोपो भवति । एवमन्यत्र ।

एषां धात्वनुबन्धानामित्संज्ञायां लोपे लौकिकानां शब्दानां प्रक्रिया प्रभाविता भवति न तु स्वरः प्रभावितो भवति ।

४. अनुबन्धप्रयोजनम् -

अत्र अकार-इकार-उकार-ऋकार-लृकार-एकार-ओकार-ककार-ञकार-टकार-डकार-पकार- षकारादिकतिपयधातूनाम् अनुबन्धप्रयोजनं प्रस्तूयते -

४.१ अकारानुबन्धप्रयोजनम्-

एध वृद्धौ, स्पर्ध संघर्षे, (भ्वादि) इत्यादौ धकाराकारस्य अनुदात्त इत्संज्ञकः, 'उपदेशे ऽजनुनासिक इत्' इति इत्संज्ञायां 'तस्य लोपः' इति लोपे च 'अनुदात्तङित आत्मनेपदम्[१८]' इति सूत्रेण आत्मनेपदं भवति । तेन लटि, एधते, स्पर्धते इत्यादि सिद्धं भवति। अनुदात्तेश्च हलादेः[१९]' इतिं सूत्रेण युच् प्रत्ययो भवति । तेन वर्धनः, स्पर्धनः इत्यादि सिद्धं भवति ।

४.२ आकारानुबन्धप्रयोजनम् -

ञिक्ष्विदाँ ञिश्वदा स्नेहमोचनयोः (भ्वादि) इत्यादिषु आकारस्य इत्संज्ञायां 'आदिदतश्च' इत्यनेन स्विन्नः, क्ष्विन्न इत्यादौ इण्निषेधार्थः ।

१०. पा. सू. ४।१।१५
११ पा. सू. १।१।४६
१२ पा. सू. ३।४।११३
१३ पा. सू. १।३।२
१४ पा. सू. १।३।५
१५ पा. सू. १।३।६
१६ पा. सू. १।३।८
१७ पा. सू. १।३।७
१८ पा. सू. १।३।१२
१९ पा. सू. ३।२।१४९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४.३ इकारानुबन्धप्रयोजनम्-

वदि अभिवादनस्तुत्योः (भ्वादि) स्कुदि आप्रवणे टुनदि सम्मृद्धौ इत्यादौ इकार इत्संज्ञकः। इदित्वात् 'इदितो नुम्धातोः[२०]' इति सूत्रेण नुम्भवति। तेन लटि वन्दते, स्कुन्दते, नन्दति इत्यादि सिद्धं भवति।

४.४ इर्. अनुबन्धप्रयोजनम्-

(भ्वादि) श्च्युतिर् क्षरणे, च्युतिर् आसेचने, (चुरादि) घुषिर् अविशब्दने इत्यादिषु इर् इत्संज्ञायां 'इरितो वा' इति सूत्रेण परस्मैपदे धातोः च्लेः चङ् विभाषया भवति। तेन अश्चुतत् अश्चोतीत्, अच्युतत्, अच्योतीत्, अजूघुषत्, अघोषीत् इत्यादि सिद्धं भवति।

४.५ ईकारानुबन्धप्रयोजनम्-

(भ्वादि)यती प्रयत्ने, ह्लादी सुखे इत्यादिषु ईकारोऽनुदात्त इत्संज्ञकः। तेन 'श्वीदितो निष्ठायाम्,' ७।२।१४इत्यनेन प्रह्लन्नः प्रह्लन्नवान् इत्यादौ इण्निषेधो भवति।

४.६ उकारानुबन्धप्रयोजनम्

(भ्वादि) कमु कान्तौ, क्रमु पादविक्षेपे, उ बुन्दिर निशामये इत्यादिषु उकार इत्संज्ञकः। तेन कम्धातोर्णिङभावे 'उदितो वा' इति सूत्रेण क्त्वायामिड्विकल्पो भवति-कमित्वा, कान्त्वा इति। क्रम् धातोः क्रमित्वा, क्रान्त्वा इति। बुन्दिर्धातोश्च बुन्दित्वा, बुन्त्वा इति।

म्रुचु, म्लुचु गत्यर्था, ग्रुचु, ग्लुचु स्तेयकरणे इत्यादौ च 'जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुश्चुश्विभ्यश्च' ३।१।५८ इति सूत्रेण परस्मैपदे धातोः च्लेः चङ् विभाषया भवति। तेन अम्रुचत् अम्रोचीत्, अम्लुचत्,अम्लोचीत्, अग्रुचत्, अग्रोचीत्,अग्लुचत्, अग्लोचीत्. इत्यादि सिद्धं भवति।

४.७ ऊकारानुबन्धप्रयोजनम् -

(भ्वादि) गुपू रक्षणे, षिधू शास्त्रे माङ्गल्ये च (दिवादि), क्लिदू आर्दीभावे, इत्यादिषु ऊकार इत्संज्ञक इति। 'आर्द्धधातुकस्येड् वलादेः[२१]' इति वलादौ आर्धधातुके परे 'स्वरतिसूतिसूयतिधूदितो वा[२२]' इति सूत्रेण विकल्पेन इड् भवति। तेन जुगोपिथ, जुगोप्थ, सिषेधिथ, सिषेद्ध, चिक्लेदिथ, चिक्लेथ इत्यादीनि रूपाणि ऊकारपाठस्य फलानि।

४.८ ॠकारानुबन्धप्रयोजनम् -

(भ्वादि) लोकृ लोचृ दर्शने भाषार्थाः इत्यादौ ॠकारोऽनुदात्त इत्संज्ञकः। तेन ॠकारेत्संज्ञायां लोपे च आत्मनेपदं भवति। लोकते, लोचते इत्यादि सिद्धं भवति। णिचि अलुलोकत्, अलुलोचत् इत्यादौ उपधाह्रस्वश्च न भवति।

४.९ लृकारानुबन्धप्रयोजनम् -

(भ्वादि) गम्लृ सृप्लृ गतौ, घस्लृ अदने इत्यादौ लृकारस्येत्संज्ञायां परस्मैपदेषु 'पुषादिद्युताद्यॢदितःपरस्मैपदेषु[२३]' इति च्लेरङ् भवति। तेन अगमत्, असृपत्,अघसत् इत्यादि सिद्धं भवति।

४.१० एकारानुबन्धप्रयोजनम्-

(भ्वादि)कटे वर्षावरणयोः, चते चदे माचने, इत्यादिष्वेकारस्येत्संज्ञयां परस्मैपदेषु 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्[२४]' इति इडादौ सिचि वृद्धिनिषेधो भवति। तेन अकटीत्, अचतीत्, अचदीत् इत्यादौ 'अतो हलादेर्लघोः[२५]' इति सूत्रेण वृद्धिः न भवति।

४.११ ओकारानुबन्धप्रयोजनम् -

भञ्जो आमर्दने, भुजो कौटिल्ये इत्यादौ ओकारस्येत्संज्ञकतया निष्ठायां नत्वं न भवति। 'ओदितश्च'[२६] इत्यस्य प्राप्तिरत्र। तेन भग्नः, भुग्नः इत्यादि सिद्धं भवति।

(भ्वादि) टु ओश्वि गतिवृद्ध्योः, टु ओस्फूर्जावज्रनिर्घोषे, ओहाक् त्यागे इत्यादौ धात्वादावपि ओकारस्येत्संज्ञकतया उच्छूनः, स्फूर्णः स्फूर्णवान्, प्रहीण इत्यादौ निष्ठानत्वं भवति।

---

२० पा. सू. ७।१।५८
२१ पा. सू. ७।२।३५
२२ पा. सू. ७।२।४४
२३ पा. सू. ३।१।५५
२४ पा. सू. ७।२।५
२५ पा. सू. ७।२।७
२६ पा. सू. ॥ ....

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ओहाक् त्यागे इत्यत्र ओकार 'ओदितश्च' इति निष्ठानत्वार्थम् । ककारस्तु 'हश्च व्रीहिकालयोः[२७]' इत्यत्र हाको हाङश्च सामान्यग्रहणार्थः । अन्यथा निरनुबन्धकस्य ग्रहणे सानुबन्धकस्य ग्रहणम् इति हाङो ग्रहणं न स्यात् ।

४.१२ ङकारानुबन्धप्रयोजनम् -

(अदादि) इङ् अध्ययने, त्रैङ् पालने, (अदादि) शीङ् स्वप्ने इत्यादिषु ङकार इत्संज्ञक आत्मनेपदार्थः । तेन ङकारेत्संज्ञायां लोपे च 'अनुदात्तङित आत्मनेपदम्' इति आत्मनेपदं भवति । तेनं अधीते, त्रायते, शेते इत्यादि सिद्धं भवति ।

४.१३ ञकारानुबन्धप्रयोजनम् --

(भ्वादि)हृञ् हरणे, भृञ् भरणे इत्यादिषु कारः 'स्वरितञित कर्त्रभिप्राये क्रियाफले[२८]' आत्मनेपदार्थः। तेन हरति, हरते, भरति, भरते इत्यादीनि रूपाणि कारपाठस्य फलानि ।

एवञ्च कतिपयञियुक्तधातूनां 'आदिर्ञिटुडवः[२९]' इतिसूत्रेण इत्संज्ञाविधीयन्ते । तदनुबन्धा धातवः ञकारेत्संज्ञका भवन्ति। तेन 'ञितः क्तः[३०]' इति सूत्रेण वर्तमाने क्तप्रत्ययो भवति । इदं ञकारेत्वस्य प्रयोजनम् । तेन ञिइन्धि दीप्तौ इत्यस्मात् इद्धः इति, (भ्वादि) ञिक्ष्विदा स्नेहमोचनयोः इत्यस्मात् क्षिण्णः इति, (दिवादि) ञितृषा पिपासायां इत्यस्मात् तृषितः इति, (भ्वाादि) ञित्वरा संभ्रमे इत्यस्मात् त्वरितम् इति, (स्वादि) ञिधृषा प्रागल्भ्ये इत्यस्मात् धृष्टः इति, (भ्वादि) ञिमिदा स्नेहने इत्यस्मात् भिन्नः इति, (जुहोत्यादि) ञिभी भये इत्यस्मात् भीतः इति, (अदादि) ञिस्वप् शये इत्यस्माच्च सुप्तः इति रूपाणि भवन्ति ।

४.१४ टकारानुबन्धप्रयोजनम् -

टकारेत्संज्ञकेभ्यः धातुभ्यः 'ट्वितोऽथुच्[३१]' इत्यनेन अथुच् प्रत्ययो भवति । इदं टकारेत्संज्ञायाः फलम् । तेन (भ्वादि)टुनदि समृद्धौ, इत्यस्मात् नन्दथुः, टुयाचृ याञ्चायाम्, इत्यस्मात् याचथुः, टुवेपृ कम्पने इत्यस्मात् वेपथुः, टु ओश्वि गतिवृद्ध्योः इत्यस्मात् श्वयथुः, टुवम् उद्गिरणे इत्यस्मात् वमथुः, टुभ्राजृ दीप्तौ. इत्यस्मात् भ्राजथुः, टुभ्राशृ दीप्तौ इत्यस्मात् भ्राशथुः, टुभ्लाशृ दीप्तौ. इत्यस्मात् भ्लाशथुः, अदादि टु क्षु शब्दे इत्यस्मात् क्षवथुः,.. स्वादि टु दु उपतापे इत्यस्मात् दवथुः इति रूपाणि भवन्ति।

४.१५ डकारानुबन्धप्रयोजनम् -

डकारेत्संज्ञकेभ्यः धातुभ्यः 'ड्वितः क्त्रि :[३२]' इति सूत्रेण क्त्रिप्रत्ययो भवति । इदं डकारेत्संज्ञायाः प्रयोजनम् । तेन (तनादि) डुकृञ् करणे इत्यस्मात् कृत्रिमम् इति, (क्रयादि) डुक्रीञ् द्रव्यविनिमये इत्यस्मात् कृत्रिमम् इति, (जुहोत्यादि) डुधाञ् धारणपोषणयोः इत्यस्मात् हित्रिमम् इति, डुदाञ् दाने इत्यस्मात् दात्रिमम्, (भ्वादि) डुपचष् पाके इत्यस्मात् पक्त्रिमम् इति, (जुहोत्यादि) डुभृँ धारणपोषणयोः इत्यस्मात् भृत्रिमम् इति, डुमिञ् प्रक्षेपणे इत्यस्मात् मित्रिमम् इति, डुलभष् प्राप्तौ इत्यस्मात् लब्ध्रिमम् इति, (भ्वादि) डुवप् बीजसन्ताने इत्यस्मात् उप्त्रिमम् इति च रूपाणि भवन्ति ।

४.१६ पकारानुबन्धप्रयोजनम् -

पकारेत्संज्ञकेन 'दादाघ्वदाप्[३३]' इति सूत्रेण प्राप्तस्य घुत्वस्य निषेधो भवति । तेन दाप् लवने इत्यस्मात् दायात्, अदासीत् इत्यादौ इत्वसिज्लुकौ न भवतः । इदं पकारेत्संज्ञायाः प्रयोजनम् ।

४.१७ षकारानुबन्धप्रयोजनम् -

षकारेत्संज्ञकेभ्यः धातुभ्यः 'षिभ्दिदादिभ्योऽङ्' । इति सूत्रेण अङ्-प्रत्ययो भवति । इदं षकारेत्संज्ञायाः प्रयोजनम् । तेन (भ्वादि) डुलभष् प्राप्तौ इत्यस्मात् लभा इति, डुपचष् पाके इत्यस्मात् पचा इति, त्रपुष् लज्जायाम् इत्यस्मात् त्रपा इति, जृष् वयोहानौ (चुरादि) इत्यस्मात् जरा इति, क्षीष् हिंसायाम् (क्रयादि) इत्यस्मात् क्षिया इत्यादीनि च रूपाणि सिद्धानि भवन्ति ।

५. निष्कर्षः

शब्द-साधुत्वविधायकं शास्त्रं व्याकरणम् । विदितमेव तत्रभवद्भिः यत्संस्कृतवाङ्मयज्ञानाय व्याकरणमेव मुख्यं साधनम्। ऐन्द्रचान्द्रादिषु नैकेषु व्याकरणेषु सत्स्वपि सर्वत्र अधुना पाणिनीयव्याकरणमेव प्रचलति । तच्च व्याकरणं लक्ष्यलक्षणात्मकम् । तत्र

---

२७ पा. सू. ३ । १ । १४८
२८ पा. सू. १ । ३ । १
२९ पा. सू. १ । ३ । ५
३० पा. सू. ३ । २ । १८७
३१ पा. सू. १ । ३ । १
३२ पा. सू. १ । ३ । १
३३ पा. सू. १ । ३ । १

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शब्दो हि लक्ष्यः लक्षणन्तु सूत्रम् । अनयोः सम्यक् ज्ञानार्थं पाणिनीयाष्टाध्याय्या अध्ययनं परमावश्यकमस्ति ।

शुद्धप्रत्ययान्तभेदेन धातवो द्विविधाः । प्रकृतिप्रत्ययविभागयुक्तस्य 'सनाद्यन्ता धातवः' इति सूत्रेण धातुसंज्ञा । प्रकृतिप्रत्ययविभागरहितस्य 'भूवादयो धातवः' इति सूत्रेण धातुसंज्ञा ।

धातुषु अनुबन्धकरणेन आत्मनेपदं परस्मैपदञ्च भवति । अनुबन्धकरणादेव विशेषधातुभ्यः विशेषकृत्प्रत्यया भवन्ति ।

अस्मिन् निवन्धे अनुबन्धानां प्रयोजनं संक्षेपरूपेण दर्शितम् । पाणिनिना शब्दशास्त्रनिर्माणे कीदृशी चातुरी अनुबन्धसंयोजने विहिता सा चातुरी अस्माभिरवगन्तुमशक्या । ऋतम्भराप्रज्ञाविषयीभूतमनुवन्धकरणं शब्दनिर्माणोपयोगि । अतः यथामति अनुबन्धप्रयोजनमदशीति शम् ।

सन्दर्भग्रन्थसूची:

- कालिदास, रघुवंश महाकाव्य, वाराणसीः मोतिलाल बनारसीदास दोस्रो संस्करण, १९८७ ।
- दीक्षितो भट्टोजिः, सिद्धान्तकौमुदी तत्ववोधिनी व्याख्या, दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, सन् १९८५ ।
- दीक्षितो, भट्टोजि, वैयाकरणसिद्धान्तकौमुदीः (बालमनोरमा तत्वबोधिनी सहिता) द्वितीयोभागः, दिल्ली : मोतीलालबनारसीदास, सन् १९९७ ।
- नौटियाल, चक्रधर, बृहद् अनुवादचन्द्रिका, दिल्लीः मोतीलाल बनारसीदास, सन् १९८८ ।
- पतञ्जलिः, व्याकरणमहाभाष्यम्, वाराणसी, चौखम्वा विद्याभवन, सन् १९८८ ।
- पाणिनिः, पाणिनीयशिक्षा, वाराणसीःचौखम्वा ओरियन्टालिया, दोस्रो संस्करण १९८८ ।
- भट्ट, नागेशः, परिभाषेन्दुशेखरः, वाराणसी, भारतीय विद्या संस्थान, १९८८ ।
- भर्तृहरिः वाक्यपदीयम्, ब्रह्मकाण्डम्, अम्वाकर्त्रीव्याख्याकारः सम्पादकश्च पद्मश्रीः पण्डितरघुनाथशर्मा, वाराणसीः सम्पूर्णानन्द संस्कृत-विश्वविद्यालय, २००६ ।
- ऋतम्भरा, वर्षः ३ अंक ५ काठमाडौंः महेन्द्र संस्कृत विश्वविद्यालय ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न्यायवैशेषिकाभिमतानुमानावयवस्वरूपविमर्शः

उपप्रा. डा. रघुनाथ-नेपालः
विश्वविद्यालयविद्यापीठस्थ

१. विषयप्रवेशः

प्राच्यपाश्चात्यभेदेन द्विधाविभक्तानां दर्शनानां मध्ये प्रथमस्य प्राच्यदर्शनस्य नास्तिकास्तिकदर्शनभेदो दृश्यते । तत्र अस्वीकृतवेदप्रामाण्यस्य नास्तिकदर्शनस्य त्रैविध्यं विद्यते, चार्वाकजैनबौद्धभेदात्। अपरस्य तु न्यायवैशेषिकसांख्ययोगमीमांसावेदान्तभेदेन षड्विधत्वं सुप्रसिद्धम् । तत्रेमेऽन्यतमभूते गौतमकणादप्रवर्तिते न्यायवैषिकाख्यदर्शने प्रमाणप्रमेयशास्त्रत्वेन प्रसिद्धे समानतन्त्ररूपे भवतः, प्रायशो विषयप्रकाशनसामीप्यात्, परस्परपूरकत्वाच्च । अतो दर्शनद्वयेऽस्मिन् प्रत्यक्षादिप्रमाणानां निरूपणं विशेषेण कृतं विद्यते । तत्र न्यायदर्शने प्रत्यक्षानुमानोपमानशब्दाख्यानि चत्वारि प्रमाणान्यभिमतानि चेद् वैशेषिकदर्शने तु प्रत्यक्षानुमानरूपं प्रमाणद्वयमेवाभिमतम् । उभयाभिमतमनुमानाख्यं प्रमाणं तत्तद्दर्शनस्य सूत्रभाष्यकारादिभिर्निरूपितं विस्तरेण । तत्र स्वार्थानुमानपरार्थानुमानभेदेन विभक्तस्यानुमानस्य स्वार्थानुमानविषये नास्ति विभेदः किन्तु पञ्चावयववाक्यपूर्वकस्य परार्थानुमानस्य निरूपणेऽस्ति लेशतो भेदः । अतो निबन्धेऽस्मिन् अनुमानपरिचयपूर्वकं न्यायवैशेषिकाभिमतपरार्थानुमानावयवस्वरूपं विमृश्यते ।

२. अनुमानपरिचयः

अनुमीयते अनेनेति तदनुमानम् इति अनूपसर्गपूर्वकमाधातोः करणार्थकल्युट्प्रत्ययेन निष्पन्नोऽयम् अनुमानशब्दः अनुमितिकरणार्थको भवति । तच्चानुमानं व्याप्तिस्मरणरूपम्, लिंगपरामर्शरूपं वा । व्यापारवदसाधारणकारणं करणमिति करणलक्षणमते परामर्शात्मकव्यापारवतो व्याप्तिस्मरणस्य अनुमितिकरणत्वम्, कार्याव्यवहितपूर्ववर्तिकारणं करणमिति मते तु परामर्शस्य करणत्वम् । तच्चानुमानं स्वार्थपरार्थभेदेन द्विविधं वर्तते ।

क) स्वार्थानुमानम्

स्वानुमितिं प्रति हेतुभूतं यदनुमानं तत्स्वार्थानुमानमित्युच्यते । यथोक्तम् - स्वार्थं स्वप्रतिपत्तिहेतुरिति ।[१] न्यायबोधिनीकारस्तु यत्रावयववाक्यानां प्रयोगो न भवति, तत्स्वार्थानुमानमिति । यथोक्तम्– स्वार्थानुमानं नाम न्यायाप्रयोज्यानुमानमिति ।[२] अवयववाक्यं हि परमो न्याय इति चोच्यते, सोऽयं परमो न्याय इति भाष्यात् । तथा हि– स्वयमेव कश्चन पुरुषो यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृह्णाति, तदनन्तरञ्च स एव कदाचित् पर्वतसमीपं गच्छति, तत्र च गते तस्य पुरुषस्य अग्नेस्सन्देहो जायते। तदा पर्वते धूमं पश्यन् व्याप्तिं स्मरति– यत्र यत्र धूमस्तत्र तत्राग्निरिति । ततो वह्निव्याप्यधूमवानयं पर्वतः' इत्याकारकं ज्ञानं तस्योत्पद्यते, तदेव स्वार्थानुमानमित्युच्यते । यथोक्तम्– तथा हि स्वयमेव महानसादौ विशिष्टेन प्रत्यक्षेण धूमाग्न्योर्व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वतवर्त्तिनीमविच्छिन्नमूलामभ्रलिहां धूमलेखां पश्यन् धूमदर्शनाच्चोद्बुद्धसंस्कारो व्याप्तिं स्मरति – यत्र धूमस्तत्राग्निरिति । ततोऽत्रापि (वह्निव्याप्य)धूमोऽस्तीति प्रतिपद्यते । तस्मादत्र पर्वतेऽग्निरप्यस्तीति स्वयं प्रतिपद्यते, तत्स्वार्थानुमानम्[३]। एतावता स्वप्रतिपत्तिहेतुत्वेन स्वार्थानुमानस्य प्रतिपादनं कृतमिति ।

ख) परार्थानुमानम्

अत्र स्वयमेव धूमेन हेतुना वह्निमनुमायान्यं प्रति बोधनाय यत् पञ्चावयववाक्यं प्रयुज्यते, तत्परार्थानुमानमित्युच्यते । यथोक्तम् - यत्तु स्वयं धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावययववाक्यं प्रयुज्यते, तत्परार्थानुमानम् ।[४] पञ्चावयववाक्यानि च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानीति । तत्र पर्वतो वह्निमानिति प्रतिज्ञावाक्यम् । धूमवत्त्वादिति हेतुवाक्यम् । यो यो धूमवान्, स सोऽग्निमान्, यथा महानसम् इत्युदाहरणवाक्यम् । तथा चायमित्युपनयवाक्यम् । तस्मात्तथेति निगमनवाक्यम् । एतेषां खलु पञ्चावयववाक्यानां साहाय्येन परपुरुषस्य यज्ज्ञानं जायते, तत्परार्थानुमानमिति सुवचम् ।

पूर्वोक्तप्रकारेण अवयववाक्यसमूहो न्याय इत्यनेन कथनेन प्रतिज्ञादीनां पञ्चानामवयवानां समुदायत्वं न्यायत्वमिति ज्ञायते।

---

१ केशवमिश्रः, तर्कभाषा, १३० तमं पृष्ठम् ।
२ गोवर्धनचार्यः, न्यायबोधिनी, ९५तमं पृष्ठम् ।
३ केशवमिश्रः तर्कभाषा, १३०तमं पृष्ठम् ।
४ अन्नम्भट्टः तर्कसङ्ग्रहः, ९६ तमं पृष्ठम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यथोक्तं न्यायबोधिनीकारेण– न्यायत्वञ्च प्रतिज्ञाद्यवयवपञ्चकसमुदायत्वम्। अवयवत्वञ्च प्रतिज्ञाद्यन्यतमत्वम्।[५]

एतावता परार्थानुमाने अवयववाक्यानामावश्यकत्वात् स्वार्थानुमाने च नावश्यकत्वात् न्यायप्रयोज्यानुमानं परार्थानुमानं भवति चेत्, न्यायाप्रयोज्यानुमानं स्वार्थानुमानमिति फलितोऽर्थः। तच्च वाक्यं त्र्यवयवमुत पञ्चावयवमित्यत्र दार्शनिकानां मतभेदो दृश्यते। न्यायदर्शने पञ्चावयववाक्यमिति आगौतमाद् अन्नंभट्टावधि निश्चप्रचम्। ते चावयवाः प्रतिज्ञाहेतूदाहरणोपनयनिगमनभेदेन पञ्च सन्ति। यथोक्तम् सूत्रकारेण– प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः[६] इति।

भाष्यकारस्तु वात्स्यायनो दशावयवाङ्गीकुर्वतां नैयायिकैकदेशिनां मतं स्वभाष्ये उपपाद्य तेषु दशावयवेषु जिज्ञासासंशयशक्यप्राप्तिप्रयोजनसंशयव्युदासादीनां पञ्चावयवानां खण्डनं च करोति[७]।

इतोऽनन्तरं क्रमशः न्यायवैशेषिकाभिमतानुमानवाक्यैकदेशीभूता अवयवा विव्रियन्ते -

३. नैयायिकाभिमतानुमानावयवविमर्शः

क) प्रतिज्ञा

साध्यविशिष्टस्य पक्षस्य प्रतिपादकवचनं प्रतिज्ञेति। यथोक्तं पदकृत्यकारेण- साध्यविशिष्टपक्षबोधकवचनं प्रतिज्ञा।[८] प्रतिज्ञाशब्दस्य सर्वप्रथमं प्रयोगस्तु न्यायसूत्रे एव कृतो गौतममुनिना। यथोक्तम्– साध्यनिर्देशः प्रतिज्ञा।[९] अर्थात् साध्यस्य निर्देशः प्रतिज्ञा। यथा - पर्वतो वह्निमान् इत्यत्र साध्यस्य वह्नेः निर्देशः कृतो वर्तते। अथवा पर्वतो वह्निमान् इत्यत्र वह्निविशिष्टपर्वतस्य प्रतिपादकत्वात् पर्वतो वह्निमानिति वाक्यं प्रतिज्ञेति। भाष्यकारस्तु प्रज्ञापनीयधर्मविशिष्टस्य धर्मिणः परिग्रहवचनं प्रतिज्ञेति वदति। यथा – अनित्यः शब्द इति। यथोक्तम् –

प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनं प्रतिज्ञा = साध्यनिर्देशः – अनित्य शब्द[१०] इति। अर्थात् प्रज्ञापनीयेन साध्येन धर्मेण अनित्यत्वेन, विशिष्टस्य धर्मिणः = पक्षस्य शब्दस्य यत् परिग्राहकं वचनं सा प्रतिज्ञेति। पक्षे साध्यस्य ज्ञानं प्रतिज्ञायाः प्रयोजनं भवतीत्यपि बोध्यम्।

ख) हेतुः

पक्षे साध्यस्यास्तित्वसाधनाय साधनत्वेन रूपेण यद् अवयववाक्यं प्रयुज्यते स हेतुरुच्यते। यथा पर्वतो वह्निमान् धूमादित्यत्र पर्वतरूपे पक्षे साध्यस्य वह्नेस्साधनाय तृतीयान्तं पञ्चम्यन्तं वा यत् 'धूमेन धूमादि'ति वाक्यं प्रयुज्यते, स धूमो हेतुर्भवति। यथोक्तम्–

तृतीयान्तं पञ्चम्यन्तं वा लिङ्गवचनं हेतुः[११]इति। गौतमस्तु उदाहरणस्य साधर्म्येण वैधर्म्येण च साध्यस्य सिद्धिर्येन भवति, स हेतुरिति वदति। यथोक्तम्– उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः।[१२] तथा वैधर्म्यात्।[१३] यथा - अनित्यः शब्दः उत्पत्तिधर्मकत्वादित्यत्र उत्पत्तिधर्मकत्वं उदाहरणसाधर्म्यतया हेतुर्भवति। तथा उदाहरणवैधर्म्यादपि साध्यसाधनं हेतुर्भवति। यथा- अनित्यः शब्द उत्पत्तिधर्मकत्वादित्यत्रैव। लिङ्गस्य ज्ञानं हेतोः प्रयोजनमिति।

ग) उदाहरणम्

उदाहरणं दृष्टान्त इत्यनर्थान्तरम्। वस्तुतो व्याप्तेः प्रतिपादकं यद् दृष्टान्तवचनं भवति तदुदाहरणमित्युच्यते। यथोक्तम्– व्याप्तिप्रतिपादकदृष्टान्तवचनमुदाहरणम्।[१४] इति। यथा महानसम्। पर्वतो वह्निमान् धूमादित्यत्र 'यत्र यत्र धूमस्तत्र तत्र वह्निरि'त्यादौ व्याप्तिप्रतिपादकदृष्टान्तो भवति महानसम्। तादृशदृष्टान्तवचनमेवोदाहरणमिति। अन्यच्च – हेतौ साध्यस्य साध्याभावे च हेत्वाभावस्य यद् व्याप्तिप्रतिपादकदृष्टान्तवचनं भवति, तद् दृष्टान्तं इत्युच्यते। हेतौ साध्यनिरूपितव्याप्तिप्रतिपादकदृष्टान्तवचनरूपमुदाहरणन्तु पूर्वोक्तमेव। सम्प्रति साध्याभावे हेत्वभावस्य व्याप्तिप्रतिपादकदृष्टान्तवचनरूपमुदाहरणमुच्यते - यथा 'पर्वतो वह्निमान् धूमादि'त्यत्र 'यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभावः' यथा 'जलह्रदः' इत्यादौ वह्न्यभावे धूमाभावस्य व्याप्तिप्रतिपादकदृष्टान्तवचनरूपमुदाहरणं

५ पूर्ववत्, ४५तमं पृष्ठम्।
६ न्यायसूत्रम् १।१।३२।
७ वात्स्यायनः न्यायभाष्यम् ५३तमं पृष्ठम्।
८ तर्कसंग्रहः-पदकृत्यम्, १६२तमं पृष्ठम्।
९ न्यायसूत्रम् १।१।३३।
१० वात्स्यायनः न्यायभाष्यम्, ५५तमं पृष्ठम्।
११ तर्कसंग्रहः-पदकृत्यम्, १६२तमं पृष्ठम्।
१२ न्यायसूत्रम् १।१।३४।
१३ न्यायसूत्रम् १।१।३५।
१४ तर्कसंग्रहः-पदकृत्यम्, १६२तमं पृष्ठम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्तते जलह्रद इति । एतयोर्द्वयोर्मध्ये प्रथमे महानसदृष्टान्तेन धूमे वह्नेः व्याप्तिर्जायते चेत् द्वितीये जलह्रददृष्टान्तेन वह्न्यभावे धूमाभावस्य व्याप्तिर्जायते। आचार्यो गौतमस्तु - साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम् ।[१५] अर्थात् साध्यस्य समानधर्मतया तद्धर्मभावो यस्मिन् वर्तते, स दृष्टान्तः तद्धर्मभावीत्युच्यते । व्याप्तिज्ञानं च तावत् उदाहरणस्य प्रयोजनमित्यवगन्तव्यम् ।

घ) उपनयः

व्याप्तिविशिष्टलिङ्गस्य प्रतिपादकं वचनमुपनय इति । उपनयस्तु उदाहरणस्यैवानुसरणं करोति । उपसंह्रियते हेतुरनेन (वाक्येन) पक्षे इति उपसंहारः स एवोपनयः । तथा च सूत्रम् - उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ।[१६]

तद्यथा- उदाहरणेन अन्वयव्याप्तिविशिष्टहेतोः बोधो जायते चेदुपनयेनापि अन्वयव्याप्तिविशिष्टहेतोर्ज्ञानं जायते । यदि चोदाहरणेन व्यतिरेकव्याप्तिविशिष्टहेतोः बोधस्तदा उपनयेन तादृशस्यैव हेतोः बोधो जायत इति । तथा चायमिति उपनयस्वरूपं वर्तते । अर्थाद् यथा वह्निव्याप्यधूमवान् महानसो भवति तथैवायमपि पर्वतो वह्निव्याप्यधूमवानिति । पदकृत्यकारस्तु उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुदाहरणम्[१७] इति वदति । पक्षधर्मतायाः ज्ञानमेव वस्तुतः उपनयस्य प्रयोजनमिति ।

ङ) निगमनम्

पक्षे साध्यस्य यद् अबाधितत्वप्रतिपादकं वचनं भवति तद् निगमनमित्युच्यते । तस्मात्तथेति निगमनस्वरूपम् । अर्थात् वह्निव्याप्यधूमवत्त्वादयं पर्वतो वह्निमानिति निगमनम् । आचार्यो गौतमस्तु हेतोः कथनेन सह प्रतिज्ञायाः पुनर्वचनं निगमनमिति वदति । यथोक्तं गौतमेन ऋषिणा– हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ।[१८] अर्थात् हेतुव्यपदेशात् प्रतिज्ञायाः यत् पुनर्वचनं तद् निगमनं भवति । यथा 'तस्मात्तथा' = तस्माद् वह्निमान् इति । तथा च पर्वतो वह्निमान् धूमात्, यो यो धूमवान् स स वह्निमान्, यथा महानसः, तथा चायम्, तस्मात्तथेत्यत्र 'तस्मात्तथा' इति प्रतिज्ञायाः पुनर्वचनमेव निगमनमिति । अबाधितत्वज्ञानम् असत्प्रतिपक्षितत्वज्ञानञ्चेति निगमनस्य प्रयोजनं ज्ञेयम् । एवं प्रकारेणैतैः पञ्चभिर्वाक्यैः सद्धेतौ पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षत्वरूपाणि पञ्चरूपाणि विद्यमानानि प्रदर्शितानि भवन्तीति ।

४. वैशेषिकाभिमतानुमानावयवविमर्शः

वैशेषिकदर्शने च पञ्चैव अवयवाः स्वीकृता विद्यन्ते किन्तु तेषां नामान्तरमवलोक्यते । प्रशस्तपादभाष्यकारेण प्रत्येकमवयवानां लक्षणमनुक्त्वैव साक्षात् विभागः कृतो दृश्यते । यथोक्तम् – अवयवाः पुनः प्रतिज्ञानपदेशनिदर्शनानुसन्धानप्रत्याम्नाया इति ।[१९] एवञ्चास्मिन् विभागे नैयायिकोक्तावयवेभ्यो नामत एव भेदः, न वस्तुस्वरूपतः । पञ्चावयवानां लक्षणन्तु प्रशस्तपादभाष्यव्याख्यायां कन्दलीकारेणैवं कृतमस्ति - प्रतिपादनीयस्यार्थस्य यावति शब्दसमूहे प्रतीतिः पर्यवस्यति, तस्य पञ्चभागास्समूहापेक्षयावयवा इत्युच्यन्ते इति ।[२०] वैशेषिकाणां लक्षणेऽस्मिन् न्यायभाष्योक्तलक्षणापेक्षया न कश्चिद् भेदो दृश्यते - साधनीयार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तस्य पञ्चावयवाः प्रतिज्ञादयः समूहमपेक्ष्यावयवा उच्यन्ते इति ।[२१] अत एवोक्तम् – अवयवानां नाम्ना भेदसत्त्वेऽप्यर्थतः साम्यमेव । अत्रेदानीं क्रमशः वैशेषिकोक्तानां पञ्चानामप्यवयवानां विवरणं प्रदर्श्यते -

क) प्रतिज्ञा

तत्र प्रशस्तपादाचार्येण अनुमेयोद्देशोऽविरोधी प्रतिज्ञा[२२] इत्युक्तम् । प्रतिपाद्यमानसाध्यविशिष्टधर्मिणः कथनम्, प्रत्यक्षादिप्रमाणेनाविरोधिवाक्यकथनं प्रतिज्ञेत्यर्थः । प्रतिपिपादयिषितधर्मविशिष्टस्य धर्मिणोऽपदेशविषयमापादयितुमुद्देशमात्रं प्रतिज्ञेति, यथा - द्रव्यं वायुरिति । कश्चन प्रमादवशात् दोषवशात् वा प्रत्यक्षादिप्रमाणविरूद्धं साध्यं साधयितुमिच्छेत्, तथा सति विरूद्धवचनमपि प्रतिज्ञाख्यावयवनाम्नोच्येतातः प्रतिज्ञालक्षणे अविरोधीति पदमत्रोक्तम्। भाष्यकारस्स्वयमेवाविरोधिग्रहणस्य प्रयोजनं स्पष्टयति- अविरोधिग्रहणात् प्रत्यक्षानुमानाभ्युपगतस्वशास्त्रवचनविरोधिनो निरस्ता भवन्ति । यथानुष्णोऽग्निरिति प्रत्यक्षविरोधी,

---

१५ न्यायसूत्रम् १।१।३६ ।
१६ न्यायसूत्रम्, १ - १ - ३८ ।
१७ चन्द्रजसिंहः, तर्कसंग्रहपदकृत्यम्, १६२तमं पृष्ठम् ।
१८ न्यायसूत्रम् १।१।३९ ।
१९ प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम्, अनुमानप्रकरणम् ५६५ तमं पृष्टम् ।
२० श्रीधराचार्यः, न्यायकन्दली, अनुमानप्रकरणम् ५५८ तमं पृष्टम् ।
२१ वात्स्यायनः, न्यायभाष्यम्, १-१-१ पृष्टसंख्या ११ ।
२२ प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम्, अनुमानप्रकरणम् ५६९ तमं पृष्टम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

घनमम्बरमित्यनुमानविरोधी, वैशेषिकस्य सत्कार्यमिति ब्रुवतः स्वशास्त्रविरोधी, न शब्दोऽर्थप्रत्यायक इति स्ववचनविरोधी इति ।[२३] व्योमशिवाचार्येण एतद्व्याख्यानावसर एवमुक्तम् - यो हि धर्मः प्रतिपादयितुमिष्टस्तद्विशिष्टो धर्मी पक्षः, तस्योद्देशमात्रं प्रत्यक्षाविरुद्धं परेषामनिश्चितार्थाभिधायकं वचनं प्रतिज्ञेति ।[२४] भाष्यकारेण स्वेनैव तस्य विवरणकाले प्रत्यक्षाविरुद्धपदं त्यक्तम्, व्योमशिवाचार्येण तस्यावश्यकत्वं ज्ञात्वा गृहीतम्, नोचेत् भाष्यकारेणैवाविरोधिग्रहणस्य प्रयोजनमुक्तन्तद् व्यर्थं स्यात् । अतो व्योमशिवाचार्येण प्रत्यक्षाविरूद्धं परेषामनिश्चितार्थाभिधायकमिति पदं प्रयुक्तम् ।

भाष्यकारेण प्रशस्तपादाचार्येण प्रतिज्ञायाः प्रयोजनं प्रदर्शयन् अपदेशवाक्यमापादयितुमित्युक्तम् । अर्थात् कस्मिंश्चित् धर्मिणि धर्मस्य(साध्यस्य) सिद्धचर्थं वचनम् । यदि धर्मी न प्रतिपाद्यते तदा हेतुप्रयोग एव न सम्भवति, हेतुप्रयोगमन्तरा साध्यसिद्धिर्न भवत्यतः प्रतिज्ञावाक्यं धर्मिग्राहकप्रमाणं बोधयन् हेत्वाश्रयमुपस्थापयति, आश्रयं बोधयन् तादृशं वाक्यं प्रतिज्ञावाक्यमुच्यते । व्योमशिवाचार्येण तु प्रतिज्ञावाक्यमन्तरा सन्दिग्ध-विपर्यस्त-अव्युत्पन्नपुरुषाणां प्रमेयविशेषे आकांक्षाभावात् पुरुषमात्रं प्रति प्रतिज्ञावाक्यं वदन् पुरुष उन्मत्तो भवेत् अतः प्रतिज्ञायाः परार्थानुमाने अत्यावश्यकत्वम् उक्तम् । वैशेषिकशास्त्रे प्रमाणद्वयं प्रत्यक्षानुमाने स्वीक्रियेते तथा सति स्वशास्त्रविरोधी प्रतिज्ञा कथं सम्भवेत् स्वशास्त्रनामकप्रमाणाभावादिति प्रश्नो यद्यपि स्यात् अथाऽप्यत्र स्वशास्त्रविरोधिपदस्य प्रयोजनम् (तात्पर्य) लोके यत् प्रत्यक्षप्रमाणेन सिद्धं एवं वैशेषिकोक्तानुमानरूपेण गृहीतशब्दप्रमाणविरुद्धवचनम् । एवं स्वस्वीकृतागमप्रमाणविरुद्धवचनं (प्रतिज्ञा) प्रतिज्ञाभास एव ।

ख) अपदेशः (हेतुः)

हेतुबोधकवाक्यम् 'अपदेशः' इत्युच्यते । साध्यवति वृत्तित्वं साध्याभाववत्यवृत्तित्वं यत्र स हेतुः । भाष्यकारेण प्रशस्तपादेन तदेवोक्तम्-

लिङ्गवचनमपदेशः । यदनुमेयेन सहचरितं तत्समानजातीये सर्वत्र सामान्येन प्रसिद्धं तद्विपरीते च सर्वस्मिन्नसदेव लिङ्गमनुमापकम् तस्य वचनमपदेश इति । यथा- द्रव्यं वायुरिति ।[२५] एतेन प्रसिद्धविरुद्धसन्दिग्धानध्यवसितवचनानामनपदेशत्वमुक्तं भवति । अर्थात् अनुमेयेन सहचरितमित्यनेनासिद्धवचनस्यानपदेशत्वमुक्तम्, तत्समानजातीये च प्रसिद्धमित्यनेन विरुद्धानध्यवसितवचनानामनपदेशत्वमुक्तं भवति । तद्विपरीते च नास्त्येवेत्यनेन सन्दिग्धवचनस्यानपदेशत्वमिति विवेकः ।

ग) निदर्शनम् (उदाहरणम्)

भाष्यकारेणास्य सामान्यलक्षणन्तु नोक्तमपितु साक्षात् साधर्म्यवैधर्म्यभेदेन निदर्शनं द्विविधं प्रदर्शितम् । निदर्शनशब्दस्य व्युत्पत्तिस्तु व्योमशिवाचार्येण द्विधा कृतम्, तत्राद्यम् - निदर्श्यते साध्यसाधनयोर्बहिर्व्याप्तिरस्मिन्निति निदर्शनं दृष्टान्तः । अपरम्, निदिर्श्यते साध्यसाधनयोर्व्याप्तिरनेनेति निदर्शनं व्याप्तिप्रतिपादकदृष्टान्तवचनमिति ।[२६]

तत्रानुमानसामान्येन लिङ्गलिङ्गिसामान्यस्यानुविधानदर्शनं साधर्म्यनिदर्शनम् । साध्यसाधनयोरनुगमो निर्दिश्यते येन वचनेन तद्वचनं साधर्म्यनिदर्शनमित्यर्थः । यथा - यत् क्रियावत् तद् द्रव्यम्, यथा - शरः । एवञ्चानुमेयविपर्यये लिङ्गस्याभावदर्शनं वैधर्म्यनिदर्शनम् । साध्यव्यावृत्त्या साधनव्यावृत्तिर्येन वचनेन निर्दिश्यते तद्वचनं वैधर्म्यनिदर्शनमित्यर्थो भवति । यथा- यन्न द्रव्यं तन्न क्रियावत्, यथा गुण इति ।

घ) अनुसन्धानम् (उपनयः)

अनुमेयसामान्येन सह दृष्टस्य लिङ्गसामान्यस्यानुमेये(पक्षे) अन्वानयनमनुसन्धानम्[२७] इति । दृष्टान्ते साध्याविनाभूतेन दर्शितं लिङ्गं पक्षेऽनुसन्धीयते प्रतिपाद्यतेऽनेनेति अनुसन्धानम् । भाष्यकारः स्वयमेव विवृणोति- अनुमेयधर्ममात्रत्वेनाभिहितं लिङ्गसामान्यमुपलब्धशक्तिकं निदर्शने साध्यधर्मसामान्येन सह दृष्टमनुमेये येन वचनेनानुसन्धीयते तदनुसन्धानम् । तथा च वायुः क्रियावानिति । अनुमेयाभावे च तस्यासत्त्वमुपलभ्य न तथेति ।[२८] अत्रायं प्रश्नः – दृष्टान्तेन हेतौ गृहीता या व्याप्तिस्तयैव साध्यसिद्धिर्भवत्येव । तथा सति अनुसन्धानस्य काऽवश्यकता ? इति । तस्योत्तरमेवम् – अनुसन्धानमन्तरा वाधितरूपधर्मस्य ज्ञानं भवितुन्न शक्नोति, हेतुवाक्यन्तु केवलं कारणमात्रमुपस्थापयति, सपक्षे (दृष्टान्ते) यथा, तथैवात्राऽपि (तथा चायमिति) इत्यनुसन्धानमन्तरा कथं साध्यं साधयितुं शक्यते ? प्रत्युत बाधशङ्का स्यादेवेति ।

अत्रायमभिप्रायः- परार्थशब्दो हि यथा यथा परस्य जिज्ञासोदयते तथा तथा प्रयुज्यते । साध्यसाधनार्थं प्रतिज्ञावाक्यं प्रयुज्यते,

२३ प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम्, अनुमानप्रकरणम् ५७० तमं पृष्टम् ।
२४ व्योमशिवाचार्यः, व्योमवती, अनुमानान्तर्गतप्रतिज्ञाप्रकरणम् ।
२५ प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम्, अनुमानप्रकरणम् ५७५ तमं पृष्टम् ।
२६ व्योमशिवाचार्यः, व्योमवती, अनुमानान्तर्गतनिदर्शनप्रकरणम् ।
२७ प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम्, अनुमानप्रकरणम् ६०५ तमं पृष्टम् ।
२८ प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम्, अनुमानप्रकरणम् ६०६ तमं पृष्टम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

साध्येऽभिहिते सति साधने भवत्याकाङ्क्षा - कुतः इदं सिद्धचतीति, तदा तु हेतुवचनम्। इदञ्च हेतुवचनं हेतुस्वरूपमात्रं बोधयति, न पक्षधर्मताम्, एकस्यैवोभयार्थवाचकत्वाभावात्, विज्ञाते हेतौ कथमस्य हेतुत्वमिति जिज्ञासोत्पद्यते। तथा च व्याप्तिवचनेनाविनाभावे कथिते सति हेतोरवधारणसामर्थ्यं ज्ञायते। तदेव दृष्टान्तवचनेनोच्यत इत्यर्थः। तदनन्तरं पक्षधर्मता (तथा चायम्) वचनार्थमुपनय आवश्यको भवति। एवं तादृशव्याप्तिविशिष्टहेतुमान्नयमिति ज्ञानं तादृशोपनयवाक्येनैव भवति, एतादृशज्ञानमन्तरा पक्षे साध्यं साधयितुमेव न शक्यते। अत एवोक्तमत्र कन्दलीकारेण- उपनयेऽपि पक्षधर्मताग्राहकप्रमाणानुसारादेव तद्धर्मतानिश्चयो न वचनमात्रादिति।[२९]

ङ) प्रत्याम्नायः (निगमनम्)

अनुमेयत्वेनादिष्टे चानिश्चिते च परेषां निश्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नाय[३०] इति। प्रतिज्ञावाक्यस्य प्रत्याम्नायवाक्यस्य च विषयभेदाभावात् किमर्थं पृथक् कथनम् ? अभिहितस्य पुनरभिधानं प्रत्याम्नायवाक्येन किमर्थम् ?। तत्रायं समाधिः - प्रथमन्तु प्रतिज्ञावाक्येन साध्यमात्रमभिहितम्, किन्तु न निश्चितम्, प्रतिज्ञामात्रेण वस्तुनस्सिद्धिर्न भवति, अतः परार्थबोधनार्थं तस्य सार्थक्यमस्त्येव, विषयभेदोऽपि स्पष्ट एव। तदेवोक्तं भाष्यकारेण - प्रतिपाद्यत्वेनोद्दिष्टे चानिश्चिते च परेषां हेत्वादिभिरवयवैराहितशक्तीनां परिसमाप्तेन वाक्येन निश्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नायः, तस्मात् तथेति।[३१]

पञ्चावयववाक्यानामेव साक्षाद् हेतुत्वे परार्थानुमानं शाब्दं प्रसज्यते। अतो वाक्येन केवलं लिङ्गोपक्षेपमात्रं क्रियते, तस्य लिङ्गोपक्षेपमात्रे चरितार्थत्वात्। अत एव तु केचन परार्थानुमानमपि अतिरिक्तन्नास्तीति कथयन्ति, तस्याऽपि स्वार्थानुमानेऽन्तर्भावात्। वाक्येन केवलं हेतूनामुपस्थितिमात्रं भवति तदनन्तरं स्वयमेवानुमिनोतीति, अतस्सर्वमपि स्वार्थमेवेति। तर्हि विभागः कुतः ? इति चेत् अत्रोच्यते – विभागस्तु लेशतस्तयोर्भेदात्। तदित्थम् – यद्यपि स्वार्थानुमाने यैव प्रतिपत्तिसामग्री सैव परार्थानुमानेऽपि, किन्तु इयान् अत्र विशेषः - स्वप्रतीतावियं स्वयमनुसन्धीयते परप्रतीतौ च परेण बोध्यते। स्वयञ्च लिङ्गसामर्थ्यात् बोध्यते।

अत्रायं पुनः प्रश्नः - प्रतिपादितञ्च हेत्वादिभिरवयवैः पक्षधर्मतान्वयव्यतिरेकोपपन्नं लिङ्गं, तावतैव च तस्मादर्थावगतिसम्भवात् कृतं निगमनेनेति ? तत्समाधत्तं कन्दलीकारेणैवम् – वाक्यं लिङ्गसामर्थ्यं बोधयति न साध्यम्। किन्तु न तस्य सामर्थ्यं बहिर्व्याप्तिपक्षधर्मतामात्रम्। सत्यपि तस्मिन् प्रकरणसमकालात्ययापदिष्टयोरसाधकत्वात्, अपितु अबाधितविषयत्वमसत्प्रतिपक्षत्वमपि सामर्थ्यम्। तत्सद्भावो यावत्प्रमाणेन न प्रतिपाद्यते, तावत् प्रतिपक्षसम्भवाकांक्षाया अनिवर्तनात्[३२] इति।

५) निष्कर्षः

एतावता निबन्धेनात्र अनुमानस्वरूप-तद्भेदपरिचयपूर्वकं परार्थानुमानैकदेशीभूतानामवयवानां क्रमशो नैयायिकाभिमतानां वैशेषिकाभिमतानाञ्च विस्तरेण विमृष्टम्। तेन चैवं वक्तुं शक्यते यत् - अवयवातिरिक्तेषु केषुचिद् विषयेषु साम्यं क्वचिच्च वैषम्यमनयोः समानतन्त्रभूतयोर्न्यायवैशेषिकदर्शनयोः। एवञ्चास्मिन् परार्थानुमानावयवविषये शब्दकृतं वैषम्यमवलोक्यतेऽनयोः किन्तु अर्थकृतं साम्यमेव वक्तव्यम्। तत्रापि प्रथमावयवस्य प्रतिज्ञायास्तु नास्ति शब्दकृतोऽपि विभेदो न्यायवैशेषिकयोः। किन्तु तदुत्तरवर्तिनां हेतूदाहरणोपनयनिगमनानां नैयायिकोक्तानां चतुर्णां स्थाने वैशेषिकैः अपदेशनिदर्शनानुसन्धानप्रत्याम्नायाः इत्येवं चत्वारोऽवयवा उक्ताः। अत्रापि चतुर्ष्ववयवेषु अर्थकृतन्तु न वैषम्यम्, अत एवाद्वैतमस्मिन् विषये दर्शनयोरनयोरिति निश्चितम्। न्यायदर्शने प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः इति[३३] सूत्रेण प्रतिपादितानां न्यायावयवानां पञ्चानामेव वैशेषिकदर्शने प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायाः पञ्चावयवा इति[३४] पर्यायशब्देन कथनमपि विषयेऽस्मिन् उभयोः साम्यमेव प्रमाणीकरोतीति निष्कर्षः।

---

२९ श्रीधराचार्यः, न्यायकन्दली, अनुमानान्तर्गतानुसन्धानप्रकरणम्।

३० प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम्, अनुमानप्रकरणम् ६११तमं पृष्टम्।

३१ प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम्, अनुमानप्रकरणम् ६११ तमं पृष्टम्।

३२ श्रीधराचार्यः, न्यायकन्दली, अनुमानप्रकरणम् ६१४ तमं पृष्टम्।

३३ न्यायसूत्रम् १-१-३२।

३४ प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम्, अनुमानप्रकरणम् ५६५ तमं पृष्टम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सन्दर्भग्रन्थसूची

अन्नंभट्टः, तर्कसंग्रहः, आलोकव्याख्यासहितः(द्वि.सं.), के.एस.वरदाचार्यः(व्या.), (ई.सं.२००७) मैसुरु, आर्षग्रन्थप्रकाशनम् ।

............,तर्कसंग्रहः, व्याख्याचतुष्टयोपेतः, केदारनाथ त्रिपाठी (व्या.), (ई.सं. १९९९) दिल्ली, : मोतीलाल वनारसीदास ।

............तर्कसंग्रहः, व्याख्याचतुष्टयोपेतः, कृष्णवल्लभाचार्यः (व्या.), (ई.सं. ......) वाराणसी, : चौखम्वा विद्याभवन ।

आचार्यः भीमः न्यायकोशः, (ई.सं. १९७८) पुणे : भण्डारकरप्राच्यविद्यासंशोधनमन्दिरम् ।

आचार्य व्योमशिवः व्योमवतीटीका प्रशस्तपादीया मूलभाष्यसहिता ....(फोटोकपि)

उद्योतकरः, न्यायवार्त्तिकम्, अनन्तलाल ठक्कुरः(सं.), (ई.सं.१९९७) नई दिल्ली, : भारतीय दार्शनिकानुसन्धानपरिषद् ।

गौतमः, न्यायदर्शनम्, भाष्यवृत्तिसहितम्, आशुबोधः, नित्यबोधः(सं.), (ई.सं.१९८६)दिल्ली : चौखम्वासंस्कृतप्रतिष्ठान ।

गौतमः, न्यायदर्शनम्, भाष्य-तद्हिन्दीव्यसहितम्, ढुण्ढिराजशास्त्री (सं.), (ई.सं.१९८६) दिल्ली : चौखम्भासंस्कृतभवन ।

जयन्तभट्टः, न्यायमञ्जरी, के.एस.वरदाचार्यः(सं.), (ई.सं.१९८३) मैसुरु : प्राच्यविद्यासंशोधनालयः ।

.... न्यायमञ्जरी, गौरीनाथ शास्त्री (सं.), (ई.सं.१९८२) वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम्, हिन्दीव्याख्यासहितग्, दुर्गाधर झा (व्या.), (ई.सं.१९९७) वाराणसी, : सं.सं.वि. ।

फणिभूषणतर्कवागीशः, न्यायपरिचयः, दिनेशचन्द्र गुहः (अनु.), (ई.सं.१९६८) वाराणसी : चौखम्वाविद्याभवन ।

भट्टाचार्यविश्वनाथः न्यायसिद्धान्तमुक्तावली, किरणावलीव्याख्योपेता, कृष्णवल्लभाचार्यः, (ई.सं. १९९५) वाराणसी : चौखम्वासंस्कृत ।

भट्टः श्रीधराचार्यः न्यायकन्दलीटीका मूलप्रशस्तपादभाष्यसहिता दुर्गाधर झा (व्या.), (ई.सं.१९९७) वाराणसी, : सं.सं.वि. ।

मिश्रः केशवः, तर्कभाषा, हिन्दीव्याख्योपेता, गजानन शास्त्री 'मुसलगाँवकर' (सं.), (ई.सं.२००३), वाराणसी : चौ.सु.भा.

मिश्रः वाचस्पतिः, न्यायवार्तिकतात्पर्यटीका, राजेश्वर शास्त्री (सं.), (वि.सं.२०४६), वाराणसी : चौखम्वा संस्कृत संस्थान

वात्स्यायनः न्यायभाष्यम्, प्रसन्नपदाख्यव्याख्यासंवलितम्, (अभिनवसंस्करण), (ई.सं.१९९८) वाराणसी : बौद्धभारती ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ईशस्य न्यायोपासना

उपप्रा. डा. रामप्रसादपौडेलः
वाल्मीकिविद्यापीठम्

१. पुरोवाक्

शास्त्रकारैः पदार्थनिरूपणावसरे पदार्थज्ञानस्य प्रयोजनमपि प्रतिपादितम् । तत् पदार्थचिन्तनमेव तत्र कालक्रमेण यथादेशे रुचीनां वैचित्र्यात् विविधदर्शनरूपेण अधिकारिभेदेन प्रसिद्धम् । तस्य दर्शनस्य विचारविकासोपक्रमे पश्चात् आस्तिकनास्तिकभेदेन द्विधा विभागः । तत्र वेदेश्वरयोरस्तित्वप्रतिपादकदर्शनमास्तिकदर्शनम् । एवं च वेदेश्वरयोर्नास्तित्वप्रतिपादकं दर्शनं नास्तिकदर्शनमितिफलितम् । तत्र आस्तिकदर्शनानि तावत् साङ्ख्ययोगन्यायवैशेषिकपूर्वमीमांसोत्तरमीमांसाभेदात् षड्विधानि सन्ति । नास्तिकदर्शनानि चार्वाकजैनवौद्धभेदात् त्रिविधानि सन्ति । उक्तं च सायणमाधवाचार्यैः "नास्तिकाः वेदवह्यास्तान् बौद्धलोकायतार्हतान्" इति (सर्वदर्शनसङ्ग्रहः, पृ. ४६) । अत्र यद्यपि षड्विधानि दर्शनानि पूर्वोक्तानि एव इत्यत्र विदुषां नैकमतमस्ति। तत्र 'षड् दर्शनसमुच्च्यात्मकग्रन्थे दर्शनानि षडेवात्र मूलभेदव्यपेक्षया इत्यादिरूपेण षड् भागेषु विभज्य षण्णां दर्शनानां नामान्याहुः।

दर्शनानि षडेवात्र मूलभेदव्यपेक्षया ।

देवतातत्त्वभेदेन ज्ञातव्यानि मनीषिभिः ॥

वौद्धं नैयायिकं साङ्ख्यं जैनं वैशेषिकं तथा ।

जैमनीयं च नामानि दर्शनानाममून्यहो ॥

(षड्दर्शनसमुच्चयः,१९७० : १-२)

अनया रीत्या षड्विधदर्शनानां पृथक् परिगणना कृता तैः । तत्र षड्विधेषु दर्शनेषु व्यासेन समासेन वा अस्तित्वेन नास्तित्वेन वा प्रतिपाद्यः सर्वदर्शनवाच्यः ईश्वरपदार्थः । तत्र सामान्यतः पदार्थो द्विविधः लौकिकः (लोकानुभवगम्यः)अलौकिकः(शास्त्रैकगम्यः) यथा न्यायदर्शनप्रतिपाद्याः द्रव्यादिसप्तपदार्थेषु द्रव्यगुणकर्मसामान्यानि लोकानुभवगम्यानि कानिचिद् । विशेषपदार्थश्च शास्त्रैकगम्यः। यथा च

क्षित्यप्तेजोमरुद्व्योमकालदिक्देहिनो मनः (न्यायसिद्धान्तमुक्तावली, २०६१ : ३)

इत्यत्र क्षित्यप्तेजोवायवः लोकानुभवगम्याः शास्त्रगम्याश्च । आकाशकालदिगात्मानश्च शास्त्रैकगम्याः । एवं च परमेश्वरोऽपि शास्त्रैकगम्यः । तस्य लक्षणं किम् ? कतिविधः ? कीदृशः ? इतिविषये सर्वेषु तन्त्रेषु,दर्शनेषु, पुराणेषु, शास्त्रेषु च वहुत्र वहुशः प्रतिपादितां ईश्वरविषयिणीं विप्रतिपत्तिं श्रुत्वा दृष्ट्वा च संकल्पविकल्पशालिप्रेक्षावतां धीमतां मनसि संशयो जायते । अतः तादृशसंशयनिवारणाय न्यायशास्त्रप्रतिपादितेश्वरविषयिणी चर्चात्र क्रियते । यतो हि इयं च परिचर्चा स्वर्गापवर्गयोर्द्वारमपि उच्यते। उक्तं च श्रीमदुदयनाचार्यैः ।

स्वर्गापवर्गयोर्द्वारमामनन्ति मनीषिणः ।

यदुपास्तिमसावत्र परमात्मा निरूपयते ॥

(न्यायकुसुमाञ्जलिः,१९९७ :१।३)

अत्र यद्यपि पूर्वपक्षिणः विवदन्ते ईश्वरविषये । लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः । मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणात् इति सर्वतन्त्रसिद्धान्तसिद्धत्वात् नहि असतः ईश्वरस्य लक्षणं प्रमाणं च संभवति । यथा असतः वन्ध्यापुत्रस्य न हि केनापि लक्षणेन प्रमाणेन सिद्धिः तद्वत् काभ्यामपि लक्षणप्रमाणाभ्यां ईश्वरं साधयितुं न शक्यते । एवं च न्यायाभिमतप्रमाणान्यपि न्यायाभिमतेश्वरं साधयितुं समर्था न हि संभवन्ति । तथा हि प्रमाणानि चत्वारि सन्ति । प्रत्यक्षानुमानोपमानशव्दाः प्रमाणानि गौतमसूत्रानुरोधात् । (न्यायसूत्रम् ३) न हि तावत् प्रत्यक्षं प्रमाणं । प्रत्यक्षप्रमाणं हि द्विविधं वाह्याभ्यान्तरभेदात् । न हि वाह्यप्रत्यक्षं तत्र प्रमाणम् । वहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे उद्भूतरूपस्य कारणत्वात् ईश्वरे च रूपत्वावच्छिन्नाभावात् । नापि मानसप्रत्यक्षम् । स्वात्मभिन्नद्रव्यत्वात् । यतो हि परात्मनः परेण मनसा प्रत्यक्षवारणाय स्वात्मप्रत्यक्षं प्रति परात्मव्यावृतविजातीयमनःसंयोगत्वेनैव हेतुत्वस्य वक्तव्यतया ईश्वरे च तस्याभावात् । नाप्यनुमानप्रमाणंम् । ईश्वरस्य सदाप्रत्यक्षतया तस्य केनचिल्लिङ्गेन सहचरादर्शनेन

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

व्याप्तिग्रहासंभवात् । न वोपमानं प्रमाणम् । ईश्वरतुल्यस्य कस्यचिदपि पदार्थस्याभावेन सादृस्यज्ञानासंभवात् । नापि शब्दः प्रमाणम् । श्रूतीनामीश्वरोच्चरितत्वेन प्रामाण्यस्य वक्तव्यतयेदानीमीश्वर एव सन्देहेनेश्वरास्तित्वप्रतिपादकश्रूतीनामपि सन्दिग्धत्वात् प्रमाणचतुष्टयं प्रत्येकं मिलित्वा वा साधयितुमसमर्थाः भवन्ति । एवं च प्रमाणचतुष्टयेनासिद्धभूतस्येश्वरस्य प्रणम्यत्वाभावात् सर्वत्र ग्रन्थादौ इष्टदेवनमस्कारात्मकमङ्गलकरणमप्ययुक्तमिति वहुधोच्यमानं ईश्वरानङ्गीकर्तृपूर्वपक्षिणं प्रति धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु यं कमपि पुरुषार्थमर्थयमानानां पदार्थनिरूपणे प्रवृत्तानां साङ्ख्यवेदान्तादिसकलदर्शनसिद्धान्तानुयायिनां मते ईश्वरस्य लक्षणं प्रमाणं च प्रदर्शनपुरःसरं अनुमानादिप्रमाणेन न्यायाभिमतेश्वरसिद्धिप्रक्रियां च निरूपयन्नाहः कुसुमाञ्जलिकारः इह यद्यपीत्यादिना । तथा च ईश्वरस्य लक्षण निर्वचनप्रसङ्गे वेदान्तिनः प्राहुः शुद्धवुद्धस्वभाव ईश्वरः । आदिविद्वान् सिद्ध इति कापिलाः । क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः । लोवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः । शिव इति शैवाः । पुरुषोत्तम इति वैष्णवाः । पितामह इति पौराणिकाः । यज्ञपुरुष इति याज्ञिकाः । सर्वज्ञ इति सौगताः । निरावरण इति दिगम्वराः । उपास्यत्वेन देशित इति मीमांसकाः । लोकव्यवहारसिद्ध इति चार्वाकः । यावदुक्तोपपन्न इति नैयायिकाः । किं वहुना यं कारवोऽपि विश्वकर्मेत्युपासते । तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्मादिवदासंसारं सुप्रसिद्धानुभावे भगवति सन्देह ऐव कुतः । (कुसुमाञ्जलि, पृ.५) सन्देहाभावे न हि तत्र न्यायः प्रवर्तते । 'नानुपलव्धे न निर्णीतेऽर्थे न्यायः प्रवर्त्तते किन्तर्हि संशयितेऽर्थे' इति भाष्यवचनात् सन्देहे सत्येव न्यायः प्रवर्तते । परमात्मनः सर्ववादिसिद्धतया साध्यवत्तानिश्चयेन संशयस्य निवर्त्यत्वात् इत्यपि वक्तुं न युज्यते । यतो हि शास्त्रान्तरेण सिद्धेऽपि परमात्मनि सत्यामनुमित्सायां अनुमानादिप्रमाणेन ईशस्य मननावस्यकतया अनुमानप्रमाणादिसमुपस्थापनेन मननरूपोपासनैव क्रियते । तथा चोक्तं श्रीमदुदयनचार्यैः -

न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणनन्तरागता ॥
(न्यायकुसुमाञ्जलिः, १९९७ : १।३)

एवं च प्रत्यक्षेण परिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः(जागदिशी पक्षता पृष्ठ ५६) इति वाचस्पतिवचनस्यापि सङ्गतिः सङ्गच्छते । अत एव ईश्वरविषयकानुमानप्रमाणानि उच्यन्ते पञ्चमस्तवके-

कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रूतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥
(न्यायकुसुमाञ्जलिः, १९९७ : ५। १)

एभिः नवभिः हेतुभिः विश्वविदव्ययः साध्यः इत्यन्वयः ।

२. ईश्वरसाधकहेतूनां विचारः

अत्र अस्मिन् ईश्वरसाधकहेतुप्रसङ्गे ईश्वरसाधकहेतूनां विषये विचारविमर्श क्रियते

२.१. कार्यहेतुकानुमानविचारः

अत्र कारिकायां कार्यपदं हेतुपरं तस्य च तादाम्यसंबन्धेन विवादात् धर्मपरतया व्याचष्टे । तथा च क्षितिः सकर्तृका कार्यत्वाद् घटवदित्यनुमानेन क्षितिः सकर्तृकत्ववती इत्यनुमितिर्जायते । ननु अत्र अनुमिति द्विधा प्रसिद्धा । अवच्छेकावच्छेदेननुमितिः सामानाधिकरण्यरूपानुमितिश्च । तथा हि यत्र उद्देश्यतावच्छेकव्यापकत्वं विधेये विधेयप्रतियोगिकसंसर्गे वा भासते साऽत्यनुमितिः अवच्छेदकावच्छिन्नरूपा । यत्र च पक्षतावच्छेदकसामनाधिकरण्येनानुमिति जायते सानुमितिः सामानाधिकरण्यरूपा । यथा पर्वतो वन्हिमान् धूमादित्यत्र यदा उद्देश्यतावच्छेदकपर्वतत्वव्यापकत्वं वन्हौ वन्हिप्रतियोगिकसंयोगसंसर्गे च भासते तदा अवच्छेदकावच्छेदेनानुमितिरुच्यते । यदा तु पक्षतावच्छेदकीभूतपर्वतत्वसामानाधिकरण्येन पर्वतैकदेशे साध्यानुमिति जायते तदा सामानाधिकरण्यरूपानुमितिः । नन्वत्र कीदृशानुमिति विवक्षिता ? यदि अवच्छेदकावच्छेन क्षितित्वावचछेदेन सकर्तृकत्वं साध्यते तदा परमाणुषु साध्याभावात् बाधापत्तेः । यदि च क्षितित्वसामानाधिकरण्येन सकर्तृकत्वं साध्यं तदा घटादौ साध्यस्य सिद्धत्वे अंशतः सिद्धसाधनम् । तत्र यदि पूर्वाक्तदोषनिवारणाय जन्यक्षितित्वावच्छेदेन सकर्तृकत्वं साध्यते तदा परमते अजन्यक्षितेरप्रसिद्धत्वात् जन्यपदव्यावृत्यसिद्धिः । जन्यत्वस्यैव पक्षतावच्छेदकत्वसंभवे पक्षतावच्छदककोटौ क्षितित्वनिवेशस्य व्यर्थत्वाच्च । ननु तर्हि जन्यत्वमेव पक्षतावच्छेदकमस्तु तथा सति पक्षतावच्छेदकहेत्वोरैक्यप्रसङ्ग इत्यपि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न।स्वरूपसंबन्धविशेषरूपकार्यत्वस्यैव पक्षतावच्छेदकत्वात्, प्रागभावप्रतियोगित्वरूपकार्यत्वस्य हेतुत्वेन तयोर्भेदात्।अत्र साध्यं सकर्तृकत्वं तच्च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम् । यथा घटस्योपादानं (समवायिकारणं)कपालद्वयं तद्विषयकप्रत्यक्षज्ञान-चिकीर्षेत्येत्त्रयं तद्वान् कुलालः कर्ता भवति तथा क्षितेरूपादानं समवायिकारणं परमाण्वादयस्तद्विषयकप्रत्यक्षज्ञानचिकीर्षाकृतिमानीश्वरः स एवास्य जगतः कर्ता भवति इत्याशयः । अत्रचानुमानेन सर्गाद्यकालिकक्षितेः कृतिजन्यत्वे सिद्धे तादृशकृतिः द्रव्याश्रिता गुणत्वात् रूपवद् इत्यनुमानेन द्रव्याश्रितत्वे साधिते, तादृशकृतिः न पृथिव्यादिद्रव्यवृति चेतनगुणत्वात्, न जीवात्मवृत्तिः नित्यकृतित्वाद् इत्याद्यनुमानेन द्रव्यान्तरस्य बाधात् तादृशकृति जीवात्मसहितपृथिव्याद्यष्टद्रव्यातिरित्तद्रव्याश्रिता पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वादिति परिशेषानुमानेन द्रव्यान्तरस्य बाधात् तादृशकृत्याश्रयतयेश्वरसिद्धिः । अत्र कृतिजन्यत्वपदेन उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिप्रयोज्योत्पत्तिमत्वंविवक्षितम्।कार्यंप्रति उपादानज्ञानत्वादिप्रत्येकधर्मेणकारणत्वेऽपिकार्योत्पत्तौसामाग्रीत्वेन प्रयोजकत्वात्, प्रत्येकधर्मावच्छिन्नप्रयोजकतानिरुपितप्रयोज्यत्वस्य उत्पत्तौ विरहात् । यदि च कार्यमात्रे कृतित्वेनैवान्वयव्यतिरेकाभ्यां ज्ञानत्वेनेच्छात्वेन वा हेतुत्वं स्वीक्रियते तदा तादृशज्ञानजन्यत्वं कृतिजन्यत्वमिच्छाजन्यत्वं वा साध्यमस्तु । वस्तुतस्तु कृतिजन्यत्वमेव विशेष्यतासंबन्धावच्छिन्नकृतित्वावच्छिन्नकारणतानिरुपितसमवायसंबन्धवच्छिन्नकार्यत्वं साध्यम्, यत्र परमाणौ विशेष्यतासंबन्धेन कारणं कृतिस्तिष्ठति तत्र समवायसंबन्धेन द्व्यणुकं कार्यं वर्तते। तथा च समवायसंबन्धेन द्व्यणुकं प्रति विशेष्तासंबन्धेन कृतिः कारणमिति कार्यकारणभावश्च बोध्यः । तेनास्मदादिकृर्तेविशेष्यतासंबन्धेन परमाणौ वृत्तित्वाभावात् अदृष्टद्वारास्मदादिकृतिजन्यत्वमादाय न सिद्धसाधनम् । एवं च कार्यं विशेष्यत्वसंबन्धावच्छिन्नकृतित्वावच्छिन्नजनकतानिरुपितजन्यतावद् प्रागभावप्रतियोगित्वाद् इत्यनुमानं फलितम् । ध्वंसे समवायसंबन्धावच्छिन्नजन्यतावत्वरूपसाध्यस्याभावात् बाधः तन्निवारणाय सत्ववैशिष्ट्यं जन्यत्वे विशेषणम्। एवं च साध्याभाववद्वृत्तित्वस्य ध्वंसे सत्वाद्व्यभिचारवारणाय सत्ववैशिष्ट्यं प्रागभावप्रतियोगित्वविशेषणम् । यद्यप्यत्र मुक्तावल्यां प्रसिद्धटीकाकारदीनकरभट्टमहोदयेन कार्यमात्रस्य ईश्वरीयकृतिजन्यत्वप्रवादमभ्युपेत्य कृतिजन्यत्वमात्रसाध्यं विधायोभयत्र सत्ववैशिष्ट्यं विशेषणं निरपेक्ष्यैव बाधव्यभिचारयोरभावः प्रदर्शितः । एवंचास्मदीयहविगोचरकृतिजन्यत्वमादाय सिद्धसाधनवारणायादृष्टाद्वारकत्वेन कृतिजन्यत्वं विशेषणीयमिति प्रोक्तम् । इत्थं चानुमानप्रमाणेन साधितेश्वरे ईश्वरोच्चरितत्वेनैवागमस्यापि प्रामाण्यात् "द्यावभूमि जनयन् देव एको विश्वस्य कर्ता भुवनस्य गोप्ता" (शुक्लयजुर्वेदः १७/१९) इत्याद्यागमेनापि परमेश्वरोऽनुसन्धेयः ।

२.२. आयोजनहेतुकानुमानविचारः

आयुज्यते संयुज्यते अनेनेति व्युत्पत्त्या -आङ्पूर्वकाद् युज् धातोः ल्युटि आयोजनं कर्म, तथा च सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म प्रयत्नवदात्मसंयोगजन्यं कार्यारम्भकसंयोगजनककर्मत्वात्, अस्मदादिशरीरकर्मवद् इत्यनुमानेन तादृशप्रयत्नवत्त्वेनेश्वरसिद्धिः । अत्राप्यागमः ।

यदा स देवो जागर्ति तदेदं चेष्टते जगत् ।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥
अज्ञो जन्तुरनीशोऽयमात्मानस्सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव च ॥
(महाभारत, २०२५ :वन.३०।२१)
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
तपाम्यहमहं वर्षं निगृण्हाम्युत्सृजामि ॥
(गीता, २०६७ :९।१९)

२.३. धृतिहेतुकानुमानविचारः

धृतिश्चात्र गुरुत्ववतां पतनाभावः । तथा च ब्रह्माण्डादिपतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठतं धृतिमत्वात्, वियति विहङ्गमधृतकाष्ठवद् इत्यनुमानेन तादृशधृतिमत्वाश्रयतयेश्वरसिद्धिः । अत्राप्यागमः । एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः । (वृ.आर.उप. ५।७।७)

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविष्य विभर्त्यव्यय ईश्वरः॥
(गीता, २०६७: १५। १७)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२.४. नाशहेतुकानुमानविचारः

अत्रादि पदाद् नाशादिपरिग्रहः। तथा च ब्रण्ह्माण्डादि द्व्यणुकपर्यन्तं जगत् प्रयत्नवद् विनाश्यं विनाश्यत्वात् पाट्यममानपटवत्॥ अत्राप्यागमः

सर्वभूतानि कौन्तेय प्रकृतिं यान्तिमामिकाम्।

कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥

(गीता, २०६७ :९.७)

२.५. पदहेतुकानुमिति विचारः

पद्यते गम्यते व्यवहाराङ्गमर्थोऽनेनेति व्युत्पत्या पदं व्यवहारःएवोच्यते। अतोऽपीश्वरसिद्धिः -तथाह्यनुमानम् -पटादिसंप्रदाय स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवत्, अत्र संप्रदायनिर्माणपरंपरा एव व्यवहारः। तथा च सर्गादौ इतरबाधादीश्वरसिद्धिः। अत्राप्यागमः

पितामहस्य जगतो माता धाता पितामह।

यदि ह्यहं न वर्तेयं जातु कर्मण्तन्द्रितः॥

मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।

उत्सीदेयुरिमे लोका न कुर्यां कर्मचेदहम्॥

(गीता, २०६७: ३।२३-२४)

२.६. प्रत्ययहेतुकानुमानविचारः

प्रत्ययतोऽत्र प्रामाण्यम् -तथा हि सर्गाद्यकालीनवेदवेदजन्यप्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या शाव्दप्रमात्वात् , लौकिकवाक्यजन्यशाव्दप्रमावद् इत्यनुमानेनापि सर्गादौ इतरवक्तृबाधादीश्वरसिद्धिः।

२.७. श्रुतिहेतुकानुमानविचारः

वेदत्वं चात्र अनुपलभ्यमूलान्तरत्वे सति महाजनपरिगृहीतवाक्यत्वम्। तथा हि वेदः सर्वज्ञप्रणीतो वेदत्वात् यन्नैवं तन्नैवम् यथा रघुवंशादिः।

२.८. वाक्यहेतुकानुमितिविचारः

वाक्यत्वहेतुनापीश्वरसिद्धिः। तथा हि वेदवक्यानि पौरुषेयाणि वाक्यत्वात् अस्मदादिवाक्यवत्। तथा च वाक्यत्वावच्छेदेन पौरुषेयत्वस्य साध्यतया वेदेऽपि पौरुषेयत्वसिद्धिः।

२.९. सङ्ख्याहेतुकानुमानविचारः

सङ्ख्याविशेषः परमाणोर्द्वित्वम्। तथा ह्यनुमानं द्वणुकपरिमाणं सङ्ख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात्,तुल्यपरिमाणककपालद्वयारब्धपरिमाणात् प्रकृष्टतादृशकपालत्रयारब्धपरिमाणवत्। तत्र परिमाणं तावत् त्रिविधम्, परिमाणजम्, सङ्ख्याजम्, प्रचयजन्यञ्च। उक्तं च मुक्तवलीकारेण "सङ्ख्यातः परिमाणाच्च प्रचयादपि जायते " (कारिकावली, १११) यथा घटपरिमाणं प्रति कपालपरिमाणं कारणं न तथा द्व्यणुकपरिमाणं प्रति परमाणुपरिमाणस्य, परिमाणस्य हि स्वसमानस्वसजातीयोत्कृष्टपरिमाणजनकत्वनियमात् तत्र द्व्यणकपरिमाणं प्रति परमाणुगतत्रित्वसंख्याकारणम्। अणुपरिमाणस्याकारणत्वात्। अत एवोक्तं पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्, (कारिकावली, श्लो.११) एवं च सर्गादौ द्व्यणुकपरिमाणहेतु- परमाणुपरिमाणनिष्ठद्वित्वसङ्ख्या नास्मदाद्यपेक्षावुद्धिजन्या यदीयापेक्षावुद्धिजन्या स एवेश्वरः। एतेषांहेतूनामुपस्थापनेनानुमानप्रमाणेन साधितेश्वरे तदुच्चरितत्वेन वेदस्यापि प्रामाण्यनिश्चयात्- द्यावाभूमि जनयन्देव एको विश्वस्य कर्ता भूवनस्य गोप्ताइत्याद्यागमेनापि ईशसिद्धिः।

३. निष्कर्षः

एतावता प्रबन्धेन शास्त्रेभ्यः ईशस्य श्रवणानन्तरं मननपुरःसरं श्रुत्योपदिष्टविधिना निदिध्यासनेन अदृष्टद्वारा स्वात्मसाक्षात्कारद्वारा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वा चरमदुःखध्वंसरूपो मोक्षो जायते । परमात्मनः अखिलागमसञ्चरणशीलत्वात् मननोपयोगिपदार्थनिरूपणद्वारा शास्त्रस्यापि मोक्षोपयोगित्वं सिद्धम् । उक्तं च-

आगमेनानुमानेनध्यानाभ्यासरसेन च ।

त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥

(योगदर्शनम्, २०६५ : ८। २४)

तत्रापि न्यायशास्त्रस्य प्रदीपवत् सर्वविद्यानां प्रकाशत्वेन सर्वशास्त्रोपकारकत्वं च निर्वहति । एवं च तमेवविदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय इति श्रुत्या साधनान्तरनिषेधाच्च ज्ञानमेव मोक्षसाधनं सिद्धमिति दिक् ।

सन्दर्भग्रन्थसूची :

उदयनाचार्य, न्यायकुसुमाञ्जलि (ई.सं. १९९७), वाराणसी : चौखम्बासुरभारती प्रकाशनः ।

गौतमः न्यायसूत्रम्, (सन् १९७८) मुंवई : गुजराती मुद्रणालय ।

तर्कालङ्कार, जगदीश, पक्षता (वि सं २०३६) द्वितीय संस्क वाराणसी, चौखम्भा सँस्कृत संस्थान ।

भट्टाचार्य, विश्वनाथः, न्यायसिद्धान्तमुक्तावली (वि.सं. २०६१), वाराणसी : चौखम्बासंस्कृतसंस्थानः ।

व्यासः, श्रीमद्भगवद्गीता (वि.सं. २०६७), शतषष्ठ्युत्तरशतं संस्क.गोरखपुर : गीताप्रेस ।

व्यासः, महाभारत (वि सं.२०२५) तृतीय संस्क. गोरखपुरः गीताप्रेस ।

वृहदारण्यकोपनिषद् (सन् १९५३) सम्पा. काशीनाथ शास्त्री, पुणेः आनन्दाश्रममुद्रणालयः ।

शुक्लयजुर्वेद-संहिता, (वि.सं १९७१) सम्पा जगदीशलाल शास्त्री, दिल्ली : मोतिलाल वनारसी दास ।

सायण, माधवाचार्य, सर्वदर्शनसंग्रहः, पूणे : भण्डाकर इन्टीट्युट ।

सूरि, हरिभद्रः, योगदर्शनम् (वि.सं २०६५), अहमदावाद : राजेन्द्रसूरि ग्रन्थमाला ।

सूरि, हरिभद्रः, षड्दर्शनसमुच्चयः (सन्. १९७०), सम्पा.महिन्द्रकुमार जैन,वाराणसी : भारतीय ज्ञानपीठः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ज्योतिषविषयस्य अध्ययनाध्यापने समागताः समस्याः तासां समाधानोपायाश्च

उपप्रा. वसन्तआचार्यः
वाल्मीकिविद्यापीठ

विषयप्रवेशः

यस्य कस्यापि विषयस्य अध्ययनाध्यापने काचित् समस्या भवत्येव। कदाचिद् अध्यापनविधेः कारणेन, कदाचित् विषयवस्तूनां कारणेन, कदाचिच्च पाठ्यक्रमाणां कारणेन विभिन्नेषु विषयेपु समस्या दृश्यन्ते। अत्र केषाञ्चन कारणानां परिगणनं क्रियते-

१. अध्यापनविधौ विविधताया अभावः

विद्यार्थिनां योग्यताधारेण, विषयवस्तूनां विशेषताधारेण, प्रयोज्यवस्तूनाम् उपलब्धताधारेण च शिक्षणविधयः विविधाः भवितुं शक्नुवन्ति। अद्यत्वे च ज्योतिषपाठने पारम्परिको विधिरेव प्रयुज्यते। अस्मिन् विधौ गुरवः व्याख्यातारः शिष्याश्च श्रोतारः। यदि अध्ययनाध्यापने अन्तः क्रिया न भवति तदा व्याख्यात्रा गुरुणा कथितं विषयं श्रोतारश्च छात्राः केवलं ५०-७० प्रतिशतमेव सम्यक्तया जानन्ति न तदधिकमिति आधुनिकानां शिक्षानुसन्धातृणां निष्कर्षः। तं प्रतिशतं वर्धयितुं विविधानां शिक्षणविधीनां प्रयोगः आवश्यकः इति आधुनिकसिद्धान्तः। पाठ्यविषयाणामाधारेण अनेके शिक्षणविधयः अवलम्बनीया इति शिक्षाविदां मतम्। परं नेपालसंस्कृतविश्वविद्यालयान्तर्गतविद्यापीठेषु सर्वे विषयाः प्राचीनप्रणाल्या एव पाठ्यन्ते। व्याख्यानविधिरेव तत्र प्रयुज्यमानः प्रमुखो विधिः। यद्यपि ज्योतिषं प्रयोगपरकं शास्त्रं तथापि ज्योतिषस्य शिक्षणे निगमनविधिः एव प्रयुज्यते। अर्थात् गुरवः एव सर्वं विषयं वदन्ति न तु प्रयोगद्वारा पाठ्यन्ते। तेन विद्यार्थिनां रुचिः क्षीयमाना भवति। अस्याः समस्यायाः समाधानाय संभावितानाम् आधुनिकानां शिक्षणविधीनां प्रयोगः अत्यावश्यकः। अत्र केचन शिक्षणविधयः प्रस्तूयन्ते -

१.१ आगमनात्मकपद्धतिः

अस्यां पद्धतौ पूर्वमनेकेषामुदाहरणानां चर्चा विधीयते। तत्र गुरवः विद्यार्थिनश्च उदाहरणानि कथयन्ति, ततः गुरवः तेषामुदाहरणानां विश्लेषणं कारयित्वा सिद्धान्तानामुल्लेखनं कुर्वन्ति। यदि ज्योतिषस्य सिद्धान्तानामुल्लेखात् पूर्वम् उदाहरणानामभ्यासं कारयित्वा सिद्धान्तस्याध्ययनं क्रियते तदा मन्दमतिकाश्च विद्यार्थिनः सरलतयैव तं सिद्धान्तं जानन्ति। यथा पलभादीनाम् अध्यापनात् प्राक् विभिन्नानां यष्टीनां प्रयोगेण छायामापनम्, छायानां यष्टीनां च मानानां सम्बन्धस्थापनम् इत्यादिकं कार्यं कृत्वा सिद्धान्तं पाठ्यते तर्हि अध्ययनाध्यापनं सरलं रुचिकरं च भवत्येव।

१.२ निगमनात्मकपद्धतिः

न सर्वे सिद्धान्ताः आगमनपद्धत्या पाठयितुं शक्यन्ते। कदाचित् पूर्वं सिद्धान्तं कथयित्वा पश्चात् उदाहरणानामभ्यासादिकमावश्यकं भवति। यस्यां पद्धतौ पूर्वं सिद्धान्तं कथयित्वा पश्चात् तत्र विमर्शादिकं विधाय अनेकेषामुदाहरणानामभ्यासः क्रियते सा निगमनात्मकपद्धतिः। ज्योतिषे सूत्रादीनां पाठने अस्य विधेः प्रयोगः प्रभावकरः। यथा घनमूलादिपाठने पूर्वं सूत्राणामुल्लेखं कृत्वा पश्चात् अनेकेषामुदाहरणानामभ्यासः आवश्यकः।

१.३ विश्लेषणात्मकसंश्लेषणात्मकपद्धतिः

अस्यां पद्धतौ एकस्मिन् विषये केषाञ्चन विदुषां मतानि संकलय्य तेषां विश्लेषणं संयोजनञ्च क्रियते। यथा अयनविषये पूर्वाचार्याणां मतानां विश्लेषणं कृत्वा सर्वेषां समानदृष्टिकोणानां संश्लेषणं च कृत्वा यदि अयनस्याध्यापनं क्रियते तदा विद्यार्थिनः अतीवोत्सुकाः भवन्ति, सिद्धान्तं च स्थापयितुं शक्नुवन्ति।

१.४ अन्वेषणपद्धतिः

ज्योतिषस्याध्यनाध्यापने अस्य विधेरतीवावश्यकता। पञ्चाङ्गादीनां गणनाध्यापने शिलालेखानां ताम्रपत्राणां हस्तलिखितप्राचीनपत्राणां च अन्त्ये दत्तानां तिथ्यादीनामाधारेण वर्षमासादीनां निर्धारणं करणीयमिति कथयित्वा अन्वेषणाय प्रेरणा दीयते तदा विद्यार्थिनः ज्योतिषस्य प्रत्यक्षं प्रयोगं ज्ञात्वा अतीवोत्सुका भवन्ति।

१.५ प्रयोगात्मकपद्धतिः

वयं सर्वे जानीमः यत् ज्योतिषविषयः प्रयोगपरकः। विद्यार्थिनः ग्रहादीनां गणनां कुर्वन्ति। तैः कृताः गणनाः शुद्धाः वा अशुद्धाः इति मापयितुं साप्ताहिकरूपेण वा पाक्षिकरूपेण नैरन्तर्येण दूरवीक्षण (टेलिस्कोप) दियन्त्राणां प्रयोगः अत्यावश्यकः। तस्याभावे विद्यार्थिनां रुचिः क्षीयमाना जायते। तेन ज्योतिषविषयस्याध्ययनाध्यापने प्रयोगात्मकपद्धतिः अतीवप्रभावकारिणी।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१.६ शैक्षिकभ्रमणविधिः

ज्यातिषे मानवजीवने अत्यावश्यकानामनेकेषां विषयाणां संग्रहोऽस्ति । तत्र यन्त्राणां,, खातादीनां, क्रकचादीनाम् अन्येषां च विद्यालये अनुपलभ्यविषयाणामध्ययनाध्यापनं भवति । तेषां वास्तविकाध्ययनाय तेषां दर्शनमतीवावश्यकम् । यत्र यत्र पाठ्यविषयसम्बद्धानि वस्तूनि प्राप्यन्ते तत्र तत्र गत्वा यदि तेषामध्ययनाध्यापनं क्रियते तदा कठिनाश्च विषयाः सरलाः इव जायन्ते । अतो ज्योतिष पाठने शैक्षिकभ्रमणश्चावश्यकः ।

१.७ सुसांख्य (पाओर पोइन्ट) प्रदर्शनविधिः

ज्योतिषस्य केषाञ्चन विषयाणामध्यापनाय वर्षैकमपि न्यूनं दृश्यते । तादृषाणां विषयाणां कदाचित् सरलाणां च विषयाणाम् अध्यापनाय सुसांख्यक्यादिषु “पाओरपोइन्ट” इति निर्माय व्याख्यां क्रियते तदा न्यूने समये कठिनमपि विषयं सरलतया पाठयितुं शक्यते । अस्मिन् युगे आगतस्य अस्य विधेः प्रयोगः अतीव आवश्यकः ।

२. समयसापेक्षपाठ्यक्रमस्याभावः

यद्यपि ज्योतिषस्य पाठ्यक्रमः शिक्षाशास्त्रस्य नियमानुसारं सर्वाङ्गपूर्णः दृश्यते, तथापि अस्मिन् पाठ्क्रमे वैज्ञानिकता न विद्यते इति केषाञ्चन शिक्षाविदामालोचना अस्त्येव । सामान्यरूपेण च दशवर्षेषु पाठ्यक्रमस्य परिमार्जनं समयसापेक्षीकरणञ्च अत्यावश्यकमिति शिक्षाशास्त्रस्य सिद्धान्तः । तदनुसारं नेपालसंस्कृतविश्वविद्यालयस्य पाठ्क्रमस्य नियमितपरिमार्जने अभावोऽस्तीति वस्तुतथ्यमेव । पाठ्यक्रमस्य परिमार्जनाय आधुनिकीकरणाय च स्वदेशीयानां विदेशीयानां च तत्तद्विषयकविदुषां सम्मेलनादीन् विधातुं शक्यते । अन्ताराष्ट्रियस्तरे खगोलस्य पठनपाठने के के विषयाः समायोजिताः सन्ति, नवीनाः शिक्षणविधयश्च के के विकसिता विद्यन्ते इति च नैरन्तर्यमेव ज्ञातव्यं भवति । तेन कदा पाठ्यक्रमस्य परिमार्जनम् आवश्यकम् इति निर्धारयितुं सुकरं भवति । परिमार्जने च केषां स्थाने के के विषयाः स्थापनीयाः इति च निश्चेतुं सरलं भवत्येव ।

३. पाठ्यपुस्तकानाम् अनुपलब्धता

ज्योतिषशास्त्राणां शास्त्रीयविषयाणां पुस्तकानि नेपालदेशे मुद्रितानि नैव सन्ति। नेपालस्थपुस्तकआपणेषु संस्कृतविषकपुस्तकानाम् अभाव एव । तेन विद्यार्थिनः समये पुस्तकानि नैव प्राप्नुवन्ति । कदाचित् केवल पुस्तकक्रयणाय वाराणसीपर्यन्तं गमनीयञ्च भवति । इयं च एका वास्तविकी समस्या । अस्याः समस्यायाः समाधानाय विश्वविद्यालयः भारते प्रकाशितानां संस्कृतपाठ्पुस्तकानां विक्रयस्थलस्य निर्माणं कर्तुं शक्नोति ।

४. विद्यार्थिनां संस्कृतविषयेषु अरुचिः

यदि विद्यार्थी एव पठने उत्सुको न भवति तदा अतियोग्योऽपि गुरुः सरलमपि विषयं बोधयितुम् असमर्थो भवति । एतादृशी च स्थितिः कदाचित् दृश्यते । उपरिवर्णितानां विषयाणां कारणेन कदाचित् विषयस्य कठिनतायाः कारणेन च संस्कृतस्य पठने विद्यार्थिनामरुचिः दृश्यते । सिद्धान्तज्योतिषस्य प्रयोगमज्ञाय च अस्मिन् विषये विद्यार्थिनः अनुत्सुकाः । यदि सिद्धान्तज्योतिषस्य प्रयोगात्मकमध्यापनं न प्रारभ्यते तदा विद्यार्थिनामरुचिः दृढतरा भवत्येव । ज्योतिषस्य प्रयोगः दैनिकजीवने महद् रूपेण भवति। अस्य प्रयोगस्तु आकाशीयग्रहनक्षत्रादीनां स्थितिज्ञानाय, वार-तिथि-नक्षत्राणां ज्ञानाय, ऋतुपरिवर्तनादीनां ज्ञानाय च मुख्यरूपेण भवति । यदि ये विषयाः छात्रेभ्य उपरि वर्णितानां विधीनां प्रयोगेण पाठ्यन्ते तदा ते च उत्सुका भवन्त्येव ।

५. मूल्याङ्कनप्रणाल्यां त्रुटिः

नेपालसंस्कृतविश्वविद्यालये केवलं वार्षिकरूपेण परीक्षां सञ्चाल्य विद्यार्थिनां योग्यतायाः मूल्याङ्कनं विधीयते । तेन विद्यार्थिनः सम्पूर्णं वर्षं पठने उत्सुका नैव दृश्यन्ते । यदि सत्रप्रणाल्यां (सेमेस्टर इति प्रणाल्यां) परीक्षां सञ्चाल्य मूल्याकनं विधीयते तदा विद्यार्थिनः सदैव पठने उत्सुका भविष्यन्ति । अस्मिन् विश्वविद्यालये निर्माणात्मकानां मासिकार्धवार्षिकपरीक्षाणां च सञ्चालनम् आवश्यकं दृश्यते । एतावत् संस्कृतस्य पाठने काश्चित् समस्याः विद्यन्ते । तासां समाधानम् असम्भवं नास्ति । केवलं सम्बद्धक्षेत्राणां सम्वद्धजनानां वा उत्सुकताया आवश्यकतेति दिक् ।

सन्दर्भग्रन्थाः

आचार्यस्तरीयः पाठ्यक्रमः नेपालसंस्कृत विश्वविद्यालय

उत्तरमध्यमास्तरीयः पाठ्यक्रमः नेपालसंस्कृत विश्वविद्यालय

टावा, हिल्डा, *करिकुलम डेभलपमेन्ट : थ्योरि एण्ड प्र्याक्टिस*

निउरे ध्रुवप्रसाद *पाठ्यक्रम योजना र अभ्यास*, ध्रुवप्रसाद निउरे, सनलाईट पब्लिकेशन

शास्त्रीस्तरीयः पाठ्यक्रमः नेपालसंस्कृत विश्वविद्यालय

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सनातनधर्मस्य वेदमूलकता सार्वजनीनता च

सहप्रा. डा. वासुदेवखनालः
वाल्मीकिविद्यापीठम्

१. प्रस्तावना

हिमालयादारभ्य कन्याकुमारीपर्यन्तं सुविस्तृतेऽस्मिन् भारतवर्षे बहुमतावलम्बिनः प्राचीनकालान् निवसन्ति । तेषां सर्वेषां मतानां प्रामाण्यं अस्मिन् क्षेत्रे विद्यते । सर्वेऽपि स्वस्वसिद्धान्तानुसारेण आत्मोन्नतये राष्ट्रोन्नतये च प्रयत्नपराः सन्ति । न कस्याप्येकस्य प्राधान्यं प्राशस्त्यं वा अत्र विद्यते । अत उक्तं गौतमेन 'देशजातिकुलधर्माश्चाऽऽम्नायैरविरूद्धाः प्रमाणम्'[1] इति । यत्र सर्वे स्वस्वकर्त्तव्यनिर्वाहं कृत्वा अस्य क्षेत्रस्य परम्परां महत्त्वं च वर्धितवन्तः । तदर्थमेवोक्तं भगवता मनुना-

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः[2] ॥

विचित्रेऽस्मिन् संसारे मानवः स्वबुद्धिबलेन, धर्मबलेन चेतरप्राणिभ्यो भिन्नो भवति । मानवस्य अन्तर्निहितगुणः तस्य विद्या च समग्ररूपेण तस्य सामाजिकजीवनं प्रभावयति । समस्तानां चलन-पतन-समर्पणानामप्यधीनं जीवनं वस्तुतः स्वाचारः शोभनं प्रतिष्ठितमादर्शमयञ्च करोति, तस्यैवाचारस्याशोभनकारणाज्जीवनमशोभनं निन्दनीयञ्चोच्यते । अतो विभिन्नेषु ग्रन्थेषु धार्मिकपरम्परायाम् 'आचारः परमो धर्मः', आचारहीनं न पुनन्ति वेदाः' इत्येवंप्रकारेण मानवजीवने आचारस्य महत्त्वाधायकानि वचनानि स्मर्य्यन्ते ।

२. वेदः

'वेदोऽखिलो धर्ममूलम्'[3] तथा 'अपौरुषेयं वाक्यं वेदः'[4] इत्यादिषु बहुप्रदेशेषु 'वेद'शब्दः श्रूयते । तत्र 'वेद'शब्दस्य कोऽर्थः ? इति प्रश्ने विदन्ति धर्ममनेनमित्यर्थे "विद्" ज्ञाने इति धातोः 'हलश्च'[5] इति सूत्रेण करणार्थे घ् प्रत्यये कृतेऽयं 'वेद' शब्दो निष्पद्यते । पाणिनिना विद्धातोश्चतुर्ष्वर्थेषु च प्रयोगो विहितस्तेन वेदशब्दस्य चत्वारोऽर्थाः प्रसिद्धाः सन्ति । विद्-ज्ञाने, विद्लृ-लाभे, विद्-विचारणे, विद्-सत्तायाम् चेत्येभ्यश्चतुर्भ्यो धातुभ्यो निष्पन्नस्य चतुर्ष्वर्थेषु वेद इति पदस्य ज्ञानम्, लाभः, विचारः, सत्ता चेति चत्वारोऽर्थाः निःसरन्ति । बह्वृक्प्रातिशाख्ये भगवता शौनकेन 'विद्यन्ते धर्मादयः पुरुषार्था यैस्ते वेदाः' इति प्रोक्तम् । इत्यनुसारेण वेदैर्धर्मादीनां पुरुषार्थचतुष्टयादीनां च ज्ञानं प्राप्यते ।

विश्ववाङ्मये वेदानां स्थानं सर्वोपरि वर्तते । सनातनधर्मव्यवस्था वेदाधारिता वर्तते । धर्मव्यवस्थासु वेदानां स्वतन्त्ररूपेण प्रामाण्यं वर्तते । स्मृत्यादीनां प्रामाण्यं वेदमूलकतया स्वीक्रियते यत्र उभयोर्विरोधो दृश्यते तत्र श्रुतेरेव प्रामाण्यं स्वीकर्तव्यम् इति मीमांसका आमनन्ति । अत एव वेदानामाविर्भावः सर्वातिशायिनी महत्त्वपूर्णा च घटना । ऋषिभिर्मन्त्रा न कृता अपितु दृष्टाः । मन्त्राणां साक्षात्कारे ते एव समर्था आसन् येषाम् अन्तःप्रज्ञा उद्बुद्धाऽऽसीत् । साक्षात्कृतधर्माणः ऋषयो बभूवुस्तेऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः । वस्तुतः "मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः"[6] इत्यनेन मोक्षार्थं प्रयुक्ता बुद्धिर्ज्ञानमित्युच्यते । अत्र वेदस्य किं वा ब्रह्मणो द्विविधं स्वरूपमुक्तं शब्दब्रह्मात्मकं परब्रह्मात्मकञ्च । तत्र शब्दब्रह्मरूपो मन्त्रभागोऽस्ति, मन्त्रभागे च यस्य कर्मब्रह्मणो वर्णनमुपलभ्यते तेन कर्मब्रह्मणा परब्रह्मणः प्राप्तिर्भवतीति वक्तुं शक्यते । तथैवोक्तम्-

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति । एवमेव मनुनाप्युक्तम्-

वेदशास्त्रार्थतत्त्वज्ञो यत्र कुत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते[7] ॥

तद्धि ज्ञानम् अलौकिकमुपायं प्राप्तुं प्रयुक्तश्चेत्तदा तेन ज्ञानेन ह्यलौकिकानन्दस्य लाभो जायते । किन्तु नृणां शक्तिवैकल्यात् पुराऽपि वेदार्थावबोधः सर्वैरप्यशक्यो जात आसीत् । अत एव कौत्सादिभिर्मन्त्राणामानर्थक्यमप्युररीकृतम्, इति तथ्यमप्यवाप्यते-"अनर्थका

---

१ गौतमधर्मसूत्रम्, २.२.२० ।
२ मनुस्मृतिः,२.२० ।
३ मनुस्मृतिः,२.६ ।
४ अर्थसंग्रहः, पृ.३१ ।
५ पाणिनिसूत्रम्, ३.३.१२१ ।
६ अमरकोशः, प्रथमकाण्डः, धीवर्गः ६ ।
७ मनुस्मृतिः, १२.१०२ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मन्त्राः” इति कौत्सः । अथ च वेदार्थज्ञानाय तैस्तै ऋषिभिरेव वेदङ्गान्यप्याविर्भावितानि ।

३. षडङ्गानि

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति’ महाभाष्यवचनात् वेदस्य षडङ्गानि सन्ति । षडङ्गत्वेन शिक्षादिषडङ्गानि गृह्यन्ते । तेन साङ्गोपाङ्गं वेदमधीत्य विद्वान् कृती भवतीति परम्परायां भणितिरेषा वर्वर्त्ति । मुण्डकोपनिषदनुसारेण ‘द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते’[८] । इत्येवं क्रमो वेदानां वेदाङ्गनाञ्च कथितः । वेदस्य अङ्गम्=वेदाङ्गम् तथा “अङ्ग्यन्ते ज्ञायन्ते अमीभिरित्यङ्गानि” इति व्युत्पत्त्या सारल्येन वस्तुस्वरूपज्ञानोपकारकाणि अङ्गानि भवन्ति । तानि च वेदाङ्गानि षट् सन्ति । यथा-

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा ।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः । इति ।

इमानि च षड् वेदाङ्गानि भगवतो वेदपुरुषस्य अवयवत्वेन वर्णितानि शिक्षापाठे । तद्यथा-

छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ इति ।

वेदाङ्गानां ज्ञानमन्तरा सम्यक्तया वेदार्थः प्रतिपत्तुं न शक्यते । अत एवोवाच भगवान् यास्कः- साक्षात्कृतधर्माणः ऋषयो वभूवुः । तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्यः उपदेशेन मन्त्रान् सम्प्रादुः । मुण्डकोपनिषदि इमानि अङ्गानि वेदवदपरविद्यात्वेन परिगणितानि। अतिगम्भीरस्य वेदस्य अर्थमवबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानि । षडङ्गानामपरविद्यारूपत्वं मुण्डकोपनिषदि इत्थं प्रतिपादितम्- “द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति” । “अथ परा यया तदक्षरमधिगम्यते”[९] इति । साधनभूतधर्मज्ञानहेतुत्वात् षडङ्गसहितानां कर्मकाण्डानामपराविद्यात्वम् । परमपुरुषार्थभूतब्रह्मज्ञानहेतुत्वादुपनिषदां पराविद्यात्वम् । वेदस्याङ्गानां मध्ये हस्तस्थानीयकल्पसूत्राद् धर्मशास्त्रस्याविर्भावोऽभूत् ।

४. कल्पः

वेदस्यार्थमभिहितं न्यायैश्च सूचितं शाखान्तरीयैर्ब्राह्मणमन्त्रन्यायैः फलकरणेतिकर्तव्यतांशत्रयवद्भावनां प्रयोगरूपेण कल्पयति समर्थं प्रयोगयोग्यं प्रतिशाखं करोति स कल्पः[१०] । कल्प्यते समर्थ्यते यागप्रयोगो यस्मिन् स कल्पः, कल्पः वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम् । कल्पस्य हस्तस्थानीयस्य विरहेण यज्ञार्थस्य वेदस्य क्रियानुष्ठानं न संभवति । हस्ताहते न खलु पुरुषः स्वीयक्रियानुष्ठाने समर्थो भवति । कल्पग्रन्थेषु श्रौतसूत्राणि, गृह्यसूत्राणि, धर्मसूत्राणि, शुल्बसूत्राणि च अन्तर्भवन्ति। श्रौतसूत्रेषु श्रुतिपादितानां मन्त्रब्राह्मणात्मकवेदैकमात्रवेद्यानां हविर्यज्ञसोमयज्ञकर्मणां प्रयोग उक्तः । धर्मसूत्रेषु समयाचारिकाणां धर्माणामुल्लेखो दृश्यते । गृह्यसूत्रेषु सामयाचारिकाणां लोकधर्माणां निर्देशः । शुल्बसूत्रेषु च यागोपयोगिनां मानानामभिधानं साधनं च वर्तते ।

तत्र ऋग्वेदीयानि आश्वलायन-शांखायनश्रौतगृह्यसूत्राणि चत्वारि, कोषीतकिगृह्यसूत्रं विष्णुवसिष्ठधर्मशास्त्रे चेति पुस्तकानि, शुक्लयजुर्वेदीयानि कात्यायनश्रौत-पारस्करगृह्य-कात्यायनशुल्बसूत्राणि । कृष्णयजुर्वेदीयानि बौधायना-पस्तम्ब-सत्याषाढ-मानव-वैखानस-भारद्वाज-वाराहश्रौतसूत्राणि च सन्ति । सामवेदीयानि लाट्यायन-द्राह्यायण-जैमिनीय-मशकश्रौतसूत्राणि, गोभिल-खादिर-जैमिनिगृह्यसूत्राणि, गौतमधर्मसूत्रं चेति पुस्तकानि । अथर्ववेदीये वैतानश्रौत-कौशिकगृह्यसूत्रे एव समुपलभ्येते । सर्वविद्याकरत्वं वेदानां प्रथितम् । किन्तु साक्षाद् वेदानामध्ययनेन तास्ता विद्या अध्येतॄणां न स्फुरन्ति । तदर्थं वेदाङ्गानामध्ययनमावश्यकम् । ततोऽप्यग्रे स्मृतीनां पुराणानां च परिशीलनेन वेदार्थोपबृंहणं जायते । षट्सु वेदाङ्गेष्वन्यतमेन कल्पेन श्रौत-धर्म-गृह्याख्यानां सूत्राणां ग्रहणं जायते । कल्पः, श्रौतः स्मार्तश्चेति द्विविधः । प्राचीनशास्त्रकारैः स्वप्रणीतधर्मशास्त्रे धर्मस्य विषये वह्वी चर्चा कृता । साधारणतो धर्मो द्विविधो भवति, श्रौतधर्मः स्मार्तधर्मश्चेति ।

---

८ मुण्डकोपनिषद्,१.४.५ ।
९ मुण्डकोपनिषद्, १.१.४-५ ।
१० सत्याषाढश्रौतसूत्रम्, प्रथमो भागः, पृ.३ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४.१. श्रौतकल्पः/श्रौतधर्मः

वैदिकानां यागादीनां अनुष्ठानविधयः प्रकारभेदाश्च यत्र वर्णिताः सन्ति तत् श्रौत्रमित्युच्यते । 'हस्तौ कल्पोऽथ पठ्यते' इति शिक्षायामुक्तिः । श्रौतेषु वेदत्रयीसाध्यं ज्योतिष्टोमादिकर्मानुष्ठानं होत्रमृग्वेदिकम्, याजुर्वेदिकम्, सामवेदिकमुद्गातृत्वमिति । श्रौतसूत्रेष्वग्न्याधानाग्निहोत्र-दर्शपूर्णमासेष्टिसोमयागादिश्रौतविषया वर्ण्यन्ते । शुल्बसूत्राण्यपि श्रौतसूत्राङ्गभूतानि विराजन्ते । तत्र कुण्डमण्डपादिनियमा यागादिसहायकाः प्रतिपाद्यन्ते । ऋग्वेदसम्वन्धि द्विविधमपि श्रौतसूत्रं भवति, यथा-आश्वलायनश्रौतसूत्रं शांखायनश्रौतसूत्रम् । शुक्लयजुर्वेदस्य कात्यायनश्रौतसूत्रम्, कृष्णयजुर्वेदस्य वौधायनश्रौतसूत्रम्, आपस्तम्वश्रौतसूत्रम्, हिरण्यकेशीश्रौतसूत्रं चेति । भरद्वाजश्रौतसूत्रम्, काठश्रौतसूत्रम्, लाट्यायनश्रौतसूत्रम्, द्राह्यायणश्रौतसूत्रम्, जैमिनीयश्रौतसूत्रमित्यादीनि सामवेदस्य प्रसिद्धानि सन्ति । अथर्ववेदस्य वैतानश्रौतसूत्रं च प्रसिद्धं भवति । एतेषां श्रौतसूत्राणां विभिन्नेषु याज्ञयज्ञादिषु अनुष्ठानेषु प्रयोगो भवति । अतोऽनुष्ठानानि तानि यागयज्ञादयश्च श्रौतधर्मा भवन्ति ।

४.२. स्मार्तकल्पः/स्मार्तधर्मः

स्मृतौ ये धर्माः प्रतिपादिताः सन्ति ते सर्वे स्मार्तधर्मपदेन अभिधीयन्ते । स्मृतिप्रति धर्मः स्मार्तधर्मः । श्रुतिर्नाम वेदः स्मृतिश्च धर्मशास्त्रम् । अस्मिन् विषये मनुः कथयति यत् 'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः'[११]इति । विज्ञानेश्वरमते षट् स्मार्तधर्माः भवन्ति[१२] । ते यथा- वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति । तत्र स्मार्तकल्प/धर्मस्यापि वेदाङ्गत्वमिति । तथा हि-'हस्तौ कल्पान्प्रचक्षते' इत्यनेन श्रौतस्यैव वेदाङ्गत्वमायाति, न तु स्मार्तानां तस्य श्रुतिमूलकत्वात् । प्रत्यक्षा हि श्रुतयः । न हि ज्ञायतेऽमुकवेदोक्तं स्मार्तमिति । अविज्ञातं स्मार्तम्, यन्न ज्ञायते किमृग्वेदिकम्, किं याजुर्वेदिकम्, किं सामवेदिकमिति, तस्माच्छ्रौतस्यैव वेदाङ्गत्वमिति चेन्न । स्मार्तानामपि वेदमूलकत्वमुक्तं भाट्टैः । स्मार्तेषु पुनः कर्तृसामान्यादनुमेयाः श्रुतयः । एवं च स्मार्तकल्पानां वेदाङ्गत्वं पारस्करगृह्यसूत्रपरिशीलनेनापि स्पष्टं ज्ञायते षडङ्गमेके च कल्पमात्रे[१३] इति सूत्रप्रणयनात् । ततश्च स्मार्तकर्मकाण्डानामपि परिज्ञानं षडङ्गाध्ययनान्तर्गतमिति न सन्देहः ।

४.३. स्मार्तकर्मणां वर्गीकरणम्

क्रियारूपस्य धर्मस्य वहुरूपत्वेन कर्मणामानन्त्ये स्मार्तकर्मणां वर्गीकरणविषये विचार्यमाणे याज्ञवल्क्यस्मृतेः काण्डत्रये विभक्तत्वाद् आचारकर्माणि, व्यवहारकर्माणि, प्रायश्चित्तकर्माणि चेति त्रेधा विभाग इति वक्तुं शक्यते ।

४.३.१ आचारः

'आङ्' उपसर्गात् 'चर्' धातोः 'घञ्' प्रत्यये कृते आचारशव्दो निष्पद्यते । आचारो मानवस्य चरित्रं-चरणं-आचरणं-व्यवहारं वा द्योतयति । अस्मिनेव विषये अस्मत्परम्परायां वह्वश्चर्चा दृश्यन्ते । वर्णानाम् आचरणं वर्णाचाराः, आश्रमाणाञ्च आचाराः, आश्रमाचाराः, इत्यादिपदैरपि अभिधीयन्ते । उदाहरणार्थं ब्राह्मणस्य मद्यपानं निषिद्धम्, अध्ययनाध्यापनादिकं कर्त्तव्यम् इत्यादिकं ब्राह्मणस्य वर्णाचाराः । तथैव देशरक्षा, देशशासनादिकं क्षत्रियस्य, कृषिः, गोरक्षा, वाणिज्यं च वैश्यस्य वर्णाचारा भवन्ति । गृहस्थाश्रमे तिष्ठन् पञ्चमहायज्ञसाधनम्, अतिथिसत्कारः, परिवाराणां रक्षा इत्यादिकं गृहस्थस्य आचारा भवन्ति । ब्रह्मचारिण आचारत्वेन परिचीयन्ते । वानप्रस्थस्य कृते वन्याहारेण जीवनयापनं, अफालकृष्टम्, अग्राम्यभोजनग्रहणप्रभृतिकञ्च वानप्रस्थस्य आचारा भवन्ति । संन्यास्यपि अनारम्भी भवेत् । भिक्षार्थं ग्राममियाद् अपि च नाभिवन्देत जीवनं नाभिनन्देत मरणमित्यादिरूपो आचारो भवति । यथोच्यते भगवता मनुना यत्-

नाभिनन्देत मरणं नाभिवन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्देशो मृतको यथा[१४] ॥ इति ।

अयमाचारः मानवस्य समग्रजीवनं प्रभावयति । उक्तञ्च मनुना- 'चतुर्णामपि वर्णानां आचारश्चैव शाश्वतः'[१५] इति । वस्तुतः आचाराद् विच्युतो यो भवति स लोके पूजितो न भवति । आचारयुक्तश्च सर्वमेव सुखमश्नाति इति अस्मद्धार्मिकपरम्परायां प्रसिद्धिर्वर्तते ।

४.३.२ व्यवहारः

गुणधर्मेषु व्यवहारस्यान्तर्भावो भवति । राजा राज्यशासनकाले प्रजासु संघटितानां विवादानां समाधानमवश्यमेव कुर्यात् ।

---

११ मनुस्मृतिः, २.१० ।
१२ विज्ञानेश्वरः, मिताक्षराटीका, याज्ञवल्क्यस्मृति, १.१ ।
१३ पारस्करगृह्यसूत्रम्, २.६ ।
१४ मनुस्मृतिः,६.४५ ।
१५ मनुस्मृतिः,१.१०७ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अन्यथा प्रजाः शान्तिपूर्णसहावस्थाने असमर्था भवेयुः । तदर्थमेव राजधर्मप्रसङ्गे व्यवहारदर्शनं कर्त्तव्यम् । उक्तञ्च भगवता मनुना-

व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।

मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम्[१६] ॥ इति ।

व्यवहारदर्शनेऽसमर्थे राजनि नियुक्तेन राजपुरुषेण प्राड्विवाकेन वा व्यवहारदर्शनं कारयेत् । उक्तं च याज्ञवल्क्येन-

अपश्यता कार्यवशाद् व्यवहारान्नृपेण तु ।

सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्[१७] ॥ इति ।

व्यवहारोऽयं 'वि' उपसर्गात् 'अव' उपसर्गात् 'हृ' धातोः 'घञ्' प्रत्यये कृते निष्पद्यते अस्य लक्षणं बहुभिः शास्त्रकारैर्विभिन्नप्रकारेणोक्तम् । मिताक्षराकारविज्ञानेश्वरस्यानुसारेण-'अन्यविरोधेन स्वात्मसम्बन्धितया कथनं व्यवहारः'[१८] । याज्ञवल्क्यमतानुसारेण व्यवहारस्य लक्षणं यत्-

स्मृत्याचारव्यपेतेन मार्गेणाऽऽधर्षितः परैः ।

आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्[१९] ॥

कात्यायनमतानुसारेण व्यवहारस्य लक्षणं यत्-

वि नानार्थेऽव सन्देहे हरणं हार उच्यते ।

नानासन्देहहरणाद्व्यवहार इति स्मृतः[२०] ॥ इति ।

व्यवहारस्य अष्टादशभेदाः मनुना उक्ताः । ते च- ऋणादानं, निक्षेपः, अस्वामिविक्रयः, सम्भूयसमुत्थानं, दत्तस्य अनपाकर्म, वेतनस्य आदानम्, संव्यतिक्रमः, क्रयविक्रयानुशयः, स्वामिपालविवादः, सीमाविवादः, दण्डपारुष्यं, वाक्पारुष्यं, स्तेयं, साहसं, स्त्रीसंग्रहणम्, स्त्रीपुंधर्मः, दायविभागः, द्यूतः, समाह्वयश्चेति[२१] । एतेषां विवादपदानां साध्यभेदेन पुनर्बहुत्वं गतानीति नारदः कथयति-

एषामेव प्रभेदोऽन्यो द्वात्रिंशदधिकं शतम् ।

क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते[२२] ॥

एषामेव विवादानां सम्यक् समाधानं राज्ञा कर्त्तव्यं भवति । स तान् विषयान् राजधर्मे प्राधान्येन भजते । वस्तुतः राजा स्वसुखाय नैव जीवति अपि प्रजासुखे राज्ञः सुखं भवति । प्रजानाञ्च हिताहितं राजा सततं चिन्तयति । राजा न केवलं प्रजाभ्यः कर्म गृह्णाति अपि च राजा धर्मादपि अंशभागमादत्ते । तस्मात् कारणाद् राजा राज्यशासनाङ्गभूतत्वेन यत्र प्रजापालनं सम्यक् करोति तत्रैव विपदां समाधानमपि सम्यगेव कुर्यात् । अस्मिन्नेव प्रसङ्गे याज्ञवल्क्यस्मृतेष्टीकाकारो विज्ञानेश्वरः सम्यग् वक्ति-' अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः । तच्च दुष्टनिग्रहमन्तरेण न संभवति । दुष्टपरिज्ञानं च न व्यवहारदर्शनमन्तरेण संभवति । तद्व्यवहारदर्शनमहरहः कर्त्तव्यमित्युक्तम्[२३] ।

४.३.३ प्रायश्चित्तम्

स्मार्तधर्मेषु निमित्तधर्ममन्यतमम् । तत्र विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तमिति मिताक्षराकारो विज्ञानेश्वरः कथयति[२४] । विहितं नाम श्रुतिस्मृतिविहितमेव भवति अर्थात् श्रुतिस्मृतिविहितानां कर्मणामनुष्ठानं कर्त्तव्यं निषिद्धानां च कर्मणामनुष्ठानं न कर्त्तव्यम् । तथैव भक्ष्याभक्ष्यनियमानुसारे विहितानामेव सेवनमविहितानां च त्यागः कर्त्तव्यः । तत्र विहितानामननुष्ठाने

१६ मनुस्मृतिः, ८.१ ।
१७ याज्ञवल्क्यस्मृतिः, २.३ ।
१८ विज्ञानेश्वरः, मिताक्षराव्याख्या, याज्ञवल्क्यस्मृतिः, २.१ ।
१९ याज्ञवल्क्यस्मृतिः, २.५ ।
२० कात्यायनस्मृतिः, वी.मि.व्य.प्र.पृ.५ ।
२१ तेषामध्यमृणाऽऽदानं निक्षेपोऽस्वाविविक्रयः ।
सम्भूय च समुत्थानं दत्तस्याऽनपकर्म च ॥
वेतनस्यैव चाऽदानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयाऽनुशयो विवादः स्वामिपालयोः ॥
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके ।
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च ॥
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च ।
पदान्यष्टादशैतानि व्यवहारान्स्थिताविह ॥ मनुस्मृतिः, ८.४-७ ।
२२ नारदस्मृतिः, १.२० ।
२३ विज्ञानेश्वरः, मिताक्षराव्याख्या, याज्ञवल्क्यस्मृतिः, २.१ प्रारम्भ ।
२४ विज्ञानेश्वरः, मिताक्षराव्याख्या, याज्ञवल्क्यस्मृतिः, १.१ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अविहितानामनुष्ठाने निन्दितानां सेवने प्रशस्तानाञ्च त्यागेन पापं भवति । अतस्तस्मात् पापाद् विमुक्तये प्रायश्चित्तं कर्त्तव्यम् इति प्राचीनशास्त्रीयपरम्परायां धार्मिकपरम्परायां च नियमो वर्तते । पापस्य द्विविधं कर्म भवति नरकोत्पादकं लोकसंव्यवहाररहितञ्च । अतो मानवः सामाजिकप्राणित्वेन लोके समाजे च मिलित्वा सर्वैः सह स्थातुमिच्छति । पापकार्यानुष्ठानाल्लोकेषु स निन्दितो भवतीति दृष्टफलं पापस्य । अदृष्टफलञ्च नरकोत्पादकत्वेन शास्त्रेषु निगद्यते । यथोच्यते भगवता याज्ञवल्क्येन-

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।

तस्मात्तेनेह कर्तव्यं प्रायश्चित्तमिति स्मृतम् ॥ इति ।

पापं च ज्ञातकृतमज्ञातकृतञ्चेति द्विविधं भवति । ज्ञातकृतस्य पापस्य कृते प्रायश्चित्तं भिन्नम् अज्ञातकृतस्य पापस्य कृते प्रायश्चित्तं च भिन्नं वर्तते । चतुर्षु वर्णेषु ज्ञानिनां उच्चवर्णानां च कृते, अधिकं प्रायश्चित्तं नीचवर्णानाम् अज्ञानिनां च कृते न्यूनं प्रायश्चित्तं शास्त्रेषु प्राचीनधार्मिकपरम्परायाञ्च निर्दिष्टमासीत् । अतः पापस्य दूरीकरणार्थं प्रायश्चित्तकरणे यथा पापकर्तुः लोकसंव्यवहारत्वं जायते तथैव आत्मिकीं शान्तिमपि स लभते । तस्मात् कारणाद् धार्मिकपरम्परायां प्रायश्चित्तस्य प्रमुखं स्थानमस्ति ।

५. विषयसंग्रहः

संस्कृतसाहित्यगङ्गाया उद्गमविन्दुर्वर्तते वेदः । वेदास्तावत् विश्वमानवताप्रतिष्ठापकाः, विश्वधर्मपोषकाः वैश्वैकाचारसंहितासमर्थकाः। अत एवाऽन्येभ्यो धर्मग्रन्थेभ्यस्ते सर्वथा विभिद्यन्ते। वेदाः समुद्घोषयन्ति-सा नो प्रथमा संस्कृतिर्विश्ववारेति। कृण्वन्तो विश्वमार्यमिति । यत्र विश्वं भवत्येकनीडमिति च । वेदाः सन्दिशन्ति-

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।

समानो मन्त्रः समितिः समानी ।

समानी व आकूतिरिति ॥

एवं हि, विश्वमानवतापोषका वेदाः परमार्थतः धर्मग्रन्थतामर्हन्ति । परन्तु अपेक्षाबुद्ध्या कामं ते केवलं सनातनपदवाच्यानां धर्मग्रन्थाः स्युः, परमार्थतस्ते सकलस्यापि वैश्विकमानवसमाजस्य धर्मग्रन्थाः। नैव कस्मादपि व्यक्तिविशेषाद् वैदिकधर्मारम्भः। अत एव वैदिको धर्मः सनातनधर्मः कथ्यते। सनातनः अर्थात् आद्यन्तविरहितः। तथापि धार्मिकपरम्परायां भारतवर्षे आचारव्यवहारप्रायश्चित्तानि धार्मिकजीवनं सामाग्रिकरूपेण प्रभावयन्ति । श्रौतधर्मपरम्परा स्मार्तधर्मपरम्परा चेति भागद्वयेन सम्पूर्णा धार्मिकपरम्परा विभक्तुं शक्यते । श्रौतधर्मपरम्परायां यागयज्ञप्रभृतीनां विकासो दृश्यते तथैव स्मार्त्तधर्मपरम्परायां स्मृत्यनुमोदितानां वेदानुमापकानाञ्च स्मार्त्तधर्माणां विस्तारो दृश्यते । धर्मेण उन्नतिः, अधर्मेण च हानिः भवतीति परम्परा प्राचीना । धर्माधर्मयोर्ज्ञानं कथं स्यादिति शास्त्रमेव तत्र नियामकं भवति, शास्त्रञ्च सदसदज्ञानस्य निर्णायकम् ।

सन्दर्भग्रन्थाः

अष्टादशस्मृतिः, अनुवाद श्यामसुन्दरलाल त्रिपाठी, खेमराज श्रीकृष्णदास, वि.सं. १९६९ ।

कणादः, वैशेषिकसूत्रम् (षडदर्शनसूत्रसंग्रह) सम्पादकः स्वामी द्वारिकादास शास्त्री, सुधीप्रकाशनम् वाराणसी, वि.सं.२०४१ ।

कृष्णमणि त्रिपाठी, अष्टादशपुराणपरिचयः, चौखम्बा सरस्वती भवन वाराणसी, सन् १९८० ।

कृष्णयजुर्वेदीयतैत्तिरीयसंहिता, सायाणभाष्यसहित, (सम्पा.काशीनाथ शास्त्री, विनायक आप्टे) आनन्दाश्रम, पुना, सन् १९४० ।

गौतमः, गौतमधर्मसूत्रम्, टीकाकार हरदत्तः, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं.२०४३ ।

तैत्तिरीयब्राह्मणम्, सायणभाष्यसहितम्, सम्पा.नारायणशास्त्री गोलबोले आनन्दाश्रम पुना, तृतीयभाग, तृतीय संस्करण, सन् १९७९ ।

तैत्तिरीयारण्यकम्, सायणभाष्यसहितम्, सम्पा.बाबाशास्त्री फडके आनन्दाश्रममुद्रालयः, पूना सन् १८९८ ।

नारदः,नारदस्मृतिः, एशियाटिक् सोसाइटी, कलकत्ता, सन् १८८५-१८८६ ।

पराशरः, पराशरस्मृतिः, खेमराज श्रीकृष्णदास,बम्बै, १९५८ ।

पारस्करः, पारस्करगृहसूत्रम्, टीकाकार हरिहरः, चौखम्बा अमरभारती प्रकाशनम्, वाराणसी, सन् १९८० ।

पाणिनिः, अष्टाध्यायीसूत्रपाठः, चौखम्बा संस्कृत सीरीज अफिस, वाराणसी, सप्तमसंस्करणम्, वि.सं. १९३२ ।

मनुः, मनुस्मृतिः (श्रीकुल्लुकभट्टविरचितया मन्वर्थ मुक्तावल्या व्याख्यया समुपेता), दिल्ली : मोतीलाल बनारसीदास पब्लिशर्स

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रा.लि., सन् १९८३ ।
महाभारतम् (नीलकण्ठकृतया भारतभावदीपाख्यया टीकया समेतम्) नरहर जोशी, पुना, सन् १९२९ ।
मिश्रमित्र, वीरमित्रोदयः, व्यवहारप्रकाशः (श्रीजीवानन्द विद्यासागर भट्टाचार्येण संस्कृत) कलिकातानगरे सुचारुयन्त्रे मुद्रिंत, सन् १८७५ ।
मुण्डकोपनिषद्, आनन्दाश्रम मुद्रणालय, पूना, सन् १८८२ ।
यास्कः, निरुक्तम् (दुर्गाचार्य संस्कृत टीका, भगीरथ शास्त्रीकृत् सुबोधिनी हिन्दी व्याख्या)(नयाँ दिल्लीः मेहरचन्द लक्षमनदास पब्लिकेशन्स, तृतीय संस्करणम् सन् १९९३)
याज्ञवल्क्यः, याज्ञवल्क्यस्मृतिः (विज्ञानेश्वरप्रणीतमिताक्षराव्याख्यासंवलिता), तृतीयावृत्ति, बम्बई : निर्णयसागरमुद्रणयन्त्रालय, सन् १९२६ ।
याज्ञवल्क्यः, याज्ञवल्क्यस्मृतिः (अपरार्कापराभिधापरादित्यविरचितटीकासमेता), भाग १ र २ आनन्दाश्रममुद्रणालय, पूना सन् १९०३/ सन् १९०४ ।
लौगाक्षिभास्करः, अर्थसंग्रहः, ओरियन्टल बुक एजेन्सी, पूना, सन् १९३२ ।
शतपथब्राह्मणम् (शुक्लयजुर्वेदस्य माध्यन्दिनशाखीयम्) (श्रीमत्सायणाचार्यकृतवेदार्थप्रकाशनामभाष्येण सहितम्, सामश्रमीत्युपनामाचार्यसत्यव्रतशर्मणा यथामति संशोध्य सण्टीक्य च सम्पादितम्) एसियाटिक सोसाइटी बंगाल, सन् १९०८ ।
शिक्षासंग्रहः, (सङ्कलयिता सम्पादकश्च आचार्य रामप्रसादत्रिपाठी) सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी, वि.सं.२०४६ ।
शुक्लयजुर्वेदसंहिता, (उवटाचार्यविरचित मन्त्रभाष्यम्, महीधरविरचितं वेददीपाख्यभाष्यम्) पाण्डुरङ्ग जावजी, निर्णय सागर प्रेस द्वितीयावृत्ति सन् १९२९ ।
स्वामी प्रभुपाद, श्रीमद्भगवद्गीता यथारूप, आठौं संस्करण, सन् १९८६ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सामवेदीयच्छन्दोदेवतर्षिज्ञानमीमांसा

सहप्रा. डा.श्रीरामोऽधिकारी
वाल्मीकिविद्यापीठम्

साक्षात्परमात्मनो निःश्वासभूतः शब्दराश्यात्मको वैदिकवाङ्मयो मन्त्रब्राह्मणत्वेन विभक्तः । गद्यपद्यगीत्यात्मकस्य वैदिकराशेस्त्रयीति नामापरम्। अर्थान्नियताक्षरावसाना ऋक्, गीतिषु सामाख्याः, शेषे यजुःशब्दः, (जै.सू.१.२.३६) इत्यादिना मीमांसाकारेण जैमिनिना मन्त्रस्वरूपं समुपस्थापितम्। एतेषां मन्त्राणामध्ययनाध्यापनं यज्ञानुष्ठानादौ प्रयोगश्च ऋषिच्छन्दोदेवताविनियोगज्ञानपूर्वकं विधातव्यः । तेन विना सर्वत्र हानिः निर्दिष्टास्ति ब्राह्मणग्रन्थे । यो ह वा अविदितार्षेयछन्दोदैवतविनियोगेन ब्राह्मणेन मन्त्रेण याजयति, वा- ध्यापयति, स स्थाणुं वर्च्छति गर्तं वा पतति प्र वा मीयते वा पापीयान् भवति, यातयामान्यस्य छन्दांसि भवन्ति । यो मन्त्रे मन्त्रे वेद सर्वमायुरेति, श्रेयान् भवति । अयातयामान्यस्य छन्दांसि भवन्ति । तस्मादेतानि मन्त्रे मन्त्रे विद्यात् (आ.ब्रा.१.६) एवं वेदोक्तमृषिच्छन्दोदेवताज्ञानं विधायैव मन्त्रप्रयोगः सम्पादनीयस्तत्र ऋषिच्छन्दोविनियोगज्ञानं तत्तच्छाखासम्बद्धग्रन्थैर्भवति । तत्र सामवेदीयमार्षेयब्राह्मणमृषीन् प्रस्तौति, निदानसूत्रं छन्दोविचितिसूत्रञ्च छन्दांसि ।

ऋग्यजुःसामाथर्वमन्त्रेषु देवताज्ञानविधिर्निरुक्तस्य सप्तमाध्याये सन्निभालितः । मन्त्रार्थवशाद् देवतानिर्धारणं तत्र । यत्काम ऋषिर्यस्यां देवतायाम् आर्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति। (नि.७.१) अर्थात् सोद्देश्यं यस्मिन् मन्त्रे प्राधान्येन यस्य देवस्य स्तुतिस्तद्दैवतः स मन्त्रो भवति। अथ च केचनानादिष्टदेवताका मन्त्राः सन्ति, तेषामपि देवताज्ञानमावश्यकमेवेति निरुक्तमभिप्रैति तद्येऽनादिष्टदेवतामन्त्रास्तेषु देवतोपपरीक्षा, यद्दैवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्ति। अर्थात् तादृशानामनादिष्टदेवताकमन्त्राणां यज्ञविनियोगाधारेण यज्ञनिर्दिष्टप्रधानदेवता निर्धार्यते यज्ञादन्यत्र तु प्रजापतिदेवता । अथान्यत्र यज्ञात्प्राजापत्या इति याज्ञिकाः (नि.७.१.) निरुक्तोक्तदेवतोपदेशसिद्धान्ते मीमांसाकृतमन्त्रलक्षणे चार्थप्राधान्यं सुस्पष्टं प्रयोगसमवेतार्थस्मारकाः मन्त्राः (अर्थसंग्रहः पृ.१३१) । अर्थाद् अनुष्ठेयद्रव्यदेवताक्रियास्मारकत्वं मन्त्रत्वं सिद्ध्यति । स्मारकत्वञ्चार्थवशाद् । मन्त्रप्रतिपादितार्थानुसारं देवताज्ञानं सामवेदेऽपि घटते। यथा ऋच्यध्यूढं साम गीयते (छा.उपनिषद् १.६) इति श्रुत्या सामानि गीयन्ते ऋक्षु, सामोत्पन्नानामृचामर्थवत्वात्तत एव देवता ज्ञेया भवति । एवमृग्यजुषोः सामवेदर्भागस्य च देवता सुविज्ञायते परमृगक्षराधारेण सप्तसु स्वरेषु गीतानां सामगानमन्त्राणान्तु देवताः कथं ज्ञेया भवन्तीति लेखेऽस्मिन् प्रवृत्तिर्दृश्यते। यतः सामगानानान्तु कश्चन विशिष्टः सांकेतिकोऽर्थो न विद्यते, ऋगक्षरभिन्नानां गानपठितानां केषाञ्चन सार्थकस्तोभानान्तु स्तोभभाष्येऽर्थः कृतो विद्यते। स्तोभभाष्ये प्रस्तुतोऽर्थः कीदृशः ? तत्र ऋगक्षरसम्बद्धार्थः कृत उत तद्भिन्नार्थः ? इत्यत्र जिज्ञासायां केषाञ्चन साम्नामृगक्षरगानाक्षरगतार्थपर्यालोकनेन ज्ञायते यद् स्तोभाः ऋगक्षरप्रतिपादिततात्पर्यार्थं विस्तारयन्ति न स्वतन्त्रार्थं प्रकाशयन्तीति। यथा चोदाहरणं सेतुसाम्नि (आरण्यक.८८) । द्वयो ऋक्स्तोभयोरर्थसमन्वये स्तोभाः ऋगक्षरार्थमेव स्तुवन्तीति हस्तंलगति । एवं सामान्यतोऽध्ययने नास्ति ऋगर्थभिन्नः स्तोभार्थः । अतः सर्वेषामृक्स्तोभानामर्थतोऽभेदाद् अर्थवतामृचां या देवता सैव सामदेवतेति सामान्यनियमः प्रतिफलति । तदुक्तञ्च ऐन्द्र्य ऋच ऐन्द्र्यं साम (ता.ब्रा.८.१.७) । ऋगक्षरभिन्नं गानपठितं पदं स्तोभपदेन व्यवह्रियते । एतेन विश्लेषणेन ऋचां या देवता, सैव देवता ऋच्यध्यूढानां सामगानानामर्थवशाद् । तदेतत्स्पष्टमाचष्टे निदानकारः साम्नां छन्दो देवता चास्ति, अस्तीति गौतमः, यच्छन्दस्यामृचि गीयते, तदस्य छन्दः, यद्देवत्यायां सास्य देवता । (नि.सू.प्र.१.१३) । एतेन सामगानानामपि, ऋक्पाठदेवतैव निर्धारिता भवति परं सामगानेषु सर्वत्र सिद्धान्तोऽयं न घटते । अतः विशिष्टानां सामगानानां देवताप्रस्तुतौ देवताध्यायाख्यं सामब्राह्मणं विशिष्टं देवताज्ञानप्रकारं समुपस्थापयति । ब्राह्मणस्यास्य भाष्यारम्भमंगलाचरणश्लोकेऽस्य प्रतिपाद्यत्वेन साम्नां निधनभेदेन देवताध्ययनादयम् इत्यादिना देवताविषयकमध्ययनं प्रस्तुतम् । अर्थात् सामगानानां भिन्ननिधनाधारेण प्रतिसाम देवताभेदः । निधनं नाम पाञ्चभक्तिकस्य साप्तभक्तिकस्य वा सामगानस्यान्तिमा भक्तिः । तच्च वाग्-इडा-स्वरनिधनात्मकम् । वागिडास्वरातिरिक्तस्यैव निधनत्वमिति ज्ञेयमत्र । साम्नां प्रस्तावोद्गीथप्रतिहोपद्रवनिधनानि (पञ्चविधसूत्र १.१) पञ्च भक्तयो भवन्ति, सप्तभक्तयस्तु हिं–प्रस्ताव-ॐ-उद्गीथ-प्रतिहार-उपद्रव-निधनानि (ऊहोह्यगानभूमिका पृ.४५) स्तोत्रप्रयोगे निर्धारितानि सन्ति । भक्तिपदेन विभागो ज्ञायते । एतैश्चतुर्विधैर्निधनैः परिलक्षिता विशिष्टा दश देवताः–

अग्निरिन्द्रः प्रजापतिः सोमो वरुणस्त्वष्टाङ्गिरसः पूषा सरस्वतीन्द्राग्नी (दे.ब्रा.१.१) प्रस्तुताः सन्ति । तत्र येषु सामसु इडा "ई"पदनिधनानि तानि अग्निदैवतानि यथा प्रतीचीनेडं काशीतमित्यत्र इडानिधनम्, कालेयसाम्नि (तरोऽ२३भिर्वो ग्रा.६.३१३ इत्यत्र इडानिधनम् । ईनिधनमार्गीयवमित्यत्र (ग्रा.१८४) ईनिधनम् । तस्यैव स्वरनिधनञ्च रुढ्या प्रयुक्तम् । ऋचामन्त्याक्षरेण स्वर्यमाणेन (सम्प्रसारेण) स्वरेण गीतानि निधनानि हाइनिधनानि च स्वरनिधनानि प्रजापतिदैवतानि । इडानिधनानि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पदनिधनानीकारणिधनानीत्यात्याग्नेयानि (दे.ब्रा.१.२) सर्वाणि स्वाराणि प्राजापत्यानि (दे.ब्रा.१.४) यथा अग्न आयाहिवीतये इत्यस्यान्त्याक्षरे बर्हिषि इत्यत्र गीतं बर्हीऽ३षीऽ२३४५ (ग्रा.गा.१) निधनम् अग्नआयाहिवी इत्यत्र साम्नि। हाइनिधनञ्च वामदेव्यसाम्नि (ग्रा.३०६) वाऽ२र्तोऽ३५हाइ इति । एताभ्यां निधनाभ्यामतिरिक्तं बाह्याक्षरनैरपेक्ष्येण ऋगन्त्याक्षरे गीतं निधनं पदनिधनमित्युल्लिखितं ब्राह्मणेन । यथा च संहितं साम तत्र ऋगक्षरं सुतः इत्यस्ति । तत्र गीतं निधनञ्च सुऽ२३४५तः वर्तते । हिरण्यय इत्यृगक्षरे ण्यायऽ२३४६ (आरण्यकगाने) इति निधनं यौधाजयसाम्नि । तथैव स्तोभाक्षररहितानि केवलमृगक्षरे गीतानि औशनकावप्रभृतीनि सामानि ऋक्सामानि सोमदेवतात्मकानि भवन्तीति ऋक्सामानि सौमानि (दे.ब्रा.१.६) इत्यादिना निरूपितमस्ति । यज्ञायज्ञीयसाम्नि वाङ्निधनमस्ति, तच्च वरुणदैवतं भवतीति वाङ्निधनानि वारुणानि (दे.ब्रा.१.८) इडास्वरवागतिरिक्तानि निधननाम्ना निर्दिष्टानि सर्वाणि निधनवन्ति सामानि ऐन्द्राणि (इन्द्रदैवतानि) भवन्तीति सर्वाणि निधनवन्त्यैन्द्राण्यादिष्टेभ्यः (दे.ब्रा.१.३) निरूपयति ब्राह्मणम्। पुनश्च निधनभेदेन देवताभेदः संघात्मकः प्रतिपादितो ब्राह्मणेन सामगानानि समभिलक्ष्य। अर्थात् पूर्वत्र पृथक् पृथक् अग्न्यादिदशदेवताः सोदाहरणं समुपदिष्टाः, सम्प्रति स्वरवागिडानिधनवतां साम्नां वस्वादिचतस्रः संघात्मकाः देवता निभाल्यन्ते । वसवो रुद्राः आदित्या विश्वे देवाः, वसूनां स्वाराणि रुद्राणां निधनवन्ति आदित्यानामैडानि विश्वेषां देवानां वाङ्निधनानि (दे.ब्रा.१.१७, १८) अनेन अग्न्यादिदशदेवतापेक्षया यथानिधनं सूत्रात्मकं देवतानां संघात्मकस्वरूपं निर्दिष्टमस्ति । यथा भूयस्त्वेन प्रदेशा वर्तन्त इत्यन्तराणि (दे.ब्रा.१.१९) एतत्सूत्रात्मकं देवतोपदेशनमभ्यन्तरम्, अग्न्यादिदशदेवतोपदेशनन्तु बाह्यम् । अभ्यन्तराणि सर्वाण्यपि निधनवन्ति सामानि अग्निदैवतानि वा इन्द्रदैवतानि। अर्थात्सर्वेषामेव साम्नामग्नीन्द्रयोरेक एव देव निर्धारणीयो भवतीति संघात्मकं देवतानिर्धारणं सूत्रितम्। अथान्तरतराणि सर्वाण्याग्नेयानि सर्वाण्यैन्द्राणि सर्वाणि स्वाराणि प्राजापत्यानि सामानीत्यन्तरतराणि (दे.ब्रा.१.२०) इत्यादिना ब्राह्मणवाक्येऽस्मिन् सर्वग्रहणेन तदन्तर्भूतं स्वरग्रहणं पुनरुक्तिस्तेनाज्ञातार्थज्ञापकाभावस्तदा ब्राह्मणमिदमप्रामाणिकमापतति । तदत्र स्वकीयवेददीपभाष्ये सायणः औशनकावादिस्वरसंग्रहार्थत्वाद् अपौनरुक्त्यम् इत्युल्लिखन् सौमानामौशनकावादीनाञ्च साम्नां प्रजापतिदेवताविधानेनाज्ञातार्थज्ञापकत्वमुद्घाटितवान् । यथा तयोः साम्नोः निधने –अभिप्रियाणि पवत इति कावं प्राजापत्यं साम (ता.ब्रा.८.५.१४) (आ.ब्रा.५.९.१)

औशनम्–पाऽ३र्थाऽ५व्याऽ६५६ (दशरात्रे १.४ ऊहे)

कावम्–वाऽ२राऽ३जाऽ५साऽ६५६ (दश.१.१३, ऊहे) (ग्रा.गा.१०८९)

स्वर्यमाणनिधनत्वात् प्रजापतिदैवतञ्च भवतीति सर्वाणि स्वाराणि प्राजापत्यानि (दे.ब्रा.१.४) ब्राह्मणं समाधानं ब्रूते । अस्मादपि सूक्ष्मतरं देवताप्रख्यापनं कृतं ब्राह्मणेन अथान्तरतमानि सर्वाणि ब्राह्माणि सामानीति सर्वान्तरतमानि (दे.ब्रा.१.२१) अर्थाद् ब्रह्मणा स्वयमेव परिणमय्य सर्वाणि वस्तुजातानि सृष्टानि, तत्र सामगानान्यपि समापतितानि । अतः सर्जकत्वात्सर्वाणि ब्रह्मदैवतानि सामानीति प्रजापतिर्वा इदमेक आसीत्, सोऽकामयत बहुस्यां प्रजायेय (ताण्ड्यब्रा.४.१.४) प्रस्तौति ब्राह्मणम्। एवं सर्वेषां सामगानानां ब्रह्मदैवतं समुल्लिख्य देवताध्यायब्राह्मणमाध्यमेन देवतोपदेशस्य सूक्ष्मप्रकारो समुपदिष्टः । अनया रीत्या देवताध्यायब्राह्मणं सामगानस्यान्तिमभक्त्याधारेण सूक्ष्मातिसूक्ष्मप्रकारेण च विशिष्टदेवताः प्रतिपादयति । एतदनुसृत्य स्वामिनारायणसम्पादिते सामगाने च साम्नां देवताद्वयं देवतात्रितयं वा समुल्लिखितं प्राप्यते । एवमेव सामगानानां छन्दःप्रतिपादकं निदानसूत्रं निधनभक्त्याधारेण छन्दांसि प्रस्तौति स्पष्टतया । स्वरो निधनमिडा वाक्, तद्यानि स्वराण्याग्नेयानि तानि गायत्रतया, वायव्यानि वा । यानि निधनवन्त्यैन्द्राणि तानि त्रैष्टुभतया । यान्यैडानि वैश्वदैव्यानि, तानि जागततया । यानि वाङ्निधनानि प्राजापत्यानि तान्यनुष्टुभतया (नि.सू.प्र.१.१२) । तथैव निधनाधारेण सामगानानामृषयः प्रस्तूयन्ते– अत्र खल्वस्य सर्वस्य छन्दसो निधनार्षेयमुक्तं भवति (नि.सू.प्र.१.१२).यान्यपुरस्तात्स्तोभानि पदनिधनानि लघुगीतीनि तानि राथन्तराणि । यानि पुरस्तात्स्तोभानि बर्हिनिधनानि..बार्हतानि। (नि.सू.प्र.२.४) अत्रावधारणीयं यद् एष विशिष्टदेवतार्षेयछन्दोविधिः न समेषां साम्नामपि तु निश्चितानामेव। समेषान्तु ऋचां या देवता, यानि च छन्दांसि, सैव, तान्येव साम्नामिति सामान्यनियमः । ऋषयश्च ऋक्पाठमन्त्र-सामगानमन्त्राणां भिद्यन्ते । एतत्सर्वं विचार्य स्वकीये सामवेदार्षेयदीपपुस्तकस्योपोद्घाते भट्टभाष्कराध्वरीन्द्रः ऋषयस्तु ऋक्सक्सामयोर्भिद्यन्ते, छन्दोदेवतयोर्न भेदः, इति सिद्धान्तयति ।

सामवेदपरम्परायां नाम्नां विशेषता सर्वत्र नाम्ना सामगृहीतत्वाद् । सामनामानि च ऋषिच्छन्दोदेवतागोत्रादिवाचकशब्दैः प्रख्यातानि सन्ति । तदेतत्प्रस्तौति ऋषीणां नामधेयगोत्रोपधारणम् (आ.ब्रा.१.१) इत्यादिनार्षेयब्राह्मणम् । एकस्यैव सामगानस्य देवतानाम्ना छन्दोनाम्ना ऋषिनाम्ना च व्यवहारः कृतः प्राप्यते गायत्रं पौष्कलमाग्नेयम् (आ.ब्रा.१.१४) तत्र च गायत्रसाम्नः तत्सवितुर्वरेणियोम् इत्यस्य व्यवहारः गायत्रीछन्दसः, पुष्कलर्षेरग्निदेवतायाश्चाधारेण प्राप्यते । तेन सामगानस्यास्य गायत्रमाग्नेयं पौष्कलञ्च नाम समजनि। एवमेव अन्येषां यौधाजयवामदेव्यप्रभृतीनाञ्च ज्ञेयं भवति। एकस्य साम्नो बहुष्वार्षेषु सत्सु, अन्यतमेनापि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नाम्ना तत्साम गृहीतं भवति। अर्थात् पौष्कलेन गायत्रेण वाग्नेयेन तदेव गायत्रं सामगानमवगम्यते। अनेन प्रकारेण छन्दोदेवतर्षिज्ञानं प्रस्तूयते। एतत्सामगानानामध्ययनमन्यत्रापि बहुषु स्थलेषु प्राप्तुं शक्यते। एतादृशेन छन्दोदैवतार्षेयज्ञानेन वेदपाठी ऋषीणां संस्थानो भवति संस्थानो भवति ब्रह्मणः,स्वर्गे लोके महीयते, स्मरन्नाजायते पुनः। तान्येतान्यार्षेयाणि योऽधीते ब्राह्मणः पङ्क्तिपावनो भवत्यर्घ्यः। य एवं वित्स्यान्न मृन्मये भुञ्जीत। तथा हास्यायुर्न रिष्यते तेजश्च (आ.ब्रा.१.९)

ऋषीणां विषयज्ञो यः स शरीराद्विमुच्यते। अतीत्य तमसः पारं स्वर्गे लोके महीयते॥

सहस्रयुगपर्यन्तमहर्ब्राह्मं यदुच्यते। नाकस्य पृष्ठे तं कालं दिवि सूर्य इव रोचते॥

ततः कृतयुगस्यादौ ब्रह्मभूतो महायशाः। सर्वज्ञो धृतिमानृषिः पुनराजायते स्मरन्॥

(दे.ब्रा.४.२४) न केवलमृषिसम्बद्धविषयज्ञोऽपि तु देवताविषयज्ञश्च फलमेतत्प्राप्नोतीति सायणः प्रस्तौति साम्नाम् ऋषिदेवतयोरुभयोरप्यपेक्षितत्वात् तदुभयप्रतिपादकार्षेयदेवताध्यायाख्यग्रन्थद्वयस्य एकत्वाभिप्रायेण ऋषीणां विषयज्ञ इत्युपन्यासः। ऋषीणामित्युपलक्षणम्। देवतानां विषयज्ञस्याप्युक्तं फलमस्त्येवेत्यभिप्रायः। उपलक्षणस्य लक्षणञ्च स्वप्रतिपादकत्वे स्वेतरप्रतिपादकत्वमस्ति। सर्वत्र सामब्राह्मणग्रन्थोक्तं फलं प्राप्नोतीति सर्वेषु सामगानेषु देवतर्षिछन्दांसि ज्ञेयानि भवन्ति सामवेदानुरागिभिरिति सम्यगुपपादयति परमकृपालुर्भगवान् स्वयम्भूः सामेदीयब्राह्मणादिग्रन्थमाध्यमेनेति शम्।



सन्दर्भग्रन्थाः

निरुक्तम् -छज्जूरामशास्त्रिदेवशर्मशास्त्रिणा संक्षेपितया दुर्गाचार्यसंस्कृतटीकया विभूषितम्, मेहरचन्द्रलछमनदासपब्लिकेशन्स-नईदेहलीत १९९३ ईशवीये प्रकाशितम्।

देवताध्यायब्राह्मणम्- डा.बे.रामचन्द्रशर्मसंपादितम्,केन्द्रीयसंस्कृतविद्यापीठतिरूपतितः १९८३ ईशवीये प्रकाशितम्।

आर्षेयब्राह्मणम्- डा.बे.रामचन्द्रशर्मसंपादितम्, केन्द्रीयसंस्कृतविद्यापीठतिरूपतितः १९६७ ईशवीये प्रकाशितम्।

ताण्ड्यब्राह्मणम्- चिह्नस्वामिशास्त्रिणा पट्टाभिरामशास्त्रिणा च संशोध्य चौखम्वा संस्कृतसंस्थानतः १९८७ ईशवीये प्रकाशितम्।

निदानसूत्रम्- महर्षिपतञ्जलिप्रणीतं मेहरचन्दलछमनदासदेहलीत १९७१ ईशवीये प्रकाशितम्।

सामवेदार्षेयदीपः-भट्टभाष्कराध्वरीन्द्रप्रणीतःडा.बे.रामचन्द्रशर्मसंपादितः,केन्द्रीयसंस्कृतविद्यापीठतिरूपतितः१९६७ईशवीये प्रकाशितः।

सामवेदः- पं.गगनकुमारचट्टोपाध्यायसंपादितः, स्वामीसदानन्दसरस्वतीजगद्गुरुशङ्कराचार्य मेमोरियलट्रष्टशारदापीठद्वारकातः २०६१ वैक्रमाब्दे प्रकाशितः।

ऊहगानम् ऊह्यगानम्- अ.मु. रामनाथदीक्षितसंपादितम्, संस्कृतमहाविद्यालयः, काशीहिन्दु विश्वविद्यालयवाराणसीतः वैक्रमाब्दे २०३३ (सन् १९६७) प्रकाशितम्।

ऊहोह्यगानभूमिका- अ.मु. रामनाथदीक्षितलिखिता, ऊहोह्यगाने, संस्कृतमहाविद्यालयः, काशीहिन्दु विश्वविद्यालयः २०३३ (सन्१९६७) वाराणसी।

अर्थसंग्रहः- लौगीक्षभाष्करप्रणीतः, श्रीकृष्णवल्लभाचार्यविरचितया किरणावलीटीकया समेतः, चौखम्वा ओरण्टालियावाराणसीतः १९८५ ईशवीये प्रकाशितः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पण्डितराजजगन्नाथविरचितगङ्गालहरीस्तवकाव्यस्य समीक्षात्मकमध्ययनम्

उपप्रा. हरिनारायणपाण्डेय
याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठम्

१. आमुखम्

सहृदयहृत्सरसो वाग्द्वारेण विनिर्गत्य पावनपृषतैः सहस्रशो भक्तिरसिकान् पुनाना भक्तिकाव्यनिर्झरिणी मानवसभ्यताया उषःकालादेव पवर्तमानासीत् । संस्कृतवाङ्मयेऽलौकिकानां देवादीनाम्, निःसर्गरमणीयानां नदनदीवनपर्वतादीनाम्, पूज्यानां गुरुचरणादीनाञ्च स्तुतिपराणि सहस्रशः स्तवकाव्यानि विलसन्ति । एवंविधानि स्तवकाव्यानि अद्यावधि समादरभाञ्जि च वर्त्तन्ते। निरवधिकेऽस्मिन् काव्यस्रोतसि समुदितासु लहरीषु पण्डितराजजगन्नाथप्रणीता रसध्वनिगुणालङ्कारादिकाव्यवैशिष्ट्यसंवलिता गङ्गालहरी अपि समाकर्षति सचेतसां चेतांसि । विबुधजनमनःसमावर्जनप्रवीणाया अस्या गङ्गालहर्याः साहित्यिकं वैशिष्टयं समुद्घाट्य तदन्तर्गतकाव्यात्मकसौन्दर्यसमीक्षणे आलेखोऽयं परिसीमितो वर्तते ।

२. स्तवकाव्यस्वरूपम्

आधुनिकाः समालोचका भावप्रधानम्, गीतितत्त्वयुतञ्च काव्यं गीतिकाव्यमध्ये परिगणयन्ति ।[1] गीत-गीतिकाव्ययोर्भिन्नतापि तैः स्फुटं प्रतिपादिता । एतदनुसारेण गीतं स्वरप्रधानम्, तच्च गायन-वादन-नृत्यादीनामुपयोगेन पूर्णतां याति । गीतिकाव्यन्तु भावप्रधानम्, पाठ्यश्रव्यरूपञ्च काव्यम् । रागात्मकहृदयोद्गारस्तूभयसामान्यः । वाचस्पतिगैरोला पोद्दारमहोदयोक्तमुद्धरन् गीतिकाव्यमित्थं परिभाषते-

यस्याश्छन्दोमय्या रचनाया भावप्रवाहे स्वरलहरयः स्वतस्तरङ्गायन्ते, यत्र व्यक्तित्वसमवेता कविपात्रगता रागात्मकता आत्मनिवेदनरूपेण प्रकटीभवति, तावत्प्रमाणञ्चास्यायतनं यावद् रागात्मकप्रवाहः शैथिल्यं नाप्नोति, यत्र घटनावर्णनं गौणं सद् भावनायाः प्राधान्यं भवति, यत्र पुनरेकमेव भावनिवेदनम्, एक एव रसः, एकैव च परिपाटी भवति तदेव गीतिकाव्यम् ।[2]

तच्च गीतिकाव्यं द्विविधम् - स्तवकाव्यम्, शृङ्गारकाव्यञ्च । यत्राध्यात्मिकभावाभिभूतस्य सहृदयहृदयस्य ऐकान्तिको हृदयोद्गारो वेगेन प्रवहति तत् स्तवकाव्यम् ।[3] सूर्यशतक-सौन्दर्यलहरी-महिम्नःस्तोत्रादीनि काव्यानि अस्मिन्नेव काव्यप्रभेदेऽन्तर्भवन्ति । यत्र पुनः शृङ्गारमय्या भावनायाः प्राधान्यं भवति तत् शृङ्गारकाव्यम् । मेघदूत-घटकर्परादीनि काव्यानि शृङ्गारप्रधाने गीतिकाव्यप्रभेदेऽन्तर्भवन्ति। तदित्थमाध्यात्मिकभावप्रधानम्, गुणीभूताख्यानकम्, आत्मनिवेदनपर्यवसन्नम्, नातिविस्तृतञ्च काव्यं स्तवकाव्यमिति उपरि कृतायाश्चर्चायाः पर्यवसितोऽर्थः । एतेन 'त्वमेव माता च पिता त्वमेव...' इत्यादिमुक्तकाकारात् श्लोकवाक्यात् सूर्यशतकादिबृहदाकारं स्तोत्रमपि स्तवकाव्येऽन्तर्भवन्ति ।

३. गङ्गालहर्याः स्तवकाव्यत्वम्

सुरभारतीविनिबद्धा गङ्गालहरी त्रिपञ्चाशत् पद्ययुता एकसर्गात्मिका (सर्गरहिता) कृतिर्वर्त्तते । अस्या आदितो द्विपञ्चाशत्तमपद्यपर्यन्तं कवेर्गङ्गाविषयकं भावनिवेदनमस्ति । पार्यन्तिके च पद्ये फलस्तुतिर्वर्णिता । काव्यान्तर्वर्तिषु कतिपयपद्येषु पद्यांशेषु चाख्यानसंस्पर्शः सन्नपि आद्यन्तगतं काव्यानुस्यूतमाख्यानतत्त्वं नास्ति । केवला गङ्गाविषयकभक्तिभावानां लहर्यो गङ्गालहरीव गङ्गालहर्यां समुच्छ्वलिताः सन्ति । अतो गङ्गाविषयकभक्तिभावप्रधानम्, आत्मनिवेदनपर्यवसन्नमिदं काव्यं स्तवकाव्यमेव ।

यत्तु रामचन्द्रमिश्रमहोदयेनोक्तम्-"जगन्नाथस्यान्यान्यपि स्तोत्राणि कवित्वदृष्ट्या बहुमूल्यानि सन्त्यपि भक्तिभावनाविरहितानीवेति स्तोत्रसाहित्यगौरवमवर्द्धयित्वा स्फुटकाव्यसाहित्यस्यैव गौरवं समेधयितुं क्षमन्ते"[4] इति । तत्त्वसमीचीनम् । जगन्नाथस्य कवित्वमन्यत्र यथातथा स्यात् परन्तु गङ्गालहरीकाव्ये गङ्गाविषयकभक्तिभावस्यात्मनिवेदनस्य च प्रकर्षेण विद्यमानत्वादिदमुत्तमं स्तोत्रकाव्यमेव। यदि साहित्यिकगुणाधिक्ये स्तोत्रत्वविरहो मन्येत तदा मयूरकविविरचिते सूर्यशतके, शङ्कराचार्यविरचितेषु भावप्रधानेषु स्तोत्रेषु च स्तोत्रकाव्यत्वविरहः स्यात् । अस्मिन् काव्येऽभिव्यक्तस्याध्यात्मिकभावस्यात्मनिवेदनस्य च चर्चा भावानुसन्धानसन्दर्भे विधास्यते।

---

१ वाचस्पति गैरोला, संस्कृत साहित्यका इतिहास, चतुर्थ संस्करण, (वाराणसी : चौखम्बा विद्याभवन, १९९१ ई.) पृ.७६९।
२ पूर्ववत् ।
३ पूर्ववत् ।
४ रामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, (वाराणसी : चौखम्वा विद्याभवन, २००१ ई.), पृ.९५।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४. गङ्गालहर्या रचयिता

गङ्गालहरीस्तवकाव्यस्य रचयिता पण्डितराजजगन्नाथो वर्त्तते । 'रसगङ्गाधर' इति प्रथितस्य लक्षणग्रन्थस्य प्रणेताऽयं साहित्यधुरन्धरः सहृदयकविश्चासीत् । अस्य वैयक्तिकजीवनस्य काव्यप्रवृत्तीनाञ्च सङ्क्षिप्तचर्चा प्रासङ्गिकीति समुपस्थाप्यते ।

४.१ जगन्नाथस्य वैयक्तिकं जीवनम्

'राय' इत्युपाधियुतो[५] जगन्नाथस्तैलङ्गब्राह्मणवंशज आसीत् । अयं खीष्टाब्दसप्तदशशतकारम्भे लक्ष्मीपेरुभट्टयोरङ्कमलञ्चकारेति रसगङ्गाधरोक्तप्रसङ्गाज्ज्ञायते ।[६] पुत्रातिवाहिते शैशवे पिता पेरुभट्टस्तं मेधाविनं सुतं ब्राह्मणवर्णधर्मानुरूपां शिक्षामुपदिश्य शास्त्राध्ययने नियोजयामास । अथ चायं जगन्नाथो ज्ञानेन्द्रभिक्षोर्वेदान्तशास्त्रम्, महेन्द्रशास्त्रिणो न्यायवैशेषिकशास्त्रम्, खण्डदेवोपाध्यायान्मीमांसाशास्त्रम्, शेषवीरेश्वराद् व्याकरणशास्त्रञ्चाधिगत्य सर्वविद्याविशारदत्वमवाप ।[७] शाहजहाँनाम्नो मुगलसम्राजो विलासमये राजभवने तारुण्यं व्यतीयानोऽयं तदैव पण्डितराज इत्युपाधिमधिगतवान् । तत्र नवनीतकोमलाङ्ग्याः कस्याश्चिद् यवनकन्यायाः प्रेमसरसि आचूडं निमग्नोऽयं तां परिणीय जीवनस्याधिकभागं तया सह सुखेन व्यतीयाय । यवनीस्पर्शदोषादप्पय्यदीक्षितादिभिर्ब्राह्मणैर्ब्राह्मणसमाजाद् बहिष्कृतोऽपि अयं सारस्वतबलेन काशीस्थं ब्राह्मणसमाजं विनिर्जित्य पण्डितराज इत्युपाधिं फलवतीं चकार । चरमे वयसि काशीनगरीमाश्रित्य १६७४ तमे खीष्टाब्दे धरामिमां विरहपर्याकुलां चकार ।[८] अनेन पण्डितप्रवरेण जीवनकाले अमृतलहरी, सुधालहरी, करुणालहरी, लक्ष्मीलहरी, गङ्गालहरी इत्यादीनि स्तवकाव्यानि, यमुनावर्णनचम्पू, आसफविलासः, प्राणाभरणम्, जगदाभरणम् इत्याख्यानि काव्यानि, चित्रमीमांसाखण्डनम्, मनोरमाकुचमर्दनम् इत्यालोचनाग्रन्थौ, रसगङ्गाधरनामा प्रौढपाण्डित्यपूर्णः साहित्यलक्षणग्रन्थः, भामिनीविलासः इति कवितासङ्ग्रहश्चेति प्रथिता ग्रन्थाः प्रणीताः ।

४.२ काव्यप्रवृत्तयः

विपक्षमतं प्रत्यसहमत इति प्रथितोऽयं पण्डितराजजगन्नाथः सकलशास्त्रपारङ्गतो लक्षणशास्त्री, प्रतिभासम्पन्नः कविश्चासीत् । प्रखरवैदुष्यस्य कमनीयकाव्यकलायाश्च विलक्षणं सामञ्जस्यमस्मिन्नेकत्र समवाप्यते । अनेन युगचेतनानुरूपाः कविताः प्रणीताः । रसभावमयकवितानिबन्धनेऽस्य लेखनी सदा साफल्यशृङ्गमारुरोह । अस्य कवितासु अनुप्राससौन्दर्यं सर्वत्र विराजते । पदलालित्यम्, साङ्गीतिकमाधुर्यम्, प्रकृतिप्रेम, दार्शनिकी चेतना, कल्पनासौष्ठवम्, भावाभिव्यञ्जनप्रावीण्यञ्च सर्वत्र समुल्लसन्ति । क्वचित् क्वचिदोजोगुणगुम्फिता गौडीरीतिर्विलसत्यपि पण्डितराजरचनासु प्रायः प्रसादगुणस्य वैदर्भीरीतेश्च छटा प्रकामं चकास्ति । अस्य कवितासु अपुष्टार्थदूरान्वयादिदोषः क्वचिदपि नावशिष्टः । पाश्चात्त्य-समालोचनाशास्त्रानुसारेणैतदीयासु कवितासु स्वच्छन्दतावादपरिष्कारवादयोः सामञ्जस्यं समुपलभ्यते ।

स्वरचितासु कवितासु पूर्णविश्वस्तोऽयमात्मानं कस्तूरिकाजननक्षमं मृगमिव मन्वानो कविवृन्देषु मृगेन्द्र इव गर्जति स्म । रसगङ्गाधरनाम्नि प्रौढतमे काव्यशास्त्रीये ग्रन्थे निजनिर्मिता एव कविताः मुख्यनिदर्शनरूपेण प्रदत्ता इति समुद्घोषः प्राप्यते ।[९] स्वीयां विद्वत्तां समादरन्, कविताश्च परिरक्षन् पण्डितम्मन्यान् प्रति गर्वेण हुङ्करोति–

मधु द्राक्षा साक्षादमृतमथ वामाधरसुधा
कदाचित् केषाञ्चिन्न खलु विदधीरन्नपि मुदम् ।
ध्रुवं ते जीवन्तोऽप्यहह मृतका मन्दमतयो
न येषामानन्दं जनयति जगन्नाथभणितिः ।[१०]

अनया गर्वोक्त्या कवेरस्य कवितासामर्थ्यं, स्वीयां काव्यकलां प्रति गौरवबोधश्च प्रकाशितो भवति ।

---

५ जगन्नाथः, गङ्गालहरी, (मुम्वई : खेमराज श्रीकृष्णदास, २००७ ई.) पृ. ४७

६ पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ॥ जगन्नाथः, रसगङ्गाधरः १।३, मदनमोहन झा (व्याख्याकार), अष्टम संस्करण, (वाराणसी : चौखम्वा विद्याभवन, १९९३ ई.)।

७ श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्च
काणादीराक्षपादीरपिगहनगिरो यो महेन्द्रादवेदित् ।
देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं
शेषाङ्कप्राप्तशेषामलभणितिरभूत् सर्वविद्याधरो यः ॥ (रसगङ्गाधरः १।२)

८ रामचन्द्रमिश्रः, पूर्ववत्, पृ. ८८।

९ निर्माय नूतनमुदाहरणानुरूपं काव्यं मयात्र निहितं न परस्य किञ्चित् ।
किं सेव्यते सुमनसां मनसापि गन्धः कस्तूरिकाजननशक्तिभृता मृगेण । (रसगङ्गाधरः १।६)

१० जगन्नाथः, भामिनीविलासः ४।२९, अच्युतराय (व्याख्याकार), तृतीयावृत्तिः, (मुम्वयी : पाण्डुरङ्ग जावाजी, १९३३ ई.)।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५. गङ्गालहरीस्तवकाव्यस्य रचनासन्दर्भः

पण्डितराजजगन्नाथस्य विषये किंवदन्ती प्रसिद्धास्ति यत्, अयं शाहजहाँनृपते राजभवनमधिवसन् कस्याश्चिद् यवनकन्यायाः प्रेमसरसि निमग्नस्तां परिणिनाय । तात्कालिको वर्णाश्रमधर्मैकपक्षपाती समाजो यवनीसंसर्गदूषितं जगन्नाथं ब्राह्मणसमाजाद् बहिश्चकार । ऊर्जस्विनि वयसि परापवादं तिरस्कुर्वाणोऽप्ययं प्रौढे वयसि स्वकर्मणाऽनुततात । तदाऽयं प्रायश्चित्तं चिकीर्षुरपि अप्पय्यदीक्षितादिभिः साधितेर्ष्योऽनभ्युपेतार्थो बभूव ।[११] अन्ते च तदानीन्तनात् समाजान्निर्विण्णो गङ्गातटमुपेत्य कल्मषविध्वंसिनीं गङ्गा स्तुवन् तां प्रविश्य प्राणान् मुमोच ।

गङ्गालहर्या रचनासन्दर्भे प्रसिद्धिरस्ति यत्, पण्डितराजजगन्नाथोऽन्तिमसमये गङ्गातटमुपेत्य तां स्तोतुमारेभे । अस्य पाषाणनिष्यन्दिनीमात्मनिवेदनपूर्णां वन्दनां श्रुत्वा प्रतिपद्यमेकैकां सोपानपङ्क्तिमुद्गच्छन्ती करुणामयी गङ्गा द्विपञ्चाशत्तमपद्यरचनावसाने तत्सङ्ख्यसोपानपङ्क्तिमुपेत्य वात्सल्याकुला माता वत्सलं पुत्रमिव तत्र ध्यानमग्नं जगन्नाथं सहसा स्वाङ्के समयोजयत् ।[१२] परन्तु प्रसिद्धिरियं तथ्यपूर्णा नैव प्रतिभाति । डा. रेखाशुक्ला गङ्गालहरीं जगन्नाथस्याद्यां रचनां मनुते ।[१३] जगन्नाथेन शाहजहाँनृपतेः राजभवनगमनात्पूर्वमेव काव्यमिदं रचितमासीदिति तन्मतम् दृश्यते । अन्यच्च यदि किंवदन्ती सत्या स्यात् तदा रसगङ्गाधरे गङ्गालहर्या उल्लेखो न स्यात् । किन्तु रसगङ्गाधरे प्रबन्धस्य भावव्यञ्जकताया उदाहरणे समागतायां 'मन्निर्मिताश्च पञ्चलहर्यो भावस्य'[१४]इत्युक्तौ सङ्गृहीतासु पञ्चलहरीषु गङ्गालहर्यपि समापततीति तस्या रसगङ्गाधरपूर्ववर्तित्वमेव सिद्ध्यति । अतो रसगङ्गाधरस्य समाप्तिपूर्वमेव गङ्गालहर्या रचनाकालः सङ्गच्छते । एतत्ववश्यमस्ति यत्, गङ्गालहर्या रचनाकाले जगन्नाथो भौतिकजीवनान्निर्विण्ण आसीत् । गङ्गालहरीगतं पद्यमप्येतत् सूचयति-

पयः पीत्वा मातस्तव सपदि यातः सहचरै-
र्विमूढैः संरन्तुं क्वचिदपि न विश्रान्तिमगमम् ।
इदानीमुत्सङ्गे मृदुपवनसञ्चारशिशिरे
चिरादुन्निद्रं मां सदयहृदये शायय चिरम् ॥[१५]

एतत् पद्यगता 'चिरं शायय' इति पदावलिः कविः पुनरावृत्तिरहितां चिरनिद्रां कामयत इति ध्वन्यर्थं प्रकाशयति ।

एतावता गङ्गालहर्या रचनाकालः पण्डितराजकृतस्य रसगङ्गाधरनाम्नोऽपूर्णग्रन्थस्य समवर्ती, अस्य भौतिकजीवनस्यान्तिमसमय(१६७४ई.)स्य निकटवर्ती च सम्भाव्यते ।

६. साहित्यिकं वैशिष्ट्यम्

पदसंयोजनादिकलामञ्जुलस्य गङ्गालहरीस्तवकाव्यस्य भावपक्षः कलापक्षश्च वैशद्येन विवेचनीयौ वर्त्तेते, परन्तु सङ्क्षिप्तेऽस्मिँल्लेखे काश्चिदेव विशेषता दिङ्मात्रेणोपस्थाप्यन्ते ।

६.१ शीर्षकविधानम्

गङ्गायाः लहरीति गङ्गालहरी । हिमवतो निःसृत्य उत्तरभारतीयं भूभागमभिसिञ्चन्ती पूर्वीयं हिन्दमहासागरं परिचुम्बन्ती पूर्ववाहिनी नदी गङ्गापदबोध्या । तामेवाश्रित्य प्रणीतं काव्यमिदं कवेर्गङ्गाविषयकभावलहर्या वाङ्मयी रचना विद्यते । गङ्गालहर्या विषयत्वेनोपादानात् शीर्षकविषययोर्वाच्यवाचकभावसम्बन्धस्य प्रतीतौ सत्यामपि काव्यमयीष्वाध्यात्मिकभावलहरीष्वर्थस्य पर्यवसानात् विवक्षितान्यपरवाच्यस्य संलक्ष्यक्रमभेदे पदद्योत्यस्वतःसम्भविना वस्तुना उपमालङ्कारः शीर्षकगतपदेन व्यज्यत इति प्रतीकात्मकोऽयं शीर्षकः । अस्यैव काव्यस्य 'पीयूषलहरी' इत्यपरमपि नाम प्रयुक्तं दृश्यते । काव्यस्य फलस्तुतिवर्णने "इमां पीयूषलहरीम्"[१६] इति पदावलीः प्रयुक्तास्ति । काव्याभिव्यक्तां भावसुधामभिलक्ष्य पीयूषलहरीति नामान्तरं प्रदत्तमिव प्रतीयते परन्तु अस्य प्रचलितं नाम 'गङ्गालहरी' एव ।

६.२ छन्दोयोजना

भावानुकूला छन्दोयोजना काव्यकृतिमास्वादरमणीयां कुर्वन्ती काव्यस्य मूलभावमेवोल्लासयति । गङ्गालहरीकाव्य

---

११ रामचन्द्रमिश्रः, पूर्ववत्, पृ. ८८।
१२ मदनमोहन झा, "भूमिका" रसगङ्गाधरः, अष्टम संस्करण, (वाराणसी : चौखम्वा विद्याभवन, १९९३ ई.), पृ.३५।
१३ रेखा शुक्ला, "भूमिका" भामिनीविलासः, (वाराणसी : चौखम्वा संस्कृत सीरीज आफिस, २००६ ई.), पृ. २४।
१४ जगन्नाथः, रसगङ्गाधरः, पूर्ववत्, पृ. ४०४।
१५ गङ्गालहरी, श्लो.४६।
१६ गङ्गालहरी, पृ. ४७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आदितोऽष्टचत्वारिंशत्तमपद्यपर्यन्तं शिखरिणीवृत्तस्य प्रयोगो विद्यते । तदनन्तरमेकोनपञ्चाशत्तमं पद्यं पृथ्वीछन्दसि, पञ्चाशत्तमं पद्यं स्रग्धराच्छन्दसि, द्विपञ्चाशत्तमं पद्यमुपजातिछन्दसि, पार्यन्तिकं पद्यञ्चानुष्टुप्छन्दसि विरचितमस्ति । समग्रकाव्यस्य छन्दोयोजना काव्ये भक्तिभावानुकूलं गीतिप्रवाहमुत्पादयति । अस्य काव्यस्य छन्दोविधानं पुष्पदन्तविरचितं शिवमहिम्नःस्तोत्रं स्मारयति ।

६.३ भावविधानम्

उत्तुङ्गहिमगिरिगह्वरान्निर्गत्य उत्तरभारतीयभूभागमभिषिञ्चन्तीं पुण्यसलिलां गङ्गानदीं विषयीकृत्य विरचिता कृतिर्वर्त्तते गङ्गालहरी । भारतीयसमाजो नदीं देवीरूपां मत्वा सम्मानयति, स्तौति, पूजयति च । हिमगिरिप्रसूतत्वात् कैलासवासिनो भगवतः शङ्करस्य जटाजूटान्निःसरणत्वमस्याः मन्यते । श्रीमद्भागवतमहापुराणानुसारेण वामनावतारसमये ब्रह्मणा कृतं वामनस्य पादावनेजनं स्वर्गङ्गारूपे परिणतमासीत् ।[१७] सैव स्वर्गङ्गा भगीरथतपसा कैलासवासिनो भगवतः शङ्करस्य जटाजूटम्, ततश्च पृथिवीतलमुपेत्य लोकं पुनाना समुद्रमधिगच्छतीति पौराणिकी मान्यता वर्त्तते । पौराणिकीं मान्यतामिमां समर्थयद् गङ्गाविषयकभक्तिभावस्य प्रकाशनमस्मिन् काव्ये समवाप्यते । तत्सहकारित्वेन कृतस्य भावनिबन्धनस्य चर्चाप्यत्र प्रत्युपशीर्षकं विधीयते ।

६.३.१ गङ्गाया रूपत्रितयप्रकाशनम्

गङ्गालहरीस्तवकाव्ये गङ्गाया आध्यात्मिकाधिदैविकाधिभौतिकरूपत्रितयस्य महिमा प्रगीतोऽस्ति। अत्र गङ्गातत्त्वस्यावाङ्मनसगोचरता, परब्रह्मरूपता, नित्यता, प्रकाशमयता, योगैकगम्यता च प्रकाशिता । गङ्गाया आध्यात्मिकरूपप्रकाशकमिदं पद्यमुद्धरणीयमस्ति–

न यत् साक्षाद्वेदैरपि गलितभेदैरवसितं
न यस्मिन् जीवानां प्रसरति मनोवागवसरः ।
निराकारं नित्यं निजमहिमनिर्वासिततमो
विशुद्धं यत्तत्त्वं सुरतटिनि तत्त्वं न विषयः ॥[१८]

गङ्गाया आधिदैविकं रूपं लोकानुद्वेगकरं शुद्धं शान्तं च वर्त्तते । स्वरूपेण सा भगवती गङ्गा शरच्चन्द्रसमानश्वेतवर्णा, चन्द्रकलामुकुटधारिणी, चतुर्बाहुस्वरूपिणी, कुम्भपद्महस्ता, निर्मलश्वेतालङ्काराम्वरधरा, शुभ्रमकरासना चास्ति। भक्तजनमात्रगम्यमिदं स्वरूपं गङ्गालहर्यामित्थं वर्णितमस्ति–

शरच्चन्द्रश्वेतां शशिशकलशोभालमुकुटां
करैः कुम्भाम्भोजे वरभयनिराशौ च दधतीम् ।
सुधाधाराकाराभरणवसनां शुभ्रमकर-
स्थितां त्वां ये ध्यायन्त्युदयति न तेषां परिभवः ॥[१९]

चर्मचक्षुष्मतां लोकानाङ्कृते गङ्गाया भौतिकं रूपमपि मनोहारि वर्त्तते । पुण्यसलिलेयं गङ्गा पावनप्रवाहेण लोकान् पुनाति, सन्तापं शमयति, विश्रान्तिं प्रददाति च । गङ्गालहरीगतानि बहूनि पद्यानि गङ्गाया अस्यैव भौतिकरूपस्य महिमगाने पर्यवसितानि सन्ति । यथा–

मरुल्लीलालोलल्लहरिलुलिताम्भोजपटल-
स्खलत्पांशुव्रातच्छुरणविलसत्कौङ्कुमरुचि ।
सुरस्त्रीवक्षोजक्षरदगुरुजम्वालजटिलं
जलं ते जङ्घालं मम जननि जालं जरयतु ॥[२०]

६.३.२ गङ्गाया महिमगानम्

गङ्गालहर्यामाद्यन्तं गङ्गामहिमगानमेव काव्यरूपतामेति । अत्र गङ्गायास्त्रिविधतापोपशमनक्षमता, भवभयपरिहरणयोग्यता, महापापक्षयिष्णुता, लोकोपकारिता, भवव्याधिनिवारणौषधरूपता, अन्यतीर्थविशिष्टता, सर्वैश्वर्यशालिता, भगवत्पदमूलता, हर्षप्रदातृता, पवित्रता, दयालुता चेति गुणाः प्रतिपादिताः । गङ्गाजलस्य सौभाग्यशालिता, श्रुतिनिष्यन्दरूपता, अमृततुल्यता, अमङ्गलविनाशकता, जन्मजन्मार्जितदुरितक्षयिष्णुता, भवबन्धविमोचकता च कवितामाध्यमेन प्रकाशिता । एवं गङ्गाप्रवाहस्य सर्वैश्वर्यप्रदानक्षमता, दुःखनिवारकता, पापविनाशकता, अविद्याक्षयिष्णुता, परमरमणीयता, तापहारिता च वर्णिता । गङ्गाभक्तिरसाप्लावितेन चेतसा

---

१७ धातुः कमण्डलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेन्द्र !
स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ॥ (श्रीमद्भागवतमहापुराणम् ८।२१।४)

१८ गङ्गालहरी, श्लो. १०।

१९ गङ्गालहरी, श्लो. ४८।

२० गङ्गालहरी, श्लो. २०।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कविना गङ्गातरङ्गस्य दुरितभयभञ्जनशालिता, सन्तापहरणशीलता च वर्णिता । गङ्गास्पर्शं महनीयं मन्यमानेनानेन गङ्गातटस्य, गङ्गामृत्तिकायाः, तटरुहां महीरुहाञ्च महिमा गीतोऽस्ति । इत्थं गङ्गासान्निध्यं सकलसम्पन्निधानमिति स्वीकृत्य गङ्गाविषयिका निर्मलभक्तिधारात्र प्रवाहिता दृश्यते ।

६.३.३ पश्चात्तापबोधः

आजीवनं भौतिकसंसारपरिभ्रमणं केवलं सन्तापसाधनं पापकारणञ्चासीदिति कविहृद्‌गतपश्चात्तापबोधो गङ्गालहरीस्तवकाव्ये प्राप्यते । ऐश्वर्यकामनया, सुखलिप्सया, यशोभिलाषया च बहूनि दुष्कृतानि कृतानीति पश्चात्तापो जगतो मिथ्यात्वज्ञानञ्चात्रानेकेषु पद्येषु प्राप्यते । यथा–

श्ववृत्तिव्यासङ्गो नियतमथमिथ्याप्रलपनं
कुतर्केष्वभ्यासः सततपरपैशुन्यमननम् ।
अपि श्रावं श्रावं मम तु पुनरेवंविधगुणा-
नृते त्वत्को नाम क्षणमपि निरीक्षेत वदनम् ॥[२१]

एवंविधस्य पश्चात्तापबोधः काव्यस्य ३, १९, २६, २८, २९, ३७, ४६, ५० तमेष्वपि पद्येषु प्राप्यते ।

६.३.४ आत्मनिवेदनम्

स्तवकाव्येष्वाराध्यं प्रति स्तोतुरात्मनिवेदनं सर्वाधिकं महत्त्वं भजते । गङ्गालहर्यामपि कवेर्गङ्गाविषयिणी भक्तिरात्मनिवेदनरूपे पर्यवसितास्ति । कवेरात्मनोऽकिञ्चनभावो गङ्गायाः सर्वैश्वर्यशालिता चात्र प्रदर्शिता । आत्मानं शरणशून्यं शिशुम्, गङ्गाञ्च सर्वशक्तिमतीं मातरं मन्वानः कविः 'यथेच्छसि तथा कुरु' इत्याकारकं भावनिवेदनं प्रकाशयति-

अनाथः स्नेहार्द्रां विगलितगतिः पुण्यगतिदां
पतन्विश्वोद्धर्त्रीं गदविगलितः सिद्धभिषजम् ।
सुधासिन्धुं तृष्णाकुलितहृदयो मातरमयं
शिशुः सम्प्राप्तस्त्वामहमिह विदध्याः समुचितम् ।[२२]

एवंविधमात्मनिवेदनं काव्यव्यापि सदपि प्राधान्येन २४, ३०, ३१, ३६, ४१, ४३, ४४, ४७ सङ्ख्यात्मकेषु पद्येष्वात्मनिवेदनस्योत्कर्षः समवाप्यते ।

उपर्युक्तानुसारेण गङ्गालहरीस्तवकाव्ये कवेर्जगन्नाथस्य गङ्गाविषयिणी भक्तिः, आध्यात्मिकी भावना, गङ्गाविषयकमैकान्तिकमात्मनिवेदनम्, समर्पणभावश्च दृग्गोचरीभवति । प्रसङ्गानुरोधेनात्र निर्वेद- दैन्य- विबोध- औत्सुक्य-स्मृति-मति-हर्ष-विषाद-ग्लानि-चिन्ताप्रभृतीनां व्यभिचारिभावानां प्रकाशनमपि प्राप्यते । प्राधान्येन कविनिष्ठगङ्गाविषयकभक्ति(देवादिविषयकरति) भावस्य प्रकाशनाद् भाव-[२३]प्रधानमिदं काव्यम् ।

६.४ रीतिविधानम्

गङ्गालहरीगता काव्यवाणी वैदर्भीरीतिप्रधाना प्रसादमयी च दृश्यते, परन्तु वर्ण्यविषयस्य प्रकृत्यनुरूपरीतिप्रयोगेऽत्र कवेर्विलक्षणं नैपुण्यं दृश्यते । सोऽयं कविः गङ्गाया निर्मलसलिलवर्णने यादृशीं समासरहितां प्रसादमयीं पदसङ्घटनामवलम्बते, गङ्गाप्रवाहस्यौद्धत्यवर्णने पदरचनां तादृशीमेव समासबहुलामोजोगुणगुम्फिताञ्च विधत्ते । अधस्तनयोः पद्ययोः कवेरस्य रीतिविधानगतं वैशिष्ट्यं दृग्गोचरीभवति । यथा-

स्मृतं सद्यः स्वान्तं सुरचयति शान्तं सकृदपि
प्रगीतं यत्पापं झटिति भवतापं च हरति ।
इदं तद्‌गङ्गेति श्रवणरमणीयं खलु पदं
मम प्राणप्रान्ते वदनकमलान्तर्विलसतु ॥[२४]

अत्र गङ्गायाः स्वाभाविकरूपवर्णने माधुर्यगुणस्य वैदर्भीरीतेश्चावस्थितिर्यादृशी मनोहारिण्यस्ति तादृश्येवौजोगुणस्य गौडीरीतेश्च चेतोदीप्तिमती स्थितिर्दृश्यते-

प्रदोषान्तर्नृत्यत्पुरमथनलीलोद्धतजटा-

---

२१ गङ्गालहरी, श्लो. ३१।

२२ गङ्गालहरी, श्लो. २४।

२३ रतिर्देवादिविषया व्यभिचारी तथाञ्चितः । भावः प्रोक्तः । मम्मटः, काव्यप्रकाशः, सूत्र ४६, अष्टमं संस्करणम्, (पुणे : भाण्डारक प्राच्यविद्यासंशोधनमन्दिरम्, १९८३ ई.)।

२४ गङ्गालहरी, श्लो. ८।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न्तराभोगप्रेङ्खल्लहरिभुजसन्तानविधुतिः ।
विलक्रोडक्रीडज्जलडमरुडङ्कारसुभग-
स्तिरोधत्तां तापं त्रिदशतटिनीताण्डवविधिः ॥ [२५]

अत्र नृत्यावसरे नटेश्वरस्य भगवतः शङ्करस्य जटाजूटान्निर्गताया गङ्गायाः प्रवाहताण्डववर्णने ओजो गुणस्य गौडीरीतेश्च सङ्घटनं वर्ण्यवस्त्वनुरूपमौचित्यपूर्णञ्च विभाति । अतो गङ्गालहर्या रीतिविधानं वैदर्भीप्रधानं सदपि वर्ण्यविषयानुरोधेनात्र पाञ्चालीगौड्योः सन्तुलितप्रयोगोऽपि दृश्यत एव ।

६.५ अलङ्कारसौन्दर्यम्

गङ्गालहरीस्तवकाव्ये कलासौन्दर्यं सर्वत्र भावसौन्दर्यानुसारि विराजते । अलङ्कारचमत्कारं प्रति नानुधावन्तीमपि कविवाचं शब्दालङ्कारा अर्थालङ्काराश्च प्रतिपदं प्रतिपद्यञ्चानुधावन्तो दृश्यन्ते। सालङ्कारेष्वपि पद्येषु भावप्रवाहस्यानवरुद्धत्वात् पदरचनासौष्ठवस्य निष्कलङ्कचन्द्रायमानत्वाच्च शब्दार्थसाहित्यस्य विलक्षणा समन्वितिरत्र काव्येऽनुभूयते ।

६.५.१ शब्दालङ्कारसौन्दर्यम्

गङ्गालहर्याः शब्दसौष्ठवं साधु स्वादु चानुभूयते । अस्य काव्यस्य कोमलकान्तवर्णयुता पदावलिर्गङ्गाप्रवाहस्य स्निग्धतानुकूला विद्यते । खञ्जनविहारोपमं शब्दनर्तनं सहृदयपाठकहृदयं चमत्करोति । सूर्यशतक इव पाठकजनविस्मयकरमनुप्रासविधानमसदपि विषयोचितं स्वाभाविकञ्चानुप्राससौन्दर्यमाकाव्यं विराजते । अनुप्राससौन्दर्यमास्वादयन्तु सुधियः -

पुरो धावं धावं द्रविणमदिराघूर्णितदृशां
महीपानां नानातरुणतरखेदस्य नियतम् ।
ममैवायं मन्तुः स्वहितशतहन्तुर्जडधियो
वियोगस्ते मातर्यदिह करुणातः क्षणमपि ॥ [२६]

अत्र पूर्वार्द्धे 'द', 'न', 'त' वर्णानामनेकवारमावृत्त्या सम्पद्यमानो वृत्त्यनुप्रासः,[२७] उत्तरार्द्धे च 'मन्तु' 'हन्तु' इत्यत्र 'अन्तु' इत्यंशे नकारतकारयोरेकवारमावृत्त्या जायमानश्छेकानुप्रास-[२८]श्च श्लोकवाक्यमलङ्करोति । काव्ये वाहुल्येन प्रयुक्तेयं शब्दचमत्कृतिः प्रकृतरसानुकूला सती गङ्गालहर्याः शब्दशरीरं भृशमुपकरोति ।

६.५.२ अर्थालङ्कारसौन्दर्यम्

कविकल्पनाधीनार्थचमत्कृती रसभावाभिव्यञ्जकस्य शब्दार्थमयकाव्यवपुषः समुल्लासे साधनताङ्गच्छति । गङ्गालहर्यामपि कवेर्विलक्षणा कल्पनाशक्तिर्दृग्गोचरीभवति । अत्र प्रतिपद्यं रसानुकूलैरर्थालङ्कारैरुत्पादिता मनोहरा विच्छित्तिरनुभूयते । यथा–

स्मृतिं याता पुंसामकृतसुकृतानामपि च या
हरत्यन्तस्तन्द्रां तिमिरमिव चण्डांशुसरणि ।३। (उपमा)
इदं हि ब्रह्माण्डं सकलभुवनाभोगभवनं
तरङ्गैर्यस्यान्तर्लुठति परितस्तिन्दुकमिव ।२७ (उत्प्रेक्षा)
निधानं धर्माणां किमपि च विधानं नवमुदां
प्रधानं तीर्थानाममलपरिधानं त्रिजगतः ।
समाधानं बुद्धेरथ खलु तिरोधानमधियां
श्रियामाधानं नः परिहरतु तापं तव वपुः ॥१८॥ (मालारूपकम्)
प्रभाते स्नातीनां नृपतिरमणीनां कुचतटी-
गतो यावन्मातर्मिलति तव तोयैर्मृगमदः ।
मृगास्तावद्वैमानिकशतसहस्रैः परिवृता
विशन्ति स्वच्छन्दं विमलवपुषो नन्दनवनम् ॥७॥ (काव्यलिङ्गम्)
भवत्या हि व्रात्याधमपतितपाखण्डपरिषत्
परित्राणस्नेहः श्लथयितुमशक्यः खलु यथा ।

---

२५ गङ्गालहरी, श्लो. ३८।
२६ गङ्गालहरी, श्लो. १९।
२७ एकस्याप्यसकृत्परः (वृत्यनुप्रासः) । काव्यप्रकाशः, सूत्र १०७ ।
२८ सोऽनेकस्य सकृत्पूर्वः (छेकानुप्रासः) । काव्यप्रकाशः, सूत्र १०६।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ममाप्येवं प्रेमा दुरितनिवहेष्वम्ब जगति
स्वभावोऽयं सर्वैरपि खलु यतो दुष्परिहरः ॥३७॥ (अर्थान्तरन्यासः)
महादानैर्ध्यानैर्बहुविधवितानैरपि च यन्-
न लभ्यं घोराभिः सुविमलतपोराशिभिरपि ।
अचिन्त्यं तद्विष्णोः पदमखिलसाधारणतया
ददाना केनासि त्वमिह तुलनीया कथय नः ॥११॥ (दीपकानन्वययोः संसृष्टिः)

एवंविधान्यलङ्कारालङ्कृतानि बहूनि पद्यानि गङ्गालहर्या अलङ्कारश्रियं समेधयन्ति गङ्गाविषयकभक्तिभावाभिव्यञ्जने पर्यवस्यन्ति।

६.६ गीतिमाधुर्यम्

छन्दोमात्रेण रचनासु गीतिमाधुर्यं नोत्पद्यते । छन्दोऽनुगामिनी, पूर्वापरानुकूलक्रमागता, शब्दालङ्कारयुता च पदयोजना; भावानुरूपा रचनाकला च गीतिप्रवाहस्योत्पादने महत्त्वाधायिनी भवति। गङ्गाविषयकभक्तिभावाभिव्यञ्जकस्य गङ्गालहरीस्तवकाव्यस्य पद्यानि यथा अन्तःसौन्दर्यपूर्णानि सन्ति तथैव बाह्यसौन्दर्यसंवलितानि च विलसन्ति । विषये गङ्गाप्रवाहस्य, अभिव्यक्तौ भावप्रवाहस्य, रचनाविधाने गीतिप्रवाहस्य च त्रिवेणी रसिकपाठकानां चित्तं समाकर्षति । शिखरिणीवृत्तस्य विलम्बितारोहावरोहोऽत्र गीतिमाधुर्यमुत्पादयति । अनुप्रासालङ्कारस्य, वैदर्भीरीतेः, प्रसादगुणस्य च सन्निवेशचारुता यावत्काव्यं श्रवणरमणीयां काव्यश्रियं समेधयति । तेन च गीतिमाधुर्येणाभिभूतं सचेतसां चेतो निर्मलं गङ्गासलिलमिव गङ्गालहर्याः प्रवाहे तरङ्गितं भवति ।

६.७ कल्पनासौष्ठवम्

न हि वस्तुजगतश्चित्रवद् वर्णनमात्रेण कविरात्मपदं लभते, न वा तादृशं काव्यं सहृदयमनांसि समावर्जति । अतः काव्यसमृद्धये कविप्रौढोक्तिसिद्धकल्पनारमणीया वाणी अपेक्ष्यते। गङ्गालहर्यामेतादृशानि बहूनि पद्यानि सन्ति यानि गङ्गालहर्याः काव्यसम्पद्भाण्डागारे स्वर्णमुद्रायन्ते । तादृशस्य प्रौढकल्पनाविजृम्भितस्य पद्यस्यैकमुदाहरणमास्वादयन्तु काव्यरसिकाः-

प्रभाते स्नातीनां नृपतिरमणीनां कुचतटी-
गतो यावन्मातर्मिलति तव तोयैर्मृगमदः ।
मृगास्तावद्वैमानिकशतसहस्रैः परिवृता
विशन्ति स्वच्छन्दं विमलवपुषो नन्दनवनम् ॥[२९]

६.८ पौराणिकता

गङ्गालहर्यां पुराणकथागर्भिता बहवः सन्दर्भाः समागताः सन्ति । ते च काव्ये पौराणिकं बिम्बमुपस्थाप्य सहृदयचेतश्चमत्कुर्वन्तो गङ्गाविषयिणीं भक्तिं समेधयन्ति । तद्यथा-

स्खलन्ती स्वर्लोकादवनितलशोकापहृतये
जटाजूटग्रन्थौ यदसि विनिबद्धा पुरभिदा ।[३०]

एवञ्च

समुत्पत्तिः पद्मारमणपदपद्मामलनखान्
निवासः कन्दर्पप्रतिभटजटाजूटभवने ।[३१]

६.९ दार्शनिकता

गङ्गालहरीगतानि पद्यानि पाठकान् न केवलं भावगाम्भीर्य एव अपि तु विचारगाम्भीर्येऽपि निमज्जयन्ति । वेदोपनिषदादिभिरप्यलभ्यम्, अवाङ्मनसगोचरम्, निराकारम्, निर्गुणञ्च तत्त्वं गङ्गातत्त्वमिति वेदान्तशास्त्रीया विषया काव्येऽस्मिन् सरलया मधुरया च काव्यगिरास्वादयितुं शक्यन्ते । तथा हि-

न यत् साक्षाद्वेदैरपि गलितभेदैरवसितं
न यस्मिन् जीवानां प्रसरति मनोवागवसरः ।
निराकारं नित्यं निजमहिमनिर्वासिततमो

---

[२९] गङ्गालहरी, श्लो. ७।
[३०] गङ्गालहरी, श्लो. १४।
[३१] गङ्गालहरी, श्लो. २१।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विशुद्धं यत्तत्वं सुरतटिनि तत्त्वं न विषयः ॥[३२]

एतादृशं समाहितचित्तसाक्षात्करणीयं रमणीयं शास्त्रीयचिन्तनं गङ्गालहर्या अन्तःसारं संवर्द्धयति ।

७. पूर्ववर्तिरचनानां प्रभावः

गङ्गालहर्याः प्रणयनात्पूर्वमपि कविभिर्गङ्गाविषयकाणि स्तोत्राणि प्रणीतान्यासन् । वाल्मीकिरामयणस्थं गङ्गाष्टकम्, कालिदासकृतं गङ्गाष्टकम्, शङ्कराचार्यविरचितं गङ्गाष्टकम्, अनन्तानन्दसरस्वतीकृतं गङ्गाष्टकम्, कल्कीपुराणान्तर्गतो गङ्गास्तव इत्यादीनि स्तोत्राणि गङ्गालहरीपूर्ववर्तीनि प्रसिद्धानि स्तोत्राणि दृश्यन्ते । तेषु शङ्कराचार्यविरचितं गङ्गाष्टकं पदसौकुमार्यदृष्ट्या भावसौष्ठवदृष्ट्या चोत्तमकोटिकं काव्यत्वपदं भजते । पण्डितराजोऽपि गङ्गालहर्याः प्रणयनात्पूर्वमेभिः स्तुतिपद्यावलिभिः परिचित आसीत् । तत्तत्स्तुतिपद्यानां शैली भावनिबन्धनञ्च गङ्गालहर्याः स्वरूपनिर्माणे सामग्रीरूपेण समाकलितानि दृश्यन्ते ।

ध्वनिकारेण यदुक्तम्- "दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् । सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ॥"[३३]इति । सत्यमेतत् । गङ्गालहर्यां समुत्थापिता अप्यर्था उपर्युक्तासु स्तोत्ररचनासु समुत्थापिता आसन् । गङ्गायाः, गङ्गाजलस्य, गङ्गातरङ्गाणाम्, गङ्गातटस्य, गङ्गासैकतादीनां पावनता तेषां महत्ता चान्यास्वपि स्तुतिपद्यावलिषु वर्णितासीत्, तत्र गङ्गाविषयकभक्तिभावस्यैवाभिव्यक्तिरासीत्, परन्तु पण्डितराजस्य काव्यकौशलमवाप्य त एव विषयाः, त एव च भावाः पाठकहृदयावर्जकं नवीनं तारुण्यं प्राप्नुवन्तो दृश्यन्ते । यथा–

इदं तद् गङ्गेति श्रवणरमणीयं खलु पदं
मम प्राणप्रान्ते वदनकमलान्तर्विलसतु ॥ (गङ्गालहरी, ८)

अस्य पद्यस्य भावो रामायणस्य निम्नोद्धृतपद्ये प्राप्यते-

त्वत्तीरे वसतस्त्वदम्बु पिबतस्त्वद्वीचिषु प्रेङ्खत-
स्त्वन्नामस्मरतस्त्वदर्पितदृशः स्यान्मे शरीरव्ययः ॥ (वाल्मीकिकृतं गङ्गाष्टकम् १)

एवञ्च

सुरस्त्रीवक्षोजक्षरदगुरुजम्बालजटिलं
जलं ते जङ्घालं मम जननि जालं जरयतु ॥ (गङ्गालहरी, २०)

अत्र प्रदत्तं गङ्गाजलस्य वैशिष्ट्यं वाल्मीकिकृते गङ्गाष्टके, शङ्कराचार्यविरचिते गङ्गाष्टके चेत्थं प्रतिपादितमासीत्-

गन्धर्वामरसिद्धकिन्नरवधूस्तुङ्गस्तनास्फालितं
स्नानाय प्रतिवासरं भवतु मे गाङ्गं जलं निर्मलम् ॥ (वाल्मीकिकृतं गङ्गाष्टकम्)

स्नानैः सिद्धाङ्गनानां कुचयुगविगलत् कुङ्कुमासङ्गपिङ्गम् । (शङ्कराचार्यकृतं गङ्गाष्टकम् ३)

एवमेव

भवान्याः सापत्न्यस्फुरितनयनं कोमलरुचा
करेणोत्क्षिप्तास्ते जननि विजयन्तां लहरयः ॥ (गङ्गालहरी, ४०)

एतादृगेव काव्यबिम्बं कालिदासप्रणीते गङ्गाष्टक इत्थं निबद्धमासीत्-

त्रिलोकस्य भर्तुर्जटाजूटबन्धात् स्वसीमान्तभागे मनाक्प्राक् स्खलन्तः ।
भवान्या रुषा प्रौढसापत्न्यभावात् करेणाहतास्त्वत्तरङ्गा जयन्ति ॥ (कालिदासकृतं गङ्गाष्टकम् ५)

एतादृशं कल्पनासाम्यमनेकत्र प्राप्यत इति गङ्गालहर्याः कलापक्षो भावपक्षश्च तत्पूर्वरचितेभ्यः स्तोत्रपद्येभ्यो भृशमुपकृतो दृश्यते, परन्तु कविप्रतिभावैलक्ष्यण्येन गङ्गालहर्यां विलक्षणा नवीनतावश्यमस्ति । अस्याः कोमलता, श्रुतिरमणीयता, भावगभीरता, कल्पनाचातुर्यप्रभृतिविशेषता अन्येभ्यस्तोत्रकाव्येभ्यो गङ्गालहरीं पृथक्कृत्वा उत्तमकाव्यतां नयन्ति ।

८ उपसंहृतिः

काव्यकलानिपुणेन व्युत्पत्तिमता कविना जगन्नाथेन निर्मिता गङ्गालहरी भावप्रधानं स्तोत्रकाव्यमिति प्रतिपादितमस्ति । माता पुण्यसलिलाया गङ्गायाः सर्वैश्वर्यशालिता, सर्वोपास्यता, भुक्तिमुक्तिप्रदातृता, परमपवित्रता चात्र प्रकाशितोपलभ्यते । माता

---

३२ गङ्गालहरी, श्लो. १०।

३३ आनन्दवर्धनः, ध्वन्यालोकः ४।४, तृतीय संस्करण, पु.मु., (वाराणसी : ज्ञानमण्डल लिमिटेड, २०१० ई.) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धूलिधूसरमपि पुत्रं यथा सस्नेहं स्वाङ्के निदधाति, परिशोधयति च तम्, तथैव लोकपावनी गङ्गा भवभोगकलुषितं, मलीमसमपि शरणापन्नं भक्तं पुनाति, भवबन्धादुद्धरति चेति गङ्गां प्रति मातृभावोऽत्राभिव्यक्तः । गङ्गायाः, गङ्गाजलस्य, गङ्गाप्रवाहस्य, गङ्गातरङ्गाणाम्, गङ्गासान्निध्यस्य च महिमवर्णनरूपा कविवाणी कवेरात्मनिवेदनं प्रकाशयन्ती भावमयमुत्तमोत्तमकाव्यत्वपदं भजते। शैवमतस्य मूलप्रवाहेऽत्र शाक्तवैष्णवादिमतानामपि समादरो दृश्यते । प्राधान्येन सगुणभक्तिभावस्य प्रकाशनं सदपि भावप्रवाहे निर्गुणभक्तिभावस्यापि प्रकाशनं लभ्यत एव । सिन्धौ विन्दुरूपाणि जलानीव स्वल्पकायेऽस्मिन् काव्ये बहूनि सारगर्भितानि प्रकरणानि विलसन्ति । येषु वैदिक-स्मार्त-पौराणिक-दार्शनिकमतानां नैपुण्येन गुम्फनं समवाप्यते । साहित्यिकदृष्ट्या भावध्वनेः, नैकविधानां शब्दार्थालङ्काराणाम्, वर्ण्यविषयानुरूपाणां गुणानां, रीतीनाञ्च समुचितप्रयोगेणास्य काव्यसम्पन्नितरां चकास्ति। झटित्यर्थसमर्पणक्षमा ललितपदयोजना काव्यपाठकान् वारंवारं समावर्जति, अन्तर्वाचनाय प्रेरयति च । सुकुमारशब्दानां मनोहरं नर्तनमत्र सचेतसां पाठकानां चेतश्चमत्करोति । शिखरिणीवृत्तमनुप्रासमयपदयोजना चात्र गीतिमाधुर्यं भृशमुत्कर्षति । पूर्ववर्तिस्तोत्रेभ्यः सङ्गृहीतमपि विषयवस्तु कविप्रतिभयात्र नितान्तं नूतनायते । गङ्गाविषयकभक्तिभावस्य, काव्यकलायाश्च समुचितसन्निवेशेन मणिकाञ्चनयोगो गङ्गालहर्यां समवाप्यत इति जगन्नाथकृतस्य 'पीयूषलहरी' इत्यपरपर्यायस्य 'गङ्गालहरी'काव्यस्य गणना उत्तमोत्तमकाव्यपङ्क्तौ भवितुमर्हतीति गुणैकपक्षधरतैव ।

सन्दर्भग्रन्थाः

आनन्दवर्धनः, ध्वन्यालोकः, तृतीय संस्करण, पु.मु., वाराणसी : ज्ञानमण्डल लिमिटेड, २०१० ई. ।
गीताप्रेस (प्रका.), श्रीमद्भागवतमहापुराणम्, सातवाँ संस्करण, गोरखपुर : गीताप्रेस, वि.सं. २०४५।
गैरोला, वाचस्पति, संस्कृत साहित्य का इतिहास, चतुर्थ संस्करण, वाराणसी : चौखम्बा विद्याभवन, १९९१ ई.।
जगन्नाथः, गङ्गालहरी, मुम्बई : खेमराज श्रीकृष्णदास, २००७ ई.।
भामिनीविलासः, अच्युतराय (व्याख्याकार), तृतीयावृत्तिः, मुम्बयी : पाण्डुरङ्ग जावाजी, १९३३ ई.।
भामिनीविलासः, डा. रेखा शुक्ला (सम्पा.), वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, २००६ ई.।
रसगङ्गाधरः, मदनमोहन झा (व्याख्याकार), अष्टम संस्करण, वाराणसी : चौखम्बा विद्याभवन, १९९३ ई.।
मम्मटः, काव्यप्रकाशः, अष्टमं संस्करणम्, पुणे : भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, १९८३ ई.।
मिश्र, रामचन्द्र, संस्कृतसाहित्येतिहासः, वाराणसी : चौखम्बा विद्याभवन, २००१ ई.।
मिश्र, शिवदत्त (सम्पा.), बृहत् स्तोत्ररत्नाकरः, वाराणसी : ज्योतिष प्रकाशन, २००४ ई.।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ग्रह एवं नक्षत्रको उदयास्त तथा दिशा ज्ञान

- उपप्रा. अनोजकुमार खत्री
जनता विद्यापीठ

१. परिचय

पूर्वीय दर्शनको सर्वश्रेष्ठ धरोहर एवं संस्कृत वाङ्मयको ज्ञानविज्ञानको सङ्गमका रूपमा संसारभर मार्गदर्शकको रेखाचित्र कोर्न सफल अलौकिक एवं अपौरुषेय ग्रन्थको रूपामा स्वीकृत वेदको षडङ्गमध्येको प्रमुख अङ्ग चक्षुको रूपमा रहेको ज्यौतिष शास्त्रले खगोलका बारेमा खोज-अनुसन्धान गर्ने क्रममा ग्रहनक्षत्रहरूको उदय, अस्त एवं उदयास्त दिशाका सम्वन्धमा पनि प्रकाश पारेको छ ।

त्यसैअनुसार ग्रहनक्षत्रहरूको उदयास्त हुने गर्दछ र त्यही उदयास्तका आधारबाट ज्योतिषशास्त्रले हिन्दूधर्मावलम्वीहरूको सम्पादन गर्ने विविध कार्यहरूमा ग्राह्याग्राह्य शुभाशुभ समयको जानकारी गराउने काम समेत गर्दछ । त्यसैले शास्त्रमा विद्वान् भास्कराचार्य भन्दछन्

वेदास्तावद्यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।[1]
शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्यात् ॥
शव्दशास्त्रं मुखं ज्यौतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ ।
या तु शिक्षाऽस्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यौर्बुधैः ॥
वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येस्य तेनोच्यते ।
संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाऽङ्गेन हीनो न किञ्चित्करः ॥
तस्माद्द्विजैरध्ययनीयमेतत् पुण्यं रहस्यं परमं च तत्वम् ।
यो ज्यौतिषं वेत्ति नरः स सम्यग्धर्मार्थकामाँल्लभते यशश्च ॥

यहाँ ग्रह एवं नक्षत्रहरूको उदय र अस्त तथा उदय र अस्त दिशा ज्ञानसम्वन्धी केही चर्चा गर्ने प्रयास गरिएको छ ।

२. ग्रहउदयास्त

सबै ग्रहहरू आ-आफ्नो विमण्डलवृत्तमा हिडिरहेका हुन्छन् भने सूर्य क्रान्तिवृत्तमा हिँडिरहेको हुन्छ । यही हिड्ने क्रममा क्षितिजवृत्तभन्दा माथि ग्रह भएको अवस्थालाई ग्रह उदय भएको र क्षितिजभन्दा तल ग्रह भएको अवस्थालाई ग्रह अस्त भएको भनिन्छ । अर्थात् मनुष्यको दृष्टिपथमा ग्रह आउन वा हुनुलाई ग्रहोदय र दृष्टिपथमा ग्रह नआउनु वा नहुनुलाई ग्रहास्त भनेर बुझ्नपर्दछ ।

ग्रहको उदयास्तका सम्बन्धमा विद्वान् भास्काराचार्यले भन्दछन् –

प्राग्दृग्ग्रहः स्यादुदयाख्यलग्नमस्ताख्यकं पश्चिमदृग्ग्रह सः ।[2]
प्राग्दृग्ग्रहोऽल्पोऽत्र यदीष्टलग्नाद्गतो गमिष्यत्युदयं बहुश्चेत् ॥
ऊनोऽधिकः पश्चिमदृग्ग्रहश्चेदस्तं गतो यास्यति चेति वेद्यम् ।

अर्थात् ग्रहको उदयलग्नलाई प्राग्दृग्ग्रह र अस्तलग्नलाई पश्चिमदृग्ग्रह भनिन्छ । यदि प्राग्दृग्ग्रह लग्नभन्दा थोरै छ भने त्यस समयमा ग्रह उदय भैसकेको छ र प्राग्दृग्ग्रह लग्नभन्दा धेरै छ भने त्यस समयमा ग्रह उदय हुने वाला छ । त्यस्तै पश्चिमदृग्ग्रह इष्ट लग्नभन्दा थोरै छ भने ग्रहअस्त भैसकेको छ र पश्चिमदृग्ग्रह इष्टलग्नभन्दा धेरै छ भने ग्रह अस्त हुनेवाला छ भन्ने बुझ्नुपर्दछ । साथै अर्को कुरा यहाँ के पनि बुझ्नु जरुरी छ भने ग्रहोदय वा ग्रहास्तका समयमा शर पनि त्यही हुने गर्दछ । जब ग्रहमा शरको अभाव हुन्छ तब प्राग्दृग्ग्रह उदय हुँदा पनि ग्रहमा त्यस्तै पश्चिमदृग्ग्रह अस्त हुँदा पनि ग्रहमा नै शर हुन्छ । अर्थात् दुवै (ग्रह र शर) एउटै बिन्दुमा हुन्छन् ।

ग्रहको शर हुँदा पनि इष्टलग्नभन्दा दृग्ग्रह थोरै छ भने ग्रह क्षितिजभन्दा माथि उदय हुन्छ र अधिक छ भने ग्रह क्षितिजभन्दा तल हुने भएका कारण उदय हुनेवाला छ भन्ने बुझिन्छ । त्यसैगरी इष्टलग्नभन्दा ग्रहको अस्त लग्न थोरै हुँदा ग्रह पश्चिम क्षितिजको तल रहने भएकाले अस्त भैसकेको र इष्टलग्नभन्दा ग्रहको अस्त लग्न अधिक हुँदा ग्रह क्षितिजको माथि रहने भएकोले

१ भास्काराचार्य, सिद्धान्तशिरोमणिः, कालमानाध्याय ९-१२ श्लोक ।
२ भास्कराचार्य, सिद्धान्तशिरोमणिः, ग्रहोदयास्ताधिकार

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्त हुनेवाला छ भन्ने बुझ्नुपर्दछ। हामीहरूले यो पनि बुझ्नु पर्दछ की ग्रहको उदयास्त प्रवह वायु वेगमा आधारित छ। अर्थात् भूभ्रमणको कारण हुने उदयास्तलाई प्रतिदिन उदयास्त तथा कुनै इष्ट समयमा हुने उदयास्तलाई निरुक्त उदयास्त भनिन्छ। यदि कुनै ग्रहको गति सूर्यभन्दा थोरै छ भने त्यो ग्रह पूर्व दिशामा उदाउँछ र पश्चिम दिशामा अस्ताउछ। त्यस्तै प्रकारले कुनै ग्रहको गति सूर्यभन्दा धेरै छ भने त्यो ग्रह पश्चिम दिशामा उदाउँछ र पूर्व दिशामा अस्ताउँछ। अर्थात् मन्द गतिको ग्रह नजिक जब सूर्य हुन्छ तब त्यो ग्रह अदृश्य हुन्छ र त्यहाँबाट सूर्य शीघ्र गतिले मन्द गतिको ग्रहभन्दा अगाडि जाँदा मन्दगतिवाला ग्रह पछाडि हट्दछ। अतः यसप्रकार पछाडि रहेको मन्द गति ग्रह पूर्व दिशामा सूर्योदयभन्दा पहिले नै दृश्य (उदय) हुन्छ। यदि मन्दगति ग्रह सूर्यभन्दा अधिक अगाडि छ भने शीघ्रताको कारण सूर्य त्यो मन्दगतिको ग्रह नजिक जान्छ र सूर्यकिरणले त्यसलाई आच्छादित (ढाक्नु) गर्दछ र ग्रह पश्चिम दिशामा अस्त हुन्छ। यसैगरी अधिक गतिवाला ग्रह पश्चिम दिशामा उदित हुन्छन् र पूर्व दिशामा अस्त हुन्छन्। यसै सम्बन्धमा भास्कराचार्य भन्दछन् –

निरुक्तौ ग्रहस्येति नित्योदयास्ताविनासन्नभावेन यौ तौ च वक्ष्ये।[३]

रवेरुनभुक्तिर्ग्रहः प्रागुदेति प्रतीच्यामसावस्तमेत्यन्यथान्यः॥

त्यस्तै विशेष रूपमा बुधशुक्र मार्गी हुँदा र तिनीहरूको गति अधिक हुने हुँदा पश्चिम दिशामा उदाउँछन् र त्यही वक्री भएर त्यही नै अस्त हुन्छन्। त्यस्तै बक्री हुँदाहुँदै पूर्वमा उदाउँछन् र त्यही पूर्व दिशामा नै मार्गी भएर अधिक गति भएकाले पूर्वमा नै अस्ताउँछन्। जुन कुरा शास्त्रमा यसरी भनिएको छ –

ज्ञशुक्रावृजू प्रत्यगुद्गम्य वक्रां गतिं प्राप्य तत्रैव यातः प्रतिष्ठाम्।

ततः प्राक् समुद्गम्य वक्रावृजुत्वं समासाद्य तत्रैव चास्तं व्रजेताम्॥[४]

यही ग्रहोदयास्तका सम्बन्धमा भट्टाचार्यले महासिद्धान्तमा भन्दछन्। –

कुजजीवार्कजमुनयः शुक्रज्ञौ वक्रिणौ च सूर्याल्पाः।[५]

यान्ति प्राच्यामुदयं पश्चादस्तं ब्रजन्त्यधिकाः॥

मङ्गलबृहस्पति आदि ग्रहहरू बक्री छन् र यदि यिनीहरूको मान सूर्यभन्दा थोरै छ भने त्यस समयमा पूर्व दिशामा ग्रहहरूको उदय हुन्छ र यदि ती ग्रहहरूको मान सूर्यभन्दा धेरै छ भने तिनीहरू पश्चिम दिशामा अस्त हुन्छन्। मार्गी गति भएको अवस्थामा बुध, शुक्र र चन्द्रमाको मान यदि सूर्यभन्दा थोरै छ भने पूर्व दिशामा अस्त हुन्छन्। त्यस्तै तिनीहरूको मान सूर्यभन्दा धेरै छ भने पश्चिम दिशामा उदय हुन्छन्।

त्यस्तै नित्य उदयास्तका सम्बन्धमा भट्टाचार्य भन्दछन् –

दिनकरवशेन कथितावुदयास्तौ सांप्रतं प्रवक्ष्यामि।[६]

प्रतिदिनमनिलवशेन व्योमगकुम्भोद्भवोडूनाम्॥

अधिल्लो दिनको सूर्यको आधारमा सूर्य सान्निध्यका कारण ग्रहहरूको उदयास्त हुन्छ भनिएको छ। वास्तवमा भन्ने हो भने प्रवह वायुको आधारमा ग्रहनक्षत्रादि प्रत्येक दिन उदयास्त हुन्छन् त्यही कुरा यहाँ निरुक्त ग्रहको नित्योदयास्त भनेर बुझिन्छ। उदयास्तका सम्बन्धमा सूर्यसिद्धान्तमा भनिएको छ –

अथोदयास्तमययोः परिज्ञानं प्रकीर्त्यते।[७]

दिवाकरकराक्रान्तमूर्तीनामल्पतेजसाम्॥

अर्थात् आ-आफ्नो कक्षमा गतिशील भएर भ्रमण गर्ने चन्द्रादि ग्रह एव नक्षत्रहरू जब सूर्यको अत्यन्त नजिक हुन्छन् तब तिनीहरू सूर्यको तेज किरणका कारण देखिन छोड्दछन् यही अवस्थालाई नै अस्त भनिन्छ भने जब सूर्यबाट ती ग्रहहरू टाढा हुन्छन् र सूर्यको अल्प तेजका कारण देखिन्छन् यही अवस्थालाई उदय भएको भनिन्छ।

यहाँ स्मरणीय के छ भने कुनै पनि ग्रह उदय वा अस्त हुनुसंगको सम्बन्ध सूर्यसँग रहेको हुन्छ। अतः जुन ग्रह सूर्यको समीपमा हुन्छ त्यो ग्रह दृश्य (उदय) हुँदैन। अर्थात अस्त भएको भनी बुझ्नुपर्दछ। त्यस्तै जुन ग्रह सूर्यभन्दा दूरमा अवस्थित छ त्यो ग्रह दृश्य (उदय) हुन्छ। यो दृश्य, अदृश्य हुने अवस्था ग्रहहरूको विभिन्न कालांशमा भर पर्दछ र यो कालांश भनेको के हो भने कालात्मक अंश हो जुन छ अंशको एक घटी हुन्छ। सूर्यबाट अस्त भएर चन्द्रमा उदाउनलाई २ घटी समय लागदछ

३ भास्कराचार्य सिद्धान्त शिरोमणिः, गह उदयास्ताधिकार

४ भास्कराचार्य सिद्धान्त शिरोमणिः, गह उदयास्ताधिकार

५ आर्यभट्ट महासिद्धान्त उदयास्ताधिकार

६ आर्यभट्ट महासिद्धान्त ग्र.छा.अ.

७ भास्कराचार्य सू.सि.उ.अ.अ.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

र योभन्दा कम समयमा सूर्यको प्रभा (छाया) ले ढाकिएर अदृश्य (अस्त) हुन्छ। २ घटी = १२ अंश तुल्य हुन्छ अतः चन्द्रमाको कालांश १२ हुन्छ। यो अंशभन्दा अधिक अन्तरमा मात्रै चन्द्रमा दृष्टियोग्य हुन्छ। मंगलको १७ अंश = २।५० घटी तुल्य हुन्छ। यसैप्रकार अन्य ग्रहहरूको लागि भनिएको कालांश न्यूनाधिक उल्का विम्वको स्थूल सूक्ष्मता वश हुन्छ र बुध-शुक्रको विम्व वक्री गतिको एवं पृथ्वीवाट नजिक हुने भएकाले अधिक चमकदार तथा ठूलो देखिन्छ र तिनीहरूको कालांश २ अंश कम भनिएको छ। त्यस्तै तिनीहरू सूर्यबाट अधिक सानिध्यमा हुँदा मात्र अस्त हुन्छन्। यही कालांशका बारेमा भास्कराचार्य भन्दछन्।

दस्रेन्दवः १२ शैलभुवश्च १७ शक्राः १४ रुद्राः[८]
११ खचन्द्राः १० तिथयः १५ क्रमेण।
चन्द्रादितः काललवा निरुक्ता
ज्ञशुक्रयोर्वक्रगयोद्विहीनाः॥

ग्रहको उदयास्त जतिवेला थाहा पाउनुपर्ने छ त्यस समयमा ग्रहको पूर्व वा पश्चिम उदयास्तको अनुसार पूर्व अथवा पश्चिम दृग्ग्रहको तथा सूर्यको स्थिति त्यस दिनको उदयास्त भन्दा केही पहिले नै जान्नु पर्दछ। यदि ग्रह पूर्वमा उदित छ भने ग्रह साधन गरेर उदयलग्न साधन गर्नुपर्दछ, त्यस्तै यदि पश्चिममा ग्रह उदयास्त छ भने ग्रह साधन गरेर सूर्यमा ६ राशि जोडेर मात्र लग्न साधन गर्नुपर्दछ। जुन कुरा शास्त्रमा यसरी भनिएको छ –

यत्रोदयो वास्तमयोऽवगम्यस्तद्दिग्भवो दृक्खचरो रविश्च।[९]
अस्तोदयासन्नदिने कदाचित् साध्यस्तु पश्चात् तरणिः सषड्भः॥

यस प्रकार प्राप्त इष्ट कालांश यदि भनिएको कालांशभन्दा थोरै छ भने ग्रह उदय हुन बाँकी छ र यदि धेरै छ भने उदय भैसकेको छ भन्ने थाहा पाउनुपर्दछ। त्यस्तै अस्तको समयमा यसको विपरीत यदि इष्ट कालांश भनिएको कालांशभन्दा थोरै छ भने ग्रह अस्त भैसकेको छ र धेरै छ भने अब अस्त हुन्छ भन्ने बुझिन्छ। भनिएको कालांश तथा इष्ट कालांशको अन्तरलाई १८०० ले गुणा गरेर दृग्ग्रह राशिको स्वदेशीय उदयासुद्वारा भाग गरिएको फललाई ग्रह वक्री छ भने ग्रह तथा सूर्यको गत्यन्तरले पुनः भाग गर्ने वा मार्गी छ भने दुवै गतियोगले भाग गरेर प्राप्त हुने फल क्रमशः (वक्री ग्रह भएको अवस्थामा) ग्रह उदय भएपछिको दिन संख्या र (मार्गी ग्रह भएको अवस्थामा) ग्रह उदय हुने बाँकी दिनसंख्या हुन्छ।

यसप्रकारको दिनवाट जबसम्म वास्तविक काल थाहा पाउन सकिँदैन तबसम्म तात्कालिक दृग्ग्रह तथा सूर्यको साधन पटक पटक संस्कार गर्नुपर्दछ। अतः यसका सम्बन्धमा शास्त्रमा भनिएको छ -

उक्तेभ्य ऊनाभ्यधिका यदीष्टाः खेटोदयो गम्यगतस्तदा स्यात्॥[१०]
अतोऽन्यथा वास्तमयोऽवगम्यः प्रोक्तेष्टकालांशवियोगलिप्ताः।
खाभ्राष्ठभू १८०० घ्ना द्युचरोदयाप्ताः खेटार्कभुक्तयन्तरभाजिताश्च॥
वक्रे तु भुक्त्यैक्यहृता अवाप्तास्तदन्तराले दिवसा गतैष्याः।
तात्कालिकाभ्यां रविदृग्ग्रहाभ्यां मुहुः कृतास्ते स्फुटतां प्रयान्ति॥

